२८३. नामप्रमाणनामनिरूपणम्
२८४-९१. नक्षत्र-देवता-कुल-पाषण्ड-गण-जीविका-आभिप्रायिकेतिसप्तभेदैः सोदाहरणं स्थापनाप्रमाणनामनिरूपणम्
२९२. द्रव्यप्रमाणनामनिरूपणम्
२९३. भावप्रमाणनाम्नः सामासिक-ताद्धितिकेत्यादिचतुर्भेदनिरूपणम्
२९४-३०१. द्वन्द्व-बहुव्रीह्यादिसमासभेदैः सोदाहरणं सामासिकभावप्रमाणनामनिरूपणम्
३०२-१०. कर्म-शिल्प-श्लोक-संयोग-समीप-संयूथ-ऐश्वर्य-अपत्यभेदैः ताद्धितिकभावप्रमाणनामनिरूपणम्
३११. धातुजभावप्रमाणनामनिरूपणम्
३१२. नैरुक्तिकभावप्रमाणनामनिरूपणम्

**पञ्च परिशिष्टानि** १-६६
प्रथमं परिशिष्टम् - सूत्रपाठान्तरादि १-३०
द्वितीयं परिशिष्टम् - चूर्णिपाठान्तरादि ३१-३५
तृतीयं परिशिष्टम् - विवृतिपाठान्तरादि ३६-४८
चतुर्थं परिशिष्टम् - वृत्तिपाठान्तरादि ४९-६३
पञ्चमं परिशिष्टम् - जैनागमसम्पादनाय विचारिता नियमावलिः ६४-६६


Jain Education International For Private & Personal Use Only www.jainelibrary.org

॥ णमोऽत्थु णं समणस्स भगवओ महइमहावीरवद्धमाणसामिस्स ॥

॥णमोऽत्थु णं अणुओगधराणं थेराणं ॥

# अणुओगद्दाराइं ।

**[ प्रथमो विभागः ]**

**[१][ णमो अरिहंताणं**
**णमो सिद्धाणं**
**णमो आयरियाणं**
**णमो उवज्झायाणं**
**णमो लोए सव्वसाहूणं ।**
**एसो पंचनमुक्कारो सव्वपावप्पणासणो**
**मंगलाणं च सव्वेसिं पढमं हवइ मंगलं ॥ ]**

**[ सू०[२] १ ] नाणं पंचविहं पण्णत्तं । तंजहा — आभिणिबोहियणाणं १, सुयणाणं २, ओहिणाणं[१] ३, मणपज्जवणाणं ४, केवलणाणं ५ ।**

---

१. **णमो अरहंताणं** सं १,३ । अनुयोगद्वारसूत्रस्य हस्तलिखितादर्शेषु अयं नमस्कारमहामन्त्रः क्वचिदपि न दृश्यते । तथापि "भावमंगलाधिकारे पत्ते भणाति - **णमो अरिहंताणं (अरहंताणं** सं १,३) ति इच्चादि" इति **चूर्णि**गतपाठानुसारेण **चूर्णि**कृतां समक्षं 'णमो अरिहंताणं' इत्यादि, पाठान्तरानुसारेण 'णमो अरहंताणं' इत्यादि वा मङ्गलमासीदिति सम्भाव्य [ ]एतच्चिह्नान्तर्गतो नमस्कारमहामन्त्रपाठोऽत्रास्माभिरादावुपन्यस्तः । आगमोद्धारकाचार्यप्रवरश्री**सागरानन्दसूरिभिः** संशोध्य विक्रमसंवत् १९८४ मध्ये मुद्रयित्वा प्रकाशितायाम् **अनुयोगद्वारचूर्णौ** प्रारम्भे एवाऽयं नमस्कारमहामन्त्रपाठो मुद्रितो ऽस्तीत्यपि ज्ञेयम् ॥ **२. सू० = सूत्रम् ।** इदमत्र बोध्यम् - अनुयोगद्वारसूत्रस्य संशोधनं सम्पादनं च आगमप्रभाकरमुनिराजश्री **पुण्यविजयजी**महाभागैः 'पण्डित **दलसुखभाई** मालवणिया-पण्डित **अमृतलालभाई** मोहनलाल भोजक' इत्यनयोः सहकारेण विहितम् । एतच्च **श्रीमहावीर-जैनविद्यालयेन** विक्रमसंवत् २०२४ [वीरसं०२४९२,ई.स.१९६८] वर्षे **जैन-आगम-ग्रन्थमाला**यां ग्रन्थाङ्क १ रूपेण प्रकाशितम्। तदेवात्रास्माभिः सूत्ररूपेण स्वीकृतम् । तत्र च तैः विविधानादर्शादीनवलम्ब्य यानि पाठान्तराणि टिप्पणेषूपन्यस्तानि तानि सर्वाणि परिशिष्टरूपेणात्र यथावदेवास्माभिनिर्देक्ष्यन्ते, अतस्तज्जिज्ञासुभिः **प्रथमं** परिशिष्टमवलोकनीयम् ।

**श्रीमहावीरजैनविद्यालयेन** 'ग्रन्थाङ्क १' रूपेण प्रकाशिते ग्रन्थे यत्र सूत्रेषु हस्तलिखितादर्शानुसारेण २ इत्यादयः अङ्का लाघवार्थमुपन्यस्तास्तत्स्थानेऽस्माभिः सर्वत्र संपूर्णान्येव सूत्राणि मुद्रितानि सुगमत्वार्थम् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

# श्रीजिनदासगणिमहत्तरविरचिता अनुयोगद्वारचूर्णिः ।

ॐ नमो वीतरागाय ॥

**[ चू[१]० १ ]** कंचि पंचविहायारजाणगं तप्परूवणे य उज्जुत्तं तट्ठितं च गुरुं पणमिऊण जाति-कुल-रूव-विणयादिगुणसंपन्नो य सीसो भणाइ- भगवं ! तुब्भंतिए अणुयोगद्दारक्कमं समोतारं तदत्थं च णातुमिच्छामि । ततो गुरू तं सीसं विणयादिगुणसंपन्नं जाणिऊण तदरिहं च ततो भणाति - सुणेहि, कहेमि ते **अणुओगद्दारत्थं** तक्कमं च, जधा य सव्वज्झयणेसु समोयारिज्जंति । तं च कहेतुकामो गुरू विग्घोवसमणिमित्तं आदीए मंगलपरिग्गहं करेति । तं च मंगलं चतुव्विहं णामादि णिक्खिवितव्वं । तत्थ णाम-ट्ठवण-दव्वमंगलेसु विहिणा वक्खाणितेसु भावमंगलाहिकारे पत्ते भणाति - **णमो अरिहंताणं**[१] ति इच्चादि । अहवा मंगलं णंदी, सा वि चतुव्विधा णामादि । इहं पि णाम-ट्ठवण-दव्वनंदीवक्खाणे कते भावनंदीअवसरे पत्ते भणाति - **णाणं पंचविधं पण्णत्तं** इच्चादि सुत्तं । इमस्स सुत्तस्स जहा **नंदिचुण्णीए** वक्खाणं तहा इहं पि वक्खाणं दट्ठव्वं ।

---

१. **चू०= चूर्णिः** । इदमत्रावश्यमवधेयम् - **अनुयोगद्वारचूर्णेः** संशोधनं खं १, खं २, जे १, जे २, सं १, सं २, सं ३ इति तालपत्रोपरि लिखितानादर्शानवलम्ब्य विहितम् । **खं १ = खंभात**नगरे श्रीशान्तिनाथतालपत्रीयग्रन्थभाण्डागारे विद्यमान आदर्शः 'संवत् १३३३ वर्षे चैत्र शु० ११ बुधे **धवलक्कके**' लिखितः ग्रन्थाङ्कः ४०, पत्रसंख्या १-५३। **खं २** = तत्रैव ५८ तमे ग्रन्थाङ्के विद्यमान आदर्शः, पत्रसंख्या ५-९९, अत्र आद्यानि चत्वारि पत्राणि अर्धं च पञ्चमं पत्रं न सन्ति । **जे१ = जेसलमेर**नगरे जिनभद्रसूरिज्ञानभाण्डागारे ७८ तमे ग्रन्थाङ्के विद्यमान आदर्शः, पत्रसंख्या १-६९ । **जे २** = तत्रैव ४१० ग्रन्थाङ्के विद्यमान आदर्शः, पत्रसंख्या २२४-२७५ । **सं १ = पाटण**नगरे श्रीहेमचन्द्राचार्यजैनज्ञानमन्दिरे १६(३) डाभडामध्ये विद्यमानः संघवीपाडाभंडारसत्क आदर्शः, पत्रसंख्या १-१२८। **सं २** = तत्रैव ५८(४) डाभडामध्ये विद्यमानः संघवीपाडाभंडारसत्क आदर्शः, पत्रसंख्या १-१५८ । **सं ३** = तत्रैव संघभंडारसत्कः डाभडा नं. ७पोथी नं ७मध्ये विद्यमान आदर्शः, पत्रसंख्या ४४-८९ । आगमोद्धारकाचार्यश्रीसागरानन्द-सूरिभिः आचार्यभगवच्छ्री**जिनदासगणिमहत्तर**विरचिता **अनुयोगद्वारचूर्णिः** आचार्यप्रवरश्री**हरिभद्रसूरि**विरचिता विवृतिश्च संशोध्य **रतलाम ऋषभदेवजी केशरीमलजी श्वेताम्बरसंस्थ**या विक्रमसंवत् १९८४ मध्ये मुद्रयित्वा प्रकाशिता । कुत्रस्थान् हस्तलिखितादर्शानवलम्ब्य तैरेतद् ग्रन्थद्वयं संशोधितमिति तैः कुत्रापि न निवेदितम् । किन्तु तत्र परःसहस्रास्तादृशाः शुद्धा-ऽशुद्धाः पाठाः सन्ति येऽस्मत्संगृहीतेषु प्राचीनेषु अर्वाचीनेषु वा केषुचिदपि हस्तलिखितादर्शेषु नैवोपलभ्यन्ते । अतस्तदन्तर्गताः पाठभेदा अस्माभिः पाठान्तरत्वेनात्र नैव निर्दिष्टाः ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

## याकिनीमहत्तरासूनवाचार्यश्रीहरिभद्रसूरिविरचिता अनुयोगद्वारविवृतिः ।

नमोऽर्हते।

[ हा० १ ][१] प्रणिपत्य जिनवरेन्द्रं त्रिदशेन्द्रनरेन्द्र-पूजितं **वीरम्** ।
**अनुयोगद्वाराणां** प्रकटार्थां **विवृति**मभिधास्ये ॥१॥

प्रक्रान्तोऽयमर्हद्वचनानुयोगः, अयं च परमपदप्राप्तिहेतुत्वाच्छ्रेयोभूतो वर्तते, श्रेयांसि च बहुविघ्नानि भवन्ति, तथा चोक्तम् - [१]*श्रेयांसि बहुविघ्नानि भवन्ति* [ ] इत्यादिश्लोकः । अतोऽस्य प्रारम्भ एव विघ्नविनायकोपशान्तये मङ्गलाधिकारे **नन्दिः** प्रतिपादितः, साम्प्रत**मनुयोगद्वाराध्ययन**मारभ्यते । अथास्या**ऽनुयोगद्वाराध्ययनस्य** कोऽभिसम्बन्ध इति ?, उच्यते - इहार्हद्वचनानुयोगस्य प्रक्रान्तत्वात् तस्य चानुयोगद्वारमन्तरेण प्रतिपादयितुमशक्यत्वादनुयोगद्वाराणां च साकल्यतोऽपि प्रायः प्रत्यध्ययनमुपयोगित्वाद् **नन्द्यध्ययन**व्याख्यानसमनन्तरमेवा**ऽनुयोगद्वाराध्ययना**वकाश इत्ययमभिसम्बन्धः, तत्रानेन सम्बन्धेनाऽऽयातमिद**मनुयोगद्वारा**ध्ययनम्, अस्य चाध्ययनान्तरत्वात् साकल्यतोऽपि प्रायः सकलाध्ययनव्यापकत्वान्महार्थत्वाच्चाऽऽदावेव मङ्गलशब्दाभिधानपूर्वकमुपन्यासमुपदर्शयता ग्रन्थकारेणेदमभ्यधायि - **णाणं पंचविहं पण्णत्त**मित्यादि । अत्राह - इह मङ्गलाधिकारे नन्दिः प्रतिपादित एव, ततश्चानर्थक[२] एव अस्य सूत्रस्योपन्यास इति, अत्रोच्यते-नैतदेवम्, अस्याऽऽक्षेपस्य '[अस्य] चाध्ययनान्तरत्वात्' इत्यादिनैवानवकाशत्वात्, अनियमप्रदर्शनार्थत्वाच्च, तथाहि— नायं नियमो **नन्द्यध्ययना**नुयोगमन्तरेणाऽस्यानुयोगो न कर्तव्य इति, यदा च क्रियते तदा सार्थक एव इति, यथोक्तोपन्यासस्तु प्रायोवृत्त्यपेक्षयाऽनवद्य एव ।

[३]***अन्ये तु व्याचक्षते*** - कञ्चिदार्यदेश-जाति-षट्त्रिंशद्गुणालंकृतः कश्चिद् विनेयः सविनयमुक्तवान् - भगवन् ! **अनुयोगद्वार**प्ररूपणया मे क्रियतामनुग्रहः । ततस्तमसावाचार्यो योग्यमधिगम्य अव्यवच्छित्तये**ऽनुयोगद्वार**प्ररूपणायां प्रवर्तमानो विघ्नविनायकोपशान्तये भावमङ्गलाधिकारे इदमुपन्यस्तवान्-**णाण**मित्यादि, अस्य च सूत्रस्य समुदायार्थोऽवयवार्थश्च **नन्द्यध्ययनटीका**यां प्रपञ्चतः प्रतिपादित एवेति नेह प्रतिपाद्यत इति ।

---

१.हा० = **हारिभद्री वृत्तिः** । अत्रेदमवधेयम् - आचार्यश्री **हरिभद्र**सूरिविरचिताया अनुयोगद्वारसूत्रविवृतेः संशोधनं जे १, जे २, पा०इति आदर्शत्रयमवलम्ब्य विहितम् । **जे १ = जेसलमेर**मध्ये ७९ ग्रन्थाङ्के विद्यमानस्तालपत्रोपरि लिखित आदर्शः, पत्रसंख्या ६७-१६३ । **जे २** = तत्रैव डाभडा नं० ४ मध्ये ५२ ग्रन्थाङ्के विद्यमानः कागदपत्रोपरि लिखित आदर्शः । पत्रसंख्या १-३० । **पा० = पाटण**मध्ये श्रीहेमचन्द्राचार्यजैनज्ञानमन्दिरे डा० १७१ मध्ये ६७२६ ग्रन्थाङ्के विद्यमानः कागदपत्रोपरि लिखित आदर्शः । पत्रसंख्या १-५३ ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

## आचार्यप्रवर मलधारिश्री हेमचन्द्रसूरिविरचिता वृत्तिः ।

ऐँ नमः । श्रीवीतरागाय नमः ॥

**[ हे०[१] १]** सम्यक्सुरेन्द्रकृतसंस्तुतिपादपद्ममुद्दामकामकरिराजकठोरसिंहम् ।
सद्धर्म्मदेशकवरं वरदं नतोऽस्मि **वीरं** विशुद्धतरबोधनिधिं सुधीरम् ॥१॥

अनुयोगभृतां पादान् वन्दे श्री**गौतमा**दिसूरीणाम् ।
निष्कारणबन्धूनां विशेषतो धर्म्मदातॄणाम् ॥२॥

यस्याः प्रसादमतुलं संप्राप्य भवन्ति भव्यजननिवहाः ।
अनुयोगवेदिनस्तां प्रयतः **श्रुतदेवतां** वन्दे ॥३॥

इहातिगम्भीरमहानीरधिमध्यनिपतितानर्घ्यरत्नमिवातिदुर्लभं संप्राप्य मानुषं जन्म, ततोऽपि लब्ध्वा त्रिभुवनैकहितश्रीमज्जिनप्रणीतबोधिलाभम्, समासाद्य विरत्यनुगुणं परिणामम्, प्रतिपद्य चरणधर्म्मम्, अधीत्य विधिवत् सूत्रम्, समधिगम्य तत्परमार्थम्, विज्ञाय स्व-परसमयरहस्यम्, तथाविधकर्म्मक्षयोपशमसंभविनीं चावाप्य विशदप्रज्ञां जिनवचनानुयोगकरणे यतितव्यम्, तस्यैव सकलमनोऽभिलषितार्थसार्थसंसाधकत्वेन यथोक्तसमग्रसामग्रीफलत्वात् । स चानुयोगो यद्यप्यनेकग्रन्थविषयः संभवति तथापि

---

**१. हे० = हेमचंद्रसूरि**विरचिता **वृत्तिः** । अत्रेदं ज्ञेयम् - मलधार्याचार्यश्री**हेमचन्द्र**सूरिविरचितेयं वृत्तिः तालपत्रोपरि लिखितान् पञ्च एकं च कागजपत्रोपरि लिखितमादर्शमवलम्ब्यास्माभिः संशोधिता सम्पादिता च । तेषां स्वरूपमिदम् - **खं** = खंभातनगरे श्री शान्तिनाथतालपत्रीयग्रन्थभाण्डागारे ३९ ग्रन्थाङ्के विद्यमान आदर्शः । पत्राणि ५७ A - २३७ B । संवत् १३०१ वर्षे आषाढशुदि १० शुक्रे लिखितेयं प्रतिः । **जे१** = जेसलमेरनगरे श्रीजिनभद्रसूरिज्ञानभाण्डागारे ८० ग्रन्थाङ्के विद्यमान आदर्शः, पत्राणि १-१८१ । **जे २** = जेसलमेरनगरे तत्रैव ८१ ग्रन्थाङ्के विद्यमान आदर्शः, पत्राणि १-१९४ । **पा १ = पाटण**नगरे [अणहिलपुरपत्तने] **सं**घवीपाडाभण्डारमध्ये [डाबडो नं. ३२] विद्यमान आदर्शः । पत्राणि ४४-२२३ । ''संवत् १४८० वर्षे कार्तिवदि १२ रवौ महं भीमासुत हरिदासेन लिखितम्'' इति एतदन्ते लिखितम् । **पा२ = पाटण**नगरे [अणहिलपुरपत्तने] **सं**घभण्डारमध्ये श्री**हेमचन्द्राचार्यज्ञानमन्दिरे** [डाबडो नं० ७ पोथी नं० ७] विद्यमान आदर्शः । पत्राणि ९० - ४३० । अस्मिन् ग्रन्थे १-४४ पत्रेषु सूत्राणि । ४४ - ८९ पत्रेषु **अनुयोगद्वारचूर्णिः** । ततः परम् ९० - ४३० पत्रेषु मलधारिश्री **हेमचन्द्र**सूरिविरचिता वृत्तिः । अस्या अनुयोगद्वारचूर्णेरन्ते '' सं० १४५६ वर्षे श्री**स्तम्भ**तीर्थे बृहत्पौषधशालायां भट्टारिक श्री**जयतिलकसूरि**रनुयोगद्वारचूर्णिउद्धार कारापति' ' इति लिखितमस्ति । एते चत्वारस्तालपत्रोपरि लिखिता ग्रन्थाः । **मां० = कच्छ**देशे **मां**डवीनगरे कागजपत्रोपरि लिखितः खरतरगच्छजैनसंघज्ञानभण्डारे [पोथी नं. ४७, ग्रन्थाङ्क २६७] विद्यमान आदर्शः । २१ - १०७ पत्राणि । ''संवत् १४५२ वर्षे आषाढशुदि ९ गुरौ'' लिखितेयं प्रतिः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

प्रतिशास्त्रं प्रत्यध्ययनं प्रत्युद्देशकं प्रतिवाक्यं प्रतिपदं चोपकारित्वात् प्रथमम**नुयोगद्वाराणा**-मेव विधेयः । जिनवचने **ह्याचारा**दि श्रुतं प्रायः सर्वमप्युपक्रम-निक्षेपा-ऽनुगम-नयद्वारैर्विचार्यते, प्रस्तुतशास्त्रे च तान्येवोपक्रमादिद्वाराण्यभिधास्यन्ते, अतोऽस्यानुयोगकरणे वस्तुतो जिनवचनस्य सर्वस्याप्यसौ कृतो भवतीत्यतिशयोपकारित्वात् प्रकृतशास्त्रस्यैव प्रथममनुयोगो विधेयः । स च यद्यपि **चूर्णि-टीका**द्वारेण वृद्धैरपि विहितः तथापि तद्वचसामतिगम्भीरत्वेन दुरधिगमत्वाद् मन्दमतिनाऽपि मयाऽसाधारणश्रुतभक्तिजनितौ-त्सुक्यभावतोऽविचारितस्वशक्तित्वादल्पधियामनुग्रहार्थत्वाच्च कर्तुमारभ्यते ।

अस्य च शास्त्रस्य परमपदप्राप्तिहेतुत्वेन श्रेयोरूपत्वात् संभाव्यमानविघ्नत्वात् तदुपशमार्थं शिष्टसमयपरिपालनार्थं चादौ मङ्गलरूपं सूत्रमाह - **नाणं पंचविह**मित्यादि । व्याख्या - ज्ञातिर्ज्ञानम्, *कृत्यल्युटो बहुलम् [पा० ३।३।११३]* इति वचनाद् भावसाधनः, ज्ञायते परिच्छिद्यते वस्त्वनेनास्मादस्मिन्निति वा ज्ञानम्, जानाति स्वविषयं परिच्छिनत्तीति वा ज्ञानं ज्ञानावरणकर्म्मक्षयोपशम-क्षयजन्यो जीवस्वतत्त्वभूतो बोध इत्यर्थः । **पंचविहं** ति पञ्चेति सङ्ख्यावचनः, विधानानि **विधाः** भेदाः, पञ्च विधा अस्येति **पञ्चविधं** पञ्चप्रकारमित्यर्थः, **पण्णत्तं** ति प्रज्ञप्तम्, अर्थतस्तीर्थकरैः सूत्रतो गणधरैः प्ररूपितमित्यर्थः, अनेन सूत्रकृता आत्मनः स्वमनीषिका परिहृता भवति, अथवा प्राज्ञात् तीर्थकरादाप्तं प्राप्तं गणधरैरिति **प्राज्ञाप्तम्**, अथवा प्राज्ञैः गणधरैस्तीर्थकरादात्तं गृहीतमिति **प्राज्ञात्तम्**, प्रज्ञया वा भव्यजन्तुभिराप्तं प्राप्तं **प्रज्ञाप्तम्**, न हि प्रज्ञाविकलैरिदमवाप्यत इति प्रतीतमेव, ह्रस्वत्वं तु सर्वत्र प्राकृतत्वादित्यवयवार्थः । अक्षरयोजना त्वेवम्-**ज्ञानं** परमगुरुभिः **प्रज्ञप्त**मिति सम्बन्धः । कतिविधम् ? इति, अत्रोच्यते-**पञ्चविध**मिति ।

तस्यैव पञ्चविधत्वस्योपदर्शनार्थमाह- **तंजहे**त्यादि, **तद्यथे**त्युपन्यासार्थः, **आभिनिबोधिकज्ञानं श्रुतज्ञानम् अवधिज्ञानं मनःपर्यायज्ञानं केवलज्ञानं** चेति । तत्र **अभी**त्याभिमुख्ये, **नी**ति नैयत्ये, ततश्चाभिमुखो वस्तुयोग्यदेशावस्थानापेक्षी नियत इन्द्रियाण्याश्रित्य स्वस्वविषयापेक्षी बोधः अभिनिबोध इति भावसाधनः, स्वार्थिकतद्धितोत्पादात् स एवाभिनिबोधिकम्, अभिनिबुध्यते आत्मना स इत्यभिनिबोध इति कर्म्मसाधनो वा, अभिनिबुध्यते वस्त्वसावित्यभिनिबोध इति कर्तृसाधनो वा, स

Jain Education International For Private & Personal Use Only www.jainelibrary.org

एवाभिनिबोधिकमिति तथैव, आभिनिबोधिकं च तद् ज्ञानं चाभिनिबोधिकज्ञानम्, इन्द्रियपञ्चक-मनोनिमित्तो बोध इत्यर्थः । श्रवणं श्रुतम् अभिलापप्लावितार्थग्रहणस्वरूप उपलब्धिविशेषः, श्रुतं च तद् ज्ञानं च श्रुतज्ञानम्, अथवा श्रूयत इति श्रुतं शब्दः, स चासौ कारणे कार्योपचाराद् ज्ञानं च श्रुतज्ञानम्, शब्दो हि श्रोतुः साभिलापज्ञानस्य कारणं भवतीति सोऽपि श्रुतज्ञानमुच्यते। अवधानमवधिः इन्द्रियाद्यनपेक्षमात्मनः साक्षादर्थग्रहणम्, अवधिरेव ज्ञानमवधिज्ञानम् । अथवा अवधिः मर्यादा, तेनावधिना रूपिद्रव्यमर्यादात्मकेन ज्ञानमवधिज्ञानम्। संज्ञिभिर्जीवैः काययोगेन मनोवर्गणाभ्यो गृहीतानि मनोयोगेन मनस्त्वेन परिणमितानि द्रव्याणि मनांसीत्युच्यन्ते, तेषां मनसां पर्यायाः चिन्तनानुगुणाः परिणामाः, तेषु ज्ञानं मनःपर्यायज्ञानम्, अथवा यथोक्तस्वरूपाणि मनांसि पर्येति अवगच्छतीति मनःपर्यायमिति *कर्म्मण्यण् [ पा० ३/२/१ ]*, तच्च तद् ज्ञानं च मनःपर्यायज्ञानम् । **केवलं** संपूर्णज्ञेयविषयत्वात् संपूर्णम्, तच्च तद् ज्ञानं च केवलज्ञानमिति । अवग्रहादिभेदचिन्ता त्वेषां ज्ञानानामत्र न क्रियते, सूत्रेऽनुक्तत्वेनाप्रस्तुतत्वात् **नन्द्या**दिषु विस्तरेणोक्तत्वाच्चेति। अनेन च शास्त्रस्यादावेव ज्ञानपञ्चकोत्कीर्त्तनेन मङ्गलं कृतं भवति, सकलक्लेशविच्छेद-हेतुत्वेन ज्ञानस्य परममङ्गलत्वात् ।

अभिधेयं तु गुणनिष्पन्नानुयोगद्वारलक्षणशास्त्रनाम्न एव सकाशात् प्रतीयते, उपक्रमाद्यनुयोगद्वाराणामेवेहाभिधास्यमानत्वात् । प्रयोजनं तु प्रकरणकर्तृ-श्रोत्रोः प्रत्येकमनन्तर-परम्परभेदाच्चिन्तनीयम्, तत्र प्रकरणकर्तुरनन्तरं सत्त्वानुग्रहः प्रयोजनम्, श्रोतुश्च प्रकरणार्थपरिज्ञानम्, परम्परं तु द्वयोरपि परमपदप्राप्तिः, इदं तु यद्यपीह साक्षान्नोक्तं तथापि सामर्थ्यादवसीयते, तथाहि - सत्त्वानुग्रहप्रवृत्ता एव परमगुरव इदमुपदिशन्ति, तदनुग्रहे च क्रमेण परमपदप्राप्तिः प्रतीतैव, श्रोताऽपि गुरुभ्यः प्रस्तुतप्रकरणार्थं विजानाति, तत्परिज्ञाने च सकलजिनवचनानुयोगकरणे कुशलतामासादयति, तत्कुशलतायां च विप्रहाय हेयान्, उपादाय उपादेयान्, संप्राप्य प्रकर्षवच्चरणकरणम्, कृत्वाऽतिदुष्करतपश्चरणम्, अनुभूय विशदकेवलालोकतः सकलत्रिलोकीतलसाक्षात्करणम्, प्रविश्य सकलकर्म्मविच्छेदकर्तृ शैलेशीकरणम्, सकलमुक्तजनशरणं परमपदमधिगच्छतीति । सम्बन्धोऽप्युपायोपेयलक्षणो गम्यत एव - वचनरूपापन्नं हि शास्त्रमिदमुपायस्तदर्थस्तूपेय

Jain Education International For Private & Personal Use Only www.jainelibrary.org

इति। एवं च समस्तशास्त्रकाराणां समय: परिपालितो भवति, उक्तं च तै:-

*संबंध-ऽभिधेय-पओयणाइं तह मंगलं च सत्थम्मि।*
*सीसपवित्तिनिमित्तं निव्विग्घत्थं च चिंतेज्जा ॥१॥* [ ]

इत्यलं विस्तरेण।

**[ सू० २ ] तत्थ चत्तारि णाणाइं ठप्पाइं ठवणिज्जाइं, णो उद्दिस्संति[१] णो समुद्दिस्संति णो अणुण्णविज्जंति[२], सुयणाणस्स उद्देसो समुद्देसो अणुण्णा अणुओगो य[३] पवत्तइ।**

[ चू० २ ] **तत्थ त्ति** णाणपंचके। तम्मज्झयो य **चत्तारि णाणाइं** ति सुतवज्जाइं, ताइं **ठप्पाइं** ति असंववहारियाइं ति वुत्तं भवति। जम्हा य ताइं असंववहारियाइं तम्हा ताइं **ठवणिज्जाइं** ति चिट्ठंतु, ण तेसिं इह उद्देस-समुद्देसादिकिरियाओ कज्जंति त्ति वुत्तं भवति। अथवा ताइं अप्पप्पणो सरूववन्नणेण **ठप्पाइं,** एवंविधस्वरूपाणीत्यर्थ:, ताइं च गुरुअणधीणत्तणतो इध अणुयोगद्दारदरिसणक्कमे य अणहिकारत्तणतो[१] उद्देसणादिकिरियासु य **ठवणिज्जाइं** ति भणिताइं। अहवा **ठप्पाइं ठवणिज्जाइं** ति एते दो वि एगट्ठिता पदा। इदाणिं इह सुतणाणस्स अधिकारत्तणतो[२] सुतणाणं भन्नति, तं च पदीवो व्व आतपरप्पगासगं पराधीणं च, तस्स[३] पराधीणत्तणतो उद्देसणादिकिरितायो[४] पवत्तंति। ता[५] य कहं ? उच्यते-

**आयारादिअंगस्स उत्तरज्झयणा**दिकालियसुतखंधस्स य **उ(ओ)ववादिया**दि-उक्कालियउवंगज्झयणस्स य इमा उद्देसणविधी - पुव्वं सज्झायं पट्ठवेत्ता ततो सुतग्गाही विण्णत्तिं करेति-इच्छक्कारेण अमुकं मे सुतं उद्दिसह। गुरू 'इच्छामो' त्ति भणति। ततो सुतग्गाही वंदणं देति पढमं १। ततो गुरू उट्ठेत्ता चेतिते वंदति, ततो वंदिय पच्चुट्ठितो सुतग्गाहिं वामपासे ट्ठवेत्ता जोगुक्खेवुस्सग्गं पणुवीसुस्सासकालियं करेति, उस्सारितकड्ढितचतुव्वीसत्थतो तहट्ठितो चेव पंचणमोक्कारं तयो वारे उच्चारेत्ता **णाणं पंचविहं पण्णत्तं** इच्चादिं उद्देसणंदिं कड्ढति, तस्संते भणाति - 'इमं पट्ठवणं पडुच्च इमस्स साधुस्स इमं अंगं सुतखंधं अज्झयणं वा उद्दिसामि', अहंकारवज्जणत्थं भणाति -

'खमासमणाणं हत्थेणं सुत्तं अत्थो तदुभयं च उद्दिट्ठं'। ततो सीसो 'इच्छामो'त्ति भणित्ता वंदणं देति बितियं २। ततो उट्ठितो भणाति - संदिसह किं भणामो ?। गुरू भणति- वंदित्ता पवेदेसु त्ति। ततो 'इच्छामो'त्ति भणित्ता वंदणं देति ततियं ३। सीसो पुणुट्ठितो भणति - तुब्भेहि मे अमुगं सुतमुद्दिट्ठं, इच्छामि अणुसट्ठिं। गुरू भणति-जोगं करेहि त्ति। एवं संदिट्ठो 'इच्छामो'त्ति भणित्ता वंदणं देति चतुत्थं ४। एत्थंतरे णमोक्कारपरो गुरुं पदक्खिणेति, पदक्खिणेत्ता पुरतो ठिच्चा पुणो भणाति - तुब्भेहि मे अमुकं सुतमुद्दिट्ठं। [ ततो गुरुणा ] 'जोगं करेहि'त्ति संदिट्ठो 'इच्छामो'त्ति भणित्ता[६] वंदित्ता य पदक्खिणं करेति, एवं ततियं वारं पि। एते ततो वि वंदणा एक्कं वंदणट्ठाणं । ततियपदक्खिणंते य गुरुस्स पुरतो चिट्ठति। ताहे गुरू णिसीयति। णिसण्णस्स य अद्धावणतो भणाति- तुब्भं पवेदितं, संदिसह साधूणं पवेदयामि। गुरू भणति- पवेदेहि त्ति। 'इच्छामो'त्ति भणित्ता पंचमं देति वंदणं ५। वंदित[७] पच्चुट्ठितो कतपंचणमोक्कारो छट्ठं देति वंदणं ६। पुणो वंदित पच्चुट्ठितो भणाति - तुब्भं पवेदितं, साधूणं पवेदितं, संदिसह, करेमि काउस्सग्गं। गुरू भणति - करेह त्ति। ताहे वंदणं देति सत्तमं ७। एते सुतपच्चता सत्त वंदणा। ततो वंदित पच्चुट्ठितो भणाति - अमुकस्स उद्दिसावणं करेमि काउस्सग्गं, अन्नत्थूससितेणं जाव वोसिरामो त्ति। सत्तावीसुस्सासकालं ठिच्चा लोगस्सुज्जोतकरं वा चिंतेत्ता उस्सारेंतो भणाति 'णमो अरहंताणं'[८]ति, लोगस्सुज्जोयकरं[९] कड्ढित्ता सुतसमत्तउद्देसकिरियत्तणतो अंते फेट्टवंदणं देति। जे पुण वंदणयं देंति ते ण सुतपच्चयं, 'गुरूवकारि'त्ति विणयपडिवत्तितो अट्ठमं वंदणं देंति ८। एवं अंगादिसमुद्देसेसु वि। णवरं समुद्देसे पवेदिते गुरू भणति - थिरपरिजितं करेहि त्ति, णंदी य ण कड्ढिज्जति, [जोगुक्खेवुस्सग्गो य ण कीरइ, ] ण त पदक्खिणं तयो वारे कारिज्जति, जेण णिसण्णो गुरू समुद्दिसइ। अंगादिअणुण्णासु जहा उद्देसे तहा सव्वं कज्जति। णवरं पवेदिते गुरू भणति - सम्मं धारय अन्नेसिं च पवेदयसु त्ति, जोगुक्खेवुस्सग्गो य ण भवति। **आवस्सगा**दिसु **पइन्नए**सु य **तंदुलवेयालिया**दिसु एसेव विधी। णवरं सज्झायो ण पट्ठविज्जति, जोगुक्खेवुस्सग्गो य ण कीरति। **सामाइया**दिसु अज्झयणेसु उद्देसगेसु य उद्दिस्समाणेसु चितिवंदण-पदक्खिणादिविसेसकिरियवज्जिताइं सत्त च्चेव वंदणाइं पुव्वक्कमेण भवंति।

जंता[१०] पुण अणुयोगो अणुण्णव्वति तता इमो विधी - पसत्थेसु तिहि-करण-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

णक्खत्त-मुहुत्तेसु पसत्थे य खेत्ते जिणायतणादिसु भूमिं पमज्जित्ता दो णिसेज्जातो कज्जंति - एक्का गुरुणो १, बितिया अक्खाणं २ । चरिमकाले य पवेदिये णिसेज्जाए णिसण्णो गुरू, अहजातोवगरणो य पुरतो ठितो सीसो । गुरू सीसो[११] य दो वि मुहपोत्तियं पडिलेहंति । ततो तीए ससीसोवरियं कायं पडिलेहंति । ततो सीसो बारसावत्तं वंदणं दातुं भणाति - संदिसह सज्झायं पट्ठवेमि । ततो दुवग्गा वि सज्झायं पट्ठवेंति । ततो पट्ठविते गुरू णिसीतइ । ततो सीसो बारसावत्तेण वंदेति । →ततो दो वि उट्ठेत्ता अणुयोगं पट्ठवेंति । पट्ठविते य गुरू णिसीयति । ततो सीसो बारसावत्तेणं वंदइ ।← वंदिते गुरुणा अक्खाभिमंतणे कते गुरू णिसेज्जातो उट्ठेति । णिसेज्जं पुरतो काउं अधीतसुतं सीसं वामपासे ठवेत्ता चेतिए वंदति । समत्ते चेतियवंदणे ट्ठितो णमोक्कारं कड्ढित्ता णंदीं(दिं?) कड्ढति, तस्संते भणाति - इमस्स साधुस्स अणुयोगं अणुजाणामि, खमासमणाणं हत्थेणं दव्वगुणपज्जवेहिं अणुण्णातो । ततो वंदति सीसो । सो उट्ठितो भणाति-संदिसह किं भणामो ? । गुरू भणति-वंदणं दातुं पवेदेहि । ततो वंदति, उट्ठितो भणाति - तुब्भेहि मे अणुयोगो अणुण्णातो, इच्छामि अणुसट्ठिं । गुरू भणति - सम्मं धारय अन्नेसिं च पवेदय । ततो वंदति, वंदित्ता गुरुं पदक्खिणेइ, एवं तयो वारा । ताधे गुरू णिसेज्जाए णिसीयइ । ताधे सीसो पुरतो ठितो भणाति-तुब्भं पवेदितं, संदिसह साधूणं पवेदयामि । एवं सेसं सव्वं पूर्ववत् । उस्सग्गस्संते वंदित्ता ततो सीसो गुरुं सह णिसेज्जाए पदक्खिणं करेति वंदइ य, एवं तयो वारा । ताहे उट्ठेत्ता गुरुस्स दाहिणभुयासन्ने णिसीयति । ततो से गुरू गुरुपरंपरागते मंतपदे कहेति तयो वारा, ताधे वड्ढंतीओ ततो अक्खमुट्ठीतो गंधसहितातो देति । ताहे गुरू णिसेज्जातो उट्ठेति, सीसो तत्थ णिसीयति । ताहे सह गुरुणा अधासन्निहिया साधू वंदणं देंति । ताहे सो निसेज्जट्ठितो अणुयोगी **णाणं पंचविहं पण्णत्तं** इच्चादि सुत्तं कड्ढेति, कड्ढित्ता जधासत्तीए वक्खाणं करेति । वक्खाते साधवो वंदणं देंति । ताहे सो उट्ठेति णिसेज्जाए, पुणो गुरू तत्थ णिसीयति । ततो अणुयोगविसज्जणं उस्सग्गं करेंति, कालस्स य पडिक्कमंति । अणुण्णायअणुयोगसाधू य णिरुद्धं पवेदेति ।

एते उद्देसाइया सुतणाणस्सेवेत्यवधारिता, न मत्यादीनाम्, जतो भणितं **सुतणाणस्स उद्देसो** इत्यादि । तेसु वि ण उद्देसादिसु अहिकारो, पुव्वमधीतत्तणतो अणुयोगद्दाराधिकारातो य अनुयोगेनाऽत्राधिकारः । तस्स णिरुत्तं इमं - अणुयोजणमणुयोगो,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

निजेन अभिधेयेनेत्यर्थः। अहवा जोगो त्ति वावारो जो सुतस्स सो य अणुरूवो अणुकूलो वा अनुयोग इत्यर्थः । अथवा अणु पच्छा-थोवभावे त्ति, अत्थतो जम्हा सुत्तं थोवं पच्छुप्पण्णं च, तेण सह अत्थस्स जोगो अनुयोग इत्यर्थः।

**[ हा० २ ] तत्थ** इत्यादि। **तत्र** तस्मिन् ज्ञानपञ्चके **चत्वारि ज्ञानानि** मत्यवधि-मनःपर्याय-केवलाख्यानि, किम् ?, व्यवहारनयाभिप्रायतः साक्षादसंव्यवहार्यत्वात् स्थाप्यानीव **स्थाप्यानि**, यतश्चैवमतः **स्थापनीयानि**, तिष्ठन्तु तावत्, न तैरिहाधिकारः। अथवा स्वरूपप्रतिपादनेऽप्यसमर्थत्वात् **स्थाप्यानि**, इह चानुयोगद्वारप्रक्रमेऽनुपयोगित्वात् **स्थापनीयानि**। अथवा **स्थाप्यानि** सांन्यासिकानि, न तेषामिहानुयोगः, पुनर्विवृणोति-**स्थापनीयानी**त्यर्थः। यतश्चैवमतः **नो उद्दिस्सन्ती**त्यादि, नो उद्दिश्यन्ते नो समुद्दिश्यन्ते नो अनुज्ञायन्ते। तत्र त्वयेदमध्ययनं पठितव्यमित्युद्देशः १, तदेवाहीनादिलक्षणोपेतं पठित्वा गुरोर्निवेदयति, तत्र 'एवंविधं स्थिरपरिचितं कुरु' इति समनुज्ञा समुद्देशः २, तथा कृत्वा गुरोरावेदिते 'ग्रन्थधारणं शिष्याध्यापनं च कुरु' इति अनुज्ञा ३। **सुयणाणस्से**त्यादि। इह श्रुतज्ञानस्य स्वपरप्रकाशकत्वाद् गुर्वायत्तत्वाच्च किन्तूद्देशः समुद्देशः अनुज्ञा अनुयोगश्च प्रवर्तत इति। संक्षेपेणोद्देशादीनामर्थः कथित एव। अधुना शिष्यजनानुग्रहार्थं विस्तरेण कथ्यते।

तत्थ **आयारा**दिअंगस्स **उत्तरज्झयणा**दिकालियसुयखंधस्स य **उ(ओ)ववादिया**दिउक्कालियउवंगज्झयणस्स य इमो उद्देसणविही –

पुव्वं सज्झायं पट्ठवेत्ता ततो सुयगाही विण्णत्तिं करेइ- इच्छक्कारेण अमुगं मे सुयमुद्दिसह। ततो गुरू 'इच्छामो' त्ति भणति, तओ सुयगाही वंदणयं देइ पढमं १। ततो गुरू उट्ठित्ता चेइए वंदइ, ततो वंदिय पच्चुट्ठिओ सुयगाहिं वामपासे ठवेत्ता जोगुक्खेवुस्सग्गं पणुवीसुस्सासकालियं करेइ, ततो उस्सारितकड्डितचउवीसत्थओ तहट्ठिओ चेव पंचनमोक्कारं तिण्णि वारे उच्चारेत्ता **णाणं पंचविहं पण्णत्त**मिच्चादि उद्देसनंदी(दिं) कड्ढइ, तीसे य अंते भणादि - 'इमं पुण पट्ठवणं पडुच्च इमस्स साधुस्स इमं अंगं सुयखंधं अज्झयणं वा उद्दिसामि,' अहंकारवज्जणत्थं भणादि - 'खमासमणाणं हत्थेणं सुत्तेणं

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अत्थेणं तदुभएणं च उद्दिट्ठं' । ततो सीसो 'इच्छामो' त्ति भणित्ता वंदणं देइ बितियं २। ततो उट्ठितो भणादि-संदिसह, किं भणामो। ततो गुरू भणादि- वंदित्ता पवेयसु त्ति। ततो सीसो 'इच्छामो' त्ति भणित्ता वंदणगं देइ तइयं ३। सीसो पुणुट्ठितो भणादि- तुम्हेहिं मे अमुगं सुयमुद्दिट्ठं, इच्छामि अणुसट्ठिं । ततो गुरू भणति-'जोगं करेहि' त्ति । एवं संदिट्ठो 'इच्छामो' त्ति भणित्ता वंदणं देइ चउत्थयं ४। एत्थंतरे णमोक्कारपरो गुरुं पदक्खिणेइ, पदक्खिणित्ता पुरतो ठिच्चा भणादि- तुब्भेहिं मे अमुगं सुतमुद्दिट्ठं। तओ गुरुणा 'जोगं करेहि' त्ति संदिट्ठो ततो 'इच्छामो' त्ति भणित्ता वंदित्ता य पदक्खिणं करेइ, एवं तइयवारं पि, एते य ततो वि वंदणा एक्कं चेव वंदणट्ठाणं। तइयपदक्खिणंते य गुरुस्स पुरओ चिट्ठइ, ताहे गुरू निसीदति, निसण्णयस्स य अद्धावणयगाओ भणति-'तुब्भं पवेदितं, संदिसह साहूणं पवेदामि' त्ति। ततो गुरू भणति - 'पवेदिहि' त्ति । ततो 'इच्छामो' त्ति भणित्ता पंचमं वंदणयं देइ ५ । वंदिय पच्चुट्ठितो य कयपंचणमोक्कारो छट्ठं वंदणयं देइ ६ । पुणो य वंदिय पच्चुट्ठिओ [भणादि] -तुब्भं पवेदितं, साहूणं पवेदितं, संदिसह, करेमि उस्सग्गं। ततो गुरू भणति - करेहि। ताहे वंदणयं देइ सत्तमयं ७। एते च सुतपच्चया सत्त वंदणगा। तओ वंदिय पच्चुट्ठिदो भणति - अमुगस्स [सुयस्स] उद्दिसावणं करेमि उस्सग्गं, अन्नत्थूससिएणं जाव वोसिरामि त्ति। ततो सत्तावीसुस्सासं कालं ठिच्चा लोयस्सुज्जोयगरं चिंतित्ता उस्सारित्ता भणादि- णमो अरहंताणं ति, लोयस्सुज्जोयगरं कड्ढेत्ता सुयसमत्तउद्देसकिरियत्तणओ अन्ते फेट्टावंदणयं देइ, जे पुण वंदणगं देंति ते न सुतपच्चतं, गुरूवकारि त्ति विणयपडिवत्तिओ अट्ठमं वंदणं देंति ८। एवं अंगादिसु समुद्देसे वि, णवरं पवेदिते गुरू भणति- थिरपरिजितं करेहि त्ति, णंदी य ण कड्ढिज्जति, जोगुक्खेवुस्सग्गो य ण कीरइ, ण य पदक्खिणं तओ वारे कारिज्जति, जेण णिसण्णो गुरू समुद्दिसति। एवं अंगादिसु अणुण्णाए जहा उद्देसे तहा सव्वं कज्जति, णवरं पवेदिते गुरू भणति-सम्मं धारय अण्णेसिं च पवेयसु त्ति, जोगुक्खेवुस्सग्गो ण य भवति, एवं **आवस्सगा**दिसु **पइण्णगे**सु य **तंदुलवेयालिया**दिसु एसेव विही, णवरं सज्झाओ ण पट्ठविज्जइ, जोगुक्खेवुस्सगो य ण कीरइ, एवं **सामादिया**दिसु वि अज्झयणेसु उद्देसएसु य उद्दिस(स्स)माणेसु चितिवंदण-पदक्खिणादिविसेसकिरियवज्जिया सत्त चेव वंदणगा पुव्वक्कमेणेव भवंति।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

[1]जदा पुण अणुओगो अणुण्णविज्जति तदा इमो विही - पसत्थेसु तिहि-करण-मुहुत्त-णक्खत्तेसु पसत्थे य खेत्ते जिणाययणादौ भूमी पमज्जित्ता दो णिसज्जाओ कीरंति- एक्का गुरुणो १, बितिया अक्खाणं २ ति। तओ[2] चरमकाले पवेदिते णिसेज्जाए णिसण्णो गुरू, अहजाउवगरणो ट्ठिओ सीसो। ततो दो वि ते गुरू सीसो य मुहपोत्तियं पडिलेहिन्ति, तओ तीए ससीसोवरियं कायं पडिलेहिन्ति, तओ सीसो बारसावत्तगं वं[3]दणगं दाउं भणाति- संदिसह सज्झायं पट्ठवेमि। तओ दुयग्गा वि सज्झायं पट्ठवेंति, ततो पट्ठविते गुरू णिसीदति, ततो सीसो बारसायत्तेण वंदति, ततो दो वि उट्ठेत्ता अणुओगं पट्ठवेंति, ततो पट्ठविते गुरू णिसीदति, ततो सीसो बारसायत्तेण वंदति, वंदिते गुरुणा अक्खामंतणे कते गुरू निसेज्जाओ उट्ठेति, ततो निसेज्जं पुरओ काउं अधीयसुयं सीसं वामपासे ठवेत्ता चेतिए वंदति, समत्ते चेइयवंदणे गुरू ठितो चेव णमोक्कारं कड्ढेत्ता णंदिं कड्ढति, तीसे य अन्ते भणाति- इमस्स साहुस्स अणुओगं अणुजाणामि, खमासमणाणं हत्थेणं दव्वगुणपज्जवेहिं अणुण्णाओ। ततो सीसो वंदणगं देइ, उट्ठितो भणाति- संदिसह किं भणामो ? तओ गुरू भणति-वंदणं दाउं पवेदेह, ततो वंदति, वंदित्ता ततो उट्ठितो भणेति- तुब्भेहिं मे अणुओगो अणुण्णाओ, इच्छामि अणुसट्ठिं। ततो गुरू भणति- सम्मं धारय अण्णेसिं च पवेदय। ततो वंदति, वंदित्ता गुरुं पयक्खिणेति, एवं ततो वारे, ताहे गुरू निसेज्जाए णिसीयति, ताहे सीसो पुरओ ठितो भणति-तुब्भं पवेदितं, संदिसह साहूणं पवेदयामि, एवं शेषं पूर्ववत्। ततो उस्सग्गस्संते वंदित्ता सीसो गुरुं सह निसेज्जाए पदक्खिणीकरेति [4]वंदेइ य, एवं ततो वारा, ताहे उट्ठेत्ता गुरुस्स दाहिणभुयासण्णे णिसीदति। ततो से गुरू गुरुपरंपरागए मंतपए कहेति ततो वारा, ततो वड्ढंतियातो ततो अक्खमुट्ठीतो गंधसहियातो देति, ताहे गुरू निसेज्जाओ उट्ठेति, सीसो तत्थ निसीदति। ताहे सह गुरुणा अहासण्णिहिता साहू वंदणं देंति। ताहे सो वि निसेज्जट्ठिओ अणुओगी **णाणं पंचविहं पण्णत्त**मिच्चादि सुत्तं कड्ढति, कड्ढित्ता जहासत्तिं वक्खाणं करेति। वक्खाणे य कते साहू वंदणं देंति। ताहे सो उट्ठेति णिसेज्जाओ, पुणो गुरू चेव तत्थ निसीयति। तओ अणुओगविसज्जणत्थं काउस्सग्गं करेंति, कालस्स य पडिक्कमंति। ततो अणुण्णायाणुओगो साहू निरुद्धं पवेदेति। एवमेते उद्देशादयः श्रुतज्ञानस्यैव प्रवर्त्तन्ते, न शेषज्ञानानामिति । न चेहोद्देशादिभिरधिकारः, किं तर्हि ? अनुयोगेन, तस्यैव

Jain Education International For Private & Personal Use Only www.jainelibrary.org

प्रक्रान्तत्वादिति ।

[ हे० २ ] यदि नाम ज्ञानं पञ्चविधं प्रज्ञप्तं ततः किम् ? इत्याह- **तत्थे**त्यादि, तत्र तस्मिन् ज्ञानपञ्चके आभिनिबोधिका-ऽवधि-मनःपर्याय-केवलाख्यानि **चत्वारि ज्ञानानि ठप्पाइं** ति स्थाप्यानि असंव्यवहार्याणि, व्यवहारनयो हि यदेव लोकस्योपकारे वर्त्तते तदेव संव्यवहार्यं मन्यते, लोकस्य च हेयोपादेयेष्वर्थेषु निवृत्ति-प्रवृत्तिद्वारेण प्रायः श्रुतमेव साक्षादत्यन्तोपकारि, यद्यपि केवलादिदृष्टमर्थं श्रुतमभिधत्ते तथापि गौणवृत्त्या तानि लोकोपकारीणीति भावः । यद्युक्तन्यायेनासंव्यवहार्याणि तानि ततः किम् ? इत्याह- **ठवणिज्जाइं** ति ततः स्थापनीयानि एतानि, तथाविधोपकाराभावतोऽसंव्यवहार्यत्वात्तिष्ठन्तु, न तैरिहोद्देश-समुद्देशाद्यवसरेऽधिकार इत्यर्थः, अथवा **स्थाप्यानि** अमुखराणि स्वस्वरूपप्रतिपादनेऽप्यसमर्थानि, न हि शब्दमन्तरेण स्वस्वरूपमपि केवलादीनि प्रतिपादयितुं समर्थानि, शब्दश्चानन्तरमेव श्रुतत्वेनोक्त इति स्व-परस्वरूपप्रतिपादने श्रुतमेव समर्थम्, स्वरूपकथनं चेदम्, अतः स्थाप्यानि अमुखराणि यानि चत्वारि ज्ञानानि तानीहानुयोगद्वारविचारप्रक्रमे किम् ? इत्याह-अनुपयोगित्वात् **स्थापनीयानि** अनधिकृतानि, यत्रैव ह्युद्देश-समुद्देशा-ऽनुज्ञाः क्रियन्ते तत्रैवानुयोगः तद्द्वाराणि चोपक्रमादीनि प्रवर्त्तन्ते, एवंभूतं **त्वाचारादि** श्रुतज्ञानमेव इत्यत उद्देशाद्यविषयत्वादनुपयोगीनि शेषज्ञानानि इत्यतोऽत्रानधिकृतानि । अत्राह-अनुयोगो व्याख्यानम्, तच्च शेषज्ञानचतुष्टयस्यापि प्रवर्त्तत एवेति कथमनुपयोगित्वम् ?, ननु समयचर्यानभिज्ञतासूचकमेवेदं वचः, यतो हन्त तत्रापि तज्ज्ञानप्रतिपादकः सूत्रसंदर्भ एव व्याख्यायते, स च श्रुतमेवेति श्रुतस्यैवानुयोगप्रवृत्तिरिति । अथवा **स्थाप्यानि** गुर्वनधीनत्वेनोद्देशाद्यविषयभूतानि, एतदेव विवृणोति-**स्थापनीयानी**ति, एकार्थौ द्वावपि, इदमुक्तं भवति- अनेकार्थत्वादतिगम्भीरत्वाद्विविधमन्त्राद्यतिशयसम्पन्नत्वाच्च प्रायो गुरूपदेशापेक्षं श्रुतज्ञानम्, तच्च गुरोरन्तिके गृह्यमाणं परमकल्याणकोशत्वादुद्देशादिविधिना गृह्यत इति तस्योद्देशादयः प्रवर्त्तन्ते, शेषाणि तु चत्वारि ज्ञानानि तदावरणकर्मक्षय-क्षयोपशमाभ्यां स्वत एव जायमानानि नोद्देशादिप्रक्रममपेक्षन्ते । यतश्चैवमत आह - **नो उद्दिस्संती**त्यादि,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

नो उद्दिश्यन्ते नो समुद्दिश्यन्ते नो अनुज्ञायन्ते, तत्र इदमध्ययनादि त्वया पठितव्यमिति गुरुवचनविशेष उद्देशः, तस्मिन्नेव शिष्येण अहीनादिलक्षणोपेतेऽधीते गुरोर्निवेदिते स्थिरपरिचितं कुर्विदमिति गुरुवचनविशेष एव समुद्देशः, तथा कृत्वा गुरोर्नि-वेदिते सम्यगिदं धारयाऽन्यांश्चाध्यापयेति तद्वचनविशेष एवानुज्ञा । **सुयणाणस्से**त्यादि, श्रुतज्ञानस्योद्देशः समुद्देशोऽनुज्ञा अनुयोगश्च प्रवर्त्तते ।

तत्रोद्देशादीनां त्रयाणां स्वरूपं संक्षेपत उक्तमपि विनेयानुग्रहार्थं किञ्चिद्विस्तरत उच्यते-तत्राऽऽ**चारा**द्यङ्गस्य **उत्तराध्ययना**दिकालिकश्रुतस्कन्धस्य **औपपातिका**-द्युत्कालिकोपाङ्गाध्ययनस्य चायमुद्देशविधिः इहाऽऽ**चाराङ्गा**द्यन्यतरश्रुतमध्येतुमिच्छति यो विनेयः सः स्वाध्यायं प्रस्थाप्य गुरुं विज्ञपयति-'भगवन् ! अमुकं मम श्रुतमुद्दिशत' । गुरुरपि भणति- 'इच्छामः' इति, ततो विनेयो वन्दनकं ददाति १ । ततो गुरुरुत्थाय चैत्यवन्दनं करोति, तत ऊर्ध्वस्थितो वामपार्श्वीकृतशिष्यो योगोत्क्षेपनिमित्तं पञ्चविंशत्युच्छ्वासमानं कायोत्सर्गं करोति, 'चंदेसु *निम्मलयरे*'ति यावच्चतुर्विंशतिस्तवं चिन्तयतीत्यर्थः, ततः पारितकायोत्सर्गः संपूर्णं चतुर्विंशतिस्तवं भणित्वा तथास्थित एव पञ्चपरमेष्ठिनमस्कारं वारात्रयमुच्चार्य 'नाणं पञ्चविहं पण्णत्त'मित्यादि उद्देशनन्दीं भणति, तदन्ते च 'इदं पुनः प्रस्थापनं प्रतीत्य अस्य साधोरिदमङ्गममुं श्रुतस्कन्धम् इदमध्ययनं वा उद्दिशामि, क्षमाश्रमणानां हस्तेन सूत्रमर्थः तदुभयं च उद्दिष्टम्' इत्येवं वदति, 'क्षमाश्रमणानाम्' इत्यादि त्वात्मनोऽहङ्कारवर्जनार्थमभिधत्ते । ततो विनेय 'इच्छामी'ति भणित्वा वन्दनकं ददाति २ । तत उत्थितो ब्रवीति- 'संदिशत किं भणामि' इति, ततो गुरुर्वदति- 'वन्दित्वा प्रवेदय' इति, ततो विनेय 'इच्छामि' इति भणित्वा वन्दनकं ददाति ३ । ततः पुनरुत्थितः प्रतिपादयति- 'भवद्भिर्ममामुकं श्रुतमुद्दिष्टमिच्छाम्यनुशास्तिम्', ततो गुरुः प्रत्युत्तरयति 'योगं कुरु' इति, एवं सन्दिष्टो विनेय 'इच्छामि' इति भणित्वा वन्दनकं ददाति ४, ततोऽत्रान्तरे नमस्कारमुच्चारयन्नसौ गुरुं प्रदक्षिणयति, तदन्ते च गुरोः पुरतः स्थित्वा पुनर्वदति - 'भवद्भिर्ममामुकं श्रुतमुद्दिष्टम्, इच्छाम्यनुशास्तिम्', ततो गुरुराह - 'योगं कुरु' इति, एवं च संदिष्ट 'इच्छामि' इति भणित्वा वन्दित्वा च पुनस्तथैव गुरुं प्रदक्षिणयति, तदन्ते च पुनस्तथैव गुरु-शिष्ययोर्वचन-प्रतिवचने, तथैव च तृतीयप्रदक्षिणां विदधाति विनेयः,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

एतानि च चतुर्थवन्दकादीनि त्रीण्यपि वन्दनकान्येकमेव चतुर्थं गण्यते, एकार्थप्रतिबद्धत्वादिति। ततस्तृतीयप्रदक्षिणान्ते गुरुर्निषीदति, निषण्णस्य च गुरोः पुरतोऽर्द्धावनतगात्रो विनेयो वक्ति - 'युष्माकं प्रवेदितम्, संदिशत, साधूनां प्रवेदयामि', ततो गुरुराह - 'प्रवेदय' इति, तत 'इच्छामि' इति भणित्वा विनेयो वन्दनकं ददाति ५। प्रत्युत्थितश्चोच्चारितपञ्चपरमेष्ठिनमस्कारः पुनर्वन्दनकं ददाति ६। पुनरुत्थितो वदति 'युष्माकं प्रवेदितम्, साधूनां प्रवेदितम्, सन्दिशत करोमि कायोत्सर्गम्', ततो गुरुरनुजानीते- 'कुरु' इति, ततः पुनरपि वन्दनकं ददाति ७। एतानि सप्त छोभवन्दनकानि श्रुतप्रत्ययानि भवन्ति, ततः प्रत्युत्थितोऽभिधत्ते - 'अमुकस्योद्देशनिमित्तं करोमि कायोत्सर्गमन्यत्रोच्छ्वसितात्' इत्यादि यावद् 'व्युत्सृजामि' इति, ततः कायोत्सर्गस्थितः सप्तविंशतिमुच्छ्वासांश्चिन्तयति, *सागरवरगम्भीरा* इति यावच्चतुर्विंशतिस्तवं चिन्तयति इत्यर्थः, *उद्देससमुद्देसे सत्तावीसं अणुण्णवणयाए* [*जीतक० गा० २२*] इति वचनात्, ततः पारितकायोत्सर्गः संपूर्णं चतुर्विंशतिस्तवं भणित्वा परिसमाप्तोद्देशक्रियत्वाद् गुरोः छोभवन्दनकं ददाति, तच्च न श्रुतप्रत्ययम्, किं तर्हि ?, श्रुतदातृत्वादिना गुरुः परमोपकारीति तद्विनयप्रतिपत्तिनिमित्तमिति। अङ्गादिसमुद्देशेऽप्येवमेव विधिर्वक्तव्यः, नवरं पूर्वं प्रवेदिते 'योगं कुरु' इत्युक्तम्, अत्र तु 'स्थिरपरिचितं कुरु' इति वदति, योगोत्क्षेपकायोत्सर्गो नन्द्याकर्षणं प्रदक्षिणात्रयविधिश्च न क्रियते, शेषः सप्तवन्दनकादिको विधिस्तथैव। अनुज्ञाविधिस्तु योगोत्क्षेपकायोत्सर्गवर्ज्जः सर्वोऽप्युद्देशविधिवद्वक्तव्यः, नवरं प्रवेदिते गुरुर्वदति- 'सम्यग् धारयान्येषां च प्रवेदय', अन्यानपि पाठयेत्यर्थः। **आवश्यका**दिषु **तन्दुलविचारणा**दिप्रकीर्णकेष्वपि चैष एव विधिः, नवरं स्वाध्यायप्रस्थापनं योगोत्क्षेपकायोत्सर्गश्च न क्रियते, एवं सामायिकाद्यध्ययनेषूद्देशकेषु च चैत्यवन्दन-प्रदक्षिणात्रयादिविशेषक्रियारहितः सप्तवन्दनकप्रदानादिकः स एव विधिरिति तावदियं **चूर्णिकार**लिखिता सामाचारी, साम्प्रतं पुनरन्यथापि ताः समुपलभ्यन्ते, न च तथोपलभ्य सम्मोहः कर्त्तव्यः, विचित्रत्वात् सामाचारीणामिति।

इदानीमनुयोगविधिरुच्यते- तत्रानुयोगो वक्ष्यमाणशब्दार्थः, स यदाऽधीतसूत्रस्याचार्यपदस्थापनायोग्यस्य शिष्यस्यानुज्ञायते तदाऽयं विधिः- प्रशस्तेषु तिथि-नक्षत्रकरण-मुहूर्त्तेषु प्रशस्ते च जिनायतनादौ क्षेत्रे भुवं प्रमार्ज्य एका गुरूणामेका त्वक्षाणामिति

Jain Education International For Private & Personal Use Only www.jainelibrary.org

निषद्याद्वयं क्रियते, ततः प्राभातिककाले प्रवेदिते निषद्यानिषण्णस्य गुरोश्चोलपट्टक-रजोहरण-मुखवस्त्रिकामात्रोपकरणो विनेयः पुरतोऽवतिष्ठते, ततो द्वावपि गुरुशिष्यौ मुखवस्त्रिकां प्रत्युपेक्षयतः, तया च समग्रं शरीरं प्रत्युपेक्षयतः, ततो विनेयो गुरुणा सह द्वादशावर्त्तवन्दनकं दत्त्वा वदति- 'इच्छाकारेण संदिशत, स्वाध्यायं प्रस्थापयामि', ततश्च द्वावपि स्वाध्यायं प्रस्थापयतः, ततः प्रस्थापिते स्वाध्याये गुरुर्निषीदति, ततः शिष्यो द्वादशावर्त्तवन्दनकं ददाति, ततो गुरुरुत्थाय शिष्येण सहानुयोगप्रस्थापननिमित्तं कायोत्सर्गं करोति, ततो गुरुर्निषीदति, ततस्तं शिष्यो द्वादशावर्त्तवन्दनकेन वन्दते, ततो गुरुरक्षानभिमन्त्र्योत्तिष्ठति, उत्थाय च निषद्यां पुरतः कृत्वा वामपार्श्वीकृतशिष्यश्चैत्यवन्दनं करोति, ततः समाप्ते चैत्यवन्दने पुनः गुरुरूर्ध्वस्थित एव नमस्कारपूर्व्वं नन्दिमुच्चारयति, तदन्ते चाभिधत्ते- 'अस्य साधोरनुयोगमनुजानामि, क्षमाश्रमणानां हस्तेन द्रव्यगुणपर्यायैरनुज्ञातः'। ततो विनेयश्छोभवन्दनकेन वन्दते, उत्थितश्च ब्रवीति- 'संदिशत किं भणामि ?' ततो गुरुराह- 'वन्दित्वा प्रवेदय', ततो वन्दते शिष्यः, उत्थितस्तु ब्रवीति- 'भवद्भिर्ममानुयोगोऽनुज्ञातः', इच्छाम्यनुशास्तिम्'। ततो गुरुर्वदति- 'सम्यग् धारय अन्येषां च प्रवेदय', अन्येषामपि व्याख्यानं कुर्व्वित्यर्थः। ततो वन्दतेऽसौ,[१] वन्दित्वा च गुरुं प्रदक्षिणयति, प्रदक्षिणान्ते च 'भवद्भिर्ममानुयोगोऽनुज्ञातः' इत्याद्युक्तिप्रत्युक्तिर्द्वितीयप्रदक्षिणा च तथैव, पुनस्तृतीयापि तथैव, ततस्तृतीयप्रदक्षिणान्ते गुरुर्निषीदति, तत्पुरः स्थितश्च विनेयो वदति- 'युष्माकं प्रवेदितम्, सन्दिशत साधूनां प्रवेदयामि' इत्यादि, शेषमुद्देशविधिवद्वक्तव्यं यावद-नुयोगानुज्ञानिमित्तं कायोत्सर्गं करोति, तदन्ते च सनिषद्यः शिष्यो गुरुं प्रदक्षिणयति, तदन्ते च वन्दते, पुनः प्रदक्षिणयति, एवं तिस्रो वाराः, ततो गुरोर्दक्षिणभुजासन्ने निषीदति, ततो गुरुपारम्पर्यागतानि मन्त्रपदानि गुरुः तिस्रो वाराः शिष्यस्य कथयति, तदनन्तरं यथोत्तरं प्रवर्द्धमानाः प्रवरगन्धमिश्रास्तिस्रोऽक्षमुष्टीस्तस्मै ददाति, ततो निषद्याया गुरुरुत्थाय शिष्यं तत्रोपवेश्य यथासन्निहितसाधुभिः सह तस्मै वन्दनकं ददाति, ततो विनेयो निषद्यास्थित एव **नाणं पंचविहं पण्णत्त**मित्यादिसूत्रमुच्चार्य यथाशक्ति व्याख्यानं करोति, तदन्ते च साधवो वन्दनकं ददति, ततः शिष्यो निषद्यात उत्तिष्ठति, गुरुरेव पुनस्तत्र निषीदति, ततो द्वावप्यनुयोगविसर्गार्थं कालप्रतिक्रमणार्थं च प्रत्येकं कायोत्सर्गं कुरुतः, ततः शिष्यो निरुद्धं

Jain Education International For Private & Personal Use Only www.jainelibrary.org

प्रवेदयते, निरुद्धं करोतीत्यर्थः । एवं श्रुतस्यैव उद्देशादयः प्रवर्त्तन्ते, न शेषज्ञानानाम्, अत्र चानुयोगेनैवाधिकारो न शेषैः, अनुयोगद्वारविचारस्यैवेह प्रक्रान्तत्वाद् ।

**[ सू० ३ ] जइ सुयणाणस्स उद्देसो समुद्देसो अणुण्णा [१]अणुओगो य पवत्तइ, किं अंगपविट्ठस्स उद्देसो समुद्देसो अणुण्णा अणुओगो य पवत्तइ ? [३]अंगबाहिरस्स उद्देसो समुद्देसो अणुण्णा अणुओगो य [२]पवत्तइ ? अंगपविट्ठस्स वि उद्देसो समुद्देसो अणुण्णा अणुओगो य पवत्तइ, [४]अंगबाहिरस्स वि उद्देसो समुद्देसो अणुण्णा अणुओगो य पवत्तइ । इमं पुण पट्ठवणं पडुच्च अंगबाहिरस्स उद्देसो समुद्देसो अणुण्णा अणुओगो य पवत्तइ ।**

**[ सू० ४ ] [५]जइ अंगबाहिरस्स उद्देसो समुद्देसो अणुण्णा अणुओगो य पवत्तइ, किं कालियस्स उद्देसो समुद्देसो अणुण्णा अणुओगो य पवत्तइ ? उक्कालियस्स उद्देसो समुद्देसो अणुण्णा अणुओगो य पवत्तइ ? कालियस्स वि उद्देसो समुद्देसो अणुण्णा अणुओगो य पवत्तइ, उक्कालियस्स वि उद्देसो समुद्देसो अणुण्णा अणुओगो य पवत्तइ । इमं पुण पट्ठवणं पडुच्च उक्कालियस्स उद्देसो समुद्देसो अणुण्णा अणुओगो य पवत्तइ ।**

**[ सू० ५ ] [६]जइ उक्कालियस्स उद्देसो समुद्देसो अणुण्णा अणुओगो य पवत्तइ, किं आवस्सगस्स उद्देसो समुद्देसो अणुण्णा अणुओगो य पवत्तइ ? आवस्सगवइरित्तस्स उद्देसो समुद्देसो अणुण्णा अणुओगो य पवत्तइ ? आवस्सगस्स वि उद्देसो समुद्देसो अणुण्णा अणुओगो य पवत्तइ, आवस्सगवइरित्तस्स वि उद्देसो समुद्देसो अणुण्णा अणुयोगो य पवत्तइ । इमं पुण पट्ठवणं पडुच्च आवस्सगस्स अणुओगो ।**

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[चू० ३-५] सुतणाणस्स० अनुयोग** इत्यादि सुत्तं । **इमं** ति वट्टमाणकालासण्णतिरियपच्चक्खभावे । **अंगा-ऽणंगा**दिविसेसणो[१] **पुण**सद्दो, **पट्ठवणं** प्रारम्भः, प्रवर्त्तनेत्यर्थः । दिवस-णिसिपढम-चरिमासु जं पढिज्जति तं **कालियं** । जं पुण कालवेलावज्जं[२] पढिज्जइ तं **उक्कालियं** ।

अवस्सं जं उभयसंझकालं कज्जइ उभयसंझकाले वा जेण किरिया कज्जइ तं **आवस्सगं** । सेसं सव्वं **वइरित्तं** ।

**[ हा० ३-५ ] जति सुतणाणस्से**त्यादि सर्वं निगदसिद्धं यावत् **इमं पुण पट्ठवणं पडुच्च आवस्सगस्साणुओगो** त्ति, नवरमिमां पुनरधिकृतां प्रस्थापनां प्रतीत्य, प्रारम्भः [प्रस्थापना], प्रस्थापनामेनामाश्रित्याऽऽ**वश्यकस्य** अवश्यं क्रियानुष्ठानादावश्यकं तस्याऽ**नुयोगः** अर्थकथनविधिः, तेनाधिकार इत्यर्थः । इहानुयोगस्य प्रक्रान्तत्वात् तद्गतवक्तव्यतालम्बनायाः खल्वस्या द्वारगाथायाः प्रस्तावः, तद्यथा –

*णिक्खेवेगट्ठ[१] निरुत्त विही पवित्ती य केण वा कस्स ।*
*तद्दार भेद लक्खण तदरिहपरिसा य सुत्तत्थो ॥१॥* [कल्पभा० १४९, दशवै०नि० ५]

अस्याः समुदायार्थमवयवार्थं च ग्रन्थान्तरे स्वस्थान एव व्याख्यास्यामः, अत्र तु कस्येति द्वारे **इमं पुण पट्ठवणं पडुच्च आवस्सगस्स अणुओगो** त्ति सूत्रनिपातः ।

**[ हे० ३-५ ]** अत्र यथाभिहितमुपजीव्याह शिष्यः – **यदी**त्यादि, यद्युक्तक्रमेण श्रुतज्ञानस्योद्देशः **समुद्देशोऽनुज्ञा अनुयोगश्च प्रवर्त्तते**, तर्हि **किमसावङ्गप्रविष्टस्य** प्रवर्त्तते, उताङ्ग**बाह्यस्ये**ति ?, तत्राङ्गेषु प्रविष्टम् अन्तर्गतमङ्गप्रविष्टं श्रुतम् **आचारा**दि, तद्बाह्यं तु **उत्तराध्ययना**दि, अत्र गुरुर्निर्वचनमाह- **अंगपविट्ठस्स वी**त्यादि, **अपि**शब्दौ परस्परसमुच्चयार्थौ, अङ्गप्रविष्टस्याप्युद्देशादि प्रवर्त्तते, तद्बाह्यस्यापि, **इदं पुनः** प्रस्तुतं **प्रस्थापनं** प्रारम्भं **प्रतीत्य** आश्रित्याङ्ग**बाह्यस्य** प्रवर्त्तते नेतरस्य, **आवश्यकं** ह्यत्र व्याख्यास्यते, तच्चाङ्गबाह्यमेवेति भावः ।

अत्राङ्गबाह्यस्येति सामान्योक्तौ सत्यां संशयानो विनेय आह- **जइ**

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**अंगबाहिरस्से**त्यादि, यद्यङ्गबाह्यस्योद्देशादिः तर्हि **किमसौ कालिकस्य** प्रवर्त्तते **उत्कालिकस्य** वा ? द्विधाऽप्यङ्गबाह्यस्य संभवादिति भावः, तत्र दिवस-निशाप्रथम-चरमपौरुषीलक्षणे कालेऽधीयते नान्यत्रेति कालिकम् **उत्तराध्ययना**दि, यत्तु कालवेला-मात्रवर्जं शेषकालानियमेन पठ्यते तदुत्कालिकम् **आवश्यका**दि। अत्र गुरुः प्रतिवचनमाह – **कालियस्स वी**त्यादि, कालिकस्याप्यसौ प्रवर्त्तते, उत्कालिकस्यापि, **इदं पुनः** प्रस्तुतं **प्रस्थापनं** प्रारम्भं **प्रतीत्य उत्कालिकस्या**सौ मन्तव्यः, आवश्यकमेव ह्यत्र व्याख्यास्यते, तच्चोत्कालिकमेवेति हृदयम्।

उत्कालिकस्येति सामान्यवचने विशेषजिज्ञासुः पृच्छति – **जइ उक्कालियस्से**-त्यादि, यद्युत्कालिकस्योद्देशादिस्तत् **किमावश्यकस्याय**ं प्रवर्त्तते उताऽऽ**वश्यक-व्यतिरिक्तस्य** ?, उभयथाऽप्युत्कालिकस्य सम्भवादिति परमार्थः। तत्र श्रमणैः श्रावकैश्चोभयसन्ध्यमवश्यं करणादावश्यकं सामायिकादिषडध्ययनकलापः, तस्मात्तु व्यतिरिक्तं भिन्नं **दशवैकालिका**दि, गुरुराह – **आवस्सगस्स वी**त्यादि, द्वयोरप्येतयोः सामान्येनोद्देशादिः प्रवर्त्तते, किन्त्वि**दं** प्रकृतं **प्रस्थापनं** प्रारम्भं **प्रतीत्यावश्यकस्या-नुयोगो** नेतरस्य, सकलसामाचारीमूलत्वादस्यैवेह शेषपरिहारेण व्याख्यानादिति भावनीयम्, उद्देश-समुद्देशा-ऽनुज्ञास्त्वावश्यकस्य प्रवर्त्तमाना अप्यत्र नाधिकृताः, अनुयोगावसरत्वात्, अतस्तत्परिहारेणोक्तम् – **अणुओगो** त्ति, अयमत्र भावार्थः – अनुयोगस्य प्रक्रान्तत्वात् तद्वक्तव्यताप्रतिबद्धाया अस्या गाथाया इहावसरः, तद्यथा –

*[१]निक्खेवेगट्ठ निरुत्त विहि पवित्ती य केण वा कस्स ?।*
*तद्दार भेय लक्खण तदरिहपरिसा य सुत्तत्थो ॥१॥* [कल्पभा० १४९, दशवै०नि० ५]

अस्या विनेयानुग्रहार्थं व्याख्या- इहानुयोगस्य निक्षेपो नाम-स्थापनादिको वक्तव्यः १।

तथाऽनुयोगस्यैकार्थिकानि वक्तव्यानि, यदाह –

*[२]अणुओगो य निओगो भास विभासा य वत्तियं चेव।*
*एते अणुओगस्स य नामा एगट्ठिया पंच ॥१॥* [आवश्यकनि० १३१, कल्पभा० १८७] २।

तथाऽनुयोगस्य निरुक्तं वक्तव्यम्, तद्यथा– स्वाभिधायकसूत्रेण सहार्थस्य अनुनियतः अनुकूलो वा योगः अस्येदमभिधेयमित्येवं संयोज्य शिष्येभ्यः प्रतिपादन-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

मनुयोगः, सूत्रार्थकथनमित्यर्थः, अथवा एकस्यापि सूत्रस्यानन्तोऽर्थ इत्यर्थो महान्, सूत्रं त्वणु, ततश्चाणुना सूत्रेण सहार्थस्य योगो अणुयोगः, तदुक्तम् —

*नियय णुकूलो जोगो सुत्तस्सऽत्थेण जो य अणुयोगो ।*
*सुत्तं च अणुं तेणं जोगो अत्थस्स अणुओगो ॥१॥* [      ] ३।

तथाऽनुयोगस्य विधिर्वक्तव्यः, यथा प्रथमं सूत्रार्थ एव शिष्यस्य कथनीयः, द्वितीयवारायां सोऽपि निर्युक्त्यर्थकथनमिश्रः, तृतीयवारायां तु प्रसङ्गानुप्रसङ्गागतः सर्व्वोऽप्यर्थो वाच्यः, तदुक्तम् —

*[3] सुत्तत्थो खलु पढमो बीओ निज्जुत्तिमीसतो भणितो ।*
*तइओ य निरवसेसो एस विही होइ अणुओगे ॥१॥* [*आवश्यकनि० २४*]

इत्याद्यन्योऽपि अत्र विधिर्वाच्यो, दिङ्मात्रत्वादस्येति ४ ।

तथाऽनुयोगस्य प्रवृत्तिर्यथा भवति तथा वाच्यम्, तत्रोद्यमी सूरिरुद्यमिनः शिष्याः १, उद्यमी सूरिरनुद्यमिनः शिष्याः २, अनुद्यमी सूरिरुद्यमिनः शिष्याः ३, अनुद्यमी सूरिरनुद्यमिनः शिष्याः ४ इति चतुर्भङ्गी, अत्र प्रथमभङ्गे अनुयोगस्य प्रवृत्तिर्भवति, चतुर्थे तु न भवति, द्वितीय-तृतीययोस्तु काचित् कथञ्चिद्भवत्यपि ५ ।

तथानुयोगः केन कर्त्तव्य इति तद्योग्यः कर्त्ताऽभिधानीयो, यदाह —

*[4] देसकुलजातिरूवी संघयण-धिईजुओ अणासंसी ।*
*अविकंथणो अमाई थिरपरिवाडी गहियवक्को ॥१॥*

'थिरपरिवाडि'त्ति अविस्मृतसूत्रः ।

*जियपरिसो जियनिद्दो मज्झत्थो देसकालभावन्नू ।*
*आसन्नलद्धपइभो नाणाविहदेसभासण्णू ॥२॥*
*पंचविहे आयारे जुत्तो सुत्तत्थतदुभयविहिण्णू ।*
*आहरण-हेउ-उवणय-नयनिउणो गाहणाकुसलो ॥३॥*
*ससमय-परसमयविऊ गंभीरो दित्तिमं सिवो सोमो ।*
*गुणसयकलिओ जुत्तो पवयणसारं परिकहेउं ॥४॥ [कल्पभा० २४१-२४४]*

सिवो त्ति मन्त्रादिसामर्थ्यादुपशमितोपद्रवः, युक्तः उचितः प्रवचनसारं परिकथयितुम् ६ ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तथा अयमनुयोगः कस्य शास्त्रस्यैवंभूतेन गुरुणा कर्त्तव्य इत्यपि वाच्यम् ७।

तथा तद्दारत्ति तस्य अनुयोगस्य द्वाराणि उपक्रमादीन्यत्रैव वक्ष्यमाणस्वरूपाणि वाच्यानि ८।

तथा भेदत्ति तेषामेव द्वाराणामानुपूर्वी-नाम-प्रमाणादिकोऽत्रैव वक्ष्यमाणस्वरूपो भेदो वक्तव्यः ९।

तथाऽनुयोगस्य लक्षणं वाच्यम्, यदाह –

*संधिया य पदं चेव, पयत्थो पयविग्गहो ।*
*चालणा य पसिद्धी य, छव्विहं विद्धि लक्खणं ॥१॥ [कल्पभा० ३०२]*

पसिद्धित्ति चालनायां सत्यां प्रसिद्धिः समाधानम्, 'विद्धि'त्ति जानीहि। व्याख्येयसूत्रस्य वा [५]*अलियमुवघायजणयं [कल्पभा० २७८-२८१, आवश्यकनि० ८८१-८८४]* इत्यादिद्वात्रिंशद्दोषरहितत्वादिकं लक्षणमत्र वक्तव्यम् १०।

तथा तस्यैव अनुयोगस्य अर्हा योग्या परिषद्वक्तव्या, सा च सामान्यतस्त्रिधा भवति, तद्यथा –

*[६]जाणंतिया अजाणंतिया य तह दुव्वियड्ढिया चेव ।*
*तिविहा य होइ परिसा तीसे नाणत्तगं वोच्छं ॥१॥*
*गुणदोसविसेसण्णू अणभिग्गहिया य कुस्सुइमएसु ।*
*सा खलु जाणगपरिसा गुणतत्तिल्ला अगुणवज्जा ॥२॥*
*खीरमिव रायहंसा जे घुट्टंती गुणे गुणसमिद्धा ।*
*दोसे वि य छड्डेत्ता(न्ता ?) ते वसभा धीरपुरिसत्ति* ॥३॥ इति ज्ञायकपरिषत्।
*जे हुंति पगइमुद्धा मिगछावग-सीह-कुक्कुडगभूया ।*
*रयणमिव असंठविया सुहसण्णप्पा गुणसमिद्धा ॥४॥* [कल्पभा० ३६४-३६७]

छावगशब्दः सर्वत्र संबध्यते, ततो मृग-सिंह-कुर्कुटशावो लघु मृगाद्यपत्यम्, तद्भूता अत्यन्तर्जुत्वसाम्यात् तत्सदृशी येत्यर्थः, सहजरत्नमिवासंस्कृता, सुहसण्णप्प त्ति सुखप्रज्ञापनीया।

*जा खलु अभाविया कुस्सुईहिं न य ससमए गहियसारा ।*

Jain Education International For Private & Personal Use Only www.jainelibrary.org

*अकिलेसकरा सा खलु वइरं छक्कोडिसुद्धं व ॥५॥ [कल्पभा० ३६८]*

षट्कोणशुद्धं वज्रमिव हीरक इव विशुद्धा या सा खलु 'अज्ञायकपरिषत्' इति वाक्यशेषः। इदानीं दुर्विदग्धपरिषदुच्यते –

*न य कत्थवि निम्माओ न य पुच्छइ परिभवस्स दोसेणं।*
*वत्थिव्व वायपुण्णो फुट्टइ गामिल्लगवियड्डो ॥६॥ [कल्पभा० ३७१]*
*किंचिम्मत्तग्गाही १ पल्लवगाही य २ तुरियगाही य ३।*
*दुव्विड्ढिया उ एसा भणइ तिविहा इमा परिसा ॥ [कल्पभा० ३६९]*

अत्राद्यपरिषद्द्वयमनुयोगार्हम्, तृतीया त्वयोग्येति **११**।

एतत् सर्वमभिधाय ततः सूत्रार्थो वक्तव्यः **१२** इति लेशतो व्याख्यातेयं गाथा। विस्तरार्थिना तु **कल्पपीठिका**ऽन्वेषणीयेति। एवं चानुयोगस्य द्वादश द्वाराणि वक्तव्यानि भवन्ति। तत्र शेषद्वारोपलक्षणार्थं कस्य शास्त्रस्यायमनुयोग इति सप्तमं द्वारं चेतसि निधाय **जइ सुयनाणस्स उद्देसो समुद्देसो** इत्यादिसूत्रप्रपञ्चपूर्वकमुक्तं सूत्रकृता – **इदं पुनः प्रस्थापनं प्रतीत्यावश्यकस्यानुयोग** इति।

**[ सू० ६ ] जइ आवस्सयस्स अणुओगो आवस्सयण्णं[१] किमंगं, अंगाइं ? सुयक्खंधो, सुयक्खंधा ? अज्झयणं, अज्झयणाइं ? उद्देसगो[२], उद्देसगा ? आवस्सयण्णं णो अंगं, णो अंगाइं, सुयक्खंधो, णो सुयक्खंधा, णो अज्झयणं, अज्झयणाइं, णो उद्देसगो[३], णो उद्देसगा।**

**[ चू० ६ ] आवस्सगण्णं[१]** इत्यादि। **ण**मिति वाक्यालंकारे देसीवयणतो वा। **अंगं अंगाइं** ति इच्चादि अट्ठ पुच्छातो, तासु णिण्णयवयणं- ततिय-छट्ठा पुच्छा आदेया, सेसा अणादेया, त्याज्या इत्यर्थः। एत्थ चोदक आह- आवस्सगं[२] **अंगं अंगाइं** ति पुच्छा ण कातव्वा, जतो **नंदि**वक्खाणे **आवस्सगं** अणंगपविट्ठं वक्खाणितं, इह य अणंगपविट्ठ[३]य-उक्कालियादिक्कमेण आवस्सगस्स उद्देसादिया भणिता, एवं भणिते का संका ?। आचार्या[४]ऽऽह – अकते **णंदि**वक्खाणे संका भवति। किह ? ण णियमो अवस्सं **णंदी** पढमं

वक्खाणेतव्वा, जतो णाणपंचकाभिधाणमेत्तमेव मंगलमिट्ठं । इहं पि **अंगा-ऽणंग-कालुक्कालिया**दिक्कमो जो दरिसितो सो वि 'कस्स सुतस्स उद्देसाइया पवत्तंते ?' इति जाणणत्थं भणितो, अणुयोगकहणे पुण ण सो सव्वो कमो घोसेतव्वो, जतो णाणपंचके वक्खाते भणितं – [५]*एत्थं पुण अहिकारो०* [ *आवश्यकनि० गा० ७९* ] गाहा। तत्थ वि अहिकारो अणुयोगेण। तस्स य इमे दारा भणिता –

[६]*णिक्खेवेगट्ठ णिरुत्त विहि पवित्ती य केण वा कस्स ।*
*तद्दार भेद लक्खण तदरिहपरिसा य सुत्तत्थो ॥१॥* [*कल्पभाष्ये गा०१४९, दशवै०नि०५*]

एतीसे वक्खाणं जधा **कप्पपेढे**। एत्थ य **कस्स** त्ति दारं, तत्थ वत्तव्वं आवस्सगस्स। तं **आवस्सगं किं अंगं अंगाइं** ति इच्चादि, एवं अट्ठपुच्छासंभवो, न दोष इत्यर्थः।

*खंधो नियमऽज्झयणा, अज्झयणा वि य ण खंधवइरित्ता।*
*तम्हा न दो वि गज्झा, अण्णतरं गेण्ह चोदेति ॥१॥* [ ]
[७]*आ० –खंधो त्ति सत्थणामं, तस्स य सत्थस्स भेद अज्झयणा।*
*फुड भिण्णत्था एवं, दोण्ह गहो भणति ता सूरी ॥२॥* [ ]

**[हा० ६] जइ आवस्सगस्से**त्यादि प्रश्नसूत्रं निर्वचनसूत्रं चोत्तानार्थमेव। नवरमाह चोदकः- इहाऽऽ**वश्यकं किमङ्गं** कि**मङ्गानी**त्यादिप्रश्नसूत्रस्यानवकाश एव, नन्द्यनुयोगादेवावगतत्वात्, तथाहि- तत्राऽऽवश्यकमनङ्गप्रविष्टश्रुताधिकार एव व्याख्यातम्, तथेहाप्यङ्गबाह्योत्कालिकादिक्रमेणैव आवश्यकस्योद्देशादीनां प्रतिपादितत्वादिति । अत्रोच्यते- यत्तावदुक्तं नन्द्यनुयोगादेवावगतत्वादिति तदयुक्तम्, यतो नायं नियमोऽवश्यमेव नन्दिरादौ व्याख्येयः। कुतो गम्यत इति चेत्, अधिकृत[१]सूत्रोपन्यासान्यथानुपपत्तेः इदमेव सूत्रं ज्ञापकमनियमस्येति। मङ्गलार्थमवश्यं व्याख्येय इति चेत्, न, ज्ञानपञ्चकाभिधानमात्रस्यैव मङ्गलत्वात्। यच्चोक्तम् -इहाप्यनङ्गप्रविष्टोत्कालिकादिक्रमेणैवाऽऽवश्यकस्योद्देशादयः प्रतिपादिता इति, एतदपि न बाधकमन्यार्थत्वात्, इहाङ्गप्रविष्टादिभेदभिन्नस्य श्रुतस्योद्देशादयः प्रवर्त्तन्ते इति ज्ञापनार्थमेतदित्यन्यार्थता । ***अन्ये तु*** व्याचक्षते – चारित्र्यपि भिन्नकर्मक्षयोपशमजन्यत्वाज् ज्ञानस्यानाभोगबहुलो भवति **माषतुष**वत् सोऽपि प्रज्ञापनीय

Jain Education International For Private & Personal Use Only www.jainelibrary.org

एवेति दर्शनार्थम् ।

[हे० ६] पुनरप्याह विनेयः – **जइ आवस्सगस्से**त्यादि, यद्यावश्यकस्य प्रस्तुतोऽनुयोगः, तर्हि आवश्यकं **ण**मिति वाक्यालङ्कारे, **किं**मिति परिप्रश्ने, किमेकं द्वादशाङ्गान्तर्गत**मङ्ग**मिदम् उत बहू**न्यङ्गानि**, अथैकः **श्रुतस्कन्धो** बहवो वा **श्रुतस्कन्धाः**, **अध्ययनं** वैकं बहूनि वाऽ**ध्ययनानि**, **उद्देशको** वा एको बहवो वा **उद्देशका** इत्यष्टौ प्रश्नाः । तत्र श्रुतस्कन्धः अध्ययनानि चेदमिति प्रतिपत्तव्यम्, षडध्ययनात्मकश्रुतस्कन्धरूपत्वादस्य, शेषास्तु षट् प्रश्ना अनादेयाः, अनङ्गादिरूपत्वादिति, एतदेवाह-**आवस्सयण्ण**मित्यादि ।

अत्राह-नन्वावश्यकं किमङ्गमङ्गानीत्येतत् प्रश्नद्वयमत्रानवकाशमेव, **नन्द्यध्ययन** एवास्यानङ्गप्रविष्टत्वेन निर्णीतत्वात्, तथात्राप्यङ्गबाह्योत्कालिकक्रमेणानन्तरमेवोक्तत्वादिति, अत्रोच्यते - यत्तावदुक्तं 'नन्द्यध्ययन एवे'त्यादि तदयुक्तम्, यतो नावश्यं नन्द्यध्ययनं व्याख्याय तत इदं व्याख्येयमिति नियमोऽस्ति, कदाचिदनुयोगद्वारव्याख्यानस्यैव प्रथमं प्रवृत्तेः, अनियमज्ञापकश्चायमेव सूत्रोपन्यासः, अन्यथा ह्यङ्गबाह्यत्वेऽस्य तत्रैव निश्चिते किमिहाङ्गानङ्गप्रविष्टचिन्तासूत्रोपन्यासेनेति । मङ्गलार्थमवश्यं नन्दिरादौ व्याख्येय इति चेत्, न, ज्ञानपञ्चकाभिधानमात्रस्यैव मङ्गलत्वात्तस्य चेहापि कृतत्वादिति । यच्चोक्तम् 'अत्राप्यङ्गबाह्योत्कालिकक्रमेणे'त्यादि तत्रापि समुदितानामुद्देश-समुद्देशा-ऽनुज्ञा-ऽनुयोगानां प्रश्नप्रकरणे तदुक्तम्, अत्र तु केवलोऽनुयोग एवाधिकृतः, तत्प्रस्तावे त्विदमेवोक्तम्-'इदं पुनः प्रस्थापनं प्रतीत्यावश्यकस्यानुयोगः' इत्यतो भिन्नप्रस्तावत्वात् पृच्छा क्रियते– **आवस्सयण्णं कि**मित्यादि, विस्मरणशीलाल्पबुद्धि**माषतुषा**दिकल्पसाध्वनुग्रहार्थं वेत्यदोषः ।

**[सू०७] तम्हा आवस्सयं णिक्खिविस्सामि, सुयं णिक्खिविस्सामि, खंधं णिक्खिविस्सामि, अज्झयणं णिक्खिविस्सामि ।**

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[ सू० ८ ] [1]जत्थ य जं जाणेज्जा णिक्खेवं णिक्खिवे [2]णिरवसेसं।**
**जत्थ वि य न जाणेज्जा चउक्कयं निक्खिवे तत्थ ॥१॥**

**[ सू० ९ ] से किं तं आवस्सयं ? आवस्सयं चउव्विहं पण्णत्तं। तंजहा — नामावस्सयं १, ठवणावस्सयं २, दव्वावस्सयं ३, भावावस्सयं ४।**

[चू० ७-९ ] **आवस्सगं णिक्खिविस्सामी**त्यादि सुत्तं जाव [आवस्सयं ति]।

[ हा० ७-९ ] इहाधिकृतानुयोगविषयीकृतशास्त्रनाम आवश्यक- श्रुत-स्कन्धा-ऽध्ययनानि, नाम च यथार्थादिभेदात् त्रिविधम्, तद्यथा-यथार्थमयथार्थमर्थशून्यं च। तत्र यथार्थं प्रदीपादि, अयथार्थं पलाशादि, अर्थशून्यं डित्थादि। तत्र यथार्थं शास्त्राभिधान-मिष्यते, तत्रैव समुदायार्थपरिसमाप्तेः। यत एवमतस्तन्निरूपयन्नाह — **तम्हा आवस्सय-**मित्यादि, तस्मादावश्यकं निक्षेप्स्यामीत्यादि उपन्याससूत्रं प्रकटार्थमेव। चोदकस्त्वाह —

*खंधो नियमज्झयणा अज्झयणा वि य ण खंधवइरित्ता।*
*तम्हा ण दो वि गेज्झा अण्णतरं गेण्ह चोदेति ॥१॥* [ ]

आचार्यस्त्वाह —

*खंधो त्ति सत्थनामं तस्स य सत्थस्स भेद अज्झयणा।*
*फुड भिण्णत्था एवं दोण्ह गहो भणति तो सूरी ॥१॥* [ ]

साम्प्रतं यदुक्तम् — आवश्यकं निक्षेप्स्यामीत्यादि, तत्र जघन्यतो निक्षेपभेदनियमना-याह — **जत्थ** गाहा। व्याख्या — **यत्र च** जीवादौ वस्तुनि **यं जानीयात्**, कम् ? **निक्षेपम्,** न्यासमित्यर्थः, यत्तदोर्नित्याभिसंबन्धात् तं **निक्षिपेत् निरवशेषं** समग्रम्, **यत्रापि च न जानीयात्** समग्रं निक्षेपजालं **चतुष्ककं** नामादि भावान्तं **निक्षिपेत् तत्र,** यस्माद् व्यापकं नामादिचतुष्टयमिति गाथार्थः।

**से किं त**मित्यादि प्रश्नसूत्रम्, अत्र '**से**' शब्दो मागधदेशीप्रसिद्धः अथशब्दार्थे वर्त्तते, अथशब्दश्च वाक्योपन्यासार्थः, तथा चोक्तम् — *अथ प्रक्रिया-प्रश्ना-ऽऽनन्तर्य-मङ्गलोपन्यास-प्रतिवचन-समुच्चयेषु* [ ], **किम्**इति परिप्रश्ने, **तद्**इति सर्वनाम

Jain Education International For Private & Personal Use Only www.jainelibrary.org

पूर्वप्रक्रान्तावमर्शि, अतोऽयं समुदायार्थः – अथ किं तदावश्यकम् ?, एवं प्रश्ने सति आचार्यः शिष्यवचनानुरोधेनादराधानार्थं प्रत्युच्चार्य निर्दिशति – अवश्यकर्त्तव्यमावश्यकम्, अथवा गुणानामावश्यमात्मानं करोतीत्यावश्यकं यथा अन्तं करोतीत्यन्तकः, प्राकृतशैल्या वा *वस निवासे* [*पा०धा० १००५, का०धा० १/६१४* ] इति गुणशून्यमात्मानमावासयति गुणैरित्यावासकम्, **चतुर्विधं प्रज्ञप्तम्,** चतस्रो विधा अस्येति चतुर्विधं प्रज्ञप्तं[१] प्ररूपितम्, अर्थतस्तीर्थकृद्भिः सूत्रतो गणधरैः, **तद्यथा – नामावश्यक**मित्यादि।

[हे० ७-९ ] तदेवं यस्माद् 'इदं पुनः प्रस्थापनं प्रतीत्यावश्यकस्यानुयोगः' इत्यनेनावश्यकमिति शास्त्रनाम निर्णीतं यस्माच्चाष्टस्वनन्तरोक्तप्रश्नेष्वावश्यकं श्रुतस्कन्धत्वेनाध्ययनकलापात्मकत्वेन च निर्णीतं तस्मात् किमित्याह – **तम्हा** इत्यादि। यस्मात् प्रस्तुतानुयोगविषयं शास्त्रमुक्तक्रमेणाऽऽवश्यकादिरूपतया निर्णीतं **तस्मादावश्यकं निक्षेप्स्यामि, श्रुतं निक्षेप्स्यामि, स्कन्धं निक्षेप्स्यामि, अध्ययनं निक्षेप्स्यामि,** इदमुक्तं भवति – आवश्यकादिरूपतया प्रकृतशास्त्रस्य निश्चितत्वादावश्यकादिशब्दानामर्थो निरूपणीयः, स च निक्षेपपूर्वक एव स्पष्टतया निरूपितो भवति, अतोऽमीषां निक्षेपः क्रियते। तत्र निक्षेपणं निक्षेपो यथासंभवमावश्यकादेर्नामादिभेदनिरूपणम्।

तत्र जघन्यतोऽप्यसौ चतुर्विध इति नियमार्थमाह – **जत्थ य** गाहा। व्याख्या – **यत्र च** जीवादौ वस्तुनि **यं जानीयात् निक्षेपं** न्यासम्, यत्तदोर्नित्याभिसंबन्धात्तत्र वस्तुनि तं निक्षेपं **निक्षिपेत्** निरूपयेत् **निरवशेषं** समग्रम्, **यत्रापि च न जानीया**न्निरवशेषं निक्षेपभेदजालं **तत्रा**पि नाम-स्थापना-द्रव्य-भावलक्षणं **चतुष्कं निक्षिपेत्,** इदमुक्तं भवति-यत्र तावन्नाम-स्थापना-द्रव्य-क्षेत्र-काल-भव-भावादिलक्षणा भेदा ज्ञायन्ते तत्र तैः सर्वैरपि वस्तु निक्षिप्यते, यत्र तु सर्वभेदा[१] न ज्ञायन्ते तत्रापि नामादिचतुष्टयेन वस्तु चिन्तनीयमेव, सर्वव्यापकत्वात्तस्य, न हि किमपि तद्वस्तु अस्ति यन्नामादिचतुष्टयं व्यभिचरतीति गाथार्थः।

तत्र 'यथोद्देशं निर्देशः' इत्यावश्यकनिक्षेपार्थमाह – **से किं तं आवस्सय**मित्यादि। अत्र **से**शब्दो मागधदेशीप्रसिद्धोऽथशब्दार्थे वर्त्तते, अथशब्दस्तु वाक्योपन्यासार्थः, तथा चोक्तम् – *अथ प्रक्रिया-प्रश्ना-ऽऽनन्तर्य-मङ्गलोपन्यास-प्रतिवचन-समुच्चयेषु*[ ] इति,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**कि**मिति परिप्रश्ने, **त**दिति सर्वनाम पूर्वप्रक्रान्तपरामर्शार्थे, ततश्चायं समुदायार्थ: – अथ किंस्वरूपं तदावश्यकम् ?, एवं प्रश्निते सत्याचार्यः शिष्यवचनानुरोधेन आदराधानार्थं प्रत्युच्चार्य निर्दिशति – **आवस्सयं चउव्विह**मित्यादि, अवश्यं कर्त्तव्यमावश्यकम्, अथवा गुणानाम् आ समन्ताद् वश्यमात्मानं करोतीत्यावश्यकम्, यथा अन्तं करोतीति अन्तकः, अथवा **आवस्सयं** ति प्राकृतशैल्या आवासकम्, तत्र *वस निवासे* [*पा० धा० १००५, का० धा० १/६१४*] इति गुणशून्यमात्मानम् आ समन्तात् वासयति गुणैरित्यावासकम्, **चउव्विहं पण्णत्तं** ति चतस्रो विधा भेदा अस्येति चतुर्विधं **प्रज्ञप्तं** प्ररूपितमर्थतस्तीर्थकरैः सूत्रतो गणधरैः, **तद्यथा – नामावस्सय**मित्यादि, नाम अभिधानम्, तद्रूपमावश्यकं नामावश्यकम्, आवश्यकाभिधानमेवेत्यर्थः, अथवा नाम्ना नाममात्रेणावश्यकं नामावश्यकं जीवादीत्यर्थः, तल्लक्षणं चेदम् –

*यद्वस्तुनोऽभिधानं स्थितमन्यार्थे तदर्थनिरपेक्षम् ।*
*पर्यायानभिधेयं च नाम यादृच्छिकं च तथा ॥१॥* [ ]

विनेयानुग्रहार्थमेतद्व्याख्या-यद् वस्तुनः इन्द्रादेः अभिधानम् इन्द्र इत्यादिवर्णावली-मात्रमिदमेव वा आवश्यकलक्षणवर्णचतुष्टयावलीमात्रं यत्तदोर्नित्याभिसंबन्धात् तन्नामेति संटङ्कः। अथ प्रकारान्तरेण नाम्नो लक्षणमाह – स्थितमन्यार्थे तदर्थनिरपेक्षं पर्यायानभिधेयं चेति, तदपि नाम, यत् कथंभूतमित्याह-अन्यश्चासावर्थश्चान्यार्थो गोपालदारकादिलक्षणः तत्र स्थितम्, अन्यत्रेन्द्रादावर्थे यथार्थत्वेन प्रसिद्धं सदन्यत्र गोपालदारकादौ यदारोपित-मित्यर्थः, अत एवाह – तदर्थनिरपेक्षमिति, तस्य इन्द्रादिनाम्नोऽर्थः परमैश्वर्यादिरूपस्तदर्थः, स चासावर्थश्चेति वा तदर्थः, तस्य निरपेक्षम्, गोपालदारकादौ तदर्थस्याभावात्, पुनः किंभूतं तदित्याह – पर्यायानभिधेयमिति, पर्यायाणां शक्र-पुरन्दरादीनामनभिधेयम् अवाच्यम्, गोपालदारकादयो हीन्द्रादिशब्दैरुच्यमाना अपि शचीपत्यादिरिव शक्र-पुरन्दरादि-शब्दैर्नाभिधीयन्ते, अतस्तन्नामापि नाम-तद्वतोरभेदोपचारात् पर्यायानभिधेयमित्युच्यते। चशब्दो नाम्न एव लक्षणान्तरसूचकः। शचीपत्यादौ प्रसिद्धं तन्नाम वाच्यार्थशून्ये अन्यत्र गोपालदारकादौ यदारोपितं तदपि नामेति तात्पर्यम्। तृतीयप्रकारेणापि तल्लक्षणमाह – यादृच्छिकं च तथेति, तथा यत् तथाविधव्युत्पत्तिशून्यं डित्थ-डवित्थादिरूपं यादृच्छिकं

Jain Education International For Private & Personal Use Only www.jainelibrary.org

स्वेच्छया नाम क्रियते तदपि नामेत्यार्यार्थः ।

**[सू० १०] से किं तं नामावस्सयं ? २ (=नामावस्सयं) जस्स णं जीवस्स वा अजीवस्स वा जीवाण वा अजीवाण वा तदुभयस्स वा तदुभयाण वा आवस्सये[1] त्ति नामं कीरए। सेतं नामावस्सयं।**

**[चू० १०]** *आवस्सगं ति णामं, कोई[1] कस्सति जहिच्छता[2] कुणते ।*
*दीसति लोए कस्सइ, जह* ***सीहग-देवदत्तादी*** *॥१॥*
*अज्जीवेसु वि केसु वि, आवासं भणंति एगदव्वं तु ।*
*जह अच्चित्तदुममिणं, भणंति सप्पस्स आवासं ॥२॥*
*जीवाण बहूण जधा, भणंति अगणिं तु मूसगावासं ।*
*अज्जीवा वि य बहवो, जह आवासं तु सउणिस्स ॥३॥*
*उभयं जीवा-ऽजीवं, तण्णिप्फण्णं भणंति आवासं ।*
*जह रादीणाऽऽवासं, देवावासं विमाणं वा ॥४॥*
*समुदाए[3] णुभताणं, कप्पावासं भणंति इंदस्स ।*
*णगरणिवेसावासं, गामावासं च इच्चादी ॥५॥* [ ]

**[हा० १० ] से किं त**मित्यादि । तत्र नाम अभिधानम्, नाम च तदावश्यकं च नामावश्यकम्, आवश्यकाभिधानमित्यर्थः, इह नाम्न इदं लक्षणम् –

*यद्वस्तुनोऽभिधानं स्थितमन्यार्थे तदर्थनिरपेक्षम् ।*
*पर्यायानभिधेयं च नाम यादृच्छिकं च तथा ॥१॥* [ ]

**यस्य** वस्तुनः, णमिति वाक्यालङ्कारे, **जीवस्य वा यावत्तदुभयानां वाऽऽवश्यकमिति नाम क्रियते सेत्त**मित्यादि तदेतन्**नामावश्यक**मिति समुदायार्थः । अवयवार्थस्त्वयम् –

*आवस्सयं ति नामं कोई कासति जहिच्छि(च्छ)या कुणति ।*
*दीसइ लोए एवं जह* ***सीहग-देवदत्तादी*** *॥१॥*

Jain Education International   For Private & Personal Use Only   www.jainelibrary.org

*अज्जीवेसु वि केसु यि आवासं भणति एगदव्वं तु।*
*जह अच्चित्तदुममिणं भणंति सप्पस्स आवासं ॥२॥*
*जीवाण बहूण जहा भणंति अगणिं तु मूसगावासं।*
*अज्जीवा वि हु बहवो जह आवासं तु सउणिस्स ॥३॥*
*उभयं जीवाजीवा तण्णिप्फण्णं भणंति आवासं।*
*जह राईणावासं देवावासं विमाणं वा ॥४॥*
*समुदाएणुभयाणं कप्पावासं भणंति इंदस्स।*
*णगरनिवासावासं गामावासं च इच्चादि ॥५॥ [ ]*

[हे० १०] नामावश्यकस्वरूपनिरूपणार्थं सूत्रकार एवाह– **से किं तं नामावस्सय**मित्यादि। अथ किं तन्नामावश्यकम् इति प्रश्ने सत्याह– **नामावस्सयं जस्स ण**मित्यादि, अत्र द्विकलक्षणेनाङ्केन सूचितं द्वितीयमपि **नामावस्सयं** ति पदं द्रष्टव्यम्, एवमन्यत्रापि यथासम्भवमभ्यूह्यम्, **ण**मिति वाक्यालङ्कारे, यस्य वस्तुनो जीवस्य वा अजीवस्य वा जीवानां वाऽजीवानां वा तदुभयस्य वा तदुभयानां वा आवश्यकमिति यन्नाम क्रियते **तन्नामावश्यक**मित्यादिपदेन सम्बन्धः, नाम च तदावश्यकं चेति व्युत्पत्तेः, अथवा यस्य जीवा-ऽजीवादिवस्तुनः आवश्यकमिति नाम क्रियते तदेव जीवादिवस्तु नामावश्यकम्, नाम्ना नाममात्रेणावश्यकं नामावश्यकमिति व्युत्पत्तेः, **वा**शब्दाः पक्षान्तरसूचका इति समुदायार्थः। तत्र जीवस्य कथमावश्यकमिति नाम सम्भवतीति, उच्यते- यथा लोके जीवस्य स्वपुत्रादेः कश्चित् सीहको देवदत्त इत्यादिनाम करोति तथा कश्चित् स्वाभिप्रायवशादावश्यकमित्यपि नाम करोति। अजीवस्य कथमिति चेत्, उच्यते – इहावश्यका-ऽऽवासकशब्दयोरेकार्थता प्रागुक्ता, ततश्चोद्‌र्ध्वशुष्कोऽचित्तो बहुकोटराकीर्णो वृक्षोऽन्यो वा तथाविधः कश्चित् पदार्थविशेषः सर्पादेरावासोऽयमिति लौकिकैर्व्यपदिश्यत एव, स च वृक्षादिर्यद्यप्यनन्तैः परमाणुलक्षणैरजीवद्रव्यैर्निष्पन्नस्तथाऽप्येकस्कन्धपरिणतिमाश्रित्य एकाजीवत्वेन विवक्षित इति स्वार्थिककप्रत्ययोपादानादेकाजीवस्यावासकनाम सिद्धम्, जीवानामपि बहूनामावासकनाम दृश्यते, यथा इष्टकापाकाद्यग्निर्मूषकावास इत्युच्यते, तत्र ह्यग्नौ किल मूषिकाः संमूर्च्छन्ति,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अतस्तेषामसंख्येयानामग्निजीवानां पूर्ववदावासकनाम सिद्धम्, अजीवानां तु यथा नीडं पक्षिणामावास उच्यते, तद्धि बहुभिस्तृणाद्यजीवैर्निष्पद्यते इति बहूनामजीवानामावासकनाम भवति, इदानीमुभयस्यावासकसंज्ञा भाव्यते - तत्र गृहदीर्घिका-ऽशोकवनिकाद्युपशोभितः प्रासादादिप्रदेशो राजादेरावास उच्यते, सौधर्मादिविमानं वा देवानामावासोऽभिधीयते, अत्र च जल-वृक्षादयः सचेतनरत्नादयश्च जीवाः, इष्टका-काष्ठादयोऽचेतनरत्नादयश्चाऽजीवाः, तन्निष्पन्नमुभयम्, तस्य कप्रत्ययोपादाने आवासकसंज्ञा सिद्धा। उभयानां त्वावासकसंज्ञा यथा- संपूर्णनगरादिकं राजादीनामावास उच्यते, संपूर्णः सौधर्म्मादिकल्पो वा इन्द्रादीनामावासोऽभिधीयते, अत्र च पूर्वोक्तप्रासादविमानयोर्लघुत्वादेकमेव जीवाजीवोभयं विवक्षितम्, अत्र तु नगरादीनां सौधर्म्मादिकल्पानां च महत्त्वाद् बहूनि जीवाजीवोभयानि विवक्षितानीति विवक्षया भेदो द्रष्टव्यः, एवमन्यत्रापि जीवादीनामावासकसंज्ञा यथासंभवं भावनीया, दिग्मात्रप्रदर्शनार्थत्वादस्य। निगमयन्नाह – **सेत्त**मित्यादि, **सेत**मित्यादि वा क्वचित् पाठः, तदेतन्नामावश्यकमित्यर्थः।

**[सू० ११] से किं तं ठवणावस्सयं ? ठवणावस्सयं - जण्णं कट्ठकम्मे[१] वा[२] चित्तकम्मे वा पोत्थकम्मे वा लेप्पकम्मे वा गंथिमे[३] वा वेढिमे वा पूरिमे वा संघाइमे वा अक्खे वा वराडए वा एगो[४] वा अणेगो वा सब्भावठवणाए वा असब्भावठवणाए वा आवस्सए त्ति ठवणा ठविज्जति[५] सेतं ठवणावस्सयं[६]।**

**[चू० ११] से किं तं ट्ठवणे**त्यादि सुत्तं।

*आवस्सयं करेंतो, ट्ठवणाए जं ठविज्जते साधू।*
*तं तह ठवणावासं, भन्नइ सा होज्जिमेहिं तु ॥१॥ [ ]*

कट्ठे कम्मं **कट्ठकम्मं**, तं च कोट्टिमं। **चित्रकर्म** प्रसिद्धम्। **पोत्थं** ति[१] पोता, तेसु कतं कम्मं **पोत्थकम्मं**, तं च धीतुल्लियकम्मं। अहवा धेल्लिकमादिसु[२] जं रूवं णिव्वत्तिज्जति तं **पोत्थकम्मं**। अहवा **पोत्थं** ति पोत्थको, तम्मज्झगं संपुडगं[३], तत्थ वत्तियाहि वट्टियं रूवं

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**पोत्थकम्मं**। अहवा **पोत्थं** जं पत्तच्छेज्जाकारेणं निव्वत्तिज्जति। **लेप्पकम्मं** पसिद्धं। **गंथिमं** ति ग्रथितं पुष्फमालावत्, एवं ग्रथितो आवस्सगं करेंतो साधू णिव्वत्तितो रंगबंधे वा तं ग्रथितम्। **वेढिमं, आणंदपुरे** पुष्पपूरकवत्, कलाकोसल्लेणं वा एक्कं दो तिन्नि वा वत्थे वेढेंतो आवस्सयं करेंतं साधुं णिव्वत्तेति। **पूरिमं** ति भरिमं प्रतिमावत्। **संघातिमं** कञ्चुकवत्। **अक्खा** प्रसिद्धा। **वराड** त्ति क[४]वडया घु[५]ल्लिया वा जेहि आसस्स गलेमालिया मुहमंडलं वा कीरति, एते किर झुसिरत्तणतो णो गज्झा; इमे गज्झा संखदलेसु वट्टादिघ[६]डिता **वराडया,** ते य गज्झा। एतेसु एगा-ऽणेगेसु इच्छिताागारणिव्वत्तणा सब्भावट्ठवणा, जा पुण इच्छिताकारविमुहा अणागिती सा असब्भावट्ठवणा इति।

[हा० ११] **से किं त**मित्यादि। तत्र स्थाप्यत इति स्थापना, स्थापना चावश्यकं चेति **स्थापनावश्यकम्,** आवश्यकवतः स्थापनेत्यर्थः, स्थापनालक्षणं चेदम् –

*यत्तु तदर्थवियुक्तं तदभिप्रायेण यच्च तत्करणि।*
*लेप्यादिकर्म तत् स्थापनेति क्रियतेऽल्पकालं च॥१॥* [ ]

**यत् ण**मिति वाक्यालङ्कारे, **काष्ठकर्म्मणि वा** याव**दावश्यकमिति स्थापना स्थाप्यते, सेत्त**मित्यादि **तदेतत् स्थापनावश्यक**मिति समुदायार्थः। अवयवार्थस्त्वयम् –

*आवासयं करेन्तो ठवणाए जं ठविज्जए साहू।*
*तं तह ठवणावासं भण्णति सा होज्जिमेहिं तु॥१॥* [ ]

काष्ठे कर्म्म **काष्ठकर्म्म,** तच्च कुट्टिमम्, तस्मिन्। **चित्रकर्म्म** प्रतीतम्। **पुस्तकर्म्म** धीतुल्लिकादि वस्त्रपल्लवसमुत्थं वा संपुटकं(क)मध्यवर्त्तिकालेख्यं वा पत्रच्छेदनिप्फण्णं वा, उक्तं च –

*धीतुल्लिगादि[१] वेल्लियकम्मादिनिव्वत्तियं च जाणाहि।*
*संपुडगवत्तिलिहियं पत्तच्छेज्जे य पोत्थंति॥१॥* [ ]

**लेप्यकर्म्म** प्रतीतम्। ग्रन्थिमं ग्रन्थिसमुदायजं पुष्पमालावत् जालिकावद्वा, निर्वर्त्तयन्ति च केचिदतिशयनैपुण्यान्वितास्तत्राप्यावश्यकवन्तं साधुमिति। एवं वेष्टिमादिष्वपि भावनीयम्, तत्र **वेष्टिमं** वेष्टनकसंभवम्, **आनन्दपुरे** [पुष्प]पूरकवत्, कलाकुशलभावतो

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वा कश्चिद् वस्त्रवेष्टनेनैवाऽऽवश्यकक्रियायुक्तं यतिमवस्थापयति । **पूरिमं** भरिमम्, सगर्भरीतिकादिभृतप्रतिमादिवत् । **संघातिमं** कंचुकवत् । **अक्षः** चन्दनकः । **वराटकः** कपर्दकः । **एतेषु एको वा** आवश्यकक्रियावान् **अनेके वा** तद्वन्तः **सद्भावस्थापनया वा असद्भावस्थापनया वा**, तत्र तदाकारवती सद्भावस्थापना, अतदाकारवती चासद्भावस्थापनेति । उक्तं च –

*[२]अक्खे वराडए वा कट्ठे पोत्थे व चित्तकम्मे वा ।*
*सब्भावमसब्भावं ठवणाकायं वियाणाहि ॥१॥*
*लेप्पगहत्थी हत्थि त्ति एस सब्भाविया भवे ठवणा ।*
*होइ असब्भावे पुण हत्थि त्ति निराकिती अक्खो ॥२॥[आवश्यकनि०१४३२-३३]*

आवश्यकमिति क्रिया-क्रियावतोरभेदात् तद्वानेव गृह्यते, **स्थापना स्थाप्यते** स्थापना क्रियते **सेत्त**मित्यादि तदेतत् **स्थापनावश्यकम्** ।

**[हे० ११]** इदानीं स्थापनावश्यकनिरूपणार्थमाह– **से किं त**मित्यादि । अथ किं तत् स्थापनावश्यकमिति प्रश्ने सत्याह- **ठवणावस्सयं जण्ण**मित्यादि, तत्र स्थाप्यते 'अमुकोऽयम्' इत्यभिप्रायेण क्रियते निर्वर्त्त्यत इति स्थापना काष्ठकर्म्मादिगतावश्यकवत्साध्वादिरूपा, सा चासौ आवश्यक-तद्वतोरभेदोपचारादावश्यकं च स्थापनावश्यकम्, स्थापनालक्षणं च सामान्यत इदम्-

यत्तु तदर्थवियुक्तं तदभिप्रायेण यच्च तत्करणि ।
लेप्यादिकर्म्म तत् स्थापनेति क्रियतेऽल्पकालं च ॥१॥ [ ] इति,

विनेयानुग्रहार्थमत्रापि व्याख्या-तुशब्दो नामलक्षणात् स्थापनालक्षणस्य भेदसूचकः, स चासावर्थश्च तदर्थो भावेन्द्र-भावावश्यकादिलक्षणस्तेन वियुक्तं रहितं यद्वस्तु तदभिप्रायेण भावेन्द्राद्यभिप्रायेण क्रियते स्थाप्यते तत् स्थापनेति सम्बन्धः, किंविशिष्टं यदित्याह-यच्च तत्करणि, तेन भावेन्द्रादिना सह करणिः सादृश्यं यस्य तत् तत्करणि, तत्सदृशमित्यर्थः । चशब्दात्तदकरणि चाक्षादि वस्तु गृह्यते, अतत्सदृशमित्यर्थः । किं पुनस्तदेवंभूतं वस्त्वित्याह- लेप्यादिकर्म्मेति, लेप्यपुत्तलिकादीत्यर्थः, आदिशब्दात्

Jain Education International For Private & Personal Use Only www.jainelibrary.org

काष्ठपुत्तलिकादि गृह्यते, अक्षादि वाऽनाकारम्। कियन्तं कालं तत् क्रियत इत्याह-अल्पः कालो यस्य तदल्पकालम्, इत्वरकालमित्यर्थः। चशब्दाद्यावत्कथिकं च शाश्वतप्रतिमादि। यत् पुनर्भावेन्द्राद्यर्थरहितं साकारमनाकारं वा तदभिप्रायेण क्रियते तत् स्थापनेति तात्पर्य-मित्यार्यार्थः।

इदानीं प्रकृतमुच्यते- **जं णं** ति, **ण**मिति वाक्यालङ्कारे, **यत् काष्ठकर्मणि वा चित्रकर्मणि वा यावत् वराटके वा एको वा अनेको वा सद्भावस्थापनया वा असद्भावस्थापनया वा आवस्सए** त्ति आवश्यक-तद्वतोरभेदोपचारात्तद्वानिह गृह्यते, ततश्चैको वा अनेके[1] वा, कथंभूताः ? अत उच्यते-आवश्यकक्रियावानावश्यकक्रियावन्तो वा, **ठवणा ठविज्जति** त्ति स्थापनारूपः स्थाप्यते क्रियते, आवृत्त्या बहुवचनान्तत्वे स्थापनारूपाः स्थाप्यन्ते क्रियन्ते, तत् **स्थापनावश्यक**मित्यादिपदेन सम्बन्ध इति समुदायार्थः । काष्ठकर्म्मादिष्वावश्यकक्रियां कुर्व्वन्तो यत् स्थापनारूपाः साध्वादयः स्थाप्यन्ते तत् स्थापनावश्यकमिति तात्पर्यम् ।

अधुना अवयवार्थ उच्यते – तत्र क्रियत इति कर्म, काष्ठे कर्म **काष्ठकर्म**, काष्ठनि-कुट्टितं रूपकमित्यर्थः। **चित्रकर्म** चित्रलिखितं रूपकम्। **पोत्थकम्मे व**त्ति, अत्र पोत्थं पोतं वस्त्रमित्यर्थः, तत्र कर्म्म, तत्पल्लवनिष्पन्नं धीउल्लिकारूपकमित्यर्थः, अथवा **पोत्थं** पुस्तकम्, तच्चेह संपुटकरूपं गृह्यते, तत्र कर्म्म, तन्मध्ये वर्त्तिकालिखितं रूपकमित्यर्थः, अथवा **पोत्थं** ताडीपत्रादि तत्र कर्म्म तच्छेदनिष्पन्नं रूपकम् । **लेप्यकर्म्म** लेप्यरूपकम् । **ग्रन्थिमं** कौशलातिशयाद् ग्रन्थिसमुदायनिष्पादितं रूपकम् । **वेष्टिमं** पुष्पवेष्टनक्रमेण निष्पन्न**मानन्दपुरा**दिप्रतीतरूपम्, अथवा एकं द्व्यादीनि वा वस्त्राणि वेष्टयन् कश्चित् रूपकम् उत्थापयति तद्वेष्टिमम् । **पूरिमं** भरिमं पित्तलादिमयप्रतिमावत् । **संघातिमं** बहुवस्त्रा-दिखण्डसंघातनिष्पन्नं कञ्चुकवत्। **अक्षः** चन्दनकः। **वराटकः** कपर्दकः। अत्र **वाचनान्तरे** अन्यान्यपि **दन्तकर्मा**दिपदानि दृश्यन्ते तान्यप्युक्तानुसारतो भावनीयानि, **वा**शब्दाः पक्षान्तरसूचकाः, यथासम्भवमेवमन्यत्रापि। एतेषु काष्ठकर्मादिषु आवश्यकक्रियां कुर्व्वन्तः एकादिसाध्वादयः सद्भावस्थापनया असद्भावस्थापनया वा स्थाप्यमानाः स्थापनावश्यकम्, तत्र काष्ठकर्मादिष्वाकारवती **सद्भावस्थापना**, साध्वाद्याकारस्य तत्र सद्भावात्। अक्षादिषु

Jain Education International For Private & Personal Use Only www.jainelibrary.org

त्वनाकारवती **असद्भावस्थापना**, साध्वाद्याकारस्य तत्रासद्भावादिति। निगमयन्नाह— **सेत्त**मित्यादि, तदेतत् **स्थापनावश्यक**मित्यर्थः।

**[सू० १२] नाम-ट्ठवणा[१]णं को पइविसेसो? णामं आवकहियं, ठवणा [२]इत्तिरिया वा होज्जा आवकहिया वा[३]।**

**[चू० १२] णामट्ठवणाणं को प[१]तिविसेसो** इत्यादि सूत्रम्।

*भावरहितम्मि दव्वे, णामं ठवणा य दो वि अविसिट्ठा।*
*इतरेतरं पडुच्चा, किह व विसेसो भवे तासिं? ॥१॥*
*कालकतोऽत्थ विसेसो, णामं ता धरति जाव तं दव्वं।*
*ठवणा दुभेद इत्तर, आवकहा इत्तरा इणमो ॥२॥*
*इह जो ठवणिंदकतो, अक्खो सो पुण ठविज्जते राया।*
*एवित्तर आवकहा, कलसादी जे विमाणेसु ॥३॥*
*अहव विसेसो भण्णति, अभिहाणं वत्थुणो णिराकारं।*
*ठवणा जो आगारो, सो वि य णामस्स णिरवेक्खो ॥४॥* [          ]

**[हा० १२]** साम्प्रतं नाम-स्थापनयोरभेदाशङ्कापोहा[१]येदं [सूत्रं **नाम-ठवणाण-**मित्यादि, कः प्रतिविशेषो नामस्थापनयोरिति] समासार्थः। आक्षेप-परिहारलक्षणो विस्तरार्थस्त्वयम्—

*भावरहितम्मि दव्वे, णाम-ट्ठवणाओ दो वि अविसिट्ठा।*
*इतरेतरं पडुच्चा, किह व विसेसो भवे तासिं? ॥१॥*
*कालकतोऽत्थ विसेसो, णामं ता धरति जाव तं दव्वं।*
*ठवणा दुहेय इत्तर आवकहा इत्तरा इणमो ॥२॥*
*इह जो ठवणिंदकओ, अक्खो सो पुण ठविज्जए राया।*
*एवित्तर आवकहा, कलसादी जे विमाणेसु ॥३॥*
*अहव विसेसो भण्णति, अभिधाणं वत्थुणो णिरागारं।*

Jain Education International    For Private & Personal Use Only    www.jainelibrary.org

*ठवणा जो आगारो, सो वि य णामस्स णिरवेक्खो ॥४॥* [ ]

[हे० १२] अत्र नाम-स्थापनयोरभेदं पश्यन्निदमाह– **नाम-ठवणाणं को पइविसेसो** त्ति। नाम-स्थापनयोः कः प्रतिविशेषः ?, न कश्चिदित्यभिप्रायः, तथाहि- आवश्यकादिभावार्थशून्ये गोपालदारकादौ द्रव्यमात्रे यथा आवश्यकादि नाम क्रियते, तत्स्थापनाऽपि तथैव तच्छून्ये काष्ठकर्मादौ द्रव्यमात्रे क्रियते, अतो भावशून्ये द्रव्यमात्रे क्रियमाणत्वाविशेषान्नानयोः कश्चिद्विशेषः, अत्रोत्तरमाह- **नामं आवकहिय**मित्यादि, नाम यावत्कथिकं स्वाश्रयद्रव्यस्याऽस्तित्वकथां यावदनुवर्त्तते, न पुनरन्तराऽप्युपरमते, **स्थापना** पुन**रित्वरी** स्वल्पकालभाविनी **वा** स्याद् **यावत्कथिका वा**, स्वाश्रयद्रव्ये अवतिष्ठमानेऽपि काचिदन्तराऽपि निवर्त्तते काचित्तु तत्सत्तां यावदवतिष्ठत इति भावः, तथाहि– नाम आवश्यकादिकं *मेरु-जम्बूद्वीप-कलिङ्ग-मगध-सुराष्ट्रा*दिकं वा यावत् स्वाश्रयो गोपालदारकदेहादिः शिलासमुच्चयादिर्वा समस्ति तावदवतिष्ठत इति तद्यावत्कथिकमेव, स्थापना त्वावश्यकत्वेन योऽक्षः स्थापितः स क्षणान्तरे पुनरपि तथाविधप्रयोजनसम्भवे इन्द्रत्वेन स्थाप्यते, पुनरपि च राजादित्वेनेत्यल्पकालीना, शाश्वतप्रतिमादिरूपा तु यावत्कथिका, तस्याश्च 'अर्हदादिरूपेण सर्वदा तिष्ठतीति स्थापना' इति व्युत्पत्तेः स्थापनात्वमवसेयम्, न तु स्थाप्यत इति स्थापना, शाश्वतत्वेन केनापि स्थाप्यमानत्वाभावादिति, तस्माद्भावशून्यद्रव्याधारसाम्येऽप्यस्त्यनयोः कालकृतो विशेषः। अत्राह- ननु यथा स्थापना काचिदल्पकालीना तथा नामापि किञ्चिदल्पकालीनमेव, गोपालदारकादौ विद्यमानेऽपि कदाचिदनेकनामपरावृत्तिदर्शनात्, सत्यम्, किन्तु प्रायो नाम यावत्कथिकमेव, यस्तु क्वचिदन्यथोपलम्भः सोऽल्पत्वान्नेह विवक्षित इत्यदोषः। उपलक्षणमात्रं चेदं कालभेदेनैतयोर्भेदकथनम्, अपरस्यापि बहुप्रकारभेदस्य सम्भवात्, तथाहि-यथेन्द्रादिप्रतिमास्थापनायां कुण्डला-ऽङ्गदादिविभूषितः सन्निहितशची-वज्रादिराकार उपलभ्यते न तथा नामेन्द्रादौ, एवं यथा तत्स्थापनादर्शनाद् भावः समुल्लसति नैवमिन्द्रादिनामश्रवणमात्रात्, यथा च तत्स्थापनायां लोकस्योपयाचितेच्छा-पूजाप्रवृत्ति-समीहितलाभादयो दृश्यन्ते नैवं नामेन्द्रादावित्येवमन्यदपि वाच्यमिति।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[सू० १३] से किं तं दव्वावस्सयं ? दव्वावस्सयं दुविहं पण्णत्तं । तंजहा— आगमतो य १, णोआगमतो य २।**

**[ चू० १३ ] से किं तं दव्वावस्सए** इत्यादि।

*देहा-ऽऽगमकिरिया वा, दव्वावासं भणंति समयण्णू[१]।*
*भावाभावत्तणतो, दव्वजियं भावरहितं वा ॥१॥* [ ]

दव्वावासयं किं भण्णति ?, उच्यते— देहो आगमो क्रिया वा तिन्नि वि भावसुण्णा दव्वावस्सयं । कथं ?, उच्यते— जधा भावसुन्नत्तणतो दव्वजियं भणंति तधा आवस्सगभावसुन्नत्तणतो दव्वावस्सयं पि भणंति।

**[ हा० १३ ] से किं त**मित्यादि, तत्र द्रवति गच्छति तांस्तान् पर्यायानिति द्रव्यम्, द्रव्यं च तदावश्यकं च **द्रव्यावश्यकम्,** भावावश्यककारणमित्यर्थः । द्रव्यलक्षणं चेदम्—

*भूतस्य भाविनो वा भावस्य हि कारणं तु यल्लोके।*
*तद् द्रव्यं तत्त्वज्ञैः सचेतना-ऽचेतनं कथितम् ॥१॥* [ ]

इह चाऽऽवश्यकशब्देन प्रशस्तभावाधिष्ठिता देहादय एवोच्यन्ते, तद्विकलास्तु त एव द्रव्यावश्यकमिति। उक्तं च —

*देहा-ऽऽगम-किरियाओ दव्वावासं भणंति सव्वण्णू।*
*भावाभावत्तणओ दव्वजितं भावरहितं वा ॥१॥* [ ]

विवक्षया विवक्षितभावरहित एवेह गृह्यते जीवः, न सामान्यतः, भावशून्यत्वानुपपत्तेः, अलं प्रसङ्गेन, प्रकृतं प्रस्तुमः । द्र**व्यावश्यकं द्विविधं प्रज्ञप्तम्, तद्यथा — आगमतः** आगममाश्रित्य, **नोआगमतश्च,** नोशब्दार्थं यथावसरमेव वक्ष्यामः । **च**शब्दौ द्वयोरपि तुल्यपक्षतोद्भावनार्थौ।

**[हे० १३]** उक्तं स्थापनावश्यकम्, इदानीं द्रव्यावश्यकनिरूपणाय प्रश्नं कारयति- **से किं त**मित्यादि । अथ किं तत् **द्रव्यावश्यक**मिति पृष्टे सत्याह- **दव्वावस्सयं दुविह-**

Jain Education International For Private & Personal Use Only www.jainelibrary.org

मित्यादि। तत्र द्रवति गच्छति ताँस्तान् पर्यायानिति द्रव्यं विवक्षितयोरतीत-भविष्यद्भावयो: कारणम्, अनुभूतविवक्षितभावमनुभविष्यद्विवक्षितभावं वा वस्त्वित्यर्थ:, द्रव्यं च तदावश्यकं च द्रव्यावश्यकम्, अनुभूतावश्यकपरिणाममनुभविष्यदावश्यकपरिणामं वा साधुदेहादीत्यर्थ:। द्रव्यलक्षणं च सामान्यत इदम् –

भूतस्य भाविनो वा भावस्य हि कारणं तु यल्लोके।
तद् द्रव्यं तत्त्वज्ञै: सचेतनाचेतनं कथितम् ॥१॥ [ ]

व्याख्या- तद् द्रव्यं तत्त्वज्ञै: कथितम्, यत् कथंभूतमित्याह-यत् कारणं हेतु:, कस्येत्याह-भावस्य पर्यायस्य, कथंभूतस्येत्याह-भूतस्य अतीतस्य भाविनो वा भविष्यतो वा, लोके आधारभूते, तच्च सचेतनं पुरुषादि अचेतनं च काष्ठादि भवति। एतदुक्तं भवति – य: पूर्वं स्वर्गादिष्विन्द्रादित्वेन भूत्वा इदानीं मनुष्यादित्वेन परिणत: सोऽतीतस्येन्द्रादिपर्यायस्य कारणत्वात् साम्प्रतमपि द्रव्यत इन्द्रादिरभिधीयते, अमात्यादिपदपरिभ्रष्टामात्यादिवत्, तथा अग्रेऽपि य इन्द्रादित्वेनोत्पत्स्यते स इदानीमपि भविष्यदिन्द्रादिपदपर्यायकारणत्वात् द्रव्यत इन्द्रादिरभिधीयते, भविष्यद्राजकुमारराजवत्, एवमचेतनस्यापि काष्ठादेर्भूत-भविष्यत्पर्यायकारणत्वेन द्रव्यता भावनीयेत्यार्यार्थ:।

इत: प्रकृतमुच्यते-तच्चेह द्रव्यरूपमावश्यकं प्रकृतम्, तत्रावश्यकोपयोगाधिष्ठित: साध्वादिदेहो वन्दनकादिसूत्रोच्चारणलक्षणश्चागम: आवर्त्तादिका क्रिया चावश्यकमुच्यते, आवश्यफोपयोगशून्यास्तु ता एव देहा-ऽऽगम-क्रिया द्रव्यावश्यकम्, तच्च **द्विविधं प्रज्ञप्तमिति, तद्यथा – आगमत:** आगममाश्रित्य **नोआगमत:** नोआगममाश्रित्य, **नो**शब्दार्थं यथावसरमेव वक्ष्याम:, **च**शब्दौ द्वयोरपि स्वस्वविषये तुल्यप्राधान्यख्यापनार्थौ।

**[ सू० १४ ] से किं तं आगमतो दव्वावस्सयं ? आगमतो दव्ववस्सयं - जस्स णं आवस्सए त्ति पदं सिक्खितं ठितं जितं मितं परिजितं णामसमं घोससमं अहीणक्खरं अणच्चक्खरं [1]अव्वाइद्धक्खरं अक्खलियं अमिलियं [2]अवच्चामेलियं पडिपुण्णं [3]पडिपुण्णघोसं कंठोट्ठविप्प[4]मुक्कं गुरुवायणोवगयं। से णं तत्थ वायणाए [5]पुच्छणाए परियट्टणाए धम्मकहाए,**

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[६]णो अणुप्पेहाए। कम्हा ? अणुवओगो दव्वमिति कट्टु।**

**[ चू० १४ ]** तत्थ जं आगमतो दव्वावस्सयं तं इमं – **जस्स आवस्सए त्ति पदं सिक्खितं** इत्यादि। जं आदितो आरब्भ पढंतेण अंतं णीतं तं **सिक्खितं**। तं चेव हितए अविस्सरणभावट्ठितं **ठितं** भन्नति। जं परावत्तयतो परेण वा पुच्छितस्स आदिमज्झंते सव्वं वा सिग्घमागच्छति तं **जितं**। जं वण्णतो लहु-गुरुय-बिंदु-मत्ताहिं पद-पाद-सिलोगादिहि य संखित्तं तं **मितं** भण्णति। जं कमेण य उक्कमेण य अणेगधा आगच्छति तं **परिजितं**। जधा सणामं सिक्खितं ठितं च तेण समं जं तं **णामसमं**। अधवा गुरूवदिट्ठं जं सिक्खितं तं **णामसमं** स्वनामवत्। उदत्तादिया घोसा, ते जधा गुरूहिं उच्चरिता तधा गहितं ति **घोससमं**। **[अहीणक्खरं** ति **]** एग-दुगादिअक्खरहीणं ण भवति। **अणच्चक्खरं** ति अधियक्खरं ण भवति। **अव्वाइद्धं** अविवरीतक्खरं पद-पाद-सिलोगादीहि य। उवलबहुलभूमीए जधा हलं खलते तधा जं परावत्तयतो खलते तं खलितं, ण खलितं **अक्खलितं**। अण्णोन्नसत्थमिस्सं तं मिलितं, दिट्ठंतो असमाणधण्णमेलो व्व, एवं जं ण मिलितं तं **अमिलितं**। उच्चरतो वा पद-पाद-सिलोगादीहिं वा **अमिलितं**, विच्छिण्णयतीत्यर्थः। एगातो च्चेव सत्थातो जे जे एकाधिकारिसुत्ता ते सव्वे वीणीउं एगतो करेति एवं विच्चामेलितं, अहवा समतिविकप्पिते तस्समाणे सुत्ते कातुं छुभतो विच्चामेलितं, दिट्ठंतो कोलियकतपायसो व्व →[१]अहवा भेरीकंथ व्व←, एवं ण विच्चामेलितं **अविच्चामेलितं**, जधा **गणधर**दब्धस्वभावस्थितमेवेत्यर्थः। बिंदु-मत्तादिएहिं जं[२] अणूणातिरित्तं तं **पडिपुन्नं** भण्णति। जातिबद्धं वा छंदेण लहु-गुरुअंसेहिं **पडिपुण्णं**। → [३]अत्थेण वा **पडिपुण्णं**। ← उदत्तादिएहिं वा घोसेहिं उच्चरतो **पडिपुन्नं-(न्नघोसं?)**, गुरुणा अव्वत्तं[४] ण भासितं बाल-मूकभणितं व। कहं वा भासतो गहितं ? उच्यते, कंठे वट्टितेण परिफुडओट्ठविप्पमुक्केण सरेण भासतो गहितं। एवं **गुरुसमीवातो वायणागतं**, ण क[५]ण्णाहाडितं पोत्थयातो वा अधीतं। तमेवं आवस्सए त्ति सुतपदं अधिज्जित्ता **से णं** 'सः' अधीतश्रुतः **तत्थे**ति आवस्सतसुते अणुवयोगतो वा वायणादी करेज्ज। **णो अणुप्पेहाए** त्ति दव्वावस्सयं ण लब्भति, जतो नियमा अणुप्पेहा उवयोगपुव्विया भवति। पर आह – सेसेसु कम्हा दव्वावस्सयं ? उच्यते – **अणुवयोगो दव्वमिति कट्टु**, जम्हा वायणादिसु

Jain Education International For Private & Personal Use Only www.jainelibrary.org

उवयोगा-ऽनुपयोगसंभव इत्यर्थः।

[ हा० १४ ] **से किं त**मित्यादि, **आगमतो द्रव्यावश्यकं जस्स ण**मित्यादि, यस्य कस्यचिद् **ण**मिति वाक्यालङ्कारे, **आवश्यकमित्ये**तत् **पदम्**, इह चाधिकृतपक्षालम्बनं शास्त्रमभिगृह्यते, **शिक्षितं** भवति, स तत्र वाचनादिभिर्वर्त्तमानोऽपि द्रव्यावश्यकमिति क्रिया। अत्र च [१]*सुपां सुलुग्* [ *पा० ७/१/३९* ] इत्यादिना च्छन्दसि एन (इते?) शिक्षितमित्यपि भवति। तत्र **शिक्षित**मिति अन्तं नीतम्, अधीतमित्यर्थः। **स्थित**मिति चेतसि स्थितम्, न प्रच्युतमिति यावत्। **जित**मिति परिपाटिं कुर्वतो द्रुतमागच्छतीत्यर्थः। **मित**मिति वर्णादिभिः परिसंख्यातमिति हृदयम्। **परिजित**मिति सर्वतो जितं परिजितम्, परावर्त्तनां कुर्वतो यदुत्क्रमेणाप्यागच्छतीत्यभिप्रायः। नाम्ना समं **नामसमम्**, नाम अभिधानम्, एतदुक्तं भवति – स्वनामवत् शिक्षितादिगुणोपेतमिति। घोषाः उदात्तादयः, वाचनाचार्याभिहितघोषैः समं **घोषसमम्**। अक्षरन्यूनं हीनाक्षरम्, न हीनाक्षर**महीनाक्षरम्**। अधिकाक्षरम् अत्यक्षरम्, नाधिकाक्षर**मन[त्य]क्षर**मिति। विपर्यस्तरत्नमालागतरत्नानीव न व्याविद्धानि अक्षराणि यस्मिँस्तद**व्याविद्धाक्षरम्**। उपलाकुलभूमिलाङ्गलवन्न स्खलित**मस्खलितम्**। न मिलित**ममिलितम्**, असदृशधान्यमेलकवन्न विपर्यस्तपद-वाक्य-ग्रन्थमित्यर्थः, असंसक्तपद-वाक्यविच्छेदं वेति। अनेकशास्त्रग्रन्थसङ्करात् अस्थानच्छिन्नग्रन्थनाद्वा न व्यत्याम्रेडितं कोलिकपायसवद् भेरीकन्थावच्चेत्**यव्यत्याम्रेडितम्**। अस्थानच्छिन्नग्रन्थनेन व्यत्याम्रेडितं यथा – [२]*प्राप्तराज्यस्य रामस्य राक्षसा निधनं गते*(ता इ)त्यादि। **प्रतिपूर्णं** ग्रन्थतोऽर्थतश्च, तत्र ग्रन्थतो मात्रादिभिर्यत् प्रतिनियतप्रमाणं छन्दसा वा नियतमानमिति, अर्थतः प्रतिपूर्णं नाम न साकाङ्क्षमव्यापकं स्वतन्त्रं वेति। उदात्तादिघोषाविकलं **परिपूर्ण-घोषम्**। आह – **घोषसम**मित्युक्तम्, ततोऽस्य को विशेषः? इति, उच्यते – घोषसममिति शिक्षितमधिकृत्योक्तम्, प्रतिपूर्णघोषं तूच्चार्यमाणं गृह्यत इत्ययं विशेषः। कण्ठश्चौष्ठौ च **कण्ठोष्ठम्**, [३]प्राण्यङ्गत्वादेकवद्भावः, तेन **विप्रमुक्त**मिति विग्रहः, नाव्यक्त(क्तं) बाल-मूकभाषितवत्। **वाचनया उपगतं** गुरुवाचनया हेतुभूतयाऽवाप्तम्, न कर्णाघाटकेन शिक्षितमित्यर्थः, पुस्तकाद्वा अधीतमिति। **सः** इति सत्त्वः, **ण**मिति वाक्यालङ्कारे, **तत्र**

Jain Education International For Private & Personal Use Only www.jainelibrary.org

आवश्यके **वाचनया प्रतिप्रश्नेन परावर्त्तनेन धर्मकथया** 'वर्त्तमानो द्रव्यावश्यक'मिति वाक्यशेषः, **नोऽनुप्रेक्षया** व्यापृतो द्रव्यावश्यकम्, **कस्माद्** ? **अनुपयोगो द्रव्यमिति कृत्वा**, अनुप्रेक्षया च तदभावात्। तत्र ग्रन्थतः शिष्याध्यापनं **वाचना**। अनवगतार्थादौ गुरुं प्रति **प्रश्नः**। ग्रन्थस्य पुनः पुनरभ्यसनं **परावर्त्तनम्**। अहिंसादिलक्षणधर्मान्वाख्यानं **धर्मकथा**। ग्रन्थार्थानुचिन्तन**मनुप्रेक्षा**। आह— आगमतोऽनुपयुक्तो द्रव्यावश्यकमित्येतावतैवाभिलषितार्थसिद्धेः शिक्षितादिश्रुतगुणकीर्त्तनमनर्थकमिति, उच्यते— शिक्षितादिश्रुतगुणकीर्त्तनं कुर्वन्निदं ज्ञापयति— यथेह सकलदोषविप्रयुक्तमपि श्रुतं निगदतो द्रव्यश्रुतं भवति द्रव्यावश्यकं च, एवं सर्व एव ईर्यादिक्रियाविशेषाः अनुपयुक्तस्य विकला इति, उपयुक्तस्य तु यथा स्खलितादिदोषदुष्टमपि निगदतः [भाव ?]श्रुतम्, एवमीर्यादयोऽपि क्रियाविशेषाः कर्ममलापगमायेति।

एत्थ य अवायदंसणत्थं हीणक्खरम्मि उदाहरणम्- इहऽड्ढभरहम्मि **रायगिहं** नगरं। तत्थ राया **सेणिओ** नाम होत्था। तस्स पुत्तो पयाणुसारी चउव्विहबुद्धिसंपन्नो **अभओ** णाम होत्था। अण्णया तेणं कालेणं तेणं समएणं समणे भगवं **महावीरे** इहऽ**ड्ढभरहम्मि** विहरमाणे तम्मि णगरे समोसरिंसु। तत्थ य बहवे सुर-सिद्ध-विज्जाहरा धम्मसवणनिमित्तं समागच्छिंसु। ततो धम्मकहावसाणे णियणियभवणाणि गच्छंताणं एगस्स विज्जाहरस्स णहगामिणीए विज्जाए एक्कमक्खरं पम्हुट्ठमासी। तओ तं वियलविज्जं णियगभवणं गंतुमचाएंतं मंडुक्कं वोप्पद-णिवयमाणं **सेणिए** अदक्खु। ततो से भगवंतं पुच्छिंसु। से य भगवं **महावीरे** अकहिंसु। तं च कहिज्जमाणं निसुणेत्ता **सेणियपुत्ते अभए** विज्जाहरं एवं वयासी-जइ ममं सामण्णसिद्धिं करेसि ततोऽहं ते अक्खरं लभामि पयाणुसारित्तणओ। से य कहिंसु। ततो से **अभए** तमक्खरं लभिंसु, लभित्ता य विज्जाहरस्स कहिंसु। ततो से य पुण्णविज्जो तीए विज्जाए **अभयस्स** साहणोवायं कहेत्ता णियगभवणं गमिंसु त्ति। एस दिट्ठंतो। अयमत्थोवणओ— जहा तस्स विज्जाहरस्स हीणक्खरदोसेणं णहगमणमेव पम्हुट्ठमासी, तम्मि य अहुंते विहला विज्जा। एवं हीनाक्षरेऽर्थभेदः, अर्थभेदात् क्रियाभेदः, ततो मोक्षाभावः, तदभावे च दीक्षावैयर्थ्यमिति।

अहियक्खरम्मि उदाहरणम्— [४]**पाडलिपुत्ते** नगरे **चंदगुत्त**पुत्तस्स **बिंदुसारस्स** पुत्तो

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**असोगो** नाम राया। तस्स **असोगस्स** पुत्तो **कुणालो** नाम, **उज्जेणी** से कुमारभोत्ती[ए] दिण्णा। सो खुड्डओ। अण्णता तस्स रण्णो निवेदितं जहा कुमारो साइरेगट्ठवासो जाओ त्ति। ताहे रण्णा सयमेव लेहो लिहिओ जहाऽहीयतु कुमारो। कुमारस्स य मादीसवक्कीए रण्णो पासट्ठियाए [तत्थ पच्छण्णो बिन्दू पाडिओ, रण्णा अवाइय] मुंद्दित्ता **उज्जेणिं** पेसिओ, वाइओ। वायगा पुच्छिया – किं लिहियं? ते णेच्छंति कहिउं। ताहे कुमारेण सयमेव वाइओ, चिंतियं च णेणं-अम्हं **मोरिय**वंसियाणं अपडिहया आणा ओ कहमहं अप्पणो पिउणो आणं भंजामि?। तओ अणेण तत्तसलागाए अच्छीणि अंजियाणि। ताहे रण्णा णायं। परितप्पित्ता **उज्जेणी** अण्णस्स कुमारस्स दिण्णा। तस्स वि कुमारस्स अण्णो गामो दिण्णो। अण्णया तस्स **कुणाल**स्स अंधयस्स पुत्तो जाओ। णामं च से कयं **संपती**। सो अंधयकुणालो गंधव्वे अतीव कुसलो। अण्णया य अण्णायउ(च)ज्जाए गायंतो हिंडइ। तत्थ रण्णो निवेदियं – जहा एरिसो तारिसो गंधव्विओ अंधलउ त्ति। तओ रण्णा भणियं– आणेह त्ति। ताहे आणिओ जवणियंतरिओ गायति। जाहे अतीव **असोगो** अक्खित्तो ताहे भणति – किं ते देमि?। तओ एत्थ **कुणालेण** गीतं –

*__चंदगुत्त__पवोत्तो उ, __बिंदुसारस्स__ णत्तुओ।*
*__असोगसिरिणो__ पुत्तो, अंधो जायति कागणिं॥१॥* [*कल्पभा० गा० २९४*]

ताहे रण्णा पुच्छितं – को एस तुमं?। तेण कहितं-तुब्भं चेव पुत्तो। ततो जवणियं अवसारेउं कंठे पघेत्तुं अंसुपातो कओ, भणियं च – किं देमि ते?। तेण भणियं- कागणिं मे देहि। रण्णा भणियं – किं कागणिए व(वि) तुमं वा(ना)रिहसि जं कागणिं जायसि?। ततो अमच्चेहिं भणियं – सामि! रायपुत्ताणं रज्जं कागणि भण्णति। रण्णा भणियं – किं तुमं काहिसि रज्जेणं?। **कुणालेण** भणियं – मम पुत्तो अत्थि **संपती** णाम कुमारो। तओ से दिण्णं रज्जं। सो च्चेव उवणओ, णवरमहियक्खरेणं ति अभिलावो कायव्वो।

अहवा भावाहिए लोकियं इमं अक्खाणयं – कामियसरस्स तने(डे)व वंजुलरुक्खो महतिमहालओ। तत्थ किर रुक्खे अवलगिउं जो सरे पडति सो जइ तिरिक्खजोणिओ तो मणुस्सो होति, अह मणुस्सो पडति ततो देवो होति, अह पुणो बीयं वारं पडति तो पुण सो च्चेय होइ। तत्थ वाणरो सपत्तिओ ओयरति पतिदिणं पाणितं पातुं। अण्णया पाणि[य]पिणयट्ठयाए

Jain Education International For Private & Personal Use Only www.jainelibrary.org

आगतो संतो वंजुलरुक्खाओ मणुस्सित्थिमिहुणगं कामसरे पडितं, ततो तं देवमिहुणगं जायं पेच्छति। तओ वाणरो सपत्तिओ संपहारेति जहा रुक्खेऽवलगिउं सरे पडामो जा देवमिहुणगं भवामो। तओ पडिताणि, उरालं माणुसजुयलं जायं। सो भणइ – [पुणो] पडामो, जाहे देवजुयलगं भवामो। इत्थी वारेती – को जाणति मा ण होमो देवा ?। पुरिसो भणति – जइ ण होज्जामो, किं माणुसत्तणं पि णस्सिहिति ?। तीए भणियं – को जाणइ त्ति। ततो सो तीए वारिज्जमाणो वि पडिओ, पुणो वि वाणरो चेव जाओ, पच्छा सा रायपुरिसेहिं गहिया रण्णो भज्जा जाया। इतरो वि मायारएहिं गहिओ, खेड्डाओ सिक्खावितो। अण्णया य ते मायारगा रण्णो पुरओ पेच्छं देंति। राया वि सह तीए देवीए पेच्छति। ताहे सो वाणरो देविं निज्झाएंतो अहिलसति, तओ तीए अणुकंपाए वाणरो भणिओ –

*जो जहा वट्टए कालो, तं तहा सेव वाणरा !।*
*मा वंजुलपरिब्भट्ठो, वाणरा ! पडणं सर ॥१॥* [कल्पभा० गा० २९५]

उपनयः पूर्ववत्।

भावहीणाधितोभए वि उदाहरणम् – जहा काइ अगारी पुत्तस्स गिलाणस्स णेहेणं
*तित्त-कटुभेसयाइं मा णं पीलेज्ज ऊणए देइ।*
*पउणति ण तेहिं अहिएहिं मरति बालो तहाऽऽहारे ॥१॥* [कल्पभा० गा० २८९]

[हे० १४] अत्राद्यभेदजिज्ञासुराह – **से किं त**मित्यादि। अथ किं **तदागमतो द्रव्यावश्यक**मिति। आह – **आगमतो दव्वावस्सयं जस्स ण**मित्यादि, **ण**मिति पूर्ववत्, **जस्स** त्ति यस्य कस्यचित् **आवस्सए त्ति पयं** ति आवश्यकपदाभिधेयं शास्त्रमित्यर्थः, ततश्च यस्य कस्यचिदावश्यकशास्त्रं **शिक्षितं स्थितं जितं** यावत् **वाचनोपगतं** भवति, **से णं तत्थे**ति स जन्तुस्तत्र आवश्यकशास्त्रे वाचना-प्रच्छना-परिवर्त्तना-धर्म्मकथाभिर्वर्त्तमानोऽप्यावश्यकोपयोगे अवर्त्तमानः आगमतः आगममाश्रित्य द्रव्यावश्यकमिति समुदायार्थः। अत्राह – नन्वागममाश्रित्य द्रव्यावश्यकमित्यागमरूपमिदं द्रव्यावश्यकमित्युक्तं भवति, एतच्चायुक्तम्, यत आगमो ज्ञानम्, ज्ञानं च भाव एवेति कथमस्य द्रव्यत्वमुपपद्यते ?, सत्यमेतत्, किन्त्वागमस्य कारणमात्मा तदधिष्ठितो देहः शब्दश्चोपयोगशून्यसूत्रोच्चारणरूप

Jain Education International For Private & Personal Use Only www.jainelibrary.org

इहास्ति, न तु साक्षादागमः, एतच्च त्रितयमागमकारण-त्वात् कारणे कार्योपचारादागम उच्यते, कारणं च विवक्षितभावस्य द्रव्यमेव भवतीत्युक्तमेवेत्यदोषः।

तत्रादित आरभ्य पठनक्रियया यदन्तं नीतं त**च्छिक्षित**मुच्यते, तदेवाविस्मरणतश्चेतसि स्थितत्वात् **स्थित**मप्रच्युतमित्यर्थः, परावर्त्तनं कुर्व्वतः परेण वा क्वचित् पृष्टस्य यच्छीघ्रमागच्छति त**ज्जितम्**, विज्ञातश्लोक-पद-वर्णादिसंख्यं **मितम्**, परि समन्तात् सर्व्वप्रकारैर्जितं **परिजितम्**, परावर्त्तनं कुर्व्वतो यत् क्रमेणोत्क्रमेण वा समागच्छतीत्यर्थः, नाम अभिधानम्, तेन समं **नामसमम्**, इदमुक्तं भवति – यथा स्वनाम कस्यचिच्छिक्षितं जितं मितं परिजितं भवति तथैतदपीत्यर्थः, घोषा उदात्तादयः, तैर्वाचनाचार्याभिहितघोषैः समं **घोषसमम्**, यथा गुरुणा अभिहिता घोषास्तथा शिष्योऽपि यत्र शिक्षते तद् घोषसममिति भावः, एक-द्व्यादिभिरक्षरैर्हीनं हीनाक्षरम्, न तथा **अहीनाक्षरम्**, एकादिभिरक्षरैरधिकमत्यक्षरम्, न तथा **अनत्यक्षरम्**, **अव्वाइद्धक्खरं** ति विपर्यस्तरत्नमालागतरत्नानीव व्याविद्धानि विपर्यस्तान्यक्षराणि यत्र तद् व्याविद्धाक्षरम्, न तथाऽव्याविद्धाक्षरम्, **अव्वाइद्ध**मिति *क्वचित् पाठः*, तत्रापि व्याविद्धाक्षरयोगाद् व्याविद्धम्, न तथाऽव्याविद्धम्, उपलशकलाद्याकुलभूभागे लाङ्गलमिव स्खलति यत्तत् स्खलितम्, न तथा**ऽस्खलितम्**, अनेकशास्त्रसम्बन्धीनि सूत्राण्येकत्र मीलयित्वा यत्र पठति तत् मिलितमसदृशधान्यमेलकवत्, अथवा परावर्त्तमानस्य यत्र पदादिविच्छेदो न प्रतीयते तन्मीलितम्, न तथा**ऽमीलितम्**, एकस्मिन्नेव शास्त्रेऽन्यान्यस्थाननिबद्धान्येकार्थानि सूत्राण्येकत्र स्थाने समानीय पठतो व्यत्याम्रेडितम्, अथवा **आचारा**दिसूत्रमध्ये स्वमतिचर्चितानि तत्सदृशानि सूत्राणि कृत्वा प्रक्षिपतो व्यत्याम्रेडितम्, अस्थानविरतिकं वा व्यत्याम्रेडितम्, न तथा**ऽव्यत्याम्रेडितम्**, सूत्रतो बिन्दु-मात्रादिभिरन्यूनमर्थतस्त्वध्याहारा-ऽऽकाङ्क्षादिरहितं **प्रतिपूर्णम्**, उदात्तादिघोषैरविकलं **प्रतिपूर्णघोषम्**। अत्राह – घोषसममित्युक्तमेव तत् क इह विशेष इति, उच्यते, घोषसममिति शिक्षाकालमधिकृत्योक्तम्, प्रतिपूर्णघोषं तु परावर्त्तनादिकालमधिकृत्येति विशेषः, कण्ठश्चौष्ठश्च कण्ठौष्ठमिति प्राण्यङ्गत्वात् समाहारः, तेन विप्रमुक्तं **कण्ठौष्ठविप्रमुक्तम्**, बाल-मूकभाषितवद्यदव्यक्तं न भवतीत्यर्थः, गुरुप्रदत्तया वाचनया उपगतं प्राप्तं **गुरुवाचनोपगतम्**, न तु कर्णाघाटकेन शिक्षितं न वा पुस्तकात् स्वयमेवाधीतमिति भावः।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तदेवं यस्य जन्तोरावश्यकशास्त्रं शिक्षितादिगुणोपेतं भवति स जन्तुस्तत्रावश्यकशास्त्रे **वाचनया** शिष्याध्यापनलक्षणया **पृच्छनया**ऽनवगतार्थादिर्गुरुं प्रति प्रश्नलक्षणया **परावर्त्तनया** पुनः पुनः सूत्रार्थाभ्यासलक्षणया **धर्मकथया** अहिंसादिधर्म्मप्ररूपणस्वरूपया 'वर्त्तमानोऽपि, अनुपयुक्तत्वात्' इति साध्याहारम् आगमतो द्रव्यावश्यकमित्यनेन सम्बन्धः।

ननु यथा वाचनादिभिस्तत्र वर्त्तमानोऽपि द्रव्यावश्यकं भवति तथाऽनुप्रेक्षयाऽपि तत्र वर्त्तमानस्तद्भवति ?, नेत्याह- **नो अणुप्पेहाए** त्ति, अनुप्रेक्षया ग्रन्थार्थानुचिन्तनरूपया तत्र वर्त्तमानो न द्रव्यावश्यकमित्यर्थः, अनुप्रेक्षाया उपयोगमन्तरेणाभावात्, उपयुक्तस्य च द्रव्यावश्यकत्वायोगादिति भावः । अत्राह परः - **कम्ह** त्ति, ननु कस्माद्वाचनादिभिस्तत्र वर्त्तमानोऽपि द्रव्यावश्यकम् ? कस्माच्चानुप्रेक्षया तत्र वर्त्तमानो न तथा ? इति प्रच्छकाभिप्रायः, एवं पृष्टे सत्याह – **अणुवओगो दव्वमिति कट्टु** त्ति अनुपयोगो द्रव्यमिति कृत्वा, उपयोजनमुपयोगो जीवस्य बोधरूपो व्यापारः, स चेह विवक्षितार्थे चित्तस्य विनिवेशस्वरूपो गृह्यते, न विद्यतेऽसौ यत्र सोऽनुपयोगः पदार्थः, स विवक्षितोपयोगस्य कारणमात्रत्वात् द्रव्यमेव भवति इति कृत्वा अस्मात् कारणाद् अनन्तरोक्तमुपपद्यत इति शेषः, एतदुक्तं भवति-उपयोगपूर्व्वका अनुपयोगपूर्वकाश्च वाचना-प्रच्छनादयः संभवन्त्येव, तत्रेह द्रव्यावश्यकचिन्ताप्रस्तावादनुपयोगपूर्व्वका गृह्यन्ते, अत एव सूत्रेऽनभिहितस्याप्यनुपयुक्तत्वस्याध्याहारस्तत्र कृतः, अनुपयोगस्तु भावशून्यता, तच्छून्यं च वस्तु द्रव्यमेव भवतीत्यतो वाचनादिभिस्तत्र वर्त्तमानोऽपि द्रव्यावश्यकम्, अनुप्रेक्षा तूपयोगपूर्विकैव संभवति, अतस्तत्र वर्त्तमानो न तथेति भावार्थः।

अत्राह— नन्वागमतोऽनुपयुक्तो वक्ता द्रव्यावश्यकमित्येतावतैवेष्टसिद्धेः शिक्षितादिश्रुतगुणसमुत्कीर्त्तनमनर्थकम्, अत्रोच्यते, शिक्षितादिगुणोत्कीर्त्तनं कुर्व्वन्निदं ज्ञापयति-यदुतैवंभूतमपि निर्दोषं श्रुतमुच्चारयतोऽनुपयुक्तस्य द्रव्यश्रुतं द्रव्यावश्यकमेव च भवति, किं पुनः सदोषम् ?, उपयुक्तस्य तु स्खलितादिदोषदुष्टमपि निगदतः भावश्रुतमेव भवति । एवमन्यत्रापि प्रत्युपेक्षणादिक्रियाविशेषाः सर्वे निर्दोषा अप्यनुपयुक्तस्य तथाविधफलशून्या एव संपद्यन्ते, उपयुक्तस्य तु मतिवैकल्यादितः सदोषा अप्यमी कर्ममलापगमायैवेत्यलं विस्तरेण।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अत्राह – ननु भवत्वेवम्, किन्तु हीनाक्षरे सूत्रे समुच्चारिते को दोषो येनोक्तमहीनाक्षरमिति, अत्रोच्यते – लोकेऽपि तावद्विद्या-मन्त्रादिभिरक्षरादिहीनैरुच्चार्यमाणैर्विवक्षितफलवैकल्य-मनर्थावाप्तिश्च दृश्यते, किं पुन: परममन्त्रकल्पे सिद्धान्ते ? तथाहि – **राजगृह**नगरे समवसृतस्य भगवत*श्चरमतीर्थाधिपते*र्वन्दनार्थं विबुध-विद्याधरनरनिवह: **श्रेणिक**श्च सपुत्र: समाययौ। ततो भगवदन्तिके धर्मं श्रुत्वा प्रतिनिवृत्तायां परिषदि कस्यचिद्विद्याधरस्य गगनोत्पतन-हेतुविद्यासंबन्ध्येकमक्षरं विस्मृतिपथमवततार, विस्मृते च तस्मिन् किञ्चिन्नभस्युत्पत्य पुनर्निपतत्यसौ, पुनरुत्पतति पुनश्च निपतति। एवं च कुर्वन्तममुं विलोक्य **श्रेणिकेन** भगवान् पृष्ट: – किमित्ययं महाभाग: खेचरो विधुरितपक्ष: पक्षीव नभसि किञ्चिदुत्पत्य पुनर्निपततीति ? भगवता च विद्याक्षरविस्मरणव्यतिकरस्तस्मै निवेदित:, तं च निवेद्यमानं श्रुत्वा **अभयकुमार:** खेचरमुपसृत्यैवमवादीत् – भो: खेचर ! यदि मां समानसिद्धिकं करोषि तदा त्वद्विद्याऽक्षरमुपलभ्य कथयामि । प्रतिपन्नं च तेन । **अभयकुमारस्य** चैकस्मादपि पदादनेकपदाभ्यूहनशक्तिरस्तीति शेषाक्षरानुसारेणोपलभ्य तदक्षरं निवेदितं खेचरस्य। सोऽपि संजातसंपूर्णविद्यो हृष्ट: **श्रेणिक**सुताय विद्यासाधनोपायं कथयित्वा गत: समीहितप्रदेशमिति एष दृष्टान्त:। उपनयस्त्वयम् – यथा तस्य विद्याधरस्य हीनाक्षरतादोषान्नभोगमनमुपरतम्, तदुपरमे च व्यर्थैव विद्या, तथेहापि हीनाक्षरतायामर्थभेद:, तद्भेदे क्रियाभेद:, तद्भेदे च मोक्षाभाव:, तदभावे च दीक्षादिग्रहणवैयर्थ्यमेवेति। एवमधिकाक्षरादिष्वपि दोषा: सदृष्टान्ता अभ्यूह्य वाच्या:।

**[सू० १५] [१] णेगमस्स[१] एगो अणुवउत्तो आगमओ एगं दव्वास्सयं, [२]दोण्णि अणुवउत्ता आगमओ दोण्णि दव्वावस्सयाइं, तिण्णि अणुवउत्ता आगमओ तिण्णि दव्वावस्सयाइं, एवं जावइया अणुव[३]उत्ता तावइयाइं ताइं णेगमस्स आगमओ दव्वावस्सयाइं।**

**[२] [४]एवमेव ववहारस्स वि।**

**[३] संगहस्स एगो वा अणेगा वा अणुवउत्तो वा अणुवउत्ता वा**

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**आगमओ दव्वास्सयं वा दव्वावस्सयाणि वा से एगे दव्वावस्सए।**

**[४] उज्जुसुयस्स एगो अणुवउत्तो आगमओ एगं दव्वावस्सयं, पुहत्तं नेच्छइ।**

**[५] तिण्हं सद्दनयाणं जाणए[५] अणुवउत्ते अवत्थू।→ कम्हा[६] ? जइ जाणए अणुवउत्ते ण भवति[७]।← सेतं आगमओ दव्वावस्सयं।**

**[चू० १५]** इदाणिं जं आगमतो दव्वावस्सतं तं णयेहिं मग्गिज्जति, जतो भणितं **णेगमस्स एगो अणुवयुत्तो** इत्यादि सूत्रम्। **जावइया अणुवयुत्ता आगमतो तत्तियाइं दव्वावस्सयाइं**, णेगमस्स भेदपधाणत्तणतो भेदाणुसारित्तणतो त्ति। संगहस्स जं आगमतो दव्वावस्सतं तं विभागङ्कितं पि एगं चेव, भूतकंठे[१] सूत्रवत्, आगमदव्वावस्सयस्स य णिच्चत्तणतो णिरवयवत्तणतो अकिरियत्तणतो सव्वगतत्तणतो य सामन्नमेत्तस्स संगहस्स एगं दव्वावस्सगं। ववहारस्स जहा णेगमस्स, सव्वसंववहारालंबित्तणतो ववहारस्स य विसेसाधीणत्तणतो। उज्जुसुत्तो एगं आगमदव्वावस्सयं आयत्थं वट्टमाणकालियं च इच्छति, कज्जकरणत्तणओ, स्वधनवत्; सेसं णेच्छति, पयोयणाभावा, परधनवत्। **तिण्हं सद्दणताणं जाणतो अणुवयुत्तो अवत्थुं**। कहं ? **जति जाणतो** तो **अणुवयुत्तो ण भवति**, अह अणुवउत्तो तो जाणतो ण भवइ, दो वि परोप्परं एते विरुद्धा पदा, शब्दनयाश्च निश्चितवस्तुस्वरूपग्राहकाः, असमंजसं णेच्छन्तीत्यर्थः। गतं आगमतो दव्वावस्सगं।

**[हा० १५]** साम्प्रतमिदमेव द्रव्यावश्यकं नयैर्निरूप्यते, ते च मूलनया नैगमादयः, तथा चोक्तम् –

*[१]णेगम संगह ववहारे उज्जुसुत्ते चेव होति बोधव्वे।*
*सद्दे य समभिरूढे एवंभूते य मूलनया॥१॥ [आवश्यकनि०गा० ७५४]*

**तओ णेगमस्से**त्यादि, **नैगमस्यैकोऽनुपयुक्तो** देवदत्त **आगमतः एकं द्रव्यावश्यकम्, द्वावनुपयुक्तौ** देवदत्त-यज्ञदत्तौ **आगमतो द्वे द्रव्यावश्यके, त्रयः अनुपयुक्ता** देवदत्त-यज्ञदत्त-सोमदत्ताः **आगमतस्त्रीणि द्रव्यावश्यकानि,** किं बहुना ?

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**एवं यावन्तोऽनुपयुक्ता** देवदत्तादय**स्तावन्त्येव तानि नैगमस्याऽऽगमतो द्रव्यावश्यकानि**, एवमतीतान्यनागतानि च प्रतिपद्यत इति, नैगमस्य सामान्य-विशेषाभ्युपगम-प्रधानत्वात्, विशेषाणां च विवक्षितत्वात्। आह — एवं सामान्य-विशेषाभ्युपगमरूपत्वाद् अस्य सम्यग्दृष्टि[त्व]प्रसङ्गः, न, परस्परतोऽत्यन्तनिरपेक्षत्वाभ्युपगमात्। उक्तं च —

*दोहि वि णएहिं नीतं सत्थमुलूएण तह वि मिच्छत्तं।*
*जं सविसयप्पहाणत्तणेण अण्णोण्णनिरवेक्खो (क्खा?)॥१॥ [सन्मति० का० गा० ४९]*

**एवमेव ववहारस्स वि**, एवमेव यथा नैगमस्य तथा व्यवहारस्यापि एकः अनुपयुक्तो देवदत्तः आगमत एकं द्रव्यावश्यकमित्यादि, अस्य व्यवहारनिष्ठत्वात्, व्यवहारस्य च विशेषायत्तत्वाद् विशेषव्यतिरेकेण च सामान्यासिद्धेः। विशेषाभ्युपगमसाम्याद-तिदेशेनैवाधिकृतनयमताभिधानलक्षणेष्टार्थसिद्धेर्लाघवार्थं नैगमनयमतोपन्यासानन्तरं व्यवहारनयमतोपन्यास इति।

**संगहस्से**त्यादि, **सङ्ग्रहस्यैको वाऽनेके वाऽनुपयुक्तो वा अनुपयुक्ता वा आगमतो द्रव्यावश्यकं वा द्रव्यावश्यकानि वा से एगि** त्ति तद् एकं **द्रव्यावश्यकं** सामान्यापेक्षया द्रव्यावश्यकम्, सामान्यमात्रप्रतिपादनपरत्वादस्य, सामान्यव्यतिरेकेण विशेषासिद्धेः।

**उज्जुसुतस्से**त्यादि, ऋजुसूत्रस्यै**को** वा**ऽनुपयुक्तो** देवदत्तः **आगमत एकं द्रव्यावश्यकम्, पृथक्त्वं नेच्छति**। अयमत्र भावार्थः — वर्तमानकालभावि आत्मीयं चेच्छति, तस्यैवार्थक्रियासमर्थत्वात्, स्वधनवत्; अतीता-ऽनागत-परकीयानि तु नेच्छति, अतीता-ऽनागतयोर्विनष्टानुत्पन्नत्वात् परकीयस्य च स्वकार्याप्रसाधकत्वादिति।

**तिण्हं सद्दणयाण**मित्यादि, त्रयाणां शब्दनयानां शब्द-समभिरूढैवम्भूतानां **ज्ञः अनुपयुक्तः अवस्तु** अभाव इत्यर्थः। **कस्मादि**ति कस्मात् कारणात् ? यदि **ज्ञः अनुपयुक्तो न भवति**, कुत एतत् ?, उपयोगरूपत्वाद् ज्ञानस्य, ततश्च ज्ञोऽनुपयुक्तश्चेत्य-सम्भव एव। **सेत्त**मित्यादि, तदेत**दागमतो द्रव्यावश्यकम्**। आह — कोऽयमागमो नाम ? इति, उच्यते, ज्ञानम्, यदि ज्ञानम् कथमस्य द्रव्यत्वम्, भावरूपत्वाद् ज्ञानस्येति, सत्यमेतत्, किन्त्वागमस्य कारणमात्मा देहः शब्दश्च, द्रव्यं च कारणमुक्तम्, अतस्तत्कारणत्वादागम

Jain Education International For Private & Personal Use Only www.jainelibrary.org

इति, कारणे कार्योपचारात्।

[हे० १५] इह जिनमते सर्वमपि सूत्रमर्थश्च श्रोतृजनमपेक्ष्य नयैर्विचार्यते,

*[1]नत्थि नएहिं विहूणं सुत्तं अत्थो य जिणमए किंचि।*
*आसज्ज उ सोयारं नए नयविसारओ बूया ॥१॥* [ आवश्यकनि० ७६१ ]

इति वचनात्। अत इदमपि द्रव्यावश्यकं नयैश्चिन्त्यते। ते च मूलभेदानाश्रित्य नैगमादयः सप्त। तदुक्तम् —

*[2]नेगम-संगह-ववहार-उज्जुसुए चेव होइ बोधव्वे।*
*सद्दे य समभिरूढे एवंभूते य मूलनया ॥१॥* [आवश्यकनि० ७५४]

तत्र नैगमस्तावत् कियन्ति द्रव्यावश्यकानीच्छतीत्याह — **नेगमस्से**त्यादि, सामान्य-विशेषादिप्रकारेण नैकः अपि तु बहवो गमा वस्तुपरिच्छेदा यस्यासौ निरुक्तविधिना ककारस्य लोपान्नैगमः, सामान्य-विशेषादिप्रकारैः बहुरूपवस्त्वभ्युपगमपर इत्यर्थः। तस्य **नैगमस्यैको** देवदत्तादिर**नुपयुक्त** आगमत **एकं द्रव्यावश्यकम्,** द्वौ देवदत्तयज्ञदत्ता**वनुपयुक्तौ आगमतो द्वे द्रव्यावश्यके, त्रयो** देवदत्त-यज्ञदत्त-सोमदत्ता **अनुपयुक्ता आगमतस्त्रीणि द्रव्यावश्यकानि**। किं बहुना ? **एवं यावन्तो** देवदत्तादयो**ऽनुपयुक्तास्तावन्त्येव तान्य**तीतादिकालत्रयवर्त्तीनि **नैगमस्यागमतो द्रव्यावश्यकानि**। एतदुक्तं भवति - नैगमो हि सामान्यरूपं विशेषरूपं च वस्त्वभ्युपगच्छत्येव, न पुनर्वक्ष्यमाणसंग्रहवत् सामान्यरूपमेव, ततो विशेषवादित्वस्येह प्राधान्येन विवक्षितत्वाद्यावन्तः केचन देवदत्तादिविशेषा अनुपयुक्तास्तावन्ति सर्वाण्यप्यस्य द्रव्यावश्यकानि, न पुनः संग्रहवत् सामान्यवादित्वादेकमेवेति भावः।

**एवमेव ववहारस्स वि** त्ति, व्यवहरणं व्यवहारो लौकिकप्रवृत्तिरूपः, तत्प्रधानो नयोऽपि व्यवहारः, तस्यापि एवमेव नैगमवदेको देवदत्तादिरनुपयुक्त आगमत एकं द्रव्यावश्यकमित्यादि सर्वं वाच्यम्, इदमुक्तं भवति- व्यवहारनयो लोकव्यवहारोपकारिण एव पदार्थानभ्युपगच्छति, न शेषान्, लोकव्यवहारे च जलाहरण-व्रणपिण्डीप्रदानादिके घट-निम्बादिविशेषा एवोपकुर्व्वाणा दृश्यन्ते, न पुनस्तदतिरिक्तं तत्सामान्यमिति

Jain Education International · For Private & Personal Use Only · www.jainelibrary.org

विशेषानेव वस्तुसत्त्वेन प्रतिपद्यतेऽसौ, न सामान्यम्, व्यवहारानुपकारित्वाद्विशेष-व्यतिरेकेणानुपलभ्यमानत्वाच्चेति, अतो विशेषवादिनैगममतसाम्येनातिदिष्टः। अत्र चातिदेशेनैवेष्टार्थसिद्धेर्ग्रन्थलाघवार्थं संग्रहमतिक्रम्य व्यवहारोपन्यासः कृत इति भावनीयम्।

**संगहस्से**त्यादि, सर्वमपि भुवनत्रयान्तर्वर्त्ति वस्तुनिकुरम्बं संगृह्णाति सामान्यरूपतयाऽध्यवस्यतीति संग्रहः, तस्य मते **एको वा अनेके वा अनुपयुक्तो वाऽनुपयुक्ता वा** यदागमतो **द्रव्यावश्यकं वा द्रव्यावश्यकानि वा** तत् किमित्याह - **से एगे** त्ति तदेकं **द्रव्यावश्यकम्**। इदमत्र हृदयम्- संग्रहनयः सामान्यमेवाभ्युपगच्छति, न विशेषान्, अभिदधाति च - सामान्याद्विशेषा व्यतिरिक्ता वा स्युः अव्यतिरिक्ता वा ? यद्याद्यः पक्षस्तर्हि न सन्त्यमी, निःसामान्यत्वात्, खरविषाणवत्। अथापरः पक्षस्तर्हि सामान्यमेव ते, तदव्यतिरिक्तत्वात्, सामान्यस्वरूपवत्। तस्मात् सामान्यव्यतिरेकेण विशेषासिद्धेर्यानि कानिचिद् द्रव्यावश्यकानि तानि तत्सामान्याव्यतिरिक्तत्वादेकमेव संग्रहस्य द्रव्यावश्यकमिति।

**उज्जुसुयस्से**त्यादि, ऋजु अतीता-ऽनागत-परकीयपरिहारेण प्राञ्जलं वस्तु सूत्रयति अभ्युपगच्छतीति ऋजुसूत्रः। अयं हि वर्त्तमानकालभाव्येव वस्त्वभ्युपगच्छति, नातीतं विनष्टत्वात्, नाप्यनागतम्, अनुत्पन्नत्वात्, वर्त्तमानकालभाव्यपि स्वकीयमेव मन्यते, स्वकार्यसाधकत्वात्, स्वधनवत्, परकीयं तु नेच्छति स्वकार्याप्रसाधकत्वात् परधनवत्, तस्मादेको देवदत्तादिरनुपयुक्तोऽस्य मते आगमत एकं द्रव्यावश्यकमस्ति, **पुहत्तं नेच्छइ** त्ति अतीतानागतभेदतः परकीयभेदतश्च **पृथक्त्वं** पार्थक्यं **नेच्छत्यसौ**, किं तर्हि ? वर्त्तमानकालीनं स्वगतमेव चाभ्युपैति, तच्चैकमेवेति भावः।

**तिण्हं सद्दनयाण**मित्यादि, शब्दप्रधाना नयाः शब्दनयाः शब्द-समभिरूढैवम्भूताः, ते हि शब्दमेव प्रधानमिच्छन्ति, अर्थं तु गौणम्, शब्दवशेनैवार्थप्रतीतेः। तेषां त्रयाणां शब्दनयानां **ज्ञायको**ऽथ चा**नुपयुक्त** इत्येत**दवस्तु**, न सम्भवतीदमित्यर्थः। **कम्ह** त्ति कस्मादेवमुच्यते इत्याह - **जई**त्यादि, **यदि ज्ञायक**स्तर्ह्य**नुपयुक्तो न भवति**, ज्ञानस्योपयोगरूपत्वात्। इदमत्र हृदयम्- आवश्यकशास्त्रज्ञस्तत्र चानुपयुक्त आगमतो द्रव्यावश्यकमिति प्राग् निर्णीतम्, एतच्चामी न प्रतिपद्यन्ते, यतो यद्यावश्यकशास्त्रं जानाति कथमनुपयुक्तः ? अनुपयुक्तश्चेत् कथं जानाति, ज्ञानस्योपयोगरूपत्वात् ?

Jain Education International For Private & Personal Use Only www.jainelibrary.org

यदप्यागमकारणत्वादात्म-देहादिकमागमत्वेनोक्तं तदप्यौपचारिकत्वादमी न मन्यन्ते, शुद्धनयत्वेन मुख्यवस्त्वभ्युपगमपरत्वात् । तस्मादेतन्मते द्रव्यावश्यकस्यासंभव इति । निगमयन्नाह - **सेत्त**मित्यादि, तदेतद**ागमतो द्रव्यावश्यकम्**।

**[सू० १६] से किं तं नोआगमतो दव्वावस्सयं ? नोआगमतो दव्वावस्सयं तिविहं पण्णत्तं । तंजहा— जाणगसरीरदव्वावस्सयं १ , भवियसरीरदव्वावस्सयं २, जाणगसरीरभवियसरीरवतिरित्तं दव्वावस्सयं ३ ।**

**[चू० १६]** इदाणिं **से किं तं णोआगमतो दव्वावस्सतं** इच्चादि सुत्तं ।

*आगमसव्वणिसेहे, णोसद्दो अधव देसपडिसेहे ।*
*सव्वे जह णसरीरं, भव्वस्स य आगमाभावा ॥१॥*
*किरियाऽऽगमुच्चरंतो, आवासं कुणति भावसुण्णो य ।*
*किरियाऽऽगमो ण होती, तस्स णिसेहो भवे देसे ॥२॥* [ ]

**[हा० १६] से किं तं नोआगमतो** इत्यादि, अथ किं तन्नोआगमतो **द्रव्यावश्यकम्** ?, नोआगमतो इत्यत्र

*आगमसव्वनिसेहे नोसद्दो अहव देसपडिसेहे ।*
*सव्वे जह णसरीरं भव्वस्स य आगमाभावा ॥१॥*
*किरियाऽऽगमुच्चरंतो आवासं कुणति भावसुण्णो त्ति ।*
*किरियाऽऽगमो ण होइ तस्स निसेहो भवे देसे ॥२॥* [ ]

**नोआगमतो द्रव्यावश्यकं त्रिविधं प्रज्ञप्तम्, तद्यथा— ज्ञशरीरद्रव्यावश्यकं भव्यशरीरद्रव्यावश्यकं ज्ञशरीरभव्यशरीरव्यतिरिक्तं** च **द्रव्यावश्यकम्** ।

**[हे० १६]** उक्तं सप्रपञ्चमागमतो द्रव्यावश्यकम्, इदानीं नोआगमतस्तदुच्यते - **से किं त**मित्यादि । अथ **किं तन्नोआगमतो द्रव्यावश्यक**मिति प्रश्नः । उत्तरमाह -

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**नोआगमओ दव्वावस्सयं तिविहं पण्णत्त**मित्यादि, नोआगमत इत्यत्र नोशब्द आगमस्य सर्वनिषेधे देशनिषेधे वा वर्त्तते। यत उक्तं पूर्वमुनिभिः -

*आगमसव्वनिसेहे नोसद्दो अहव देसपडिसेहे।*
*सव्वे जह णसरीरं भव्वस्स य आगमाभावा ॥१॥ [ ]*

व्याख्या - आगमस्य आवश्यकादिज्ञानस्य सर्वनिषेधे वर्त्तते नोशब्दः, अथवा तस्यैव देशप्रतिषेधे वर्तते, तत्र सव्वे त्ति सर्वनिषेधे उदाहरणमुच्यते, यथेत्युपप्रदर्शने, णसरीरं ति ज्ञस्य जानतः शरीरं ज्ञशरीरं नोआगमत इह द्रव्यावश्यकम् , भव्यस्य च योग्यस्य यच्छरीरं तदपि नोआगमत इह द्रव्यावश्यकम् । कुत इत्याह- आगमस्य आवश्यकादिज्ञानलक्षणस्य सर्वथाऽभावात् । इदमुक्तं भवति- ज्ञशरीरं भव्यशरीरं चानन्तरमेव वक्ष्यमाणस्वरूपं **नो-आगमतः** सर्वथा आगमाभावमाश्रित्य **द्रव्यावश्यक**मुच्यते, नोशब्दस्यात्र पक्षे सर्वनिषेध-वचनत्वादिति गाथार्थः। देशप्रतिषेधवचनेऽपि नोशब्दे उदाहरणं यथा -

*किरियागमुच्चरंतो आवासं कुणइ भावसुन्नो उ।*
*किरियाऽऽगमो न होई तस्स निसेहो भवे देसे ॥१॥ [ ]*

व्याख्या- क्रियाम् आवर्तादिकां 'कुर्वन्' इत्यध्याहारः, आगमं च वन्दनकसूत्रादिकमुच्चारयन् भावशून्यो य आवश्यकं करोति सोऽपि नोआगमतः, इह द्रव्यावश्यकमिति शेषः । अत्र च क्रिया आवर्तादिकाऽऽगमो न भवति, जडत्वात्, आगमस्य च ज्ञानरूपत्वात्, अतस्तस्याऽऽगमस्य देशे क्रियालक्षणे निषेधो भवति, क्रिया आगमो न भवतीत्यर्थः । अतो नोआगमत इति इह किमुक्तं भवति ? देशे क्रियालक्षणे आगमाभावमाश्रित्य द्रव्यावश्यकमिदमिति गाथार्थः। तदेवं **नोआगमत** आगमाभावमाश्रित्य **द्रव्यावश्यकं त्रिविधं प्रज्ञप्तम्, तद्यथा- ज्ञशरीरद्रव्यावश्यकं भव्यशरीरद्रव्यावश्यकं ज्ञशरीरभव्यशरीरव्यतिरिक्तं द्रव्यावश्यकम्।**

**[सू० १७] से किं तं जाणगसरीरदव्वावस्सयं ? जाणगसरीरदव्वावस्सयं- आवस्सए[1] त्ति पदत्थाधिकारजाणगस्स जं सरीरयं[2] ववगयचुत[3]चावितचत्तदेहं जीवविप्पजढं सेज्जागयं वा संथारगयं[4] वा**

**[५]सिद्धसिलातलगयं वा [६]→पासित्ता णं कोइ [७]भणेज्जा – ← [८]अहो ! णं इमेणं सरीरसमुस्सएणं [९]जिणदिट्ठेणं भावेणं आवस्सए त्ति पयं आघवियं पण्णवियं परूवियं दंसियं निदंसियं उवदंसियं। जहा को दिट्ठंतो ? अयं महुकुंभे आसी, [१०]अयं घयकुंभे आसी। सेतं जाणगसरीरदव्वावस्सयं।**

**[चू० १७] आवस्सएत्ति** जं **पदं** तस्स जो अत्थो सो चेवऽ**त्थाहिकारो** भन्नति, अहवा अणंतगम-पज्जायं सुत्तमिति कातुं तत्थ जे अणेगविधा **अत्थाधिकारा, तज्जाणगस्स जं सरीरगं** । किंविसिट्ठं ?, भन्नइ-**ववगत**त्यादि। **ववगतं** सरीरं जीवातो, जीवो वा सरीरातो। एवं **चुत-चतिया** वि, **चत्तं** जीवेण **देहं**, चत्तो देहेण वा जीवो। **जीवेण विप्पजढं** सरीरं, जीवो वा विप्पजढो सरीरेण। एवं एते एगट्ठिता वंजणभेदतो। अणेगट्ठा इमेण विधिणा –

**ववगतं** ति

*पज्जायंतरपत्तं, खीरं व कमेण जह दधित्तेण।*
*तह चेतणपज्जाया, अचेतणत्तं **ववगयं** ति ॥१॥*
***चुत**मिति ठाणब्भट्ठं, भण्णति देवो व्व जहा विमाणवासातो।*
*इय जीवितचेतनाकियादिभट्ठं चुतं भणिमो ॥२॥*
***चइतं** ति चावियं जं, जह कप्पा **संगमो** सुरिंदेण।*
*तह जीवा **चइत** इमो, देहो आउक्खएणं ति ॥३॥*
*अहवा चया इतं जं, तं **चइतं** इण गतीय धातु त्ति।*
*गत चतभावातो तं, जीवाभावा अतो **चइतं** ॥४॥ [ ]*

**चत्तदेहं** ति

*दसपाणपरिच्चत्तं, जम्हा देहं ठितं विगमपक्खे।*
*तम्हा समयविहण्णू, **चत्तं देहं** भणंतेवं ॥१॥ [ ]*

**जीवविप्पजढं** ति विविहप्पगारेण जढं विप्पजढं शरीरं जीवेणेत्यर्थः। कथं ?, उच्यते,

*बंधच्छेदत्तणतो, आयुक्खयतो य **जीवविप्पजढं**।*
*विजढंति पगारेणं, जीवणभावट्ठितो जीवो ॥१॥ [ ]*

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अहवा एगट्ठिता पदा एते । **सेज्जा**दिया पसिद्धा, **गतं** ति तत्रस्थं कृतं वा इत्यर्थः । **सिद्धसिल** त्ति जत्थ सिलातले साधवो तवपरिकम्मियसरीरा सयमेव गंतुं भत्तपरिण्णिंगिणि-पादवगमणं वा बहवे पडिवण्णपुव्वा पडिवज्जंति य, तत्थ य खेत्तगुणतो अधाभद्दियदेवतगुणेण वा आराधण(णा) सिद्धियत्थाऽवस्सं भवति सा सिद्धसिला । **अहो** दैन्य-विस्मया-ऽऽमन्त्रणेषु त्रिष्वपि युज्यते, अनित्यं शरीरमिति दैन्ये, आवश्यकं सुज्ञातमिति विस्मये, अन्यं पार्श्वस्थमामन्त्र[३]यतो वा [आमन्त्रणे] । गुरुसमीवातो आगमितं **आघवितं** । सिस्साणं कहणे **पन्नवितं** । सुत्ते सुत्ते जहत्थेणऽत्थणिरूवणं जं तं **परूवितं** । आवस्सग-पडिलेहणादि-किरिउवदेसकरणेण **दंसितं** । इयं क्रिया एभिरक्षरैः कर्त्तव्येत्यर्थः । **[णिदंसितं ?]** सिस्स-पडिच्छयाणं अण्णोण्णाणं पुणो पुणो जो जधा जावइयं वा घेत्तुं समत्थो तस्स तधा दंसितं **उवदंसितं**, उत् प्राबल्यार्थः । अहवा **आघवितं** आख्यातं, आवासतं

*आवस्सतं अवस्सकरणिज्ज धुवणिग्गहो विसोधी य ।*
*अज्झयणछक्कवग्गो, णातो आराधणा मग्गो ॥१॥*
*समणेण सावएण य, अवस्स कातव्वयं हवति जम्हा ।*
*अंतो अहोणिसस्स तु, तम्हा आवस्सयं णाम ॥२॥*

[अनुयो० सूत्रम् २९; विशेषा० ८७२-८७३]

आघवेत्ता जं भेदेहि क[हि]तं तं **पण्णवितं**, जहा णाम-ट्ठवणा-दव्व-भावावस्सयं ति । आघविय-भे[४]दकहियस्स भेदाणं प्रति प्रति अत्थनिरूवणा **परूवियं** ति भन्नति । आघवियभेदकहित-परूवितस्स जं उदाहरणेण दंसणं, जधा-जणस्स सूरुदयादिवेलासु मुहधोवणादिअवस्सकिरियाकरणं व आवस्सयं, धि[५]ज्जादियादियाणं वा संज्झोवासणादिकरणं व, एवं **दंसितं** । आघवित-पण्णवित-परूवित-दंसितस्स णिदंसणं [६]उवसंघारेणं, जधा— तेसिं ज[७]णव्वयाणं मुहधोवणादिकिरिया अवस्सकरणत्तातो आवस्सताणि भण्णंति तहा अम्ह वि उभयसंझासु अवस्सप्रतिक्रमणभावातो, जं वा जत्थ काले पडिलेहणादि अवस्सं कज्जति तं आवस्सगं, एवं **णिदंसितं** । **उवदंसितं**, आघवितं, आघवेत्ता पण्णवितं, पण्णवेत्ता परूवितं, परूवेत्ता दंसितं, दंसेत्ता णिदंसितं, णिदंसेत्ता उवदंसितं जधासत्तिं सव्वणएहिं अत्थ-गमपज्जवा पंचावयवेण त्र्यवयवेन वा, एवं **उवंदसितं** । अहवा एते एगट्ठिता पदा । सीसो

Jain Education International For Private & Personal Use Only www.jainelibrary.org

पुच्छति-कहं अचेतणं सरीरं आगम-किरियातीतं दव्वावस्सगं ? [८]भणंति एत्थ – **जधा को दिट्ठंतो** ? आचार्याऽऽह – अतीतमधु-घृताधेयपर्याय**मधु-घृतघटा**दिवत्।

**[हा० १७] से किं त**मित्यादि प्रश्नसूत्रम्। अत्र निर्वचनम् – ज्ञातवानिति ज्ञः, तस्य शरीरम्। उत्पादकालादारभ्य प्रतिक्षणं शीर्यत इति शरीरं तदेवानुभूतभावत्वाद् द्रव्यावश्यकं **ज्ञशरीरद्रव्यावश्यकम्**।

**आवस्सए त्ति पदत्थाधिकारजाणगस्से**त्यादि, आवश्यकमिति यत् पदं [१]भव्यशरीरद्रव्यावश्यकम्(?), अस्यार्थ एवार्थाधिकारः तद्गतार्थाधिकारा वा गृह्यन्ते, तस्य तेषां वा ज्ञातुः **यच्छरीरकम्**, *संज्ञायां कन्* [*पा० ५/३/७६*]। किंभूतम् ? **व्यपगत-च्युत-च्यावित-त्यक्तदेहम्**, **व्यपगतम्** ओघतश्चेतनापर्यायादचेतनत्वं प्राप्तम्, **च्युतं** देवादिभ्यो भ्रष्टम्, **च्यावितं** तेभ्य एवाऽऽयुःक्षयेण भ्रंशितम्, **त्यक्तदेहं** जीवसंसर्गसमुत्थ-शक्तिजनिताहारादिपरिणामप्रभवपरित्यक्तोपचयम्। तत्र व्यपगतं सर्वगतात्मनः प्राकृतमपि भवति, तद्व्यवच्छित्तये **च्युतम्**, इदमपि स्वभावत एव कैश्चिदिष्यते, तद्व्यपोहाय **च्यावितम्**, इत्थं **त्यक्तोपचय**मिति चैतज्जीव-शरीरयोर्विशिष्टसम्बन्धज्ञापनार्थमिति। उक्तं च वृद्धैः –

*पज्जायंतरपत्तं खीरं व कमेणं जह दधित्तेण।*
*तह चेतणपज्जायादचेयणत्तं ववगतं ति ॥१॥*
*चुतमिह ठाणब्भट्ठं देवो व्व जहा विमाणवासाओ।*
*इय जीवितचेतण्णादिकिरियभट्ठं चुतं भणिमो ॥२॥*
*चइयं ति चावितं जं जह कप्पा* ***संगमो*** *सुरिंदेणं।*
*तह चावितमिति जीवा बलिएणाऽऽउक्खएणं ति ॥३॥*
*आहारसत्तिजणिताऽऽहारसुपरिणामजोवचयसुण्णं।*
*भण्णइ हु चत्तदेहं देहोवरउ त्ति एगट्ठा ॥४॥* [ ]

एवमुक्तेन विधिना जीवेन आत्मना विविधमनेकधा प्रकर्षेण मुक्तं **जीवविप्रमुक्तम्**। तथा चान्यैरप्युक्तम् –

*बंधणछेदत्तणओ आउक्खयउ व्व जीवविप्पजढं।*
*विजढं ति पगारेणं जीवणभावट्ठितो जीवो ॥१॥* [ ]

Jain Education International For Private & Personal Use Only www.jainelibrary.org

ततश्चेदं **व्यपगता**दिविशेषणकलापयुक्तं याव**ज्जीवविप्रमुक्तं** ज्ञशरीरद्रव्यावश्यकमिति गम्यते। कथम् ?, यस्मादिदं **शय्यागतं वा संस्तारगतं वा सिद्धशिलातलगतं वा दृष्ट्वा कश्चिदाह – अहो! अनेन शरीरसमुच्छ्रयेण जिनदृष्टेन भावेन आवश्यकमित्येत**तत् **पदमाख्यात**मित्यादि, तस्मादतीतकालनयानुवृत्त्याऽतीतां वृत्तिमपेक्ष्य द्रव्यावश्यकमित्युच्यत इति क्रिया। **यथा को दृष्टान्तः** ? इति प्रश्ने निर्वचनमाह – **अयं मधुकुम्भ आसीद् अयं घृतकुम्भ आसी**दित्यादि अक्षरगमनिका। भावार्थ उच्यते – तत्र **शय्या-संस्तारकौ** प्रतीतौ। **सिद्धशिलातलं** तु यत्र शिलातले साधवस्तपःपरिकर्मितशरीराः स्वयमेव गत्वा भक्तपरिज्ञाद्यनशनं प्रतिपन्नपूर्वाः प्रतिपद्यन्ते प्रतिपत्स्यन्ते चेति, क्षेत्रगुणतश्च तत्र यथाभद्रिकदेवतागुणादाराधनासिद्धिमासादयन्तीति। **अन्ये** तु *व्याचक्षते* – यस्मिन् शिलातले सिद्धः कश्चिदिति। **गतं** स्थितमित्यनर्थान्तरम्। **अहो** दैन्य - विस्मया-ऽऽमन्त्रणेषु त्रिष्वपि युज्यते, तत्रानित्यं शरीरमिति दैन्ये, आवश्यकं ज्ञातमिति विस्मये, अन्यं पार्श्वस्थमामन्त्रयत आमन्त्रणमिति। **अनेन** प्रत्यक्षेण, उत्पत्तिकालादारभ्य प्रतिसमयं शीर्यत इति शरीरम्, तदेव पुद्गलसङ्घातनरूपत्वात् समुच्छ्रयस्तेन, जिनदृष्टेन भावेन, भूतपूर्वगत्या जीव-शरीरयोः कथञ्चिदभेदाद् आवश्यकमित्येतत् पद**माख्यातं** सामान्य-विशेषरूपेण। ***अन्ये** तु* व्याचक्षते – **आघवियं** ति प्राकृतशैल्या छान्दसत्वाच्च गुरोः सकाशादागृहीतम्। **प्रज्ञापितं** सामान्यतो विनेयेभ्यः। **प्ररूपितं** प्रतिसूत्रमर्थकथनेन। **दर्शितं** प्रत्युपेक्षणादिक्रियादर्शनेन, इयं क्रिया एभिरक्षरैरुपात्ता, इत्थं क्रियत इति भावना। **निदर्शितं** कथञ्चिदगृह्णतः परयाऽनुकम्पया निश्चयेन पुनः पुनर्दर्शितम्। **उपदर्शितं** सकलनययुक्तिभिः। ***अन्ये*** त्वन्यथाऽपि व्याचक्षते, तदलं तदुपन्यासलक्षणेन प्रयासेनेति। अतः द्रव्यावश्यकमभिधीयते। आह – आगमक्रियातीतमचेतनमिदं कथं द्रव्यावश्यकमभिधीयते ? इति, अत्रोच्यते – अतीतकालनयानुवृत्त्या, **यथा को दृष्टान्तः**, तत्र दृष्टमर्थमन्तं नयतीति दृष्टान्तः, *लौकिक-परीक्षकाणां यस्मिन्नर्थे बुद्धिसाम्यं स दृष्टान्तः* [*न्यायसू० १।१।२५*] इत्यन्ये, **अयं मधुकुम्भ आसी**दित्यादि, अतीतमधु-घृतघटवदिति भावना। **सेत्त**मित्यादि निगमनम्।

**[हे० १७]** तत्राऽऽद्यभेदं विवरीषुराह- **से किं त**मित्यादि। अथ **किं तत्**

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**ज्ञशरीरद्रव्यावश्यक**मिति प्रश्ने निर्वचनमाह - **जाणगसरीरदव्वावस्सयं आवस्सए त्तीत्**यादि, ज्ञातवानिति ज्ञः, प्रतिक्षणं शीर्यत इति शरीरम्, ज्ञस्य शरीरं ज्ञशरीरम्, तदेव अनुभूतभावत्वाद् द्रव्यावश्यकं ज्ञशरीरद्रव्यावश्यकम्, किं तदित्याह - **यच्छरीरकं** *संज्ञायां कन् [पा० ५/३/७६, ८७]* वपुरित्यर्थः, कस्य सम्बन्धीत्याह- **आवस्सए त्ती**त्यादि, आवश्यकमिति यत् पदम्, आवश्यकपदाभिधेयं शास्त्रमित्यर्थः, तस्यार्थ एवार्थाधिकारोऽनेके वा तद्गता अर्थाधिकारा गृह्यन्ते, तस्य तेषां वा ज्ञातुः सम्बन्धि । कथंभूतं सदिदं ज्ञशरीरद्रव्यावश्यकं भवतीत्याह- **व्यपगत-च्युत-च्यावितत्यक्तदेहं जीवविप्रमुक्त**मित्यक्षरयोजना । इदानीं भावार्थः कश्चिदुच्यते- तत्र **व्यपगतं** चैतन्यपर्यायादचैतन्यलक्षणं पर्यायान्तरं प्राप्तम्, अत एव **च्युतम्** उच्छ्वासनिःश्वासजीवितादिदशविधप्राणेभ्यः परिभ्रष्टम्, अचेतनस्य उच्छ्वासाद्ययोगात्, अन्यथा लेष्टवादीनामपि तत्प्रसङ्गात्, तेभ्यश्च परिभ्रंशः स्वभाववादिभिः कैश्चित् स्वभावत एव अभ्युपगम्यते, तदपोहार्थमाह- **च्यावितं** बलीयसाऽऽयुःक्षयेण तेभ्यः परिभ्रंशितम्, न तु स्वभावतः, तस्य सदाऽवस्थितत्वेन सर्वदा तत्प्रसङ्गात्, एवं च सति कथंभूतं तदित्याह- **त्यक्तदेहम्**। *दिहउपचये[पा० धा० १०८५, का० धा० २/६२]* त्यक्तो देहः आहारपरिणतिजनित उपचयो येन तत् त्यक्तदेहम्, अचेतनस्याऽऽहारग्रहण-परिणत्योरभावात्। एवमुक्तेन विधिना जीवेन आत्मना विविधम् अनेकधा प्रकर्षेण मुक्तं **जीवविप्रमुक्तम्**। तदेतदावश्यकज्ञस्य शरीरकमतीतावश्यकभावस्य कारणत्वाद् द्रव्यावश्यकम्। अस्य च नोआगमत्वमागमस्य तदानीं सर्वथाऽभावात् नोशब्दस्य चात्र पक्षे सर्वनिषेधवचनत्वादिति भावः । ननु यदि जीवविप्रमुक्तमिदं कथं तर्ह्यस्य द्रव्यावश्यकत्वम्? लेष्ट्वादीनामपि तत्प्रसङ्गात्, तत्पुद्गलानामपि कदाचिदावश्यकवेत्तृभिर्गृहीत्वा मुक्तत्वसम्भवादित्याशङ्क्याह- **सेज्जागत**मित्यादि, यस्मादिदं **शय्यागतं वा संस्तारगतं वा[१] सिद्धशिलातलगतं वा दृष्ट्वा कोऽपि** ब्रूयात्- **अहो! अनेन शरीरसमुच्छ्रयेण जिनदृष्टेन भावेन आवश्यक**मित्येतत् **पदम् आगृहीत**मित्यादि यावद**उपदर्शित**मिति, तस्मादतीत-वर्तमानकालभाविवस्त्वेकत्वग्राहिनयानुसारिणामेवंवादिनां सम्भवाद् यथोक्तशरीरस्य द्रव्यावश्यकत्वं न विरुध्यते, लेष्ट्वादिदर्शने पुनर्नेत्थम्भूतः प्रत्ययः कस्यापि समुत्पद्यत इति न तेषां तत्प्रसङ्गः, तेनैव कर-चरणोरु-ग्रीवादिपरिणामेनानन्तर-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

मेवाऽऽवश्यककारणत्वेन व्यापृतत्वात् तदेव तथाविधप्रत्ययजनकं द्रव्यावश्यकम्, न लेष्ट्वादय इति भाव इति समुदायार्थः।

इदानीमवयवार्थ उच्यते- तत्र **शय्या** महती सर्वाङ्गप्रमाणा, तां गतं शय्यागतम्, शय्यास्थितमित्यर्थः। **संस्तारो** लघुकोऽर्धतृतीयहस्तमानः, तं गतम्, तत्रस्थमित्यर्थः। यत्र साधवस्तपःपरिकर्मितशरीराः स्वयमेव गत्वा भक्तपरिज्ञाद्यनशनं प्रतिपन्नपूर्वाः प्रतिपद्यन्ते प्रतिपत्स्यन्ते च तत् **सिद्धशिलातल**मुच्यते, क्षेत्रगुणतो यथाभद्रकदेवतागुणतो वा साधूनामाराधनाः सिद्ध्यन्ति तत्रेति कृत्वा। **अन्ये** तु व्याचक्षते - यत्र महर्षिः कश्चित् सिद्धस्तत् सिद्धशिलातलम्, तद्गतं तत्रस्थितं **सिद्धशिलातलगतम्**। इह **निसीहियागयं वे**त्यादीन्यपि पदानि **वाचनान्तरे** *दृश्यन्ते*, तानि च सुगमत्वात् स्वयमेव भावनीयानि। नवरं **नैषेधिकी** शबपरिस्थापनभूमिः। अपरं चात्रान्तरे **पासित्ता णं कोइ[2] भणेज्जे**ति ग्रन्थः **क्वचिद्** दृश्यते। स च समुदायार्थकथनावसरे योजित एव, यत्र तु न दृश्यते तत्राध्याहारो द्रष्टव्यः। **अहो**शब्दो दैन्य-विस्मया-ऽऽमन्त्रणेषु वर्तते, स चेह त्रिष्वपि घटते। तथाहि- अनित्यं शरीरमिति दैन्ये, आवश्यकं ज्ञातमिति विस्मये, अन्यं पार्श्वस्थितमामन्त्रयमाणस्या-ऽऽमन्त्रणे, **अनेन** प्रत्यक्षतया दृश्यमानेन **शरीर**मेव पुद्गलसङ्घातत्वात् **समुच्छ्रय**स्तेन **जिनदृष्टेन** तीर्थकराभिमतेन **भावेन** कर्मनिर्जरणाभिप्रायेण अथवा **भावेन** तदावरण-कर्मक्षयक्षयोपशमलक्षणेन आवश्यकपदाभिधेयं शास्त्रम्, **आघवियं** ति प्राकृतशैल्या छान्दसत्वाच्च गुरोः सकाशादागृहीतम्, **प्रज्ञापितं** सामान्यतो विनेयेभ्यः कथितम्, **प्ररूपितं** तेभ्य एव प्रतिसूत्रमर्थकथनतः, **दर्शितं** प्रत्युपेक्षणादिक्रियादर्शनतः, 'इयं क्रिया एभिरक्षरैरत्रोपात्ता इत्थं च क्रियते' इत्येवं विनेयेभ्यः प्रकटितमिति भावः, **निदर्शितं** कथञ्चिदगृह्णतः परयाऽनुकम्पया निश्चयेन पुनः पुनः दर्शितम्, **उपदर्शितं** सकलनय-युक्तिभिः।

आह- नन्वनेन शरीरसमुच्छ्रयेणा-ऽऽवश्यकमागृहीतमित्यादि नोपपद्यते, ग्रहण-प्ररूपणादीनां जीवधर्मत्वेन शरीरस्याघटमानत्वात्, सत्यम्, किन्तु भूतपूर्वगत्या जीव-शरीरयोरभेदोपचारादित्थमुपन्यास इत्यदोषः। पुनरप्याह- ननु यद्यपि तच्छरीरकं शय्यादिगतं दृष्ट्वा पूर्वोक्तवक्तारो भवन्ति तथापि कथं **[तस्य]** द्रव्यावश्यकता ? यत आवश्यकस्य

Jain Education International For Private & Personal Use Only www.jainelibrary.org

कारणमेव द्रव्यावश्यकं भवितुमर्हति, *भूतस्य भाविनो* वा *[ ] इत्यादिपूर्वोक्तवचनात्, कारणं चाऽऽगमस्य चेतनाधिष्ठितमेव शरीरम्, न त्विदम्, चेतनारहितत्वात्, तस्यापि तत्कारणत्वेऽतिप्रसङ्गात्, सत्यम्, किन्त्वतीतपर्यायानुवृत्त्यभ्युपगमपरनयानुवृत्त्याऽतीतमावश्यककारणत्वपर्यायमपेक्ष्य द्रव्यावश्यकताऽस्योच्यत इत्यदोषः।

स्यादेवम्, यद्यत्रार्थे कश्चिद् दृष्टान्तः स्यादिति विकल्प्य पृच्छति- **यथा कोऽत्र दृष्टान्तः** ? इति पृष्टे सत्याह - **यथाऽयं मधुकुम्भ आसी**दित्यादि। एतदुक्तं भवति- यथा मधुनि घृते वा प्रक्षिप्यापनीते तदाधारत्वपर्यायेऽतिक्रान्तेऽप्ययं मधुकुम्भः **अयं** च **घृतकुम्भ** इति व्यपदेशो लोके प्रवर्तते, तथा आवश्यककारणत्वपर्यायेऽतिक्रान्तेऽपि अतीतपर्यायानुवृत्त्या द्रव्यावश्यकमिदमुच्यत इति भावः। निगमयन्नाह - **सेत**मित्यादि, तदेतद् **ज्ञशरीरद्रव्यावश्यकम्**।

**[सू० १८] से किं तं भवियसरीरदव्वावस्सयं ? भवियसरीरदव्वावस्सयं- जे जीवे जोणिजम्मणणिक्खंते इमेणं चेव सरीरसमुस्सएणं आदत्तएणं [१]जिणोवदिट्ठेणं भावेणं आवस्सए त्ति पयं [२]सेयकाले सिक्खिस्सइ, न ताव सिक्खइ। जहा को दिट्ठंतो ? [३]अयं महुकुंभे भविस्सइ, अयं घयकुंभे भविस्सइ। सेतं भवियसरीरदव्वावस्सयं।**

**[सू० १९] से किं तं जाणगसरीरभवियसरीरवतिरित्ते दव्वावस्सए ? जाणगसरीरभवियसरीर[४]वतिरित्ते दव्वावस्सए तिविधे पण्णत्ते। तंजहा — लोइए १, कुप्पावयणिते २, लोउत्तरिते ३।**

**[सू० २०] से किं तं लोइयं दव्वावस्सयं ? [५]लोइयं दव्वावस्सयं - जे इमे राईसर-तलवर-माडंबिय-[६]कोडुंबिय-इब्भ-सेट्ठि-सेणावइ-सत्थवाह-[७]प्पभितिओ कल्लं [८]पाउप्पभायाए रयणीए सुविमलाए फुल्लुप्पल-**

* दृश्यतां पृ० ३६ पं० १२ ॥

**[९]कमलको[१०]मलुम्मिल्लियम्मि अह पंडुरे पभाए रत्तासोगप्पगास-किंसुय[११]-सुयमुह-गुंजद्धरागसरिसे कमला[१२]गर-नलिणिसंडबोहए उ[१३]ट्ठियम्मि सूरे सहस्सरस्सिम्मि दिणयरे ते[१४]यसा जलंते मुहधोयण-दंतपक्खालण-तेल्ल-फणिह-सिद्धत्थय-ह[१५]रियालिय-अद्दाग-धूव-[१६]पुप्फ-मल्ल-गंध-[१७]तंबोल-वत्थमाइयाइं दव्वावस्सयाइं [१८]करेत्ता ततो पच्छा रायकुलं वा देव[१९]कुलं वा आरामं वा उज्जाणं वा सभं वा पवं वा गच्छंति। सेतं लोइयं दव्वावस्सयं।**

[चू० १८-२०] **भविए** त्ति योग्यं, आवस्सगस्स ग्रहण-धारण-व्याख्यानत्वेनेत्यर्थः । **जोणी** गर्भाधारस्थानम्, तातो सव्वहा पज्जत्तो **जन्मत्वेन निष्क्रान्तः**, आमगर्भनिष्क्रमणप्रतिषेधार्थमेवमुक्तम् । **आदत्तं** गृहीतम्, योऽयं **शरीरसमुच्छ्रयः** वर्तमानकाले, अहवा समुच्छ्रय इति प्रतिसमयमुच्छ्रितं कुर्वाणम्, प्रवर्द्धमानेनेत्यर्थः। जिनेन उवदिट्ठो जिणोवदिट्ठो, तेण **जिणोवदिट्ठेणं भावेणं** । को य सो भावो ?, उच्यते, कर्मक्षपणाय कर्मक्षपणार्थं विधिना **सेयाले सिक्खिस्सति, से** त्ति स भव्यः आगामिनि काले गा-मि-नि-का एतेसिं चतुण्हं अक्खराणं लोवेणं **सेयाले** त्ति भणितं। सेसं कंठं जाव **[रा]ईसरे**त्यादि । **राय** त्ति चक्कवट्टी वासुदेवो बलदेवो महामंडलीओ वा । जुवराय-अमच्चादिया **ईसरा**। अहवा अष्टविधैश्वर्ययुक्त ईश्वरः, तच्चाष्टविधम् ऐश्वर्यम् इमं- अणिमा १ लघिमा २ महिमा ३ प्राप्तिः ४ प्राकाम्यम्, ५ ईशित्वं ६ वशित्वं ७ यत्रकामावसायित्वम् ८। राइणा तुट्ठेणं चामीकरपट्टो रयणखइतो सिरसि बद्धो जस्स सो **तलवरो** भन्नति । जे मंडलियराइणो ते **कोडुंबी** । छिन्नमडंबाधिवो **मडंबी** । इभो हत्थी, तप्पमाणो हिरण्ण-सुवण्णादिपुंजो जस्स अत्थि अधिकतरो वा सो **इब्भो** । अभिषिच्यमानश्रीवेष्टनकबद्धः सव्ववणियाधिवो **सेट्ठी** । चउरंगिणीए सेणाए अधिवो **सेणावती** । रायाणुण्णातो चतुव्विहं दविणजातं गणिम-धरिम-मेज्ज-पारिच्छं घेत्तुं लाभत्थी विसयंतरगामी **सत्थवाहो। कल्ल**मिति श्वः प्रगे वा, तच्च कल्यमतिक्रान्तमनागतं वा, एतच्च कल्यग्रहणं पन्नवगं पडुच्च, जतो पन्नवगो बितियजामे पन्नवेति । [१]**पादु**रिति प्रकाशीकृतं, केन ? **प्रभया**, किं प्रकाशितं ?, **रयणीए**

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सेसं, किमुक्तं भवति ? अरुणोदयादारभ्य यावन्नोदयते आदित्य इत्यर्थः, [२]तंसि **पभाते**। पभातोवलक्खणं वा इमं, **फुल्ला उप्पला कमला य कोमला उम्मिल्लिया** [३]अद्धविकसिता य सोभना, पभातं पि तत्तुल्लं। अरुणप्पभातस्स **अथ** इति अनन्तरं **पाण्डुर**मिति प्रभातविसेसणं, तच्च उदिते सूर्ये भवति। किंविशिष्टे सूर्ये ?, उच्यते, **रत्तासोगा**दि। प्रधानमुत्तमो वा इह समूहः षण्डमुच्यते। तम्मि **सूरिते उदिते** इमं आवस्सगं कुव्वंति – **मुहधोवणे**त्यादि। अग्रथितानि **पुष्पाणि**, ग्रथितानि **माल्यम्**। अहवा विगसियाणि **पुप्फाणि**, अविगसितानि **माल्यम्**। अहवा वत्था-ऽऽभरणा **मल्लं**। **सभा** जत्थ [४]*भारहा*इहि कहाहिं जणो अच्छति। **पवा** जत्थ उदगं दिज्जति। **आरामो** विविधफुल्लजातिउवसोभितो, आरमंति वा जत्थ णर-णारिजणा। **उज्जाणं** विविधवणोवसोभितं, अहवा ऊसव-अणूसवेसु वा मंडित-पसाहितो जणो असणादि णेतुं जत्थ भुंजति तं **उज्जाणं**। गतं लोइयं दव्वावस्सयं।

**[हा० १८-२०] से किं त**मित्यादि, भव्यो योग्यो दलं पात्रमिति पर्यायाः, तस्य शरीरम्, तदेव भाविभावावश्यककारणत्वाद् द्रव्यावश्यकं **भव्यशरीरद्रव्यावश्यकम्**। **जो जीवे**त्यादि, यो जीवो **योन्या** अवाच्यदेशलक्षणया **जन्मत्वेन** सकलनिर्वृत्तिलक्षणेन, अनेनाऽऽमगर्भव्यवच्छेदमाह, **निष्क्रान्तः** निर्गतोऽनेनैव **शरीरसमुच्छ्रयेणे**ति पूर्ववत्, **आदत्तेन** गृहीतेन, *अन्ये* त्वभिदधति – **आदत्तएणं** ति आत्मीयेन। **जिनदृष्टेन भावेने**-त्यादि पूर्ववत्, अथवा तदावरणकर्मक्षयोपशमलक्षणेन, **सेयकाले** त्ति छान्दसत्वादागामिनि काले शिक्षिष्यते, न तावच्छिक्षते, तदेतद् भाविनीं वृत्तिमङ्गीकृत्य भव्यशरीरद्रव्यावश्यक-मित्युच्यते। **यथा को दृष्टान्त** इत्यादि भावितार्थं यावत् **सेत्त**मित्यादि।

**से किं त**मित्यादि, ज्ञशरीर-भव्यशरीराभ्यां व्यतिरिक्तं **द्रव्यावश्यक**मिति निरूपितशब्दार्थमेव **त्रिविधं प्रज्ञप्तम्, तद्यथा – लौकिकं कुप्रावचनिकं लोकोत्तरम्**।

**से किं त**मित्यादि, य एते राजेश्वरादयो मुखधावनादि कृत्वा ततः पश्चाद् राजकुलादौ गच्छन्ति तदेतल्लौकिकं द्रव्यावश्यकमिति क्रिया, तत्र **राजा** चक्रवर्त्यादिर्महामाण्डलि-कान्तः। **ईश्वरो** युवराजा माण्डलिकोऽमात्यश्च, *अन्ये* तु व्याचक्षते – अणिमाद्यष्ट-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

विधैश्वर्ययुक्त ईश्वर इति । **तलवरः** परितुष्टनरपतिप्रदत्तपट्टबन्धभूषितः । **माडम्बिकः** छिन्नमडम्बाधिपः । **कौटुम्बिकः** कतिपयकुटुम्बप्रभुः । **इभ्यः** अर्थवान्, स च किल यस्य पुञ्जीकृतरत्नराश्यन्तारितो हस्त्यपि नोपलभ्यत इत्येतावताऽर्थेनेति । **श्रेष्ठी** श्रीदेवताध्यासितसौवर्णपट्टभूषितोत्तमाङ्गः पुरज्येष्ठो वणिक् । **सेनापतिः** नरपतिनिरूपितो हस्त्यश्व-रथ-पदातिसमुदायलक्षणायाः सेनायाः प्रभुरित्यर्थः । **सार्थनायकः**

*गणिमं धरिमं मेज्जं पारिच्छेज्जं च दव्वजायं तु ।*
*घेत्तूणं लाभट्ठी वच्चइ जो अण्णदेसं तु ॥१॥*
*निवबहुमओ पसिद्धो दीणा-ऽणाहाण वच्छलो पंथे ।*
*सो सत्थवाहनामं* ***धणो*** *व्व लोए समुव्वहति ॥२॥* [ ]

**प्रभृति**ग्रहणेन प्राकृतजनपरिग्रहः । **कल्लं पादुप्पभाताए** इत्यादि, **कल्ल**मिति श्वः प्रज्ञापकापेक्षमेतत्, यतः प्रज्ञापको द्वितीयायामेव (द्वितीययामे एव ?) प्रज्ञापयति, **प्रादुः** प्रकाशन इत्यर्थो धातुः, ततश्च प्रकाशप्रभातायां **रजन्यां सुविमलाया**मित्यादिनोत्तरोत्तरकालभाविना विशेषणकलापेनाऽत्यन्तोद्यमवतां सत्त्वानां तमावश्यककालमाह । **फुल्लोत्पलकमलकोमलोन्मीलिते**, इह **उत्पलं** पद्ममुच्यते, **कमल**स्तु आरण्यः पशुविशेषः, ततश्च फुल्लोत्पल-कमलयोः विकशितपद्म-कमलयोः **कोमलम्** अकठोरम् **उन्मीलितं** दल-नयनोन्मीलितं यस्मिन्निति समासः, अनेनारुणोदयावस्थामाह । **अह पंडरे पहाए**, अथ आनन्तर्ये । तथा **रत्तासोगे**त्यादि, रक्ताशोकप्रकाश-किंशुक-शुकमुख-गुञ्जार्द्धरागसदृशे, आरक्त इत्यर्थः । तथा **कमलाकरनलिनिषण्डबोधके** कमलाकरो ह्रदादिजलाश्रयस्तस्मिन्नलिनिषण्डं तद्बोधक इति, अनेन स्थलनलिनीव्यवच्छेदमाह, यद्वा कमलाकरनलिनिषण्डयोर्भेदेनैव ग्रहणम् । **उत्थिते** उद्गते **सूर्ये सहस्ररश्मौ** सहस्रकिरणे **दिनकरे** आदित्ये **तेजसा ज्वलति** सति, विशेषणबहुत्वं महत्याशयशुद्ध्यर्थं कर्त्तव्यमिति ख्यापनार्थम्, यत्रैते सर्व एव विशेषाः सन्ति तस्मिन्नुदिते, अज्ञातज्ञापनार्थं वा विशेषणकलाप इति । **मुहधोवणे**त्यादि निगमनान्तं प्रायो निगदसिद्धमेव । नवरं पुष्प-माल्ययोरयं विशेषः - अग्रथितानि पुष्पाणि, ग्रथितं माल्यम्; विकशितानि वा पुष्पाणि, अविकशितानि माल्यम् । आरामोद्यानयोरप्ययं विशेषः - विविधपुष्पजात्युपशोभित आरामः, चम्पकवनाद्युपशोभितमुद्यानम् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

[हे० १८-२०] उक्तो नोआगमतो द्रव्यावश्यकप्रथमभेदः, अथ द्वितीयभेदनिरूपणार्थमाह- **से किं त**मित्यादि। अथ किं तद् **भव्यशरीरद्रव्यावश्यक**मिति प्रश्ने सत्याह- **भवियसरीरदव्वावस्सयं जे जीवे** इत्यादि, विवक्षितपर्यायेण भविष्यतीति भव्यो विवक्षितपर्यायार्हः, तद्योग्य इत्यर्थः, तस्य शरीरम्, तदेव भाविभावावश्यककारणत्वाद् द्रव्यावश्यकं भव्यशरीरद्रव्यावश्यकम्, किं पुनस्तत् ? इत्यत्रोच्यते- यो जीवो योनिजन्मत्वनिष्क्रान्तोऽनेनैव शरीरसमुच्छ्रयेणात्तेन जिनोपदिष्टेन भावेन आवश्यकमित्येतत् पदम् आगामिनि काले शिक्षिष्यते न तावच्छिक्षते तज्जीवाधिष्ठितं शरीरं भव्यशरीरद्रव्यावश्यकमिति समुदायार्थः।

साम्प्रतमवयवार्थ उच्यते - तत्र **यः** कश्चिद् **जीवो** जन्तुः **योन्या** योषिदवाच्यदेशलक्षणायाः परिपूर्णसमस्तदेहो **जन्मत्वेन** जन्मसमयेन **निष्क्रान्तो** न पुनरामगर्भावस्थ एव पतितो योनिजन्मत्वनिष्क्रान्तः, **अनेनैव शरीर**मेव पुद्गलसङ्घातत्वादुत्पत्तिसमयादारभ्य प्रतिसमयं समुत्सर्पणाद् वा **समुच्छ्रय**स्तेन **आत्तेन आदत्तेन वा** गृहीतेन, प्राकृतशैलीवशा**दात्मीयेन वा जिनोपदिष्टेने**त्यादि पूर्ववत्, **सेयकाले** त्ति छान्दसत्वादागामिनि काले **शिक्षिष्यते** अध्येष्यते, साम्प्रतं तु **न ताव**दद्यापि **शिक्षते** तज्जीवाधिष्ठितं शरीरं भव्यशरीरद्रव्यावश्यकम्। नोआगमत्वं चात्राप्यागमाभावमाश्रित्य मन्तव्यम्, तदानीं तत्र वपुष्यागमाभावात्, नोशब्दस्य चात्रापि सर्वनिषेधवचनत्वादिति। अत्राऽऽह- नन्वावश्यककारणं द्रव्यावश्यकमुच्यते, यदि त्वत्र वपुष्यागमाभावः कथं तर्हि तस्य तं प्रति कारणत्वम् ? न हि कार्याभावे वस्तुनः कारणत्वं युज्यते, अतिप्रसङ्गात्, अतः कथमस्य द्रव्यावश्यकता ? सत्यम्, किं तु भविष्यत्पर्यायस्येदानीमपि योऽस्तित्वमुपचरति नयस्तदनुवृत्त्याऽस्य द्रव्यावश्यकत्वमुच्यते, तथा च तन्नयानुसारिणः पठन्ति- *भाविनि भूतवदुपचारः [कातन्त्रपरि०]* इति। अत्रार्थे दृष्टान्तं दिदर्शयिषुः प्रश्नं कारयति- **यथा को**ऽत्र **दृष्टान्त** इति। निर्वचनमाह- यथा**ऽयं मधुकुम्भो भविष्यती**त्यादि। एतदुक्तं भवति - यथा मधुनि घृते वा प्रक्षेप्तुमिष्टे तदाधारत्वपर्याये भविष्यत्यपि लोकेऽयं मधुकुम्भो घृतकुम्भो वेत्यादिव्यपदेशो दृश्यते, तथाऽत्राप्यावश्यककारणत्वपर्याये भविष्यत्यपि तदस्तित्वपरनयानुवृत्त्या

Jain Education International For Private & Personal Use Only www.jainelibrary.org

द्रव्यावश्यकत्वमुच्यत इति भावः। निगमयन्नाह - **सेत्त**मित्यादि, तदेतद् **भव्यशरीर-द्रव्यावश्यक**मिति।

उक्तो नोआगमतो द्रव्यावश्यकद्वितीयभेदः, तत्तृतीयभेदनिरूपणार्थमाह - **से किं त**मित्यादि। अथ किं तत् **ज्ञशरीर-भव्यशरीरव्यतिरिक्तं द्रव्यावश्यकम्**? निर्वचनमाह - **जाणगसरीरभवियसरीरवइरित्ते दव्वावस्सए तिविहे** इत्यादि। यत्र ज्ञशरीर-भव्यशरीरयोः सम्बन्धि पूर्वोक्तं लक्षणं न घटते तत् ताभ्यां व्यतिरिक्तं भिन्नं द्रव्यावश्यक-मुच्यते। तच्च **त्रिविधं प्रज्ञप्तम्, तद्यथा - लौकिकं कुप्रावचनिकं लोकोत्तरिकं** च।

तत्र प्रथमभेदं जिज्ञासुराह - **से किं त**मित्यादि। अत्र निर्वचनमाह - **लोइय**-मित्यादि। लोके भवं लौकिकम्, शेषं तथैव। अत्र **य एते राजेश्वर-तलवरादयः** प्रभातसमये मुखधावनादि कृत्वा ततः पश्चाद् राजकुलादौ गच्छन्ति, तत्तेषां सम्बन्धि मुखधावनादि लौकिकं ज्ञशरीरभव्यशरीरव्यतिरिक्तं द्रव्यावश्यकमिति समुदायार्थः। तत्र **राजा** चक्रवर्ती वासुदेवो बलदेवो महामण्डलिकश्च। **ईश्वरो** युवराजः सामान्यमण्डलिकोऽमात्यश्च, ***अन्ये तु व्याचक्षते*** - अणिमाद्यष्टविधैश्वर्ययुक्त ईश्वरः। परितुष्टनरपतिप्रदत्तरत्नालङ्कृत-सौवर्णपट्टविभूषितशिरा**स्तलवरः**। यस्य पार्श्वत आसन्नमपरं ग्राम-नगरादिकं नास्ति तत् सर्वतश्छिन्नं जनाश्रयविशेषरूपं मडम्बमुच्यते, तस्याधिपति**र्माडम्बिकः**। कतिपय-कुटुम्बप्रभुः **कौटुम्बिकः**। इभो हस्ती, तत्प्रमाणं द्रव्यमर्हती**तीभ्यः**, यस्य सत्कपुञ्जीकृत-हिरण्यरत्नादिद्रव्येणान्तरितो हस्त्यपि न दृश्यते सः, अधिकतरद्रव्यो वा इभ्य इत्यर्थः। श्रीदेवताध्यासितसौवर्णपट्टविभूषितोत्तमाङ्गः पुरज्येष्ठो वणिग्विशेषः **श्रेष्ठी**। हस्त्यश्व-रथ-पदातिसमुदायलक्षणायाः सेनायाः प्रभुः **सेनापतिः**।

गणिमं धरिमं मेज्जं पारिच्छेज्जं च दव्वजायं तु।
घेत्तूणं लाभत्थं वच्चति जो अन्नदेसं तु ॥१॥
निवबहुमओ पसिद्धो दीणाणाहाण वच्छलो पंथे।
सो सत्थवाहनामं **धणो** व्व लोए समुव्वहइ ॥२॥ [ ]

एतल्लक्षणयुक्तः **सार्थवाहः**। **प्रभृति**ग्रहणेन शेषप्राकृतजनपरिग्रहः। **कल्लं पाउप्पभाताए** इत्यादि, **कल्य**मिति विभक्तिव्यत्ययात् सामान्येन प्रभाते। प्रभातस्यैव विशेषावस्थाः प्राह -

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**पाउ** इत्यादि, प्रादुः प्राकाश्ये, ततश्च प्रकाशप्रभातायां रजन्याम्, किञ्चिदुपलभ्यमान-प्रकाशायामिति भावः । तदनन्तरं **सुविमलायां** तस्यामेव किञ्चित्परिस्फुटतर-प्रकाशायाम् । **अथ**शब्द आनन्तर्ये, तदनन्तरं **पाण्डुरे प्रभाते** । कथंभूत इत्याह- **फुल्लोत्पलकमलकोमलोन्मीलिते**, फुल्लं विकसितं तच्च तदुत्पलं च फुल्लोत्पलम्, कमलः हरिणविशेषः, फुल्लोत्पलं च कमलश्च फुल्लोत्पल-कमलौ, तयोः कोमलम् अकठोरं दलानां नयनयोश्चोन्मीलितम् उन्मीलनं यत्र प्रभाते तत् तथा, अनेन च प्रागुक्तायाः सुविमलतायाः वक्ष्यमाणसूर्योदयस्य चान्तरालभाविनीं पूर्वस्यां दिश्यरुणप्रभावस्थामाह। तदनन्तरम् **उट्ठिए सूरिए** त्ति अभ्युद्गते आदित्ये, कथम्भूते इत्याह - **रक्ताशोकप्रकाश-किंशुक-शुकमुख-गुञ्जार्धरागसदृशे**, रक्ताशोकप्रकाशस्य किंशुकस्य पुष्पितपलाशस्य शुकमुखस्य गुञ्जार्धस्य च रागेण सदृशो यः स तथा तस्मिन्, आरक्ते इत्यर्थः। तथा **कमलाकरनलिनीषण्डबोधके,** कमलानामाकरा उत्पत्तिभूमयो ह्रदादिजलाशयविशेषास्तेषु यानि नलिनीषण्डानि तेषां बोधको यः स तथा[1] तस्मिन्। पुनः किंभूते तस्मिन्नित्याह - **सहस्ररश्मौ**, दिनं करोतीति **दिनकर**स्तस्मिन्, **तेजसा ज्वलति**, तत्रैते भावाः सर्वेऽपि सन्तीति ज्ञापनार्थं सूर्यस्य विशेषणबहुत्वम्। अनेन चोत्तरोत्तरकालभाविना आवश्यककरणकालविशेषणकलापेन प्रकृष्ट-मध्यम-जघन्योद्यमवतां सत्त्वानां तं तमावश्यककरणसमयमाह। तथाहि - केचित् प्रकृष्टोद्यमिनः किञ्चित् प्रकाशमात्रायां रजन्यां मुखधावनाद्यावश्यकं कुर्वन्ति, मध्यमोद्यमिनस्तु तस्यामेव सुविमलायामरुणप्रभावसरे वा, जघन्योद्यमिनस्तु समुद्गते सवितरीति।

**मुहधोवणे**त्यादि, मुखधावनं च दन्तप्रक्षालनं च तैलं च फणिहश्च सिद्धार्थाश्च हरितालिका च आदर्शश्च धूपश्च पुष्पाणि च माल्यं च गन्धाश्च ताम्बूलं च वस्त्राणि च तान्यादिः येषां स्नाना-ऽऽभरण-परिधानादीनां तानि तथा। तत्र **फणिहः** कङ्कतकः, तं मस्तकादौ व्यापारयन्ति । **सिद्धार्थाः** सर्षपाः, **हरितालिका** दूर्वा, एतद्द्वयं मङ्गलार्थं शिरसि प्रक्षिपन्ति। **आदर्शे** तु मुखादि निरीक्षन्ते। **धूपेन** तु वस्त्रादि धूपयन्ति। अग्रथितानि **पुष्पाणि**,[2] तान्येव ग्रथितानि **माल्यम्**, अथवा विकसितानि **पुष्पाणि**, तान्येवाविकसितानि **माल्यम्**, एतेषां च मस्तकादिषूपयोगः। शेषं स्वरूपत उपयोगतश्च प्रतीतमेव। **एतानि द्रव्यावश्यकानि कृत्वा ततः पश्चाद् राजकुलादौ गच्छन्ति**। तत्र रमणीयतातिशयेन स्त्रीपुरुषमिथुनानि

Jain Education International For Private & Personal Use Only www.jainelibrary.org

यत्राऽऽरमन्ति स विविधपुष्पजात्युप-शोभित **आराम**:। वस्त्रा-ऽऽभरणादिसमलङ्कृतविग्रहाः सन्निहिताशनाद्याहारा मदनोत्सवादिषु क्रीडार्थं लोका उद्यान्ति यत्र तच्चम्पकादित[३]रुषण्ड-मण्डित**मुद्यानम्। भारतादिकथाविनोदेन** यत्र लोकस्तिष्ठति सा **सभा**। शेषं प्रतीतम्।

अत्राह - ननु राजादिभिः प्रभातेऽवश्यं क्रि[४]यन्त इति व्युत्पत्तिमात्रेणाऽऽवश्यकत्वं भवतु मुखधावनादीनाम्, द्रव्यत्वं तु कथममीषाम्? विवक्षितभावस्य हि कारणं द्रव्यं भवति, *भूतस्य भाविनो वा भावस्य हि**[ ] इत्यादिवचनात्, न च राजादिभिः क्रियमाणानि मुखधावनादीनि भावावश्यककारणं भवन्ति, सत्यम्, किन्तु [५]*भूतस्य भाविनो वा** [ ] इत्याद्येव द्रव्यलक्षणं न मन्तव्यम्, किं तर्हि? [६]*अप्पाहण्णे वि दव्वसद्दो त्ती*[पञ्चाशके ६।१३] ति वचनादप्रधानवाचकोऽपि द्रव्यशब्दोऽवगन्तव्यः, अप्रधानानि च मोक्षकारणभावावश्यकापेक्षया संसारकारणानि राजादिमुखधावनादीनि, ततश्च द्रव्यभूतानि अप्रधानभूतान्यावश्यकानि द्रव्यावश्यकानि एतानीत्यदोषः। नोआगमत्वं चेहाप्यागमाभावान्नोशब्दस्य च सर्वनिषेधवचनत्वादित्यलं विस्तरेण। निगमयन्नाह - **सेतं लोइय**मित्यादि, तदेतज्ज्ञशरीर-भव्यशरीरव्यतिरिक्तं लौकिकं द्रव्यावश्यकमित्यर्थः।

**[सू० २१] से किं तं कुप्पावयणियं दव्वावस्सयं? कुप्पावयणियं दव्वावस्सयं जे इमे चरग-चीरिग-चम्मखंडिय-[१]भिच्छुंडग-पंडरंग-गोतम-गोव्वतिय- गिहिधम्म-धम्मचिंतग-अविरुद्ध-विरुद्ध-[२]वुड्ढ-सावगप्प-भितयो पासंडत्था कल्लं पाउप्पभायाए रयणीए [३]जाव तेयसा जलंते इंदस्स वा खंदस्स वा रुद्दस्स वा सिवस्स वा वेसमणस्स वा देवस्स वा नागस्स वा जक्खस्स वा भूयस्स वा [४]मुगुंदस्स वा अज्जाए [५]वा [६]कोट्टकिरियाए वा उवलेवण-सम्मज्जण[७]-ऽऽवरिसण-धूव-पुप्फ-गंध-मल्लाइयाइं दव्वावस्सयाइं करेंति। सेतं कुप्पावयणियं दव्वावस्सयं।**

**[सू० २२] से किं तं लोगोत्तरियं दव्वावस्सयं? लोगोत्तरियं दव्वावस्सयं जे इमे समणगुणमुक्क[८]जोगी, छक्कायनिरणुकंपा, हया इव [९]उद्दामा, गया**

* दृश्यतां पृ० ३६ पं० १२॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**इव निरंकुसा, घट्टा, मट्टा, [१०]तुप्पोट्टा, [११]पंडरपडपाउरणा जिणाणं अणाणाए सच्छंदं विहरिऊणं उभओकालं आवस्सगस्स [१२]उवट्ठंति। सेतं लोगुत्तरियं दव्वावस्सयं। से तं जाणगसरीरभवियसरीरवइरित्तं दव्वावस्सयं। सेतं नोआगमतो दव्वावस्सयं। सेतं दव्वावस्सयं।**

**[चू० २१-२२] से किं तं कुप्पावयणियं** इत्यादि। जे धाडिभिक्खं हिंडंति भुंजंता वा हिंडंति ते **चरगा**। चीरपरिहाणा चीरपाउरणा चीरभंडोवकरणा य **चीरिया**। चम्मपरिहाणा चम्मपाउरणा चम्मभंडोवकरणा य **चम्महंडिया चम्मखण्डिता** वा। भिक्खं उंडेंति **भिच्छुंडा,** भिक्षाभोजना इत्यर्थः, बुद्धसासणत्थो वा **भिच्छुंडो**। **पंडरंगा** सरक्खा। [१]पावडणादिविविधसिक्खाहिं बइल्लं सिक्खवेंता तं चेव पुरेकातुं कणभिक्खादि अडंता **गोतमा**। गावीहिं समं गच्छंति चिट्ठंति वसंति य आहारिमे य कंद-मूल-पत्त-पुप्फ-फले आहारेंति [२]संरंग-वरंग-कंसभायणेसु य दिण्णं असणादि गोण इव भक्खयंता **गोव्वतिया**। सव्वसाधारणत्तणतो गृहधर्म एव श्रेयान् ,अतो गृहधर्मे स्थिता **गृहधर्मस्थाः**। **गौतम-याज्ञवल्क**प्रभृतिभिः ऋषिभिर्या धर्मसंहिता प्रणीता तां चिंतयन्तः ताभिश्च व्यवहरन्तो **धर्मचिन्तगा** भवन्ति, ते च जने प्रख्याताः धर्मसंहितापाठकाः। वेणइयवादट्ठिता पासंडत्था, जहा *वेसियायणपुत्तो,* सव्वदेवताणं णर-तिरियाण य सव्वाविरोधपणामकारित्तणतो य **अविरुद्ध**धम्मट्ठिता भणिता । अकिरियावादट्ठिता सव्वकिरियावादी-अण्णाणिय-वेणतिएहिं सह **विरुद्धा,** ण य तेसिं का वि देवता पासंडो वा विज्जति तहवि केइ सुहजीविताइकज्जेण देवतं पासंडं वा पडिवन्ना वि **विरुद्ध**धम्मट्ठिता भणिता। उस्सण्णं वुड्ढवते पव्वयंति त्ति तावसा **वुड्ढा** भणिता। सावगधम्मातो पसूय त्ति बंभणा **सावग** त्ति भणिता। ***अण्णे भणंति*** – **वुड्ढसावगा** बंभणा इत्यर्थः। **खंदः** कार्तिकेयः। [३]**मगुंदो** बलदेवः। *दुगार्याः* पूर्वरूपं *अम्ब्र[४]कुष्माण्डिवत्* तधा ठिता **अज्जा** भन्नति। सैव महिषव्यापादनकालात् प्रभृति तद्रूपस्थिता [५]**कोट्टम्बा (कोट्टकिरिया)** भण्णति। सेसा **इंदाइया** कंठा। तेसु इमे आवस्सए करेंति – **उवलेवणेत्यादि**। **उवलेवणं** लिंपणं।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**सम्मज्जणं** वोहरणं। **आवरिसणं** उदकेण। सेसं कंठं। कुप्पावयणदव्वावस्सतं गतं।

**से किं तं लोगुत्तरियं** इत्यादि। जंघा फेणगादिणा **घट्ठा**। सरीरं केसा वा उदकादिणा **मट्ठा** कता। केसा सरीरं वा तेल्लेण तुप्पिता मक्खिता जेसिं ते **तुप्पोट्ठा,** तुप्पिता वा ओट्ठा सित्थकेण जेसिं ते **तुप्पोट्ठा**। सेसं कंठं। सद्धा-संवेगभावरहितत्तणतो एतं दव्वावस्सतं गतं।

[हा० २१-२२] **से किं त**मित्यादि, यदेते चरकादयः इन्द्रादेरुपलेपनादि कुर्वन्ति तदेतत् कुप्रावचनिकं द्रव्यावश्यकमिति क्रिया। तत्र **चरकाः** धाटिभिक्षाचराः। **चीरिकाः** रथ्यापतितचीरपरिधानाः, चीरोपकरणा **इत्यन्ये**। **चर्मखण्डिकाः** चर्मपरिधानाः, चर्मोपकरणा इति **चान्ये**। **भिक्षोण्डाः** भिक्षाभोजिनः, **सुगत**शासनस्था **इत्यन्ये**। **पाण्डरङ्गाः** भौताः। **गौतमाः** लघुतराक्षमालाचर्चितविचित्रपादपतनादिशिक्षाकलापवद्वृषभकोपायतः कणभिक्षाग्राहिणः। **गोवृ(व्र)तिकाः** गोश्चर्यानुकारिणः। उक्तं च –

*गावीहिं समं निग्गम पवेस ठाणाऽऽसणाइ य करेन्ति।*
*भुंजंति य जह गावी तिरिक्खवासं विभावेन्ता॥१॥* [ ]

**गृहिधर्माः** गृहस्थ[धर्म] एव श्रेयान् इत्यभिसन्धाय तद्यथोक्तकारिणः। **[धर्मचिन्तकाः]** धर्मसंहितापरिज्ञानवन्तः सभासदः। **अविरुद्धाः** वैनयिकाः। उक्तं च –

*अविरुद्ध विणयकारी देवादीणं पराए भत्तीए।*
*जह* ***वेसियायणसुओ*** *एवं अण्णे वि नायव्वा॥१॥* [ ]

**विरुद्धाः** अक्रियावादिनः परलोकानभ्युपगमात् सर्ववादिभ्य एव विरुद्धा इति। **वृद्धाः** तापसाः प्रथमसमुत्पन्नत्वात् प्रायो वृद्धकाले च दीक्षाप्रतिपत्तेः। **श्रावकाः** धिग्वर्णाः। ***अन्ये*** तु **वृद्धश्रावका** इति व्याचक्षते, धिग्वर्णा एव। **प्रभृति**ग्रहणात् परिव्राजकादिपरिग्रहः। **पाषण्डस्थाः**।

**कल्ल**मित्यादि पूर्ववत्। [१]**इंदंसे(इंदस्स)** वे त्यादि, **इन्द्रः** प्रतीतः। **स्कन्दः** कार्तिकेयः। **रुद्रः** प्रतीतः। **शिवो** महादेवः। **वैश्रवणो** यक्षनायकः। **देवः** सामान्यः। **नागो** भवनवासिभेदः। **यक्षो** व्यन्तरः। **भूतः** स एव। **मुकुन्दो** बलदेवः। **आर्या** प्रशान्तरूपा दुर्गा, **कोट्टक्रिया** सैव महिषाद्यारूढा। उपलेपन-सम्मार्जना-ऽऽमर्षण-धूप-पुष्प-गन्ध-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

माल्यादीनि द्रव्यावश्यकानि कुर्वन्ति । तत्रो**पलेपनं** छगणादिना प्रतीतमेव, **सम्मार्जनं** दण्डपुच्छादिना, **आमर्षणं** गन्धोदकादिनेति । **सेत्त**मित्यादि निगमनम् ।

**से किं त**मित्यादि । **जे इमे** त्ति य एते **समणगुणमुक्कजोगे** त्ति, श्रमणाः, साधवः, तेषां गुणाः मूलोत्तराख्याः प्राणातिपातादिविनिवृत्त्यादयः पिण्डविशुद्ध्यादयश्च, योजनं **योगः** आसेवनमित्यर्थः, श्रमणगुण[२]प्रमुक्तो योगो यैस्ते तथाविधाः । शेषाः अवयवाः सुखोन्नेयाः, यावद् **घट्ठ** त्ति अवयवा-ऽवयविनोरभेदोपचाराद् जङ्घे फेनकादिना घृष्टे येषां ते घृष्टाः । तथा **मट्ठा** तैलोदकादिमृष्टाः, मतुप्लोपाद्वा मृष्टवन्तो मृष्टाः । **तुप्पोट्ठ** त्ति तुप्रं स्निग्धम्, तुप्रा ओष्ठाः समदना वा येषां ते तुप्रौष्ठाः । शेषं कण्ठ्यम्, यावदु**भयकालम् आवश्यकस्ये**ति आवश्यकाय, *छट्ठ(ट्ठी)विभत्तीए भण्णइ चउत्थी* [ ]ति लक्षणात् प्रतिक्रमणायोपतिष्ठन्ते तदेतद् द्रव्यावश्यकम्, भावशून्यत्वादभिप्रेतफलाभावाच्च ।

एत्थ उदाहरणम् – **वसंतउरं** नगरं । तत्थ गच्छो अ[३]गीयत्थसंविग्गो विहरति । तत्थ य एगो संविग्गो समणगुणमुक्कजोगी । सो दिवसदेवसियं उदउल्लादियाओ अणेसणाओ पडिगाहेत्ता महता संवेगेण पडिक्कमणकाले आलोएति । तस्स पुण सो गच्छगणी अगीयत्थत्तणओ पायच्छित्तं देंतो भणाति – अहो इमो धम्मसद्धिओ साहू, सुहं पडिसेवितुं दुक्खं आलोइउं, एवं नाम एसो आलोएति अगूहंतो ता असढत्तणओ सुद्धो त्ति । एवं च दट्ठूणं अण्णे अगीयत्थसमणा पसंसंति, चिंतेंति य – णवरं आलो[ए]यव्वं ति, णत्थि किंचि पडिसेवितेणं ति । तत्थऽण्णया कयादी गीयत्थो संविग्गो विहरमाणो आगओ । सो दिवसदेवसियं अविहिं दट्ठूणं उदाहरणं दाएति - **गिरिणगरे** वाणियओ रत्तरयणाणं घरं भरेऊण वरिसे वरिसे पलीवेइ । एवं च दट्ठूणं सव्वलोगो अविवेगित्तणओ पसंसति-अहो इमो धण्णो जो भगवंतं अग्गिं तप्पेति । तत्थऽण्णया तेण य पलीवियं गिहं, वाओ य पबलो जाओ, सव्वं नगरं दड्ढं । ततो सो पच्छा रण्णा पडिहओ, णिण्णारो य कओ । अण्णहिं पि णगरे एगो एवं चेव करेइ । सो राइणा सुतो – जहा को वि वणिओ एवं करेइ त्ति । सो तेण सव्वस्स-हरणो काऊण विसज्जिओ, अडवीए किं [न] पलीवेसि ? । तो जहा तेण वणिएण अवसेसा वि दड्ढा एवं तुमं पि एवं पसंसेतो एते साहुणो सव्वे वि परिच्चयसि । ताहे वि जाहे सो न ठाइ ताहे तेण साहुणो भणिता एस महानिद्धम्मो अगीयत्थो, ता अलं एयस्स आणाए,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

जइ एयस्स णिग्गहो ण कीरइ तओ अण्णे वि विणस्संति त्ति।

**सेत्त**मित्यादि निगमनत्रयं निगदसिद्धम्।

[ हे० २१-२२ ] उक्तो नोआगमतो द्रव्यावश्यकान्तर्गतज्ञशरीरभव्यशरीरव्यतिरिक्तद्रव्यावश्यकप्रथमभेदः। अथ तद्द्वितीयभेदनिरूपणार्थमाह - **से किं त**मित्यादि। अथ किं तत् **कुप्रावचनिकं द्रव्यावश्यकम्** ? अत्र निर्वचनम् — **कुप्पा-वयणियं दव्वावस्सयं जे इमे** इत्यादि, कुत्सितं प्रवचनं येषां ते कुप्रवचनास्तेषामिदं कुप्रावचनिकं द्रव्यावश्यकम्। किं पुनस्तदित्याह — **जे इमे** इत्यादि, य एते **चरक-चीरिका**दयः प्रभातसमये इन्द्र-स्कन्दादेरुपलेपनादि कुर्वन्ति तत् कुप्रावचनिकं द्रव्या- वश्यकमिति समुदायार्थः।

तत्र धाटिवाहकाः सन्तो ये भिक्षां चरन्ति ते **चरकाः**, अथवा ये भुञ्जानाश्चरन्ति ते **चरकाः**। रथ्यापतितचीरपरिधानाश्**चीरिकाः**, अथवा येषां चीरमयमेव सर्वमुपकरणं ते **चीरिकाः**। चर्मपरिधानाश्**चर्मखण्डिकाः**, अथवा चर्ममयं सर्वमेवोपकरणं येषां ते **चर्मखण्डिकाः**। ये भिक्षामेव भुञ्जते न तु स्वपरिगृहीतगोदुग्धादिकं ते **भिक्षोण्डाः**, **सुगतशासनस्था इत्यन्ये**। **पाण्डुराङ्गा** भस्मोद्धूलितगात्राः। विचित्रपादपतनादिशिक्षाकलापयुक्तवराटकमालिकादिचर्चितवृषभकोपायतः कणभिक्षाग्राहिणो **गौतमाः**। गोचर्यानुकारिणो **गोव्रतिकाः**, ते हि वयमपि किल तिर्यक्षु वसाम इति भावनां भावयन्तो गोभिर्निर्गच्छन्तीभिः सह निर्गच्छन्ति स्थिताभिस्तिष्ठन्त्यासीनाभिरुपविशन्ति। भुञ्जानाभिस्तद्वदेव तृण-पत्र-पुष्प-फलादि भुञ्जते। तदुक्तम् —

*गावीहिं समं निग्गमपवेसठाणासणाइ पकरेंति।*
*भुंजंति जहा गावी तिरिक्खवासं विभावंता॥१॥* [ ]

गृहस्थधर्म एव श्रेयानित्यभिसन्धाय तद्यथोक्तचारिणो **गृहिधर्माः**। तथा च तदनुसारिणां वचः —

*गृहाश्रमसमो धर्मो न भूतो न भविष्यति।*
*तं पालयन्ति ये धीराः क्लीबाः पाषण्डमाश्रिताः॥१॥* [ ]*इति।*

**याज्ञवल्क्य**प्रभृतिऋषिप्रणीतधर्मसंहिताश्चिन्तयन्ति ताभिश्च व्यवहरन्तीति **धर्म-**

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**चिन्तकाः** । देवता-क्षितीश-मातापितृ-तिर्यगादीनामविरोधेन विनयकारित्वाद**विरुद्धा** वैनयिकाः । पुण्य-पाप-परलोकाद्यनभ्युपगमपरा अक्रियावादिनो **विरुद्धाः**, सर्वपाषण्डिभिः सह विरुद्धचारित्वात् । अत्राऽऽह - ननु यद्येते पुण्याद्यनभ्युपगमपराः कथं तर्ह्येषां वक्ष्यमाणमिन्द्राद्युपलेपनं संभवति, पुण्यादिनिमित्तमेव तस्य सम्भवात् ? सत्यम्, किन्तु जीविकादिहेतोस्तेषामपि तत् संभवतीत्यदोषः । प्रथममेवाऽऽद्यतीर्थकरकाले समुत्पन्नत्वात् प्रायो वृद्धकाले दीक्षाप्रतिपत्तेश्च **वृद्धाः** तापसाः । **श्रावका** ब्राह्मणाः, प्रथमं **भरता**दिकाले श्रावकाणामेव सतां पश्चाद् ब्राह्मणत्वभावात् । **अन्ये** तु **वृद्धश्रावका** इत्येकमेव पदं ब्राह्मणवाचकत्वेन व्याचक्षते । एतेषां द्वन्द्वसमासः । **प्रभृति**ग्रहणात् परिव्राजकादिपरिग्रहः । पाषण्डं व्रतम्, तत्र तिष्ठन्तीति **पाषण्डस्थाः** । **कल्लं पाउप्पभा**ताए इत्यादि पूर्ववद् याव**त्तेजसा ज्वलती**ति । **इंदस्स वे**त्यादि, तत्रे**न्द्रः** प्रतीतः, **स्कन्दः** कार्तिकेयः, **रुद्रो** हरः, **शिव**स्त्वाकारविशेषधरः स एव व्यन्तरविशेषो वा, **वैश्रवणो** यक्षनायकः, **देवः** सामान्यः, **नागो** भवनपतिविशेषः, **यक्ष-भूतौ** व्यन्तरविशेषौ, **मुकुन्दो** बलदेवः । **आर्या** प्रशान्तरूपा दुर्गा, सैव महिषारूढा तत्कुट्टनपरा **कोट्टक्रिया** । अत्रोपचारादिन्द्रादिशब्देन तदायतनमप्युच्यते, अतस्तस्येन्द्रादे**रुपलेपन-सम्मार्जना-ऽऽवर्षण-पुष्प-धूप-गन्ध-माल्यादीनि द्रव्यावश्यकानि कुर्वन्ति** । तत्र **उपलेपनं** छगणादिना प्रतीतमेव, सम्मार्जनं दण्डपुञ्छनादिना, **आवर्षणं** गन्धोदकादिना, शेषं गतार्थम् । तदेवं य एते चरकादय इन्द्रादेरुपलेपनादि कुर्वन्ति तत् कुप्रावचनिकं द्रव्यावश्यकम् । अत्र द्रव्यत्वमावश्यकत्वं नोआगमत्वं च लौकिकद्रव्यावश्यकोक्तमिव भावनीयम् । निगमयन्नाह - **सेत्त**मित्यादि, तदेतज्ज्ञशरीर-भव्यशरीरव्यतिरिक्तं कुप्रावचनिकं द्रव्यावश्यकमित्यर्थः ।

उक्तो नोआगमतो द्रव्यावश्यकान्तर्गतज्ञशरीर-भव्यशरीर-व्यतिरिक्तद्रव्यावश्यकद्वितीयभेदः । अथ तत्तृतीयभेदनिरूपणार्थमाह — **से किं त**मित्यादि । अथ किं तल्लोकोत्तरिकं द्रव्यावश्यकम् ? अत्र निर्वचनमाह — **लोउत्तरियं दव्वावस्सयं जे इमे** इत्यादि, लोकस्योत्तराः प्रधानाः लोकोत्तराः साधवः, अथवा लोकस्योत्तरं प्रधानं लोकोत्तरं जिनशासनम्, तेषु तस्मिन् वा भवं लोकोत्तरिकं द्रव्यावश्यकमिति व्याख्यातमेव । किं पुनस्तदित्याह - **जे इमे** इत्यादि, य एते **श्रमणगुणमुक्तयोगि**त्वादिविशेषणविशिष्टाः

Jain Education International For Private & Personal Use Only www.jainelibrary.org

साध्वाभासा **जिनानामनाज्ञया स्वच्छन्दं विहृत्योभयकालमावश्यकाय** प्रतिक्रमणायो**पतिष्ठन्ते** तत्तेषां प्रतिक्रमणानुष्ठानं लोकोत्तरिकं द्रव्यावश्यकमिति समुदायार्थः।

इदानीमवयवार्थ उच्यते - तत्र श्रमणाः साधवस्तेषां गुणा मूलोत्तरगुणरूपाः, तत्र जीववधविरत्यादयो मूलगुणाः, पिण्डविशुद्ध्यादयस्तूत्तरगुणाः, तेषु मुक्तो योगो व्यापारो यैस्ते सर्वधनादेराकृतिगणत्वात् श्रमणगुणमुक्तयोगिनः। एते च जीववधादिविरतिमुक्तव्यापारा अपि मनसा कदाचित् सानुकम्पा अपि स्युरित्याह - **षट्सु कायेषु** पृथिव्यादिषु विषये **निर्गता** अपगता **अनुकम्पा** मनःसार्द्रता येभ्यस्ते तथा। निरनुकम्पताचिह्नमेवाऽऽह- **हया इव** तुरगा इव **उद्दामाः**, चरणनिपातजीवोपमर्दनिरपेक्षत्वाद् द्रुतचारिण इत्यर्थः। किमित्येवंभूतास्ते इत्याह - यतो **गजा इव** दुष्टद्विरदा इव **निरङ्कुशाः**, गुर्वाज्ञाव्यतिक्रमचारिण इत्यर्थः। अत एव **घट्ठ** त्ति येषां जङ्घे श्लक्ष्णीकरणार्थं फेनादिना घृष्टे भवतस्तेऽवयवावयविनोरभेदोपचारात् घृष्टाः। तथा **मट्ठ** त्ति तैलोदकादिना येषां केशाः शरीरं वा मृष्टं ते तथैव **मृष्टाः**, अथवा केशादिषु मृष्टं विद्यते येषां मृष्टवन्तः, [१]वन्तुप्रत्ययलोपान्मृष्टाः। तथा **तुप्पोट्ठ** त्ति तुप्रा म्रक्षिता मदनेन वा वेष्टिताः शीतरक्षादिनिमित्तमोष्ठा येषां ते **तुप्रोष्ठाः**। तथा मलपरीषहसहिष्णुतादूरीकृतत्वात् **पाण्डुरो**[२] धौतः **पटः प्रावरणं [च]** येषां ते तथा। **जिनानामनाज्ञया स्वच्छन्दं विहृत्य** तीर्थकराज्ञाबाह्याः स्वस्वरुच्या विविधचेष्टाः कृत्वा ततश्चो**भयकालं** प्रभातसमयेऽस्तमयसमये च, चतुर्थ्यर्थे षष्ठीति कृत्वा **आवश्यकाय** प्रतिक्रमणायो**पतिष्ठन्ते** तत्तेषामावश्यकं लोकोत्तरिकं द्रव्यावश्यकम्। अत्र तु द्रव्यावश्यकत्वं भावशून्यत्वात् तत्फलाभावाच्चाप्रधानतयाऽवसेयं। नोआगमत्वमपि देशे क्रियालक्षणे आगमाभावान्नोशब्दस्य चात्र देशप्रतिषेधवचनत्वादिति।

अत्र च लोकोत्तरिके द्रव्यावश्यके उदाहरणम् - **वसन्तपुरे** नगरेऽगीतार्थसंविग्नो गच्छ एको विचरति। तत्र च श्रमणगुणमुक्तयोगी संविग्नाभासः साधुरेकः प्रतिदिनं पुरःकर्मादिदोषदुष्टमनेषणीयं भक्तादि गृहीत्वा महता संवेगेन प्रतिक्रमणकाले आलोचयति। तस्मै च गच्छाचार्योऽगीतार्थत्वात् प्रायश्चित्तं प्रयच्छन् भणति - पश्यत, अहो ! कथमसौ भावमगोपयन् अशठतया सर्वं समालोचयति। सुखं हि आसेवना क्रियते, दुःखं चेत्थमालोचयितुम्, तस्मादशठतयैव शुद्धोऽसौ। तथा च तं प्रशस्यमानं दृष्ट्वा तत्र अन्येऽप्यगीतार्थ-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

श्रमणाः प्रशंसन्ति चिन्तयन्ति च - गुरोश्चेदित्थमालोच्यते तर्हि दोषासेवनायामसकृत् कृताया-मपि न कश्चिद्दोषः, आलोचनाया एव साध्यत्वात्।

एवं चान्यदा तत्र संविग्नगीतार्थः साधुः कश्चिदायातः। तेन च प्रतिदिनं तमेव व्यतिकरमालोक्य सूरिरुक्तः - त्वमित्थमस्य प्रशंसां कुर्वन् विवक्षितक्षितीश इव लक्ष्यसे। तथाहि - गिरिनगरवासी कश्चिदग्निभक्तो वणिक् पद्मरागरत्नानां गृहं भृत्वा प्रतिवर्षं वह्निना प्रदीपयति। तं चाविवेकितया तन्नगरनरपतिर्लोकश्च श्लाघते - अहो ! धन्योऽयं वणिग् यो भगवन्तं हुतभुजमित्थमौदार्यभक्त्यतिशयाद्रत्नैस्तर्पयति। अन्यदा च प्रबलपवनपटल-प्रेरितस्तत्प्रदीपितदहनः सराजप्रासादं समस्तमपि तन्नगरं दहति स्म। ततोऽसौ राज्ञा दण्डितो नगराच्च निष्कासितः। तदेवं यथा राज्ञा तस्य प्रशंसां कुर्वता आत्मा नगरलोकश्च नाशितस्तथा त्वमपि अस्याऽविधिप्रवृत्तस्य प्रशंसां कुर्वन्नात्मानं समस्तगच्छं चोच्छेदयसि। यदि पुनरमुमेकं शिक्षयसि तदा तथाविधनृप इव सपरिकरो निरपायतामनुभवसि। तथाहि - अन्येन केनचिद् राज्ञा तथैव कुर्वन् कश्चिद् वणिगाकर्णितः। ततो नगरदाहापायदर्शिना क्षितीशेन 'अरण्यं गत्वा किमित्थं न करोषि ?' इत्यादि-वचोभिस्तिरस्कृत्य दण्डितो निष्कासितश्च। एवं त्वमपीत्याद्युपनयो गतार्थः। इत्यादि बहु प्रकारं भणितोऽपि यावदसौ तत्प्रशंसातो न निवर्तते तावत्तेन गीतार्थ-साधुना शेषसाधवोऽभिहिताः - एष गणाधिपो महानिर्धर्मताऽऽस्पदमगीतार्थो यदि न परित्यज्यते तदा भवतां महतेऽनर्थाय प्रभवतीति।

तदेवं तत् साध्वावश्यकप्रकारं सर्वं लोकोत्तरिकं द्रव्यावश्यकमिति। निगमयन्नाह-**सेत**मित्यादि, तदेतल्लोकोत्तरिकं द्रव्यावश्यकम्। एतद्भणने च ज्ञशरीर-भव्यशरीरव्यतिरिक्तं त्रिविधमपि द्रव्यावश्यकं समर्थितं भवत्यतस्तदपि निगमयति - **सेत्त**मित्यादि। एतत्समर्थने च नोआगमतो द्रव्यावश्यकस्य सप्रभेदस्य समर्थितत्वात्तदपि निगमयति - **सेतं नोआगमतो** इत्यादि। एतत्समर्थने च यत् प्रक्रान्तं द्रव्यावश्यकं तत् सोत्तरभेदमप्यवसितमतो निगमयति - **सेत्तं दव्वावस्सय**मिति तदेतत् द्रव्यावश्यकं समर्थितमित्यर्थः।

**[सू० २३] से किं तं भावावस्सयं ? भावावस्सयं दुविहं पण्णत्तं। तंजहा— आगमतो य १, णोआगमतो य २।**

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[चू० २३] से किं तं भावावस्सयं** इत्यादि।

**[हा० २३] से किं त**मित्यादि, अवश्यक्रियानुष्ठानादावश्यकम्, गुणानां वा आवश्यमात्मानं करोतीति आवश्यकम्। उपयोगाद्यात्मकत्वाद् भावश्चासावावश्यकं चेति समासः, भावप्रधानं वाऽऽवश्यकं भावावश्यकम्। द्विविधं प्रज्ञप्तम्, तद्यथा— आगमतो नोआगमतश्च।

**[हे० २३]** उक्तं सप्रपञ्चं द्रव्यावश्यकम्, साम्प्रतमवसरायातभावावश्यकनिरूपणार्थमाह - **से किं त**मित्यादि। अथ किं तद् **भावावश्यक**मिति। अत्र निर्वचनमाह - **भावावस्सयं दुविह**मित्यादि। वक्तृविवक्षितपरिणामस्य भवनं भावः। उक्तं च —

भावो विवक्षितक्रियाऽनुभूतियुक्तो हि वै समाख्यातः।
सर्वज्ञैरिन्द्रादि[१]वदिहेन्दनाक्रियाऽनुभवात्॥१॥ [ ]

व्याख्या - वक्तुर्विवक्षितक्रियायाः विवक्षितपरिणामस्य इन्दनादेरनुभवनम् अनुभूतिस्तया युक्तो योऽर्थः स भाव-तद्वतोरभेदोपचाराद्भावः सर्वज्ञैः समाख्यातः। निदर्शनमाह - इन्द्रादिवदित्यादि। यथा इन्दनादिक्रियानुभवात् परमैश्वर्यादिपरिणामेन परिणतत्वादिन्द्रादिर्भाव उच्यत इत्यर्थः इत्यार्यार्थः।

भावश्चासौ आवश्यकं च भावमाश्रित्य वा आवश्यकं **भावावश्यकम्**। तच्च **द्विविधं प्रज्ञप्तम्, तद्यथा - आगमत**: आगममाश्रित्य **नोआगमतः** आगमाभावमाश्रित्य।

**[सू० २४] से किं तं आगमतो भावावस्सयं ? आगमतो भावावस्सयं जाणए उवउत्ते। सेतं आगमतो भावावस्सयं।**

**[सू० २५] से किं तं नोआगमतो भावावस्सयं ? नोआगमतो भावावस्सयं तिविहं पण्णत्तं। तंजहा — लोइयं १, कुप्पावयणियं २, लोगुत्तरियं ३।**

**[सू० २६] से किं तं लोइयं भावावस्सयं ? लोइयं भावावस्सयं पुव्वण्हे**

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**भारहं अवरण्हे रामायणं। सेतं लोइयं भावावस्सयं।**

**[सू० २७] से किं तं कुप्पावयणियं भावावस्सयं ? कुप्पावयणियं भावावस्सयं ? जे इमे[१] चरग-चीरिय जाव पासंडत्था इज्जंजलि-होम-जप्प[२]-उंदुरुक्क[३]-नमोक्कारमाइयाइं भावावस्सयाइं करेंति । से तं कुप्पावयणियं भावावस्सयं।**

**[चू० २४-२७]** संवेगजणितविसुज्झमाणभावस्स सुतमणुस्सरतो तदत्थोवयोगपरिणयस्स **आगमतो भावावस्सगं** भवति।

**णोआगमतो भावावस्सतं**। णाणुवयोगेण किरियं करेमाणस्स णाण-किरियासु वा सुभोवयोगपरिणयस्स **णोआगमतो भावावस्सतं**। **तं तिविधं**। तत्थ लोइयं **पुव्वण्हे भारहं** इत्यादि कंठं। कुप्पावयणियं **जे इमे चरगे**त्यादि। **इज्ज**त्ति यजनं याग **इज्जा** भणिता, देवपूया वा **इज्जा,** तं गायत्र्यादिक्रियया उभयसंझं माहणा करेंति। दो वि करा मउलसंठिता तं इट्ठदेवताए **अंजलिं** करेंति। ***अन्ने*** भणंति – **इज्ज**त्ति माता, तीए गब्भस्स णिग्गच्छतो जो करतलाणं आगारो तारिसं देवताए **अंजलिं** करेंति । अहवा मातु-पितुभत्ता देवयमिव मण्णमाणा अंजलिं करेंति सा **इज्जंजली**। *इज्जदेवताए* वा अंजली **इज्जंजली**। **होमं** अग्गिहोत्तियाणं। **जप्पं** मन्त्रजापः। *देसी*वयणातो **उंण्डुं**[१] मुहं, तेण **रुक्कं** ति सद्दकरणं, तं च वसभढेक्कियाइ। **णमोक्कारो** जधा 'णमो भगवते आदित्याय'। एवं खंदादियाण[२] वि वत्तव्वं । गतं कुप्पावयणीयं भावावस्सयं ।

**[हा० २४-२७] से किं तमित्यादि, ज्ञ उपयुक्तः** । अयमत्र भावार्थः – आवश्यकपदार्थज्ञस्तज्जनितसंवेगेन विशुद्ध्यमानपरिणामस्तत्रैवोपयुक्तस्तदुपयोगानन्यत्वादागमतो भावावश्यकमिति। तथा चाह – **सेत्त**मित्यादि निगमनम्।

**से किं त**मित्यादि। **नोआगमतो भावावश्यकं** – ज्ञान-क्रियोभयपरिणामः, मिश्रवचन-त्वाद् नोशब्दस्य, **त्रिविधं प्रज्ञप्तम्, तद्यथा – लौकिक**मित्यादि।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**से किं त**मित्यादि, पूर्वाह्णे **भारतम्**, अपराह्णे **रामायणम्**, तद्वाचन(क)-श्रोतॄणां पत्रकपरावर्त्तन-संयतगात्रादिक्रियायोगे सति तदुपयोगभावतो ज्ञान-क्रियोभयपरिणाम-सद्भावादित्यभिप्रायः। **सेत्त**मित्यादि निगमनम्।

**से किं त**मित्यादि गतार्थं यावद् **इज्जंजली**त्यादि, इज्जांज(ज्याञ्ज ?)लि-होम-जपोन्दुरुक्ख-नमस्कारादीनि श्रद्धानभावयुक्तत्वाद् भावावश्यकानि कुर्वन्ति । तत्र **इज्याञ्जलिः** यागाञ्जलिरुच्यते, स च यागदेवताविषयः, मातुर्वाऽञ्जलिरिज्याञ्जलिः मातृनमस्कारविधाविति भावः। **होमो**ऽग्निहवनक्रिया। **जपो** मन्त्रादिन्यासः। **उन्दुरुक्खं** ति देशीवचनं वृषभगर्जितकरणाद्यर्थ इति । ***अन्ये*** तु व्याचक्षते-**उन्दुं** मुखं, तेण **रुक्खं** ति सद्दकरणं, तं पि वसभढेक्कियादि चेव घेप्पति । **नमस्कारः** प्रतीतः, यथा 'नमो भगवते दिवसनाथाय'। **आदि**शब्दात् स्तवादिपरिग्रहः। **सेत्त**मित्यादि निगमनम्।

**[हे० २४-२७]** तत्राऽऽद्यभेदनिरूपणार्थमाह - **से किं त**मित्यादि। अथ किं त**दागमतो भावावश्यकम्** ? अत्राह - **आगमओ भावावस्सयं जाणए** इत्यादि, ज्ञायक उपयुक्त आगमतो भावावश्यकम्। इदमुक्तं भवति - आवश्यकपदार्थज्ञस्तज्जनितसंवेगेन विशुद्ध्यमानपरिणामस्तत्रैवोपयुक्तः साध्वादिरागमतो भावावश्यकम्, आवश्यकार्थोपयोगलक्षणस्याऽऽगमस्यात्र सद्भावात्। भावावश्यकता चात्राऽऽवश्यकोपयोगपरिणामस्य सद्भावात्, भावमाश्रित्य आवश्यकमिति व्युत्पत्तेः, अथवाऽऽवश्यकोपयोगपरिणामानन्यत्वात् साध्वादिरपि भावः, ततश्च भावश्चासावावश्यकं चेति व्युत्पत्तेरप्यसौ मन्तव्येति। **सेत**मित्यादि निगमनम्।

अथ भाववश्यकद्वितीयभेदनिरूपणार्थमाह - **से किं त**मित्यादि । अथ किं त**न्नोआगमतो भावावश्यकम्** ? अत्राऽऽह - **नोआगमतो भावावश्यकं त्रिविधं प्रज्ञप्तम्। तद्यथा - लौकिकं कुप्रावचनिकं लोकोत्तरिकं च**।

तत्र प्रथमभेदनिर्णयार्थमाह - **से किं तं लोइय**मित्यादि, अथ किं त**ल्लौकिकं भावावश्यक**मिति ? अत्राह - **लोइयं भावावस्सयं पुव्वण्हे** इत्यादि । लोके भवं लौकिकम्। यदिदं लोकः पूर्वाह्णे **भारत**मपराह्णे **रामायणं** वाचयति शृणोति वा तल्लौकिकम्,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

भावावश्यकम्, लोके हि **भारत-रामायणयो**र्वाचनं श्रवणं वा पूर्वाह्णापराह्णयोरेव रूढम्, विपर्यये दोषदर्शनात् । ततश्चेत्थमनयोर्लोकेऽवश्यकरणीयत्वादावश्यकत्वम्, तद्वाचक - श्रोतॄणां च तदर्थोपयोगपरिणामसद्भावाद् भावत्वम्, तद्वाचक - श्रोतारश्च पत्रकपरावर्तन-हस्ताभिनय-गात्रसंयतत्व-करकुड्मलमीलनादिक्रियायुक्ता भवन्ति, क्रिया च अनागमत्वेन प्रागिहोक्ता, *किरियाऽऽगमो न होइ**[ ] त्ति वचनात्, ततश्च क्रियालक्षणे देशे आगमस्याभावात् नोआगमत्वमपि भावनीयम्, नोशब्दस्यात्र देशनिषेधवचनत्वात्, देशे त्वागमोऽस्ति, लौकिकाभिप्रायेण **भारता**देरागमत्वात्, तस्माद् यथानिर्दिष्टसमये लौकिकास्तदुपयुक्ता यदवश्यं **भारतादि** वाचयन्ति शृण्वन्ति वा तल्लौकिकं भावावश्यकमिति स्थितम्, भावमाश्रित्याऽऽवश्यकं भावश्चासावावश्यकं चेति वा भावावश्यकमित्यलं विस्तरेण । **सेत** मित्यादि निगमनम् ।

उक्तो नोआगमतो भावावश्यकप्रथमभेदः, अथ तद्द्वितीयभेदनिरूपणार्थमाह - **से किं तं कुप्पावयणिय**मित्यादि । अत्र च निर्वचनमाह- **कुप्पावयणियं भावावस्सयं जे इमे** इत्यादि, कुत्सितं प्रवचनं येषां ते तथा, तेषु भवं कुप्रावचनिकं भावावश्यकम्, किं तत् ? उच्यते, य एते **चरक-चीरिका**दयः पाषण्डस्था यथावसरम् **इज्याञ्जलि-होमा**दीनि भावरूपाण्यावश्यकानि **भावावश्यकानि** कुर्वन्ति तत् कुप्रावचनिकं भावावश्यकमिति सम्बन्धः । तत्र चरकादिस्वरूपं प्रागेवोक्तम्, इज्याञ्जल्यादिस्वरूपं तूच्यते- तत्र यजन**मिज्या** याग इत्यर्थः, तद्विषयो जलस्याञ्जलिरि**ज्याञ्जलि**र्यागदेवतापूजावसरभावीति हृदयम् । अथवा यजनमिज्या पूजा गायत्र्यादिपाठपूर्वकं विप्राणां सन्ध्यार्चनमित्यर्थः, तत्राञ्जलिः **इज्याञ्जलिः** । अथवा देशीभाषया **इंज्ज** त्ति माता, तस्या नमस्कारविधौ तद्भक्तैः क्रियमाणः करकुड्मलमीलनलक्षणोऽञ्जलिरिज्याञ्जलिः । **होमः** अग्निहोत्रिकैः क्रियमाणमग्निहवनम् । **जपो** मन्त्राद्यभ्यासः । **उंदुरुक्कं**ति देशीवचनत **उन्दु** मुखम्, तेन **रुक्कं** वृषभादिशब्दकरण-मुन्दुरुक्कं देवतादिपुरतो वृषभगर्जितादिकरणमित्यर्थः । **नमस्कारो** 'नमो भगवते दिवसनाथाय' इत्यादिकः । एतेषां द्वन्द्वे इज्याञ्जलि-होम-जपोन्दुरुक्क-नमस्काराः, ते आदिर्येषां तानि तथा, **आदि**शब्दात् स्तवादिपरिग्रहः । एतेषां च चरकादिभिरवश्यं क्रियमाणत्वा-

* दृश्यतां पृ० ५० पं० १७ ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

दावश्यकत्वम्। एतत्कर्तॄणां च तदर्थोपयोगश्रद्धादिपरिणामसद्भावाद् भावत्वम्। अन्यच्च, चरकादीनां तदर्थोपयोगलक्षणो देश आगमः, देशस्तु कर-शिरोव्यापारादिक्रियालक्षणोऽनागमः, ततो देशे आगमाभावमाश्रित्य नोआगमत्वमवगन्तव्यम्, नोशब्दस्येहापि देशनिषेधपरत्वात्। तस्माच्चरकादयस्तदुपयुक्ता यथावसरं यदवश्यमिज्याञ्जल्यादि कुर्वन्ति तत् कुप्रावचनिकं भावावश्यकम्। भावावश्यकशब्दस्य च व्युत्पत्तिद्वयं तथैव। **सेत**मित्यादि निगमनम्।

**[सू० २८] से किं तं लोगोत्तरियं भावावस्सयं? लोगोत्तरियं भावावस्सयं [१]जण्णं इमं समणे वा समणी वा सावए वा साविया वा तच्चित्ते तम्मणे तल्लेसे तयज्झवसिते तत्तिव्वज्झवसाणे तयट्ठोवउत्ते तयप्पियकरणे तब्भावणा[२]भाविते अण्णत्थ कत्थइ मणं [३]अकरेमाणे उभओकालं आवस्सयं [*४]करेति। सेतं लोगोत्तरियं भावावस्सयं। सेतं नोआगमतो भावावस्सयं। सेतं भावावस्सयं।**

**[चू० २८]** इदाणिं **से किं तं लोगुत्तरियं** इत्यादि। **तच्चित्ता**दिपदा एगट्ठिता। अहवा एगस्सेवऽत्थस्स तदंसे भिण्णे दंसेत्ता भिण्णत्था भवंति, घट-ग्रीवा-कुक्ष्यादिवत्। इह पुण इमेण विहिणा — णिच्छयणयाभिप्पाएण **चित्त** इत्यात्मा, तदेव [१]चित्तं तच्चित्तं, तम्हि वा चित्तं **तच्चित्तं**, अहवा मति-सुतणाणभावे **चित्तं**, अहवा आवस्सयकरणकाले चेव अण्णोण्णसुत्तऽत्थ-किरियालोयणं **चित्तं**। तदेव मनोद्रव्योपरञ्जितं **मनः**। तदेव चित्तं द्रव्यलेश्योपरञ्जितं **लेश्या**। एते परिणामवशाद् व्यावर्त्तमानभिन्नकाला भवन्ति। क्रियया करोमीति प्रारम्भकाले **मनसाऽध्यवसितम्**। तदेवोत्तरकालं सन्तानक्रियाप्रवृत्तस्य प्रवर्धमानश्रद्धस्य **तीव्राध्यवसितम्**। प्रतिसूत्रं प्रतिक्रियं चार्थेषु साकारोपयोगोपयुक्तः **तदट्ठोवयुत्ते**। तस्साहणे जाणि सरीर-[२]रयोहरण-मुहणंतगादियाणि दव्वाणि ताणि किरियाकर[३]णत्तणतो **अप्पियाणि**। प्रतिसमयाऽऽवलिकादिकालविभागं प्रतिसूत्रार्थं प्रतिक्रियं प्रतिसन्ध्यं संताणतो **तब्भावणाभावितो** भवति। एवं अणन्नमणसस्स उवयोगोवयुत्तस्स भावावस्सयं भवति। एत्थ पसत्थेण लोगुत्तरभावावस्सएण अधिकारो।

---

* **करेति** पुण्यविजयजीमहाराजस्वीकृतः पाठः॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

[हा० २८] **से किं त**मित्यादि, यदित्यावश्यकमभिसम्बध्यते। **श्रमणो वे**त्यादि सुगमम्, यावत् **तच्चित्ते**त्यादि, सामान्यतस्तस्मिन् आवश्यके चित्तं भावमनोऽस्येति **तच्चित्तः** । तथा **तन्मनाः** द्रव्यमनः प्रतीत्य विशेषोपयोगं वा । तथा **तल्लेश्यः** तत्स्थशुभपरिणामविशेष इति भावना। उक्तं च –

*कृष्णादिद्रव्यसाचिव्यात् परिणामो य आत्मनः।*
*स्फटिकस्येव तत्रायं लेश्याशब्दः प्रयुज्यते ॥१॥* [ ]

तथा **तदध्यवसितः**, इहाध्यवसायोऽध्यवसितम्, तच्चित्तादिभावयुक्तस्य सतः तस्मिन् आवश्यक एवाध्यवसितं क्रियासम्पादनविषयमस्येति तदध्यवसितः । तथा **तत्तीव्राध्यवसानः**, इह प्रारम्भकालादारभ्य सन्तानक्रियाप्रवृत्तस्य तस्मिन्नेव तीव्रमध्यवसानं प्रयत्नविशेषलक्षणमस्येति समासः। तथा **तदर्थोपयुक्तः**, तस्यार्थस्तदर्थस्तस्मिन्नुपयुक्तः प्रशस्ततरसंवेगविशुद्धयमानस्याऽऽवश्यक एव प्रतिसूत्रं प्रत्यर्थं प्रतिक्रियं चोपयुक्त इति भावार्थः । तथा **तदर्पितकरणः**, इह करणानि रजोहरण-मुखवस्त्रिकादीनि, तस्मिन् आवश्यके यथोचितव्यापारनियोगेनार्पितानि न्यस्तानि करणानि येन स तथाविधः, द्रव्यतः सम्यक् स्वस्थानन्यस्तोपकरण इत्यर्थः । तथा **तद्भावनाभावितः** असकृदनुष्ठानात् पूर्वभावनाऽपरिच्छेदत एव पुनः पुनः प्रतिपत्तेरिति हृदयम्, सकृदनुष्ठानेऽपि प्रतिपत्तिसमयभावनाऽविच्छेदादिति। उपसंहरन्नाह - **अन्यत्र** प्रस्तुतव्यतिरेकेण **कुत्रचित्** कार्यान्तरे **मनः अकुर्वन्**, मनोग्रहणं काय-वागुपलक्षणम्, अन्यत्र कुत्रचिन्मनो-वाक्कायानकुर्वन्नित्यर्थः। **उभयकालम्** उभयसन्ध्यम् **आवश्यकं** प्रागूनिरूपितशब्दार्थं **करोति** निर्वर्त्तयति स खल्वावश्यकपरिणामानन्यत्वादावश्यकमिति क्रिया। **सेत्त**मित्यादि निगमनम्।

[हे० २८] उक्तो नोआगमतो भावावश्यकद्वितीयभेदः, अथ तत्तृतीयभेदनिरूपणार्थमाह- **से किं तं लोउत्तरिय**मित्यादि। अत्र निर्वचनम्- **लोउत्तरियं भावावस्सयं जं ण**मित्यादि। **जं णं** ति, **ण**मिति वाक्यालङ्कारे, यदिदं श्रमणादयस्तच्चित्तादिविशेषणविशिष्टा उभयकालं प्रतिक्रमणाद्यावश्यकं कुर्वन्ति तल्लोकोत्तरिकं भावावश्यकमिति सण्टङ्कः । तत्र श्राम्यतीति **श्रमणः** साधुः, **श्रमणी** साध्वी, शृणोति साधुसमीपे जिनप्रणीतां सामाचारीमिति **श्रावकः**

Jain Education International For Private & Personal Use Only www.jainelibrary.org

श्रमणोपासकः, **श्राविका** श्रमणोपासिका, **वा**शब्दाः समुच्चयार्थाः । तस्मिन्नेवाऽऽवश्यके चित्तं सामान्योपयोगरूपं यस्येति स[1] **तच्चित्तः** ।[2] तस्मिन्नेव मनो विशेषोपयोगरूपं यस्य स **तन्मनाः** । तत्रैव लेश्या शुभपरिणामरूपा यस्येति स **तल्लेश्यः** । तथा **तदध्यवसितः**, इहाध्यवसायोऽध्यवसितम्, ततश्च तच्चित्तादिभावयुक्तस्य सतस्तस्मिन्नेवाऽऽवश्यकेऽध्यवसितं क्रियासम्पादनविषयमस्येति तदध्यवसितः । तथा **तत्तीव्राध्यवसानः**, तस्मिन्नेवाऽऽवश्यके तीव्रं प्रारम्भकालादारभ्य प्रतिक्षणं प्रकर्षयायि प्रयत्नविशेषलक्षणमध्यवसानं यस्य स तथा । तथा **तदर्थोपयुक्तः**, तस्य आवश्यकस्यार्थस्तदर्थः, तस्मिन्नुपयुक्तस्तदर्थोपयुक्तः प्रशस्ततरसंवेगविशुद्ध्यमानः, तस्मिन्नेव प्रतिसूत्रं प्रतिक्रियं चार्थेषूपयुक्त इत्यर्थः । तथा **तदर्पितकरणः**, करणानि तत्साधकतमानि देह-रजोहरण-मुखवस्त्रिकादीनि, तस्मिन् आवश्यके यथोचितव्यापारनियोगेनाऽर्पितानि नियुक्तानि तानि येन स तथा, सम्यग् यथास्थानन्यस्तोपकरण इत्यर्थः । तथा **तद्भावनाभावितः**, तस्य आवश्यकस्य भावना अव्यवच्छिन्नपूर्वपूर्वतरसंस्कारस्य पुनः पुनस्तदनुष्ठानरूपा तया भावितः अङ्गाङ्गिभावेन परिणतावश्यकानुष्ठानपरिणामस्तद्भावनाभावितः । तदेवं यथोक्तप्रकारेण प्रस्तुतव्यतिरेकतो**ऽन्यत्र कुत्रचिन्मनोऽकुर्वन्** उपलक्षणत्वाद्वाचं कायं चान्यत्राकुर्वन्, एकार्थिकानि वा विशेषणान्येतानि प्रस्तुतोपयोगप्रकर्षप्रतिपादनपराणि । अमूनि च लिङ्गविपरिणामतः श्रमणीश्राविकयोरपि योज्यानि । तस्मात् तच्चित्तादिविशेषणविशिष्टाः श्रमणादयः **उभयकालम्** उभयसन्ध्यं यदा**वश्यकं कुर्वन्ति** तल्लोकोत्तरिकम्, भावमाश्रित्य भावश्चासावावश्यकं चेति वा भावावश्यकम् । अत्राप्यवश्यंकरणादावश्यकत्वं तदुपयोगपरिणामस्य च सद्भावाद् भावत्वं मुखवस्त्रिकाप्रत्युपेक्षण-रजोहरणव्यापारादिक्रियालक्षणदेशस्यानागमत्वाद् नोआगमत्वं भावनीयम् । **सेत**मित्यादि निगमनम् ।

**[सू० २९] तस्स णं इमे एगट्ठिया[1] णाणाघोसा णाणावंजणा णामधेज्जा भवंति । तंजहा—**

**आवस्सयं १, अवस्सकरणिज्ज २, धुवणिग्गहो ३, विसोही य ४ ।**
**अज्झयणछक्कवग्गो ५, नाओ ६, आराहणा ७, मग्गो[2] ८ ॥२॥**

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**समणेण सावएण य अवस्सकायव्वयं हवति जम्हा।**
**अंतो [३]अहो-निसिस्स [४]उ तम्हा आवस्सयं नाम ।।३।।**

**[५]सेतं आवस्सयं।**

**[चू० २९]** तस्स य अभिण्णत्था पज्जायवयणा असम्मोहत्थं भणिता, ते य **णाणावंजणा**, णाणावंजणत्तणतो चेव **णाणाविहघोसा भवंति**। ते य इमे – **आवस्सगं०** गाहा। **आवस्सगकरणिज्जं** जं तं **आवासं**। अहवा गुणाणमाधारत्तणतो[१] आवास इव **आवासं**। अहवा आ मज्जायाए वासं करेइ त्ति **आवासं**। अहवा जम्हा तं आवासयं जीवं आवासं करेति दंसण-णाण-चरणगुणाण तम्हा तं **आवासं**। अहवा तक्करणातो णाणादिया गुणा आवासेंति त्ति **आवासं**। अहवा आ मज्जायाए पसत्थभावणातो **आवासं**। अहवा आ मज्जाताए, *वस आच्छादने [पा०धा० १०२३, का० धा० ४/४७]* पसत्थगुणेहि अप्पाणं छादेतीति **आवासं**। अहवा सुण्णमप्पाणं तं पसत्थभावेहिं आवासेतीति **आवासं**। कम्मऽट्ठविहं धुवं, कसाया इंदिया वा धुवा, इमेण जम्हा तेसिं णिग्गहो कज्जति तम्हा **[२]धुवणिग्गहो**। अवस्सं वा निग्गहो **धुवणिग्गहो**। कम्ममलिणो आता वि[३]सोहिज्जतीति **विसोधी**। सामादिकादि गण्यमानानि **षडध्ययनानि** समूहो **वग्गो**। **णायो** युक्तम्। अभिप्रेतार्थसिद्धिः **आराधणा**। मोक्खस्स सव्वपसत्थभावाण वा लद्धीण वा **पंथो**, मार्ग इत्यर्थः ।।२।। **समणेण०**गाहा। एस णिरुत्तवयणगाहा ।।३।। आवस्सगे त्ति गतं।

**[हा० २९]** उक्तं भावावश्यकम्। अस्यैवेदानीमसंमोहार्थं पर्यायनामानि प्रतिपादयन्नाह – **तस्स णं इमे** इत्यादि। **तस्य** आवश्यकस्य **ण**मिति वाक्यालङ्कारे **अमूनि** वक्ष्यमाणानि **एकार्थिकानि** तत्त्वत एकार्थविषयाणि **नानाघोषाणि नानाव्यञ्जनानि नामधेयानि भवन्ति**। इह **घोषा** उदात्तादयः, कादीनि **व्यञ्जनानि**।

तद्यथा – **आवस्सगं** गाहा। **व्याख्या** – अवश्यक्रियानुष्ठानादावश्यकम्, गुणानां वा आवश्यकमात्मानं करोतीत्यावश्यकम्। **अवश्यकरणीय**मिति मोक्षार्थिना नियमानुष्ठेयमिति। **ध्रुवनिग्रह** इति, अत्रानादित्वात् प्रायोऽनन्तत्वाच्च ध्रुवं कर्म तत्फलभूतो वा भवः,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तस्य निग्रहो ध्रुवनिग्रहः, निग्रहहेतुत्वान्निग्रहः। तथा कर्ममलिनस्याऽऽत्मनो विशुद्धिहेतुत्वाद् **विशुद्धिः** । **अध्ययनषट्कवर्गः** सामायिकादिषडध्ययनसमुदायः । सम्यग् जीव-कर्मसम्बन्धव्यवहारापनयनाद् **न्यायः**। मोक्षाराधनानिबन्धनत्वाद् **आराधना**। **मार्गः** पन्थाः शिवस्येति गाथार्थः।

**समणेण** गाहा निगदसिद्धैव। नवरम् **अन्त** इति मध्ये। **सेत्त**मित्यादि निगमनम्।

**[हे० २९]** तदेवं स्वरूपत उक्तं भावावश्यकम् । अनेनैव चात्राधिकार इत्यतो नानादेशजविनेयानुग्रहार्थं तस्यैव पर्यायाभिधानार्थमाह- **तस्स णं इमे** इत्यादि । **तस्य** आवश्यकस्य **अमूनि** वक्ष्यमाणानि **एकार्थिकानि** परमार्थत एकार्थविषयाणि **नानाघोषाणि** पृथग्भिन्नोदात्तादिस्वराणि **नानाव्यञ्जनानि** पृथग्भिन्नककाराद्यक्षराणि **नामधेयानि** पर्यायध्वनयो **भवन्ति, तद्यथा-आवस्सयं** गाहा।

व्याख्या-श्रमणादिभिरवश्यं क्रियत इति निपातनादावश्यकम्, अथवा ज्ञानादिगुणा मोक्षो वा आ समन्ताद्वश्यः क्रियतेऽनेनेत्यावश्यकम्, अथवा आ समन्ताद्वश्या इन्द्रिय-कषायादिभावशत्रवो येषां ते तथा, तैरेव क्रियते यत् तदावश्यकम्, अथवा समग्रस्यापि गुणग्रामस्यावासकमित्यावासकमित्याद्यपरमपि स्वधिया वाच्यम्, पूर्वमपि च व्युत्पादित-मिदम्। तथा मुमुक्षुभिर्नियमानुष्ठेयत्वाद**वश्यकरणीयम्**। तथा **ध्रुवनिग्रह** इति, अत्रा-नादित्वात् क्वचिदपर्यवसितत्वाच्च ध्रुवं कर्म तत्फलभूतः संसारो वा, तस्य निग्रहहेतुत्वान्निग्रहो ध्रुवनिग्रहः। तथा कर्ममलिनस्याऽऽत्मनो विशुद्धिहेतुत्वा**द्विशुद्धिः**। तथा सामायिकादि-षडध्ययनकलापात्मकत्वा**दध्ययनषड्वर्गः**। तथाऽभिप्रेतार्थसिद्धेः सम्यगुपायत्वात् **न्यायः**, अथवा जीवकर्मसम्बन्धापनयनान्न्यायः, अयमभिप्रायः-यथा कारणिकैर्दृष्टो न्यायो द्वयोरर्थि-प्रत्यर्थिनोर्भूमिद्रव्यादिसम्बन्धं चिरकालीनमप्यपनयत्येवं जीव-कर्मणोरनादिकालीनमप्या-श्रयाश्रयिभावसम्बन्धमपनयतीत्यावश्यकमपि न्याय उच्यते । तथा मोक्षाराधनाहेतुत्वा-**दाराधना**। तथा मोक्षपुरप्रापकत्वादेव **मार्ग** इति गाथार्थः ॥२॥

उक्तगाथाया आद्यपदं सूत्रकार एव व्युत्पादयन्नाह- **समणेण०** गाहा, श्रमणादिना अहोरात्रस्य मध्ये यस्मादवश्यं क्रियते तस्मादावश्यकम्। एवमवश्यकरणीयादिपदानामपि

Jain Education International For Private & Personal Use Only www.jainelibrary.org

व्युत्पत्तिर्द्रष्टव्या, उपलक्षणत्वादस्या इति गाथार्थः ॥३॥

सेत्तमित्यादि निगमनम्, तदेतदावश्यकं निक्षिप्तमित्यर्थः।

**[सू० ३०] से किं तं सुयं ? सुयं चउव्विहं पण्णत्तं। तंजहा — नामसुयं १, ठवणासुयं २, दव्वसुयं ३, भावसुयं ४।**

**[सू० ३१] [1]से किं तं नामसुयं ? नामसुयं जस्स णं जीव[2]स्स वा अजीवस्स वा जीवाण वा अजीवाण वा तदुभयस्स वा तदुभयाण वा सुए इ नामं कीरति से तं नामसुयं।**

**[सू० ३२] से किं तं ठवणासुयं ? ठवणासुयं जण्णं कट्ठकम्मे वा[3] जाव सुए इ ठवणा ठविज्जति से तं ठवणासुयं।**

**[सू० ३३] नाम-ठवणाणं को पतिविसेसो ? नामं आवकहियं, ठवणा इत्तिरिया वा हो[4]ज्जा आवकहिया वा।**

**[सू० ३४] से किं तं दव्वसुयं ? दव्वसुयं दुविहं पण्णत्तं। तं जहा — आगम[5]तो य १, नोआगमतो य २।**

**[सू० ३५] से किं तं आगमतो दव्वसुयं ? आगमतो दव्वसुयं जस्स णं [6]सुए त्ति पयं सिक्खियं ठियं जियं मियं परिजियं जा[7]व कम्हा ? जइ जाणते अणुवउत्ते ण भवइ। से तं आगमतो दव्वसुयं।**

**[सू० ३६] से किं तं णोआगमतो दव्वसुयं ? णोआगमतो दव्वसुयं तिविहं पन्नत्तं। तंजहा — जाणयसरीरदव्वसुयं १, भवियसरीरदव्वसुयं २, जाणयसरीरभवियसरीरवइरित्तं दव्वसुयं ३।**

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[सू० ३७] से किं तं जाणयसरीरदव्वसुतं ? जाणयसरीरदव्वावस्सयं [८]सुतत्तिपदत्थाहिकारजाणयस्स जं [९]सरीरयं ववगय[१०]चुतचतियचत्तदेहं [११]→जीवविप्पजढं सेज्जागयं वा संथारगयं [१२]वा सिद्धसिलायलगयं वा, अहो ! णं इमेणं सरीरसमुस्सएणं जिणदिट्ठेणं भावेणं [१३]सुए इ पयं आघवियं पण्णवियं परूवियं दंसियं निदंसियं उवदंसियं। जहा को दिट्ठंतो ? [१४]अयं मधुकुंभे आसी, अयं घयकुंभे आसी।←से तं जाणयसरीरदव्वसुतं।**

**[सू० ३८] से किं तं भवियसरीरदव्वसुतं ? भवियसरीरदव्वसुयं जे जीवे जोणीजम्मणनिक्खंते [१५]→इमेणं चेव सरीरसमुस्सएणं आदत्तएणं जिणोवइट्ठेणं भावेणं सुए इ पयं सेकाले सिक्खिस्सति, ण ताव सिक्खति। जहा को दिट्ठंतो ? [१६]अयं मधुकुंभे भविस्सति, अयं घयकुंभे भविस्सति। ← सेतं भवियसरीरदव्वसुतं।**

**[सू० ३९] से किं तं जाणयसरीरभवियसरीरवतिरित्तं दव्वसुतं ? जाणयसरीरभव्वसरीरवतिरित्तं दव्वसुतं पत्तय-पोत्थयलिहियं।**

**[चू० ३०-३९] से किं तं सुते**त्यादि। तं चतुर्विधं णामादि। नाम-ट्ठवणा कंठा। **दव्वसुतं आगमओ णोआगमतो य**। जं आगमतो तं अणुवयोगतो सुतमुच्चारयंतस्स। जं तं **णोआगमतो** तं **तिविहं जाणयसरीरादि**। जाणय-भव्वसरीरदव्वसुता कंठा। वइरित्तं इमं— तालिमादि**पत्तलिहितं**, ते चेव तालिमादिपत्ता पोत्थकता तेसु लिहितं पोत्थयलिहितं, वत्थे वा लिहितं तं **पोत्थलिहितं**।

**[हा० ३०-३९] से किं त**मित्यादि, **श्रुतं** प्राग्निरूपितशब्दार्थमेव **चतुर्विधं पण्णत्त**मित्याद्यावश्यकविवरणानुसारतो भावनीयम्, यावत् **पत्तयपोत्थयलिहितं**, इह पत्रकाणि तल-[१]ताल्यादिसम्बन्धीनि, तत्संघातनिष्पन्नास्तु पुस्तकाः, वस्त्रनिप्फण्णा

Jain Education International For Private & Personal Use Only www.jainelibrary.org

इ**त्यन्ये**। इयमत्र भावना- पत्रक-पुस्तकलिखितमपि भावश्रुतनिबन्धनत्वाद् द्रव्यश्रुतमिति।

**[हे० ३०-३९]** तदेवं नामादिभेदैर्निक्षिप्तमावश्यकम्, तन्निक्षेपे च यदुक्तम् 'आवश्यकं निक्षेप्स्यामि' इति तत् सम्पादितम्, साम्प्रतं पुनर्यदुक्तं 'श्रुतं निक्षेप्स्यामि' इति तत्सम्पादनार्थमाह- **से किं तं सुत**मिति। अथ किं तत् श्रुतमिति प्रश्नः। अत्र निर्वचनं **सुतं चउव्विह**मित्यादि, **श्रुतं** प्राग्निरूपितशब्दार्थं **चतुर्विधं प्रज्ञप्तम्, तद्यथा-नामश्रुतं स्थापनाश्रुतं द्रव्यश्रुतं भावश्रुतं च**।

तत्राऽऽद्यभेदनिर्णयार्थमाह- **से किं त**मित्यादि। अत्र निर्वचनम्-**नामश्रुतं जस्स ण**मित्यादि, यस्य जीवस्य वा अजीवस्य वा जीवानां वा अजीवानां वा तदुभयस्य वा तदुभयानां वा श्रुतमिति यन्नाम क्रियते **तन्नामश्रुत**मित्यादिपदेन सम्बन्धः, नाम च तत् श्रुतं चेति व्युत्पत्तेः। अथवा यस्य जीवादेः श्रुतमिति नाम क्रियते तज्जीवादिवस्तु नामश्रुतम्, नाम्ना नाममात्रेण श्रुतं नामश्रुतमिति व्युत्पत्तेः। तत्र जीवस्य कथं श्रुतमिति नाम सम्भवतीत्यादिभावना यथा नामावश्यके तथा तदनुसारेण यथासम्भवमभ्यूह्य वाच्या। **सेत्त**मित्यादि निगमनम्।

उक्तं नामश्रुतम्, अथ स्थापनाश्रुतनिरूपणार्थमाह- **से किं त**मित्यादि। अत्र निर्वचनम्- **ठवणासुतं जं ण**मित्यादि, अत्र व्याख्यानं यथा स्थापनावश्यके तथा सप्रपञ्चं द्रष्टव्यम्, नवरमावश्यकस्थाने श्रुतमुच्चारणीयम्, काष्ठकर्मादिषु श्रुतपठनादिक्रियावन्त एकादिसाध्वादयः स्थाप्यमानाः स्थापनाश्रुतमिति तात्पर्यम्। **सेत्त**मित्यादि निगमनम्।

**नामठवणाणं को पइविसेसो** ? इत्यादि पूर्वं भावितमेव। **वाचनान्तरे** तु **नामठवणाओ भणिताओ** इत्येतदेव दृश्यते, आवश्यकनाम-स्थापनाभणनेन प्रायोऽभिन्नार्थत्वात् श्रुतनाम-स्थापने अप्युक्ते एव भवत इत्यतो नात्र ते उच्येते इति भावः।

द्रव्यश्रुतनिरूपणार्थमाह- **से किं त**मित्यादि। अत्र निर्वचनम्- **दव्वसुतं दुविह**मित्यादि, **द्रव्यश्रुतं द्विविधं प्रज्ञप्तम्, तद्यथा- आगमतश्च नोआगमतश्च**।

तत्राऽऽद्यभेदनिर्णयार्थमाह-**से किं त**मित्यादि। अत्र निर्वचनम्-**आगमओ दव्वसुत**मित्यादि। **यस्य** कस्यचित् **श्रुतमिति पदं** श्रुतपदाभिधेय**माचारा**दिशास्त्रं **शिक्षितं स्थितं** याव**द्वाचनोपगतं** भवति स जन्तुस्तत्र वाचना-प्रच्छनादिभिर्वर्तमानोऽपि

Jain Education International For Private & Personal Use Only www.jainelibrary.org

श्रुतोपयोगेऽवर्तमानत्वादागमतः आगममाश्रित्य द्रव्यश्रुतमिति समुदायार्थः। शेषोऽत्राऽऽक्षेपपरिहारादिप्रपञ्चो नयविचारणा च द्रव्यावश्यकवद् द्रष्टव्या, अत एव सूत्रेऽप्यतिदेशं कुर्वता **जाव कम्हा ?, जइ जाणए** इत्यादिना पर्यन्तनिर्दिष्टानां शब्दनयानां सम्बन्धी सूत्रालापको गृहीतः । एतच्च **काञ्चिदेव वाचना**माश्रित्य व्याख्यायते, **वाचनान्तराणि** तु हीनाधिकान्यपि दृश्यन्ते। **सेत**मित्यादि निगमनम्।

उक्तमागमतो द्रव्यश्रुतम्, इदानीं नोआगमतस्तदेवोच्यते- **से किं त**मित्यादि। अत्र निर्वचनम्-**नोआगमतो दव्वसुतं तिविह**मित्यादि।

अत्राऽऽद्यभेदज्ञापनार्थमाह- **से किं त**मित्यादि। अत्रोत्तरम्- **जाणगसरीरदव्वसुतं सुयत्ती**त्यादि। ज्ञातवानिति ज्ञस्तस्य शरीरं तदेवानुभूतभावत्वाद् द्रव्यश्रुतं ज्ञशरीरद्रव्यश्रुतम्, श्रुतमिति यत् पदं तदर्थाधिकारज्ञायकस्य यच्छरीरकं व्यपगतादिविशेषणविशिष्टं तज्ज्ञशरीरद्रव्यश्रुतमित्यर्थः । ननु यदि जीवविप्रमुक्तमिदं कथं तर्ह्यस्य द्रव्यश्रुतत्वम् ?, लेष्ट्वादीनामपि तत्प्रसङ्गात्, तत्पुद्गलानामपि कदाचित् श्रुतवेत्तृभिः गृहीत्वा मुक्तत्वसम्भवादित्याशङ्क्याऽऽह- **सेज्जागय**मित्यादि, शेषोऽत्रावयवव्याख्यादिप्रपञ्चो ज्ञशरीरद्रव्यावश्यकवत् श्रुताभिलापतो वाच्यः यावत् **सेत**मित्यादिनिगमनम्।

द्वितीयभेदनिरूपणार्थमाह- **से किं त**मित्यादि। अत्र प्रतिवचः- **भवियसरीरदव्वसुअं जे जीवे** इत्यादि, विवक्षितपर्यायेण भविष्यतीति भव्यो विवक्षितपर्यायार्हः, तद्योग्य इत्यर्थः, तस्य शरीरं तदेव भाविभावश्रुतकारणत्वात् द्रव्यश्रुतं भव्यशरीरद्रव्यश्रुतम्। किं पुनस्तदिति, अत्रोच्यते, यो जीवो योनिजन्मत्वनिष्क्रान्तोऽनेनैव शरीरसमुच्छ्रयेणादत्तेन जिनोपदिष्टेन भावेन श्रुतमित्येतत् पदमागामिकाले शिक्षिष्यते न तावच्छिक्षते तज्जीवाधिष्ठितं शरीरं भव्यश[३]रीरद्रव्यश्रु[४]तमित्यर्थः। शेषं भव्यशरीरद्रव्यावश्यकवत् श्रुताभिलापेन सर्वं वाच्यं यावत् **सेत**मित्यादि निगमनम्।

तृतीयभेदपरिज्ञानार्थमाह— **से किं त**मित्यादि । अत्र निर्वचनम्- **जाणगसरीरभवियसरीरवइरित्तं दव्वसुत**मित्यादि। यत्र ज्ञशरीर-भव्यशरीरयोः सम्बन्धि अनन्तरोक्तं स्वरूपं न घटते तत् ताभ्यां **व्यतिरिक्तं**भिन्नं द्रव्यश्रुतम्। किंपुनस्तदित्याह- **पत्तयपोत्थयलिहियं** ति। पत्रकाणि तलताल्यादिसंबन्धीनि, तत्संघातनिष्पन्नास्तु पुस्तकाः, ततश्च पत्रकाणि च

Jain Education International For Private & Personal Use Only www.jainelibrary.org

पुस्तकाश्च तेषु लिखितं पत्रक-पुस्तकलिखितम्, अथवा **पोत्थयं** ति पोतं वस्त्रम्, पत्रकाणि च पोतं च, तेषु लिखितं पत्रक-पोतलिखितं ज्ञशरीरभव्यशरीरव्यतिरिक्तं द्रव्यश्रुतम्, अत्र च पत्रकादिलिखितश्रुतस्य भावश्रुतकारणत्वाद् द्रव्यत्वमवसेयम्, नोआगमत्वं तु आगमतो द्रव्यश्रुत इव आगमकारणस्याऽऽत्म-देह-शब्दत्रयरूपस्याभावाद् भावनीयम्।

**[सू० ४०] अहवा[1] सुत्तं पंचविहं पण्णत्तं। तं जहा — अंडयं १, बोंडयं २, कीडयं ३, वालयं ४, वक्कयं[2] ५।**

**[सू० ४१] से किं तं अंडयं ? अंडयं हंसगब्भादि। सेतं अंडयं।**

**[सू० ४२] से किं तं बोंडयं ? बोंडयं फलिहमादि[3]। सेतं बोंडयं।**

**[सू० ४३] से किं तं कीडयं ? कीडयं पंचविहं पण्णत्तं। तंजहा — पट्टे १, मलए २, अंसुए ३, चीणंसुए ४, किमिरागे ५। सेतं कीडयं।**

**[सू० ४४] से किं तं वालयं ? वालयं पंचविहं पण्णत्तं। तंजहा — उण्णिए १, उट्टिए २, मियलोमिए[4] ३, कुतवे ४, किट्टिसे ५। सेतं वालयं।**

**[सू० ४५] से किं तं वक्कयं ? वक्कयं सणमाई[5]। सेतं वक्कयं। सेतं जाणगसरीरभवियसरीरवतिरित्तं दव्वसुयं। से तं नोआगमतो दव्वसुयं। सेतं दव्वसुयं।**

[चू० ४०-४५] **अहवा सुत्तं पंचविहं अंडया**दि। अंडाज्जातं **अंडजं**, तं च **हंसगब्भं**। अंडमिति कोसिकारको, सो चेव कोसिकारको **हंसगब्भो** भण्णति, हंसो पक्खी, सो त पतंगो, सो तस्स गब्भो। एवं वडयसुत्तं **हंसगब्भं** भन्नति, लोगे य प्पतीतं। वडयसुत्तं[1] पतंगगब्भो तं भन्नति। ***अन्ने*** पंचिंदियहंसगब्भजं भणंति।

**कीडयं पंचविहं पट्ट** इत्यादि। जम्मि विसए पट्टो उप्पज्जति तत्थ अरन्ने

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वणणिगुंजट्ठाणे मंसं चीडं वा आमिसं पुंजपुंजेसु ठविज्जति, तेसिं पुंजाणं पासतो णिण्णुण्णता संतरा बहवे खीलया भूमीए उद्धा णिहोडिज्जंति, तत्थ वणंतरातो पदंगकीडा आगच्छंति, ते तं मंसचिडाइयं आमिसं चरंता इतो इतो य कीलंतरेसु संचरंता लालं मुयंति एस **पट्टो**, एस य **मलय**विसयवज्जेसु भणितो। एवं चेव[२] **मलय**विसयुप्पण्णो **मलयपट्टो** भण्णति। एवं चेव **चीण**विसयबहिमुप्पण्णो **अंसुपट्टो**। **चीण**विसयुप्पण्णो **चीणंसुयपट्टो**। एवं एतेसिं खेत्तविसेसतो कीडविसेसतो य पट्टविसेसो भवति। मणुयादिरुहिरं घेत्तुं किणावि जोगेण जुत्तं भायणत्थं[३] ठविज्जति, तत्थ किमी उप्पज्जंति, ते वाताभिलासिणो छिड्डनिग्गता इतो इतो य आसण्णं भमंति, तेसिं णीहारलाला **किमिरागपट्टो** भण्णति, सो सपरिणामरंगरंगितो चेव भवति। ***अण्णे*** भणंति – जाहे रुहिरे उप्पन्ना किमी, ते तत्थेव मलेत्ता कसट्टे उत्तारेत्ता तत्थ रसे किं पि जोगं पक्खिवित्ता पट्टं रयंति सो **किमिरागो** भण्णति अणुग्गाली।

**वालयं पंचविधं उण्णिगे**त्यादि। **उण्णोट्टिता** पसिद्धा। मिएहिंतो लहुतरा मृगाकृतयो बृहत्पुच्छा, तेसिं लोमा **मियलोमा**। **कुतवो** उंदुररोमेसु। एतेसिं चेव उण्णितादीणं अवघाडो **किट्टिसं**। अहवा एतेसिं दुगादिसंजोगजं **किट्टिसं**। अहवा जे अण्णे साणमादिया रोमा ते सव्वे **किट्टिसं** भण्णति।

**[हा० ४०-४५]** साम्प्रतं प्राकृतशैल्या तुल्यशब्दाभिधेयत्वाद् ज्ञशरीर-भव्यशरीर-व्यतिरिक्तद्रव्यश्रुताधिकार एव निर्दोषत्वादिख्यापनप्रसङ्गोपयोगितया सूत्रनिरूपणायाह – **अहवे**त्यादि। **अथवे**ति प्रकारान्तरप्रदर्शनार्थः, **सूत्रं पञ्चविधं प्रज्ञप्तम्, तद्यथा - अंडज**मित्यादि।

**से किं त**मित्यादि, अण्डाज्जात**मण्डजं हंसगर्भादि** कारणे कार्योपचारात्। हंसः किल पतङ्गः, तस्य गर्भः कोशिकारकः, **आदिशब्दः** स्वभेदप्रख्यापकः। **कौ**शिकारप्रभवं **चटकसूत्रमित्यर्थः**, पञ्चेन्द्रियहंसगर्भजमित्यादि **के[चित्]**। **सेत्त**मित्यादि निगमनम्। एवं शेषेष्वपि प्रश्न-निगमने वाच्ये। पोण्डाद् जातं पोण्डजं **फलिहमादि** त्ति कर्पासफलादि, कारणे कार्योपचारादेवेति भावना। कीटाज्जातं कीटजं पञ्चविधं प्रज्ञप्तम्, तद्यथा – **पट्टे**त्यादि, **पट्टित्ति** पट्टसूत्रम्। **मलयं** अंशुकम्। **चीणांशुकं** कृमिरागादि। अत्र ***वृद्धा***

Jain Education International For Private & Personal Use Only www.jainelibrary.org

***व्याचक्षते***-किल जम्मि विसए पट्टे उप्पज्जति तत्थ अरण्णे वणणिगुंजट्ठाणे मंसं चीणं वा आमिसं पुंजपुंजेहिं ठविज्जइ। ततो तेसिं पुंजाण पासओ णिण्णुण्णया अंतरा बहवे खीलया भूमीए उद्धा निहोडिज्जंति। तत्थ वणंतराओ पयंगकीडा आगच्छंति, ते मंस-चीणादिय-मामिसं चरंता इतो ततो य कीलंतरेसु संचरंता लालं मुयंति। एस पट्टे त्ति। एस य **मलय**वज्जेसु भणितो। एवं चेव **मलय**विसउप्पण्णे मलए त्ति भण्णइ। एवं चेव **चीण**विसयबहिमुप्पण्णे अंसुए। **चीण**विसयुप्पण्णे चीणंसुए त्ति। एवमेतेसिं खेत्तविसेसओ कीडविसेसो, कीडविसेसतो य पट्टसुत्तविसेसतो भवति। एवं मणुयादिरुहिरं घेत्तुं किणावि जोएण जुत्तं भायणत्थं ठविज्जति, ततो तत्थ किमी उप्पज्जंति, ते वायाभिलासिणो छिद्देण णिग्गता इतो ततो आसन्नं भमंति, तेसिं णीहारलाला किमिरागसुत्तं भण्णइ, तं सपरिणामरंगरंगियं चेव भवइ। ***अन्ने*** *भणंति* – जाहे रुहिरुप्पन्ना किमी ते तत्थेव मलित्ता कसवट्टं उत्तारित्ता तत्थ रसेहिं जोगं पक्खिवित्ता पट्टसुत्तं रयंति तं किमिरागं भण्णइ अणुग्गाली। **वालयं पंचविधं उण्णिय**मित्यादि **उण्णोट्टिया** पसिद्धा। मिएहिंतो लहुतरा मृगाकृतयः बृहत्पिंछाः, तेसिं लोमा **मियलोमा**। **कुतवो** उंदुररोमेसु। एतेसिं चेव उण्णियादीणं उवहारो **किट्टिसं,** अहवा एतेसिं दुगादिसंजोगेण किट्टिसं, अहवा जे अण्णे साणमादिया रोमा ते सव्वे किट्टिसं भण्णंति। **सेत्तं वालज**मिति निगमनम्। **से किं तं वागज**मित्यादि सनिगमनं निगदसिद्धमेवेति।

**[हे० ४०-४५]** तदेवमेकेन प्रकारेण ज्ञशरीरभव्यशरीरव्यतिरिक्तं द्रव्यश्रुतमुक्तम्, साम्प्रतं तदेव प्रकारान्तरेण निरूपयितुमाह- **अहवे**त्यादि, अथवा सूत्रं पञ्चविधं प्रज्ञप्तम्, **तद्यथा- अंडय**मित्यादि। अत्राऽऽह - ननु श्रुते प्रक्रान्ते सूत्रस्य प्ररूपणमप्रस्तुतम्, सत्यम्, किन्तु प्राकृतशैलीमङ्गीकृत्य श्रुतस्याण्डजादिसूत्रस्य च **सुत्त**लक्षणेनैकेन शब्देनाभिधीयमान-त्वसाम्यादिदमपि प्ररूपयतीत्यदोषः, प्रसङ्गतोऽण्डजादिसूत्रस्वरूपज्ञापनेन शिष्यव्युत्पत्तिश्चैवं कृता भवति। अत एव भावश्रुते प्रक्रान्ते नामश्रुतादिप्ररूपणमप्रस्तुतमित्याद्यपि प्रेर्यमपास्तम्, तस्यापि शिष्यव्युत्पादनादिफलत्वात्, न च भावश्रुतप्रतिपक्षस्य नामश्रुतादेः प्ररूपणमन्तरेण भावश्रुतस्य निर्दोषत्वादिस्वरूपनिश्चयः कर्तुं पार्यते, *जे सव्वं जाणइ से एगं जाणति* [*आचा० १।३।४।१*] त्ति वचनादित्यलं विस्तरेण।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अत्राऽऽद्यभेदज्ञापनार्थमाह- **से किं त**मित्यादि। अत्रोत्तरम्- **अंडयं हंसगब्भादि** त्ति, अण्डाज्जातमण्डजम्, हंसः पतङ्गश्चतुरिन्द्रियजीवविशेषः, गर्भस्तु तन्निर्वर्तितकोसिकारः, हंसस्य गर्भो हंसगर्भः, तदुत्पन्नं सूत्रमण्डजमुच्यते, **आदि**शब्दः स्वभेदप्रख्यापनपरः। ननु यदि हंसगर्भोत्पन्नं सूत्रमण्डजमुच्यते तर्हि सूत्रे **अण्डजं हंसगर्भादी**ति सामानाधिकरण्यं विरुध्यते, हंसगर्भस्य प्रस्तुतसूत्रकारणत्वादेव, सत्यम्, कारणे कार्योपचारात् तदविरोधः, कोशिकारभवं सूत्रं व[1]टकसूत्रमिति लोके प्रतीतमण्डजमुच्यत इति हृदयम्, पञ्चेन्द्रियहंसगर्भसम्भवमि**त्यन्ये**। **सेत**मित्यादि निगमनम्।

अथ द्वितीयभेद उच्यते- **से किं त**मित्यादि, अत्र निर्वचनम्- **बोंडयं फलिह[2]मादि** त्ति, **बोंडं** वमनीफलम्, तस्माज्जातं बोण्डजम्, फलिही वमनी, तस्याः फलमपि फलिहं कर्पासाश्रयकोशकरूपम्, तदिहापि कारणे कार्योपचाराद् बोण्डजं सूत्रमुच्यते इति भावः। **सेत्त**मित्यादि निगमनम्।

अथ तृतीयभेद उच्यते- **से किं त**मित्यादि। अत्रोत्तरम्- **कीडयं पंचविह**-मित्यादि। कीटाज्जातं कीटजं सूत्रं तत् **पञ्चविधं प्रज्ञप्तम्, तद्यथा- पट्टे** त्ति पट्टसूत्रम्, **मलयम्, अंशुकम्, चीनांशुकम्, कृमिरागम्**। अत्र **वृद्धव्याख्या**- किल यत्र विषये पट्टसूत्रमुत्पद्यते तत्रारण्ये वननिकुञ्जस्थाने मांसचीडादिरूपस्याऽऽमिषस्य पुञ्जाः क्रियन्ते, तेषां च पुञ्जानां पार्श्वतो निम्ना उन्नताश्च सान्तरा बहवः कीलका भूमौ निखायन्ते, तत्र वनान्तरेषु संचरन्तः पतङ्गकीटाः समागत्य मांसाद्यामिषोपभोगलुब्धाः कीलकान्तरेष्वितस्ततः परिभ्रमन्तो लालाः प्रमुञ्चन्ति, ताश्च कीलकेषु लग्नाः परिगृह्यन्ते, इत्येतत् पट्टसूत्रमभिधीयते। अनेनैव क्रमेण **मलय**विषयोत्पन्नं तदेव मलयम्। इत्थमेव **चीन**विषयबहिस्तादुत्पन्नं तदेवांशुकम्। इत्थमेव **चीन**विषयोत्पन्नं तदेव चीनांशुकमभिधीयते। क्षेत्रविशेषाद्धि कीटविशेषस्तद्विशेषात्तु पट्टसूत्रादिव्यपदेशविशेष इति भावः। एवं क्वचिद्विषये मनुष्यादिशोणितं गृहीत्वा केनापि योगेन युक्तं भाजनसम्पुटे स्थाप्यते, तत्र च प्रभूताः कृमयः समुत्पद्यन्ते, ते च वाताभिलाषिणो भाजनच्छिद्रैर्निर्गत्य तदासन्नं पर्यटन्तो यल्लालाजालमभिमुञ्चन्ति तत् कृमिरागं पट्टसूत्रमुच्यते, तच्च रक्तवर्णकृमिसमुत्थत्वात् स्वपरिणामत एव रक्तं भवति। **अन्ये** त्वभिदधति-यदा तत्र शोणिते कृमयः समुत्पन्ना भवन्ति तदा सकृमिकमेव तन्मलित्वा किट्टिसं परित्यज्य रसो गृह्यते,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तत्र च कश्चिद् योगः प्रक्षिप्यते, ततस्तेन यद् रज्यते पट्टसूत्रं तत् कृमिरागमुच्यते, तच्च धौताद्यवस्थासु मनागपि कथञ्चिद्रागं न मुञ्चति। **सेत**मित्यादि निगमनम्।

अथ चतुर्थभेद उच्यते- **से किं त**मित्यादि । अत्रोत्तरम्- **वालयं पंचविह**-मित्यादि, वालेभ्यः ऊरणिकादिलोमभ्यो जातं **वालजम्**, तत् **पञ्चविधं प्रज्ञप्तम्, तद्यथा**- ऊर्णाया इद**मौर्णिकम्**, उष्ट्राणामिद**मौष्ट्रिकम्**, एते द्वे अपि प्रतीते, ये मृगेभ्यो ह्रस्वका मृगाकृतयो बृहत्पुच्छा आटविकजीवविशेषास्तल्लोमनिष्पन्नं **मृगलोमिकम्**। उन्दुररोमनिष्पन्नं **कौतवम्**। ऊर्णादीनां यदुद्वरितं किट्टिसं तन्निष्पन्नं सूत्रमपि **किट्टिसम्**। अथवा एतेषामेवोर्णादीनां द्विकादिसंयोगतो निष्पन्नं सूत्रं किट्टिसम्, अथवा उक्तशेषश्वादिजीवलोमनिष्पन्नं किट्टिसम्। **सेत**मित्यादि निगमनम्।

अथ पञ्चमभेदोऽभिधीयते- **से किं त**मित्यादि, वल्काज्जातं **वल्कजम्**, तच्च सणप्रभृति, क्वचित् पुनर**तस्यादी**ति पाठः, तत्रातसीसूत्रं **मालवका**दिदेशप्रसिद्धम् । **सेत्त**मित्यादि निगमनम्। उक्तं पञ्चविधमण्डजादिसूत्रम्, तद्भणनेनोक्तं ज्ञशरीर-भव्यशरीर-व्यतिरिक्तं द्रव्यश्रुतम्, अतस्तदपि निगमयति-**सेतं जाणगे**त्यादि, एतद्भणने च समर्थितं नोआगमतो द्रव्यश्रुतमतस्तदपि निगमयति-**से तं नोआगमओ** इत्यादि। एतत्समर्थने च समर्थितं द्विविधमपि द्रव्यश्रुतमतस्तदपि निगमयति- **से तं दव्वसुत**मिति।

**[सू० ४६] से किं तं भावसुयं ? भावसुयं दुविहं पन्नत्तं। तंजहा — आगमतो य १, नोआगमतो य २।**

**[सू० ४७] से किं तं आगमतो भावसुयं ? आगमतो भावसुयं जाणते उवउत्ते। सेतं आगमतो भावसुयं।**

**[सू० ४८] से किं तं नोआगमतो भावसुयं ? नोआगमतो भावसुयं दुविहं पन्नत्तं। तंजहा — लोइयं १, लोउत्तरियं च २।**

**[सू० ४९] से किं तं लोइयं[१] भावसुयं ? लोइयं भावसुयं जं इमं**

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अ[२]ण्णाणिएहिं मि[३]च्छदिट्ठीहिं सच्छंदबुद्धि-मइविगप्पियं। तंजहा— भा[४]रहं रामा[५]यणं हंभीमासुरुक्कं [६]कोडिल्लयं घो[७]डमुहं [८]सगभद्दिआओ [९]कप्पासियं नागसुहुमं कणगसत्तरी वइसेसियं [१०]बुद्धवयणं वेसियं काविलं [११]लोयाययं [१२]सट्ठितंतं [१३]माढरं [१४]पुराणं वागरणं नाडगादी, अहवा [१५]बावत्तरिकलाओ चत्तारि य वेदा संगोवंगा। सेतं लो[१६]इयं भावसुयं।

[सू० ५०] से किं तं लोगोत्तरि[१७]यं भावसुयं ? लोगुत्तरियं भावसुयं जं इमं अरहंतेहिं भगवंतेहिं उप्पन्नना[१८]ण-दंसणधरेहिं तीत-[१९]पडुप्पन्न-मणागतजाणएहिं सव्वन्नूहिं सव्व[२०]दरिसीहिं तेलोक्क[२१]चहिय-महिय-पूइएहिं अप्पडिहयवरनाण-दंसणधरेहिं पणीतं दुवालसंगं गणिपिडगं। तंजहा— आयारो १, सूयगडो २, ठाणं ३, समवाओ ४, वि[२२]याहपण्णत्ती ५, नायाधम्मकहाओ ६, उवासगदसाओ ७, अंतगडदसाओ ८, अणुत्तरोववाइयदसाओ ९, पण्हावागरणाइं १०, विवागसुयं ११, दिट्ठिवाओ १२ य। सेतं लोगोत्त[२३]रियं भावसुयं। सेतं नोआगमतो भावसुयं। सेतं भावसुयं।

[सू० ५१] तस्स णं इमे एगट्ठि[२४]या नाणाघोसा नाणावंजणा नामधे[२५]ज्जा भवंति। तंजहा —

[२६]सुय सुत्त [२७]गंथ सिद्धंत [२८]सासणे आण वयण उवदेसे।
पण्णव[२९]ण आगमे या एगट्ठा पज्जवा सुत्ते ॥४॥

सेतं [३०]सुयं।

**[चू० ४६-५१] से किं तं भावसुते**त्यादि। आगमोवउत्तस्स भावसुतं, जम्हा सुतोवयुत्तो ततो अणण्णो लब्भति। **णोआगमतो भावसुते**त्यादि। इह चोदक आह—

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सुतोवयोगोवयुत्तस्स आगमतो भावसुतं जुत्तं, णोआगमतो कहं भावसुतं भवतीति ? जति णोगारो सुतपडिसेधे तो आगमो ण भवति, अह णो ण सुत्तपडिसेधे तो सुतं णोआगमो कहं भवति ? । आचार्याऽऽह – ‘अणेगत्था निवाता’इति कातुं भण्णति, चरणगुणसंजुत्तस्स सुतोवयुत्तस्स णोआगमं भणिमो, एत्थ चरणगुणो आगमो ण भवति, तस्स पडिसेहे, एवं णोसद्दो देसपडिसेहे। तं च **णोआगमभावसुतं दुविहं-लोइयं लोउत्तरं च**। मिच्छद्दिट्ठिप्पणीयं मिच्छसुतं, तं च लोइयं [1]**भारहा**दि। सम्मद्दिट्ठिपणीतं सम्मसुतं, तं च लोउत्तरं **आयारा**दि। सेसं जहा ***नंदी***ए वक्खातं तधा दट्ठव्वं।

इदाणिं **तस्स एगट्ठिता** पंच **णाणावंजण-घोसा**, ते य इमे । [2]**सुत तंत०** गाधा कंठा। एत्थ ***अण्णे*** इमं पढंति **सुत सुत्त०** गाहा। एते अत्थपज्जायतो अणेगट्ठिया इमेण विधिणा – सोइंदियलद्धिविसयत्तणतो **सुतं** भण्णति। गुरुसमीवातो वा सवणभावे **सुतं**। गुरूहिं अणक्खातं जम्हा णो बुज्झति तम्हा पासुत्तसमं **सुत्तं**। वितिगिण्णपुप्फट्ठिता इव अत्था जम्हा तेण गंथिता तम्हा **गंथो**। सिद्धमत्थमंतं णयति त्ति **सिद्धंतो**। अन्नाण-मिच्छ-विसय-कसायप्रबलभावावस्थितजीवाणं सासणातो **सासणं**, अहवा कडसासणमिव **सासणं** भाणितव्वं। आणमणं **आणा**, तद्भाव इत्यर्थः, आणप्पेंति वा एताए त्ति **आणा**। [3]वायगो **वयणं**, वइजोगेणं दिज्जति जम्हा वइजोगेण वा गेण्हति जम्हा, वाग्योगविसयत्थं वा **वयणं** भण्णति। इह-परलोगहियपवत्तणे अहियणियत्तणे उवदेसप्पदाणातो **उवदेसो** भन्नति। प्रतिजीवादिभेदतत्त्वस्य पण्णावणत्तणतो **पण्णवणा**, अहवा पण्णा बुद्धी, तं च मतिणाणं वा भावसुतणाणं वा, तेहुवलद्धे अत्थे वणाइ त्ति सद्दकरणं, तेण सह योजयंतस्स **पण्णवणा** भण्णति। **सुधम्मा**तो आरब्भ आयरियपरंपरेणाऽऽगतमिति **आगमो**, आप्तस्य वा वयणं आगमो। सुते त्ति गतं।

**[हा० ४६-५१] से किं त**मित्यादि, इदमप्यावश्यकविवरणानुसारतो भावनीयम्, प्रायस्तुल्यवक्तव्यत्वात्। नवर**मागमतो भावश्रुतं** तज्ज्ञस्त**दुपयुक्तः** तदुपयोगानन्यत्वात्। **नोआगमतस्तु लौकिका**दि। अत्राह – नोआगमतो भावश्रुतमेव न युज्यते, तथाहि – यदि नोशब्दः प्रतिषेधवचनः कथमागमः ? अथ न प्रतिषेधवचनः कथं तर्हि नोआगमतः ?

Jain Education International For Private & Personal Use Only www.jainelibrary.org

इति, अत्रोच्यते – नोशब्दस्य देशप्रतिषेधवचनत्वात् चरणगुणसमन्वितश्रुतस्य विवक्षितत्वात् चरणस्य चानागमत्वादिति ।

**जं इमं अरहंतेही**त्यादि, **नन्दी**विशेषविवरणानुसारतोऽन्यथा वोपन्यस्तविशेषण-कलापयुक्तमपि स्वबुद्ध्या नेयमिति । शेषं प्रकटार्थं यावन्निगमनमिति ।

**तस्स णं इमे** इत्यादि पूर्ववत् । **सुत सुत्त** गाहा । व्याख्या – श्रूयत इति **श्रुतम्** । सूचनात् **सूत्रम्** । विप्रकीर्णार्थग्रन्थनाद् **ग्रन्थः** । सिद्धमर्थमन्तं नयतीति **सिद्धान्तः** । मिथ्यादर्शना-ऽविरति-प्रमाद-कषाय-योगप्रवृत्तजीवशासनात् **शासनम्** । *पाठान्तरं* वा **प्रवचनम्**, तत्रापि प्रगतं प्रशस्तं प्रधानमादौ वा वचनं प्रवचनम् । मोक्षायाऽऽज्ञाप्यन्ते प्राणिनोऽनये**त्याज्ञा** । उक्तिर्**वचनं** वाग्योग इत्यर्थः । हितोपदेशरूपत्वादुपदेशन**मुपदेशः** । यथावस्थितजीवादि-पदार्थप्रज्ञापनात् **प्रज्ञापने**ति । आचार्यपारम्पर्येणाऽऽगच्छती**त्यागमः**, आप्तवचनं वा आगम इति, **एकार्थाः पर्यायाः सूत्र** इति गाथार्थः । **सेत्त**मित्यादि निगमनम् ।

[हे० ४६-५१] अथ भावश्रुतनिरूपणार्थमाह- **से किं त**मित्यादि । अत्रोत्तरम् - **भावसुअं दुविह**मित्यादि । विवक्षितपरिणामस्य भवनं भावः, स चासौ श्रुतं चेति भावश्रुतं भावप्रधानं वा श्रुतं **भावश्रुतम्**, तद् **द्विविधं प्रज्ञप्तम्- आगमतो नोआगमतश्च** ।

तत्राऽऽद्यभेदनिरूपणार्थमाह- **से किं त**मित्यादि । अत्रोत्तरम्- श्रुतपदार्थज्ञस्तत्र चोपयुक्त **आगमतः** आगममाश्रित्य **भावश्रुतं** श्रुतोपयोगपरिणामस्य सद्भावात् तस्य चाऽऽगमत्वादिति भावः । **सेत**मित्यादि निगमनम् ।

अथ द्वितीयभेद उच्यते - **से किं तं नोआगमओ** इत्यादि । अत्रोत्तरम् - **नोआगमओ भावसुतं दुविह**मित्यादि ।

अत्राऽऽद्यभेदनिरूपणार्थमाह- **से किं त**मित्यादि । अत्र निर्वचनम् - **लोइयं भावसुतं जं इम**मित्यादि । लोकैः प्रणीतं लौकिकम्, किं पुनस्तदित्याह-**यदिदमज्ञानिकैर्मिथ्या-दृष्टिभिः स्वच्छन्दबुद्धिमतिविकल्पितं** तल्लौकिकं भावश्रुतमिति सम्बन्धः । तत्राल्पज्ञान-भावतोऽधनवदशीलवद् वा सम्यग्दृष्टयोऽप्यज्ञानिकाः प्रोच्यन्तेऽत आह-मिथ्यादृष्टिभिः स्वच्छन्दबुद्धिमतिविकल्पितम्, इहाऽवग्रहेहे बुद्धिः, अपाय-धारणे तु मतिः, स्वच्छन्देन

स्वाभिप्रायेण तत्त्वत: सर्वज्ञप्रणीतार्थानुसारमन्तरेण बुद्धि-मतिभ्यां विकल्पितं स्वच्छन्दबुद्धिमतिविकल्पितम्, स्वबुद्धिकल्पनाशिल्पिनिर्मितमित्यर्थ:। तत्प्रकटनार्थमेवाऽऽह - **तद्यथा- भारत**मित्यादि एतच्च **भारता**दिकं **नाटकादि**पर्यन्तं श्रुतं लोकप्रसिद्धिगम्यम्।

अथ प्रकारान्तरेण लौकिकश्रुतनिरूपणार्थमाह - **अहवा बावत्तरिकलाओ** इत्यादि, तत्र कलनानि वस्तुपरिज्ञानानि कला:, ताश्च द्विसप्तति: **समवायाङ्गा**दिग्रन्थप्रसिद्धा:, **चत्वारश्च वेदा:** [ग्रन्थाग्रम् १०००] सामवेद-ऋग्वेद-यजुर्वेदा-ऽथर्ववेदलक्षणा: **साङ्गोपाङ्गा:**, तत्राङ्गानि शिक्षा १ कल्प २ व्याकरण ३ च्छन्दो ४ निरुक्त ५ ज्योतिष्कायन[1] ६ लक्षणानि षट्, उपाङ्गानि तद्व्याख्यानरूपाणि, तै: सह वर्तन्ते इति साङ्गोपाङ्गा:। **सेत**मित्यादि निगमनम्।

उक्तं नोआगमतो लौकिकं भावश्रुतम्, अथ लोकोत्तरिकं तदेवाऽऽह - **से किं त**मित्यादि। लोकोत्तरै: लोकप्रधानैरर्हद्भि: प्रणीतं **लोकोत्तरिकम्**। किं पुनस्तदित्याह- **लोउत्तरियं भावसुतं जं इम**मित्यादि, यदिदमर्हद्भिर्द्वादशाङ्गं गणिपिटकं प्रणीतं तल्लोकोत्तरिकं भावश्रुतमिति सम्बन्ध:, **तद्यथा-आयारो सूयगड**मित्यादि, तत्र सदेव-मनुजा-ऽसुरलोकविरचितां पूजामर्हन्तीति **अर्हन्त**स्तै:, एवंभूताश्चातीर्थकरा अपि केवल्यादयो भवन्त्यतस्तीर्थकरप्रतिपत्तये प्राह- **भगवद्भि**रिति समग्रैश्वर्य-निरुपमरूप-यश:-श्री-धर्म-प्रयत्नवद्भिरित्यर्थ:, इत्थंभूताश्च अनाद्यप्रतिघज्ञानादिमन्त: केचित् कैश्चिदभ्युपगम्यन्ते, उक्तं चैतद्वादिभि: —

*ज्ञानमप्रतिघं यस्य वैराग्यं च जगत्पते:।*
*ऐश्वर्यं चैव धर्मश्च सहसिद्धं चतुष्टयम्॥१॥* [ ]

इत्यादि, अतस्तद्व्यवच्छेदार्थमाह-ज्ञानावरणक्षपणादिप्रकारेणो**त्पन्ने**, न तु सहजे, ज्ञानदर्शिनि धरन्ती**त्युत्पन्नज्ञानदर्शनधरा**स्तै:, न च प्रस्तुतविशेषणव्यवच्छेद्या अप्येवंभूता एव, *सहसिद्धं चतुष्टयम्* [ ] इत्यादिवचनविरोधप्रसङ्गात्। तर्हि **सुगता** इत्थंभूता अपि भविष्यन्तीति चेत्, अत्रोच्यते-**तीतपडुपण्णे**त्यादि, अतीत-वर्तमान-भविष्यदर्थज्ञायकैरित्यर्थ:, न च **सुगताना**मतीत-भविष्यदर्थज्ञातृत्वसम्भव: एकान्तक्षणभङ्गवादित्वेन तदसत्त्वाभ्युपगमात् असतां च ग्रहणेऽतिप्रसङ्गात्। अथ सन्तानद्वारेण कालत्रयेऽप्यर्थानां सद्भावादतीता[द्य][2]र्थज्ञातृत्वं तेषामपि न विहन्यत इत्याशङ्क्याऽऽह-**सर्वज्ञै: सर्वदर्शिभि**रिति, सर्वम् एकेन्द्रिय-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

[३]द्वीन्द्रियजीवादि वस्तु केवलज्ञानेन जानन्तीति सर्वज्ञाः, तैः, तदेव सर्वं केवलदर्शनेन पश्यन्तीति सर्वदर्शिनः, तैः, शाक्यानां त्वतीताद्यर्थ-ज्ञातृत्वेऽपि सर्वज्ञादित्वं नोपपद्यते कतिपयधर्माद्यभीष्ट-पदार्थवेत्तृत्वस्यैव तेष्वभ्युपगमात्, यत उक्तं तच्छिष्यैः-

*सर्वं पश्यतु मा वाऽसाविष्टमर्थं तु पश्यतु।*
*कीटसङ्ख्यापरिज्ञानं तत्र(स्य) नः क्वोपयुज्यते ?॥१॥* [[४]प्रमाणवा० १।३३-३५]

इत्यादि। यथोक्तगुणविशिष्टा[५] एव **तिलुक्कचहियमहिये**त्यादि, **चहिय** त्ति विगलद्बहलानन्दाश्रुदृष्टिभिः सहर्षं निरीक्षिताः, यथावस्थितानन्यसाधारणगुणोत्कीर्तनलक्षणेन भावस्तवेन **महिता** अभिष्टुताः, सुगन्धिसुमनःप्रकरक्षेपादिना तु द्रव्यस्तवेन **पूजिताः**, तत एषां द्वन्द्वे त्रैलोक्येन भवनपति-व्यन्तर-नर-विद्याधर-वैमानिकादिसमुदायलक्षणेन **चहितमहित-पूजिता**[[६]त्रैलोक्यचहितमहितपूजिता]स्तैः, आह-ननूत्पन्नज्ञानदर्शनधरैरित्युक्तम्, उत्पत्तिमच्च सप्रतिघं दृष्टं यथा मूर्तेष्ववध्यादिज्ञानम्, उत्पन्ने च तज्ज्ञानदर्शने अभ्युपगते, अतस्ताभ्यां ते सप्रतिघज्ञानिनः प्राप्नुवन्ति, तथा च पूर्वोक्तसर्वज्ञत्वादिहानिरित्या- शङ्कयाऽऽह — **अप्रतिहतवरज्ञानदर्शनधरै**रिति, समस्तावरणक्षयसम्भूतत्वादप्रतिहते मूर्तामूर्तेषु समस्तवस्तुष्वस्खलिते, अत एव **वरे** प्रधाने केवलज्ञान-दर्शनलक्षणे ज्ञान-दर्शने धरन्ति ये ते तथा तैः, यत्त्ववध्यादेः सप्रतिघत्वं तन्नोत्पत्तिमत्त्वेन, किं तर्हि ? आवरणसद्भावात्, अतोऽप्रतिघे केवलज्ञानदर्शने समस्तावरणक्षयसम्भूतत्वात्, तत्क्षयेऽपि सप्रतिघत्वाभ्युपगमे-ऽतिप्रसङ्गात्, इदं च विशेषणं कस्याञ्चिदेव **वाचनायां** दृश्यते, न सर्वत्र। तदेवं यथोक्तप्रकारेण तावद् व्याख्यातान्यमूनि विशेषणानि, अन्यथा वाऽविरोधतः सुधिया व्याख्येयानि। तैरर्थकथनद्वारेण **प्रणीतं** प्ररूपितम्, किं तत् ? **द्वादशाङ्गं** श्रुतम्, परमपुरुषस्याङ्गानीवाङ्गानि द्वादश अङ्गानि **आचारा**दीनि यत्र तद् द्वादशाङ्गम्, किंभूतम् ? **गणिपिटकम्**, गुणगणोऽस्यास्तीति गणी आचार्यः, तस्य पिटकं सर्वस्वं गणिपिटकं **तद्यथा-आचार** इत्यादि सुगमम्। अत्र द्वादशाङ्गश्रुतस्य चरणगुणसमन्वितस्य विवक्षितत्वान्नोआगमत्वं भावनीयम्, देशस्य चरणगुणलक्षणस्यानागमत्वान्नोशब्दस्य च देशप्रतिषेधत्वेनाश्रयणात्, एवं पूर्वत्रापि लौकिकभावश्रुते वाच्यम्। निगमयन्नाह-**से तं लोउत्तरिय**मित्यादि। एतद्भणने च समर्थितं द्विविधमपि नोआगमतो भावश्रुतम्, अतस्तदपि निगमयति-**से तं नोआगमतो** इत्यादि।

Jain Education International　For Private & Personal Use Only　www.jainelibrary.org

एतद्वर्णने चोक्तं सर्वमपि भावश्रुतमतो निगमयति-**सेतं भावसुत**मिति।

तदेवं स्वरूपत उक्तं भावश्रुतम्। अनेनैव चात्राधिकार इत्यतोऽस्यैव पर्यायनिरूपणार्थमाह- **तस्स ण**मित्यादि। **तस्य** श्रुतस्य **अमूनि** अनन्तरमेव वक्ष्यमाणतया प्रत्यक्षाणि **एकार्थिकानि** तत्त्वत एकार्थविषयाणि **नानाघोषाणि** पृथग्भिन्नोदात्तादिस्वराणि **नानाव्यञ्जनानि** पृथग्भिन्नाक्षराणि **नामधेयानि** पर्यायध्वनिरूपाणि **भवन्ति, तद्यथा- सुत** गाहा, व्याख्या-गुरुसमीपे श्रूयत इति **श्रुतम्**, अर्थानां सूचनात् **सूत्रम्**, विप्रकीर्णार्थग्रन्थनाद् **ग्रन्थः**, सिद्धं प्रमाणप्रतिष्ठितमर्थमन्तं संवेदननिष्ठारूपं नयतीति **सिद्धान्तः**, मिथ्यात्वाऽविरति-कषायादिप्रवृत्तजीवानां शासनात् शिक्षणा**च्छासनम्, प्रवचन**मिति **पाठान्तरम्**, तत्रापि प्रशस्तं प्रधानं प्रथमं वा वचनं प्रवचनम्, मोक्षार्थमाज्ञाप्यन्ते प्राणिनो**ऽनयेत्याज्ञा,** उक्ति**र्वचनं** वाग्योग इत्यर्थः, हिता-ऽहितप्रवृत्ति-निवृत्त्युपदेशना**दुपदेशः**, यथावस्थितजीवादिपदार्थप्रज्ञापनात् **प्रज्ञापना**, आचार्यपारम्पर्येणागच्छती**त्यागमः**, आप्तवचनं वाऽऽगम इति, **सूत्रे** सूत्रविषये **एकार्थाः पर्याया** इति गाथार्थः। **सेतं सुत**मिति, तदेतन्नामादिभेदैरुक्तं श्रुतमित्यर्थः।

**[सू० ५२] से किं तं खंधे ? खंधे चउव्विहे पण्णत्ते। तंजहा— नामखंधे १, ठवणाखंधे २, दव्वखंधे ३, भावखंधे ४।**

**[सू० ५३] [1] → से किं तं नामखंधे ? नामखंधे जस्स णं जीवस्स वा अजीवस्स वा जाव खंधे ति णामं कज्जति। से तं णामखंधे।**

**[सू० ५४] से किं तं ठवणाखंधे ? ठवणाखंधे जण्णं कट्ठकम्मे वा जाव खंधे इ ठवणा ठविज्जति। सेतं ठवणाखंधे।**

**[सू० ५५] णाम-ठवणाणं को पतिविसेसो ? नामं आवकहियं, ठवणा इत्तिरिया वा होज्जा आवकहिया वा।**

[सू० ५६] से किं तं दव्वखंधे ? दव्वखंधे दुविहे पण्णत्ते। तंजहा– आगमतो य १, नोआगमतो य २।

[सू० ५७] [१] से किं तं आगमओ दव्वखंधे ? आगमओ दव्वखंधे जस्स णं खंधे इ पयं सिक्खियं ठियं जियं मियं जाव णेगमस्स एगे अणुवउत्ते आगमओ एगे दव्वखंधे, दो अणुवउत्ता आगमओ दो[ण्णि] दव्वखंधाइं, तिण्णि अणुवउत्ता आगमओ तिण्णि दव्वखंधाइं, एवं जावइया अणुवउत्ता तावइयाइं ताइं दव्वखंधाइं।

[२] एवमेव ववहारस्स वि।

[३] संगहस्स एगो वा अणेगा वा अणुवउत्तो वा अणुवउत्ता वा दव्वखंधे वा दव्वखंधाणि वा से एगे दव्वखंधे।

[४] उज्जुसुयस्स एगो अणुवउत्तो आगमओ एगे दव्वखंधे, पुहत्तं णेच्छति।

[५] तिण्हं सद्दणयाणं जाणए अणुवउत्ते अवत्थू। कम्हा ? जइ जाणए कहं अणुवउत्ते भवति ?। सेतं आगमओ दव्वखंधे।

[सू० ५८] से किं तं णोआगमतो दव्वखंधे ? णोआगमतो दव्वखंधे तिविहे पण्णत्ते। तंजहा— जाणगसरीरदव्वखंधे १, भवियसरीरदव्वखंधे २, जाणगसरीरभवियसरीरवइरित्ते दव्वखंधे ३।

[सू० ५९] से किं तं जाणगसरीरदव्वखंधे ? जाणगसरीरदव्वखंधे खंधे इ पयत्थाहिगारजाणगस्स जाव खंधे इ पयं आघवियं पण्णवियं परूवियं जाव सेतं जाणगसरीरदव्वखंधे।

[सू० ६०] से किं तं भवियसरीरदव्वखंधे ? भवियसरीरदव्वखंधे जे

Jain Education International For Private & Personal Use Only www.jainelibrary.org

जीवे जोणिजम्मणनिक्खंते जाव खंधे इ पयं सेकाले सिक्खिस्सइ। जहा को दिट्ठंतो ? [२]अयं महुकुंभे भविस्सइ, अयं घयकुंभे भविस्सति। सेतं भवियसरीरदव्वखंधे।

**[सू० ६१] से किं तं जाणगसरीरभवियसरीरवइरित्ते दव्वखंधे ? जाणगसरीरभवियसरीरवइरित्ते दव्वखंधे तिविहे पण्णत्ते। ← तंजहा सचित्ते १, अचित्ते २, मीसए ३।**

**[सू० ६२] से किं तं [३]सचित्तदव्वखंधे ? सचित्तदव्वखंधे अणेगविहे पण्णत्ते। तंजहा — [४]हयखंधे गयखंधे किन्नरखंधे किंपुरिसखंधे महो[५]रगखंधे उसभखंधे। सेतं [६]सचित्तदव्वखंधे।**

**[सू० ६३] से किं तं [७]अचित्तदव्वखंधे ? अचित्तदव्वखंधे अणेगविहे पण्णत्ते। तंजहा— दुपए[*]सिए खंधे तिपए[*]सिए खंधे जाव दसपए[*]सिए खंधे संखेज्जपए[*]सिए खंधे असंखेज्जपए[*]सिए खंधे अणंतपए[*]सिए खंधे। से तं [८]अचित्तदव्वखंधे।**

**[सू० ६४] से किं तं [९]मीसदव्वखंधे ? मीसदव्वखंधे अणेगविहे पण्णत्ते। तंजहा— सेणाए अग्गिमखंधे, सेणाए मज्झिमखंधे, सेणाए पच्छिमखंधे। सेतं मी[१०]सदव्वखंधे।**

**[चू० ५२-६४] से किं तं खंधे** इत्यादि। खंधे णामादिचतुव्विधो णिक्खेवो। णाम-ट्ठवणा कंठा। दव्वे वि जाव **वतिरित्ते तिविधे सचित्तादि**।

तत्थ सचित्ते [१]**हयाई**, अचित्ते **दुपदेसादी**, मीसे **सेणाए अग्गिमखंधादी**।

**[हा० ५२-६४] से किं** तमित्यादि वस्तुतो भावितार्थमेव, यावद् **ज्ञशरीर-**

* °सियखंधे, इति मलधारिसम्मतः पाठः॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

भव्यशरीरव्यतिरिक्तस्त्रिविधः प्रज्ञप्तः, तद्यथा – सचित्तेत्यादि।

**से किं त**मित्यादि प्रश्नसूत्रम्। चित्तं मनोऽर्थविज्ञानमिति पर्यायाः, सह चित्तेन वर्तत इति **सचित्तः, सचित्त**श्चासौ **द्रव्यस्कन्ध**श्चेति समासः। इह विशिष्टैकपरिणामपरिणतः आत्मप्रदेशपरमाण्वादिसमूहः स्कन्धः। **अनेकविधः** अनेकप्रकारः व्यक्तिभेदेन **प्रज्ञप्तः** प्ररूपितः। तद्यथा – **हयस्कन्ध** इत्यादि, **हयः** अश्वः, स एव विशिष्टैकपरिणामपरिणतत्वात् स्कन्धो हयस्कन्धः, एवं शेषेष्वपि भावनीयम्। इह च सचित्तद्रव्यस्कन्धाधिकारादात्मन एव परमार्थतश्चेतनत्वादसङ्ख्येयप्रदेशात्मकत्वाच्च कथञ्चिच्छरीरे(रा)भेदे सत्यपि हयादीनां हयादिजीवा एव गृह्यन्ते इति सम्प्रदायः। प्रभूतोदाहरणाभिधानं तु विजातीयानेकस्कन्धाभिधानेनैकपरमपुरुषस्कन्धप्रतिपादनपरदुर्नयनिरासार्थम्। तथा चाहुरेके –

*एक एव हि भूतात्मा, भूते भूते व्यवस्थितः।*
*एकधा बहुधा चैव, दृश्यते जलचन्द्रवत् ॥१॥* [ ]

एवं हि [१]मुक्तेतराद्यभावप्रसङ्गाद् व्यवहारानुपपत्तिरिति। **सेत्त**मित्यादि निगमनम्।

**से किं त**मित्यादि, अविद्यमानचित्तः **अचित्तः, अचित्त**श्चासौ **द्रव्यस्कन्ध**श्चेति समासः, **अनेकविधः प्रज्ञप्त** इति पूर्ववत्। **तद्यथा** – **द्विप्रदेशिक** इत्यादि आनिगमनं सूत्रसिद्धमिति।

**से किं त**मित्यादि। **मिश्रः** सचित्ता-ऽचित्तसंकीर्णः, **मिश्र**श्चासौ **द्रव्यस्कन्ध**श्चेति समासः। **सेनायाः** हस्त्यश्व-रथ-पदाति-सन्नाह-खड्ग-कुन्तादिसमुदायलक्षणायाः **अग्रस्कन्धः** अग्रानीकमित्यर्थः, तथा **मध्यमः पश्चिम**श्चेति। **सेत्त**मित्यादि निगमनम्।

**[हे० ५२-६४]** साम्प्रतं यदुक्तं 'स्कन्धं निक्षेप्स्यामि' इति तत्सम्पादनार्थमुपक्रमते- **से किं त**मित्यादि। अथ किं तत् स्कन्ध इत्युच्यते इति प्रश्ने निर्वचनमाह - **खंधे चउव्विहे** इत्यादि।

अत्र नामस्कन्धप्रतिपादनसूत्रं स्थापनास्कन्धप्रतिपादकसूत्रं च नामस्थापनावश्यकप्रतिपादकसूत्रव्याख्यानुसारेण स्वयमेव भावनीयम्।

द्रव्यस्कन्धसूत्रमपि भव्यशरीरद्रव्यस्कन्धसूत्रं यावद् द्रव्यावश्यकोक्तव्याख्यानु-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सारेणैव भावनीयम्, प्रायस्तुल्यवक्तव्यत्वादिति।

**से किं तं जाणगसरीरभवियसरीरवइरित्ते दव्वखंधे** इति प्रश्ने निर्वचनमाह- **जाणगसरीर-भवियसरीरवइरित्ते दव्वखंधे तिविहे** इत्यादि, ज्ञशरीर-भव्यशरीर-व्यतिरिक्तो द्रव्यस्कन्ध**स्त्रिविधः प्रज्ञप्तः, तद्यथा-सचित्तोऽचित्तो मिश्रः**।

तत्राऽऽद्यभेदं जिज्ञासुः पृच्छति- **से किं त**मित्यादि, अत्रोत्तरम्- **सचित्तदव्वखंधे अणेगविहे पण्णत्ते** इत्यादि, चित्तं मनो विज्ञानमिति पर्यायाः, सह चित्तेन वर्तत इति सचित्तः, स चासौ द्रव्यस्कन्धश्चेति **सचित्तद्रव्यस्कन्धः, अनेकविधो** व्यक्तिभेदतोऽनेकप्रकारः **प्रज्ञप्तः**। **तद्यथा- हयस्कन्ध** इत्यादि, **हयः** तुरगः, स एव विशिष्टैकपरिणामपरिणतत्वात् **स्कन्धो** हयस्कन्धः, एवं **गजस्कन्धा**[१]दिसमासः, नवरं **किन्नर-किम्पुरुष-महोरगा** व्यन्तरविशेषाः, **उसभत्ति** वृषभः, *क्वचिद्* **गन्धर्वस्कन्धा**दीन्यधिकान्यप्युदाहरणानि दृश्यन्ते, सुगमानि च, नवरं **पसु-पसय-विहग-वानरखंधे** त्ति क्वचिद् दृश्यते, तत्र **पशुः** छगलकः, **पसय**स्तु आटविको द्विखुरः चतुष्पदविशेषः, **विहगः** पक्षी, **वानरः** प्रतीतः, **स्कन्ध**शब्दस्तु प्रत्येकं द्रष्टव्यः। इह च सचित्तस्कन्धाधिकाराज्जीवानामेव च परमार्थतः सचेतनत्वात् कथञ्चिच्छरीरैः सहाभेदे सत्यपि हयादीनां सम्बन्धिनो जीवा एव विवक्षिताः, न तु तदधिष्ठितशरीराणीति सम्प्रदायः। न च जीवानां स्कन्धत्वं नोपपद्यते, प्रत्येकमसङ्ख्येय-प्रदेशात्मकत्वेन तेषां स्कन्धत्वस्य सुप्रतीतत्वादिति। हयस्कन्धादीनामन्यतरेणैकेनाप्युदा-हरणेन सिद्धम्, किं प्रभूतोदाहरणाभिधानेनेति चेत्, सत्यम्, किन्तु पृथग्विभिन्नस्वरूप-विजातीयस्कन्धबहुत्वाभिधानेनाऽऽत्माद्यद्वैतवादं निरस्यति, तथाऽभ्युपगमे मुक्तेतरादि-व्यवहारोच्छेदप्रसङ्गात्। **सेत**मित्यादि निगमनम्।

अथाचित्तद्रव्यस्कन्धनिरूपणार्थमाह- **से किं त**मित्यादि । अत्र निर्वचनम्- **अचित्तदव्वखंधे** इत्यादि, अविद्यमानचित्तोऽचित्तः, स चासौ द्रव्यस्कन्धश्चेति समासः, अय**मनेकविधः प्रज्ञप्तः, तद्यथा-द्विप्रदेशिकस्कन्धः** इत्यादि, तत्र प्रकृष्टः पुद्गला-स्तिकायदेशः प्रदेशः, परमाणुरित्यर्थः, द्वौ प्रदेशौ यत्र स द्विप्रदेशिकः, स चासौ स्कन्धश्च **द्विप्रदेशिकस्**[२]**कन्धः**, एवमन्यत्रापि यथायोगं समासः। **सेत्त**मित्यादि निगमनम्।

अथ मिश्र[३]द्रव्यस्कन्धनिरूपणायाऽऽह- **से किं त**मित्यादि। अत्रोत्तरम्- **मीसदव्वखंधे**

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**सेणाए** इत्यादि, सचेतनाचेतनसंकीर्णो मिश्रः, स चासौ द्रव्यस्कन्धश्चेति **मिश्रद्रव्यस्कन्धः**, कोऽसावित्याह-**सेनायाः** हस्त्यश्व-रथ-पदाति-सन्नाह-खड्ग-कुन्तादिसमुदायलक्षणाया **अग्रस्कन्धो**ऽग्रानीकमित्यर्थः, **मध्यमस्कन्धो** मध्यमानीकम्, **पश्चिमस्कन्धः** पश्चिमानीकम्, एतेषु हि हस्त्यादयः सचित्ताः खड्गादयस्त्वचित्ता इत्यतो मिश्रत्वं भावनीयमिति। **सेत्त**-मित्यादि निगमनम्। तदेवमेकेन प्रकारेण तद्व्यतिरिक्तो द्रव्यस्कन्धः प्ररूपितः।

**[सू० ६५] अहवा जाणगसरीर-भवियसरीरवतिरित्ते दव्वखंधे तिविहे पन्नत्ते। तंजहा — कसिणखंधे १, अकसिणखंधे २, अणेगदवियखंधे ३।**

**[सू० ६६] से किं तं कसिणखंधे ? कसिणखंधे से [1]चेव हयक्खंधे गयक्खंधे जाव उसभखंधे। सेतं कसिणखंधे।**

**[सू० ६७] से किं तं अकसिण[2]खंधे ? अकसिणखंधे से चेव [3]दुपएसियादी खंधे जाव अणंतपदेसिए खंधे। से तं अकसिणखंधे।**

**[सू० ६८] से किं तं अणेगदवियखंधे ? अणेगदवियखंधे त[4]स्सेव[5] देसे अवचिते [6]तस्सेव देसे उवचिए। सेतं अणेगदवियखंधे। सेतं जाणगसरीरभवियसरीरवतिरित्ते दव्वखंधे। सेतं नोआगमतो दव्वखंधे। सेतं दव्वखंधे।**

**[चू० ६५-६८] अहवा** एसेव सचित्तादि अण्णाभिधाणेण तिविहो **कसिणादी** भण्णति। तत्थ **कसिणो** जो चेव हतादी सचित्तो भणितो सो च्चेव अविसिट्ठो। **अकसिणो** वि दुपदेसादी चेव अविसिट्ठो। **अणेगदवियखंधो** पुण उवचितावचितो भाणितव्वो। अहवा सुत्तकारेण विसेसदंसणत्थमेव बितियो कसिणादिभेदो उवण्णत्थो। किञ्चान्यत्, अभिधाणविसेसतो णियमा चेव अत्थविसेसो भवति, सो य वक्खाणतो विसेसो लक्खेतव्वो। तत्थ हयादिए सचित्ते सचित्तगहणातो जीवसमूहखंधो विवक्खितो, दुपदेसादियाणं

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अचित्तत्तणतो अचित्तखंधत्तणं भणितं, जिया-ऽजियदव्वाण विभिण्णट्ठिताण जा समूहकप्पणा स मीसो खंधो। सो चेव हयादी सचित्तखंधो कसिणो भन्नति, कहं ? उच्यते – जीवा-ऽजीवपदेसेसु य जे सरीरपरिणता दव्वा, एरिसो विवक्खितपिंडसमूहो कसिणखंधो भन्नति। अकसिणो वि दुपदेसादिए, दुपदेसो तिपदेसादिए पडुच्च पदेससंखया अकसिणो भण्णति, एवं सेसा वि भाणितव्वा, जाव सव्वहा कसिणं ण पावति। अणेगदवियखंधो जीवोपयोगपरिणामिता जीवपदेसोपचिता य जे दव्वा ते अणेगविधा, अन्ने तत्थेव जीवोपयोगपरिणामिता जीवपदेसेसु य अवचिता एरिसा वि दव्वा अणेगविधा, एरिसाणं उवचितावचितदव्वाणं बहूणं समूहो अणेगदवियखंधो भण्णति। गतो दव्वखंधो।

[हा० ६५-६८] **अहवे**त्यादि सुगमं यावत् **से किं तं कसिणक्खंधे, कृत्स्नः** सम्पूर्णः, कृत्स्नश्चासौ स्कन्धश्चेति विग्रहः। **से च्चेव** इत्यादि, स एव **हयस्कन्ध** इत्यादि। आह – यद्येवं ततः किमर्थं भेदेनोपन्यासः ? इति, उच्यते – प्राक् सचित्तद्रव्यस्कन्धाधिकारात् तथाऽसम्भविनोऽपि बुद्ध्या निष्कृष्य जीवा एवोक्ताः, इह तु जीवा-ऽजीवप्रयोगपरिणा(ण ?)मितशरीरसमुदायलक्षणः समग्र एव कृत्स्नः स्कन्ध इति। **अन्ये** तु जीवस्यैव कृत्स्नस्कन्धत्वाद् व्यत्ययेन व्याचक्षते, तथाऽप्यविरोधः। **सेत्त**मित्यादि निगमनम्।

**से किं त**मित्यादि। न कृत्स्नः अकृत्स्नः, अकृत्स्नश्चासौ स्कन्धश्च अकृत्स्नस्कन्धः। **से च्चेव** इत्यादि, स एव द्विप्रदेशादिः। अयमत्र भावार्थः – द्विप्रदेशिकः त्रिप्रदेशिकमपेक्ष्याकृत्स्नो वर्तते इत्येवमन्येष्वपि वक्तव्यम्, न यावत् कार्त्स्न्यमापद्यत इति। आह – यद्येवं हयादिकृत्स्नस्कन्धस्यापि तदन्यमहत्तरस्कन्धापेक्षया अकृत्स्नस्कन्धत्वप्रसङ्गः, न, असंख्येयजीवप्रदेशान्योन्यानुगतस्यैव विवक्षितत्वाद् जीवप्रदेशानां च स्कन्धान्तरेऽपि तुल्यत्वाद् बृहत्तरस्कन्धानुपपत्तिः, जीवप्रदेश-पुद्गलसाकल्यवृद्धौ हि महत्तरत्वमिति, अत्र बहु वक्तव्यं तत्तु नोच्यते, ग्रन्थविस्तरभयात्, गमनिकामात्रमेतत्। **सेत्त**मित्यादि निगमनम्।

**से किं त**मित्यादि, अनेकद्रव्यश्चासौ स्कन्धश्चेति समासः, विशिष्टैकपरिणामपरिणतो नख-चरण-जङ्घोरु-रदन-केशाद्यनेकद्रव्यसमुदाय इत्यर्थः। तथा चाह – **तस्सेवे**त्यादि, तस्यैव विवक्षितस्कन्धस्य देश एकदेशः अपचितो जीवप्रदेशविरहादिति भावना, तथा

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तस्यैव देश उपचितो जीवप्रदेशभावादिति हृदयम्, एतदुक्तं भवति– जीवप्रयोगपरिणा(ण?)मितानि जीवप्रदेशापचितानि च नख-रोम-रदन-केशादीन्यनेकानि द्रव्याणि तथाऽन्यानि जीवप्रयोगपरिणा(ण?)मितानि जीवप्रदेशोपचितानि च चरण-जङ्घोरुप्रभृतीनि प्रभूतान्येव, एतेषामपचितोपचितानामनेकद्रव्याणां पुनर्यो विशिष्टैक-परिणामो देहाख्यः सोऽनेकद्रव्य इति। अत्राह– ननु कृत्स्न द्रव्यस्कन्धादस्य को विशेषः ? इति, उच्यते– स किल यावानेव जीवप्रदेशानुगतस्तावानेव विशिष्टैकपरिणामपरिणतः परिगृह्यते, न नखाद्यपेक्षयाऽपि, अयं तु नखाद्यपेक्षयाऽपीत्ययं विशेष इत्यलं प्रसङ्गेन। **सेत्त**मित्यादि निगमनम्।

[हे० ६५-६८] अथ तमेव प्रकारान्तरेण प्ररूपयितुमाह- **अहवा जाणगे**त्यादि। **अथवा** अन्येन प्रकारेण **ज्ञशरीर-भव्यशरीरव्यतिरिक्तो द्रव्यस्कन्धस्त्रिविधः प्रज्ञप्तः, तद्यथा-कृत्स्नस्कन्धः अकृत्स्नस्कन्धोऽनेकद्रव्यस्कन्धः**।

तत्राऽऽद्यभेदनिरूपणार्थमाह- **से किं त**मित्यादि, अत्रोत्तरम्- **कसिणक्खंधे**[1]त्यादि, यस्मादन्यो बृहत्तरः स्कन्धो नास्ति स **कृत्स्नः** परिपूर्णः स्कन्धः कृत्स्नस्कन्धः, कोऽयमित्याह- **से चेवे**त्यादि, स एव **हयखंधे**त्यादिनोपन्यस्तो हयादिस्कन्धः कृत्स्न-स्कन्धः। आह- यद्येवं प्रकारान्तरत्वमसिद्धम्, सचित्तस्कन्धस्यैव संज्ञान्तरेणोक्तत्वात्, नैतदेवम्, प्राक् सचित्तद्रव्यस्कन्धाधिकारात् तथाऽसम्भविनोऽपि बुद्ध्या निष्कृष्य जीवा एवोक्ताः, इह तु जीव-तदधिष्ठितशरीरावयवलक्षणः समुदायः कृत्स्नस्कन्धत्वेन विवक्षित इत्यतोऽभिधेयभेदात् सिद्धं प्रकारान्तरत्वम्। यद्येवं तर्हि हयादिस्कन्धस्य कृत्स्नत्वं नोपपद्यते, तदपेक्षया गजादिस्कन्धस्य बृहत्तरत्वात्, नैतदेवम्, यतोऽसंख्येयप्रदेशात्मको जीवः तदधिष्ठिताश्च शरीरावयवा इत्येवंलक्षणः समुदायो हयादिस्कन्धत्वेन विवक्षितो जीवस्य चासङ्ख्येयप्रदेशात्मकतया सर्वत्र तुल्यत्वाद् गजादिस्कन्धस्य बृहत्तरत्वमसिद्धम्, यदि हि जीवप्रदेश-पुद्गलसमुदायः सामस्त्येन वर्द्धेत तदा स्याद् गजादिस्कन्धस्य बृहत्त्वम्, तच्च नास्ति, समुदायवृद्ध्यभावात्, तस्मादितरेतरापेक्षया जीवप्रदेश-पुद्गलसमुदायस्य हीनाधिक्याभावात् सर्वेऽपि हयादिस्कन्धाः परिपूर्णत्वात् कृत्स्नस्कन्धाः। **अन्ये** तु पूर्वं

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सचित्तस्कन्धविचारे जीव-तदधिष्ठितशरीरावयवसमुदायः सचित्तस्कन्धः, अत्र तु शरीरात् बुद्ध्या पृथक्कृत्य जीव एव केवलः कृत्स्नस्कन्ध इति व्यत्ययं व्याचक्षते। अत्र च व्याख्याने प्रेर्यमेव नास्ति, हय-गजादिजीवानां प्रदेशतो हीनाधिक्याभावेन कृत्स्नस्कन्धत्वस्य सर्वत्राविरोधादित्यलं प्रसङ्गेन। **सेत्त**मित्यादि निगमनम्।

अथाकृत्स्नस्कन्धनिरूपणार्थमाह- **से किं त**मित्यादि। अत्रोत्तरम्- **अकसिणखंधे से चेवे**त्यादि, न कृत्स्नोऽकृत्स्नः, स चासौ स्कन्धश्चाकृत्स्नस्कन्धः, यस्मादन्योऽपि बृहत्तरः स्कन्धोऽस्ति सोऽपरिपूर्णत्वादकृत्स्नस्कन्ध इत्यर्थः। कश्चायमित्याह-**से चेवे**त्यादि, स एव दुपदेसिए खंधे तिपदेसिए खंधे इत्यादिना पूर्वमुपन्यस्तो द्विप्रदेशिकादिरकृत्स्नस्कन्ध इत्यर्थः द्विप्रदेशिकस्य त्रिप्रदेशिकापेक्षयाऽकृत्स्नत्वात् त्रिप्रदेशिकस्यापि चतुष्प्रदेशिकापेक्षयाऽकृत्स्नत्वाद् एवं तावद्वाच्यं यावत् कार्त्स्न्यं नापद्यत इति । पूर्वं द्विप्रदेशिकादिः सर्वोत्कृष्टप्रदेशश्च स्कन्धः सामान्येनाचित्ततया प्रोक्तः, इह तु सर्वोत्कृष्टस्कन्धादधोवर्तिन एवोत्तरोत्तरापेक्षया पूर्वपूर्वतरा अकृत्स्नस्कन्धत्वेनोक्ता इति विशेषः। **सेत्त**मित्यादि निगमनम्।

अथानेकद्रव्यस्कन्धनिरूपणार्थमाह — **से किं त**मित्यादि । अत्रोत्तरम् - **अणेगदवियखंधे तस्सेवे**त्यादि, अनेकद्रव्यश्चासौ स्कन्धश्चेति समासः, **तस्सेवे**त्यत्रानुवर्तमानं स्कन्धमात्रं संबध्यते, ततश्च **तस्यैव** यस्य कस्यचित् स्कन्धस्य यो **देशो** नख-दन्त-केशादिलक्षणः **अपचितो** जीवप्रदेशैर्विरहितो यश्च **तस्यैव देशः** पृष्ठोदर-चरणादिलक्षण **उपचितो** जीवप्रदेशैर्व्याप्त इत्यर्थः तयोर्यथोक्तदेशयोर्विशिष्टैकपरिणामपरिणतयोर्यो देहाख्यः समुदायः सोऽनेकद्रव्यस्कन्ध इति विशेषः, सचेतनाचेतनानेकद्रव्यात्मकत्वादिति भावः। स चैवंभूतः सामर्थ्यात्तुरगादिस्कन्ध एव प्रतीयते। यद्येवं कृत्स्नस्कन्धादस्य को विशेष इति चेत्, उच्यते-स किल यावानेव जीवप्रदेशानुगतस्तावानेव विवक्षितो न तु जीवप्रदेशा-व्याप्तनखाद्यपेक्षयाऽपि, अयं तु नखाद्यपेक्षयाऽपीति विशेषः। पूर्वोक्तमिश्रस्कन्धादस्य तर्हि को विशेष इति चेत्, उच्यते-तत्र खड्गाद्यजीवानां हस्त्यादिजीवानां च पृथग्व्यवस्थितानां समूहकल्पनया मिश्रस्कन्धत्वमुक्तम्, अत्र तु जीवप्रयोगतो विशिष्टैकपरिणामपरिणतानां सचेतनाचेतनद्रव्याणामनेकद्रव्यस्कन्धत्वमिति विशेष इत्यलं प्रसङ्गेन । **सेत्त**मित्यादि

Jain Education International For Private & Personal Use Only www.jainelibrary.org

निगमनम् । तदेवमुक्तो ज्ञशरीर-भव्यशरीरव्यतिरिक्तो द्रव्यस्कन्धः, तद्भणने च समर्थितो नोआगमतो द्रव्यस्कन्धविचारः, तत्समर्थने च समर्थितो द्रव्यस्कन्ध इति।

**[सू० ६९] से किं तं भावखंधे ? भावखंधे दुविहे पण्णत्ते। तंजहा — आगमतो य १, नोआगमतो य २।**

**[सू० ७०] से किं तं आगमतो भावखंधे[१] ? आगमतो भावखंधे जाणए उवउत्ते। सेतं आगमतो भावखंधे।**

**[सू० ७१] से किं तं नोआगमओ भावखंधे ? नोआगमओ भावखंधे एएसिं चेव सामाइयमाइयाणं[२] छण्हं अज्झयणाणं समुदयसमिइसमागमेणं[३] निप्पन्ने आवस्सगसुयक्खंधे[४] भावखंधे त्ति लब्भइ। सेतं नोआगमतो भावखंधे। से तं भावखंधे।**

[चू० ६९-७१] **से किं तं भावखंधे** इत्यादि। खंधपदत्थोवयोगपरिणामो जो सो **आगमतो भावखंधो**। **णोआगमतो भावखंधो** णाण-किरियागुणसमूहमतो, सो य **सामादियादिछण्हं अज्झयणाणं** सम्मेलो, एत्थ किरिया णोआगमो त्ति कातुं णोसद्दो मीसभावे भवति।

**[हा० ६९-७१] से किं त**मित्यादि सुगमं यावत् **एतेसि**मित्यादि। नवर**मागमतो भावस्कन्धः ज्ञः उपयुक्त**ः तदर्थोपयोगपरिणामपरिणत इत्यर्थः। **नोआगमत**स्तु ज्ञान-क्रियासमूहमय इति, अत एवाह— **एतेसिं चेव** इत्यादि, एतेषामेव प्रस्तुतावश्यकभेदानां सामायिकादीनां षण्णामध्ययनानां **समुदयसमितिसमागमेन,** इहाध्ययनमेव पद-वाक्यसमुदायत्वात् **समुदा(द)यः**, समुदा(द)यानां **समितिः** मेलकः समुदयमेलकः समुदयसमितिः, इयं च स्वस्वभावव्यवस्थितानामपि भवति, अत एकीभावप्रतिपत्त्यर्थ-माह— **समागमेन। समुदयसमितेः समागमः** विशिष्टैकपरिणाम इति समास**स्तेन**

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**आवश्यकश्रुत[स्कन्धः] भावस्कन्ध इति लभ्यते**। अयमत्र भावार्थः – सामायिकादीनां षण्णामध्ययनानां समावेशाद् ज्ञान-दर्शन-क्रियोपयोगवतो नोआगमतो भावस्कन्धः, नोशब्दस्य मिश्रवचनत्वात् क्रियाया अनागमत्वादिति। **सेत्त**मित्यादि निगमनम्।

[हे० ६९-७१] अथ भावस्कन्धनिरूपणार्थमाह - **से किं त**मित्यादि। अत्रोत्तरम्- **भावखंधे दुविहे** इत्यादि। भावश्चासौ स्कन्धश्च भावमाश्रित्य वा स्कन्धो भावस्कन्धः, स च **द्विविधः प्रज्ञप्तः, तद्यथा - आगमतश्च नोआगमतश्च,** तत्रागमतः स्कन्धपदार्थज्ञस्तत्र चोपयुक्तस्तदुपयोगानन्यत्वाद् भावस्कन्धः । नोआगमतस्तु **एतेषामेव** प्रस्तुतावश्यक-भेदानां **सामायिकादीनां षण्णामध्ययनानां** समुदायः । स च तेषां विशकलितानामपि तथाविधदेवदत्तादीनामिव स्यादत उच्यते- **समुदयस्य समितिः** नैरन्तर्येण मीलना, सा च नैरन्तर्यावस्थापितायःशलाकानामिव परस्परनिरपेक्षाणामपि स्यादत उच्यते-तस्याः समुदयसमितेर्यः **समागमः** परस्परं सम्बद्धतया विशिष्टैकपरिणामः **समुदयसमिति-समागमस्तेन निष्पन्नो य आवश्यकश्रुतस्कन्धः स भावस्कन्ध इति लभ्यते** प्राप्यते, भवति इति हृदयम्। इदमुक्तंभवति-सामायिकादिषडध्ययनसंहतिनिष्पन्न आवश्यकश्रुतस्कन्धो मुखवस्त्रिका-रजोहरणादिव्यापारलक्षणक्रियायुक्ततया विवक्षितो नोआगमतो भाव-स्कन्धः, नोशब्दस्य देशे आगमनिषेधपरत्वात् क्रियालक्षणस्य च देशस्यानागमत्वादिति भावः। **सेत्त**मित्यादि निगमनम्। तदेवं प्रतिपादितो द्विविधोऽपि भावस्कन्ध इति निगमयति- **सेतं भावखंधे** त्ति।

**[सू० ७२] तस्स णं इमे एगट्ठिया नाणाघोसा नाणावंजणा नामधेज्जा भवंति। तंजहा —**

**गण[1] काय निकाय खंध वग्ग रासी पुंजे य पिंड नियरे य।**
**संघाय आकुल समूह भावखंधस्स पज्जाया।।५।।**

**सेतं खंधे[2]।**

[चू० ७२] **तस्स** य भावखंधस्स **एगट्ठिया इमे — गण काय** गाधा। एतेसु अत्थदंसगा उदाहरणा इमे — **मल्लजनगणवद् गणः**। पृथिवीसमस्तजीवकायवत् **कायः**। छजीवणिकायवद् **निकायः** । त्र्यादिपरमाणुस्कन्धवत् **स्कन्धः** । गोवर्गवद् **वर्गः** । शालिधान्यराशिवद् **राशिः**। विप्रकीर्णधान्यपुञ्जीकृतपुञ्जवत् **पुञ्जः**। [1]गुडादिपिण्डीकृतपिण्डवत् **पिण्डः**। हिरण्यादिद्रव्यनिकरवद् **निकरः** । तीर्थादिषु संगलितजनसङ्घातवत् **सङ्घातः** । राजगृ[2]हाङ्गणजनाकुलवद् **आकुलः**। पुरादिजनसमूहवत् **समूहः**।

[हा० ७२] **तस्स ण**मित्यादि पूर्ववत्, यावत् **गण काय** गाहा, व्याख्या — **मल्लगणवद् गणः**। पृथिवीसमस्तजीवकायवत् **कायः**। षड्जीवनिकायवद् **निकायः**। त्र्यादिपरमाणुस्कन्धवत् **स्कन्धः** । गोवर्गवद् **वर्गः** । शालिधान्यराशिवद् **राशिः** । विप्रकीर्णधान्यपुञ्जीकृतपुञ्जवत् **पुञ्जः** । गुडादिपिण्डीकृतपिण्डवत् **पिण्डः** । हिरण्यादिद्रव्यनिकरवद् **निकरः** । तीर्थादिषु संगलितजनसङ्घातवत् **सङ्घातः** । राजगृहाङ्गणजनाकुलवद् **आकुलम्**। पुरादिजनसमूहवत् **समूहः**। **सेत्त**मित्यादि निगमनम्।

[हे० ७२] इदानीं त्वस्यैव एकार्थिकान्यभिधित्सुराह - **तस्स ण**मित्यादि गतार्थं यावद् **गण काय** गाहा। व्याख्या-**मल्ला**दिगणवद् **गणः**। पृथिवीकायादिवत् **कायः**। षड्जीवनिकायव**न्निकायः**। त्र्यादिपरमाणुस्कन्धवत् **स्कन्धः**। गोवर्गवद् **वर्गः**। शालिधान्यादिराशिवद् **राशिः** । विप्रकीर्णपुञ्जीकृतधान्यादिपुञ्जवत् **पुञ्जः** । गुडादिपिण्डवत् **पिण्डः**। हिरण्यद्रव्यादिनिकरव**न्निकरः**। तीर्थादिषु संमिलितजनसङ्घातवत् **सङ्घातः**। राजगृहाङ्गणजनाकुलव**दाकुलः**। पुरादिजनसमूहवत् **समूहः**। एते **भावस्कन्धस्य पर्यायाः** वाचकध्वनय इति गाथार्थः। **सेत**मित्यादि निगमनम्।

**[सू० ७३] आवस्सगस्स णं इमे अत्थाहिगारा भवंति। तं जहा —**

**सावज्जजोगविरती १, उक्कित्तण २, गुणवओ य पडिवत्ती ३।**
**खलियस्स निंदणा ४, वणतिगिच्छ ५, गुणधारणा ६ चेव ॥६॥**

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[चू० ७३]** सीसो पुच्छति– कहं छव्विहमावस्सयं ति ? भणणति– जतो [१]सामादियादियाण सावज्जवज्जणादि छव्विहो अत्थणिबंधो, इमे य ते अत्था– **सावज्जजोग०** गाधा। पढमे सामादियज्झयणे पाणातिवायादिसव्व**सावज्जजोगविरती** कातव्वा। बितिए दरिसणविसोहिणिमित्तं पुणो बोहिलाभत्थं च कम्मखवणत्थं च तित्थकराणा**मुक्कित्तणा** कता। ततिए चरणादि**गुण**समूह**वतो** वंदण-णमंसणादिएहिं **पडिवत्ती** कातव्वा। चतुत्थे मूलुत्तरावराधक्खलणाए **क्खलितो** पच्चागतसंवेगो विसुज्झमाणभावो पमादकरणं संभरंतो अप्पणो **णिंदण**गरहणं करेति। पंचमे **व्रण**साधम्मोवणएण दसविध-पच्छित्तेण चरणादियारव्रणस्स [२]**चिगिच्छं** करेति । छट्ठे जहा मूलुत्तर**गुण**पडिवत्ती निरतियार**धारणं** च जधा तेसिं भवति तधा अत्थपरूवणा।

**[हा० ७३]** आह– किं पुनरिदमावश्यकं षडध्ययनात्मकम् ? इति, उच्यते– षडर्थाधिकारविनियोगात्। क एतेऽर्थाधिकाराः ? इति तानुपदर्शयन्नाह– **आवस्सगस्स ण**मित्यादि। **सावज्ज** गाहा, व्याख्या– **सावद्ययोगविरतिः** सपापव्यापारविरमणं सामायिकार्थाधिकारः। **उत्कीर्तनेति** सकलदुःखविरेकभूतसावद्ययोगविरत्युपदेशकत्वा-दुपकारित्वात् सद्भूतगुणोत्कीर्तनकरणादन्तःकरणशुद्धेः प्रधानकर्मक्षयकारणत्वाद् दर्शनविशुद्धिः(द्धेः) पुनर्बोधिलाभहेतुत्वाद् भगवतां जिनानां यथाभूतान्यासाधारण-गुणोत्कीर्तना चतुर्विंशतिस्तवस्येति। **गुणवतश्च प्रतिपत्त्यर्थं** [वन्दना] वन्दनाध्ययनस्य। तत्र **गुणाः** मूलगुणोत्तरगुणव्रत-पिण्डविशुद्ध्यादयो गुणा अस्य विद्यन्त इति गुणवान्, तस्य गुणवतः प्रतिपत्त्यर्थं वन्दनादिलक्षणा [प्रतिपत्तिः] कार्येति। उक्तं च-[१]*पासत्थादी* [*आवश्यक नि० ११०८* ] गाहा। **च**शब्दात् पुष्टमालम्बनमासाद्याऽगुणवतोऽपीत्याह। उक्तं च– [२]*परियाय०*[*आवश्यकनि० ११२८*] गाहा। **स्खलितस्य निन्दा** प्रतिक्रमणार्थाधिकारः, कथञ्चित् प्रमादतः स्खलितस्य मूलगुणोत्तरगुणेषु प्रत्यागतसंवेगविशुद्ध्यमानाध्यवसायस्य प्रमादकरणमनुस्मरतोऽकार्यमिदमतीवेति भावयतो निन्दाऽऽत्मसाक्षिकीति भावना। **व्रणचिकित्सा** कायोत्सर्गस्य, इयमत्र भावना– निन्दया शुद्धिमनासादयतः व्रणसाधर्म्योपनयेनाऽऽलोचनादिदशविधप्रायश्चित्तभैषजेन चरणातिचारव्रणचिकित्सेति।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**गुणधारणा** प्रत्याख्यानस्यार्थाधिकार इति, अयमत्र भावार्थः — यथेह मूलगुणोत्तरगुणप्रतिपत्तिः निरतिचारसन्धारणं च तथा प्ररूपणमर्थाधिकार इति। **च**शब्दादन्ये चापान्तरालार्थाधिकारा विज्ञेया इति। **एव**कारोऽवधारण इति गाथार्थः। एषां च प्रत्यध्ययनमर्थाधिकारद्वार एवावकाशः प्रत्येतव्यः।

**[हे० ७३]** आह - नन्वावश्यके किमिति षडध्ययनानि ? अत्रोच्यते, षडर्थाधिकारयोगात्। के पुनस्ते इत्याशङ्क्य तदुपदर्शनार्थमाह - **आवस्सगस्स ण**मित्यादि। **आवश्यकस्य एते** वक्ष्यमाणा **अर्थाधिकारा भवन्ति, तद्यथा - सावज्जजोग** गाहा। व्याख्या - प्रथमे सामायिकलक्षणे अध्ययने प्राणातिपातादिसर्व**सावद्ययोगविरतिरर्था**धिकारः १। **उक्कित्तण** त्ति द्वितीये चतुर्विंशतिस्तवाध्ययने प्रधानकर्मक्षयकारणात्वाल्लब्धबोधिविशुद्धिहेतुत्वात् पुनर्बोधिलाभफलत्वात् सावद्ययोगविरत्युपदेशकत्वेनोपकारित्वाच्च तीर्थकराणां गुणोत्कीर्तनाऽर्थाधिकारः। **गुणवओ य**[1] **पडिवत्ति** त्ति, गुणा मूलोत्तरगुणरूपा व्रतपिण्डविशुद्ध्यादयो विद्यन्ते यस्य स गुणवाँस्तस्य प्रतिपत्तिः वन्दनादिका कर्तव्येति तृतीये वन्दनाध्ययनेऽर्थाधिकारः। **च**शब्दात् पुष्टालम्बनेऽगुणवतोऽपि प्रतिपत्तिः कर्तव्येति द्रष्टव्यम्। उक्तं च —

*[2]परियाय परिस पुरिसं खेत्तं कालं च आगमं नाउं।*
*कारणजाए जाए जहारिहं जस्स जं जोग्गं*[3] *॥१॥* **[***आवश्यकनि० ११२८***]** *ति ३।*

**खलियस्स निंदण** त्ति स्खलितस्य मूलोत्तरगुणेषु प्रमादाचीर्णस्य प्रत्यागतसंवेगस्य जन्तोर्विशुद्ध्यमानाध्यवसायस्याऽकार्यमिदमिति भावयतो निन्दा प्रतिक्रमणेऽर्थाधिकारः ४। **वणतिगिच्छ** त्ति व्रणचिकित्सा कायोत्सर्गाध्ययनेऽर्थाधिकारः। इदमुक्तं भवति - चारित्रपुरुषस्य योऽयमतिचाररूपो भावव्रणस्तस्य दशविधप्रायश्चित्तभेषजेन कायोत्सर्गाध्ययने चिकित्सा प्रतिपाद्यते ५। **गुणधारणा चेव** त्ति गुणधारणा प्रत्याख्यानाध्ययने अर्थाधिकारः। अयमत्र भावार्थः - मूलगुणोत्तरगुणप्रतिपत्तिस्तस्याश्च निरतिचारं सन्धारणं यथा भवति तथा प्रत्याख्यानाध्ययने प्ररूपणा करिष्यते ६। **च**शब्दादन्येऽप्यपान्तरालार्थाधिकारा विज्ञेयाः, एवकारोऽवधारण इति गाथार्थः।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तदेवं यदादौ [सू० ७] प्रतिज्ञातम् **आवश्यकं निक्षेप्स्यामी**त्यादि, तत्रावश्यक-श्रुत-स्कन्धलक्षणानि त्रीणि पदानि निक्षिप्तानि। साम्प्रतं त्वध्ययनपदमवसरायातमपि न निक्षिप्यते, वक्ष्यमाणनिक्षेपानुयोगद्वार ओघनिष्पन्ननिक्षेपे तस्य निक्षेप्स्यमानत्वात्, अत्रापि भणने च ग्रन्थगौरवापत्तेरिति।

**[सू० ७४] आवस्सगस्स एसो पिंडत्थो वण्णितो समासेणं।**
**एत्तो एक्केक्कं पुण अज्झयणं कित्तइस्सामि[1] ॥७॥**

**तंजहा— सामाइयं १, चउवीसत्थओ २, वंदणं[2] ३, पडिक्कमणं ४, काउस्सग्गो ५, पच्चक्खाणं ६।**

**[सू० ७५] तत्थ पढमज्झयणं सामाइयं। तस्स णं इमे चत्तारि अणुओग[3]-दारा[5] भवंति। तंजहा— उवक्कमे १, णिक्खेवे २, अणुगमे ३, णए ४।**

**[चू० ७४-७५]** इदाणिं आवस्सयस्स जं वक्खातं तज्ज्ञापनार्थं यच्च व्याख्येयं तस्य च ज्ञापनार्थं इदमाह — **आवस्सगस्स एसो** गाधा। छण्ह वि अज्झयणाणं जो सामण्णत्थो स **पिंडत्थो** भण्णति, सो य एसो भणितो।

इदाणिं अज्झयणेसु जो जहा पत्तेयमत्थो स तहा सवित्थरो वण्णिज्जति। **तंजधा — सामाइयं** इत्यादि सूत्रम्। **तत्थ** त्ति अज्झयणछक्कमज्झे जं **पढमं सामाइयं** ति **अज्झयणं,** तं च समभावलक्खणं सव्वचरणादिगुणाधारं वोमं पिव सव्वदव्वाणं सव्वविसेसलद्धीण य हेतुभूतं बीयं पिव अंकुरादीणं। चतुवीसत्थयादयो वि सलक्खणेहि भिण्णा भाणितव्वा। अहवा जतो तं सामाइयं णाण-दंसण-चरणगुणमयं णाणादिवइरित्तो य अण्णो गुणो णत्थि, सेसज्झयणा वि जतो णाणादिगुणातिरित्ता ण भवंति अतो ते वि तब्भेदा एव दट्ठव्वा इति।

**तस्स** पढमज्झयणस्स **चतुरो अणुयोगदारा,** तत्थ *दिट्ठंतो* जहा महापुरं अकतद्दारं अपरिभोगत्तणतो अणगरमिव दट्ठव्वं। अहेकदारं तधा वि हय-गय-गो-महिस-रह-सगडादिएहिं जुगवं पवेस-निग्गमेण जम्हा दुक्खसंचारं भवति, तम्हा सुहपवेस-निग्गमट्ठया चतुमूलदारं कतं,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

पुणो इत्थी-बाल-वुड्ढमादियाण सुहसंचारतरं भविस्सति त्ति कातुं अंतरंतरेसु पडिदुवारा कता । एवं अधिकतमज्झयणत्थो अणुयोगपुरं, तस्स अग्गहो अकतद्दारे एगदारे य [1]दुधाभिगम्मत्तणं णातुं गुरूहिं उवक्कमादिचतुदुवारं कतं । पुणो सुहाभिगम्मत्तणतो अंतरंतरदुवारसरिच्छा उवक्कमस्स छब्भेदा, णिक्खेवस्स तयो, दो अणुगमस्स, दो य णयस्स । पुणो उत्तरुत्तरभेदेहिं अणेगभेदट्ठिता कता ।

तत्थ **उवक्कमो** त्ति अज्झयणस्सोवक्कमणं **उवक्कमो** समीवकरणं णिक्खेवस्स, एस भावसाहणो । तेण वा उवक्कमिज्जइ त्ति [2]गुरुवतिजोगत्थकहणेण **उवक्कमो**, एस करणसाहणो । तम्मि वा उवक्कमिज्जति त्ति **उवक्कमो** सीसस्स सवणभावे, एस अधिकरणसाहणो । ततो [वा] उवक्कमिज्जति त्ति **उवक्कमो**, सीसो गुरुं विणएण आराहेत्ता अज्झयणसब्भावं कहावेंतो अप्पणो अवादाणत्थे वट्टइ, एस अवादाणसाहणो ।

एवं उवक्कमेण णिक्खेवसमीवमाणीय अज्झयणं णिक्खिप्पति । णिक्खिवणं **णिक्खेवो** । तेण वा करणभूतेण णिक्खिप्पति तहिं वा णिक्खिप्पति ततो [वा] णिक्खिप्पति त्ति **णिक्खेवो** । णियतो णिच्छितो वा खेवो **णिक्खेवो**, अर्थभेदन्यास इत्यर्थः ।

णिक्खित्तस्स य अणुगमणं **अणुगमो** । तेण वा अणुयोगो गम्मति तहिं वा अणुगम्मति ततो [वा] अणुगम्मति त्ति **अणुगमो** । अणु वा सुत्तं तस्साणुगमणभावातो **अणुगमो**, अत्थातो वा सुत्तं अणु, तस्स अत्थणुरूवगमणत्तातो **अणुगमो**, सुत्ताणुगमो सूत्रस्पर्शनानुगमश्चेत्यर्थः ।

नयनं **नयः** भावसाधनः, अहवा नयतीति **नयः** कर्तृसाधनः, तेन वा वस्तुस्वरूपं नीयत इति **नयः** । तहिं वा ततो वा वत्थुणो पज्जायसंभवेण बहुधा नयनं **नयो** भण्णति ।

एतम्मि उवक्कमादिदारक्कमे कारणं इमं – णासमीवत्थं जतो णिक्खिप्पति अतो अब्भासकरणत्थं आदावेव उवक्कमो कतो । जम्हा य अणिक्खित्तं णाणुगम्मति तम्हा उवक्कमाणंतरं णिक्खेवो । णिक्खित्तं च णियमा णाणत्थमणुगम्मति, णाणं च अत्थपज्जायाणुसारी, अत्थपज्जायाणुसारी य णियमा णयो, अतो णयदारातो पुव्वं णिक्खेवाणंतरं च अणुगमो भणितो । अणुगमो य णयो णियमा, णयाइरित्तो य अणुगमो जतो णत्थि, किं च, सव्वाभिधाणसव्वपज्जायाणुगता य णय त्ति कातुं अंते णयद्दारं ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[हा० ७४-७५]** साम्प्रतं यदुक्तमादौ श्रुतस्कन्धोऽध्ययनानि चावश्यकमिति तत्राऽऽवश्यकादिन्यासोऽभिहितः, इदानीमध्ययनन्यासावसरः, स चानुयोगद्वारप्रक्रमायातः प्रत्यध्ययनमोघनिष्पन्न एव वक्ष्यते लाघवार्थमिति । साम्प्रतमावश्यकस्य यद् व्याख्यातं यच्च व्याख्येयं तदुपदर्शयन्नाह – **आवस्सयस्स** गाहा। व्याख्या – **पिण्डार्थः**[१] समुदायार्थः **वर्णितः** कथितः **समासेन** संक्षेपेण आवश्यकश्रुतस्कन्ध इति शास्त्रस्यान्वर्थाभिधानात् । **इत** ऊर्ध्वम**कैकमध्ययनं कीर्त्तयिष्यामः** वक्ष्याम इति गाथार्थः ।

कीर्त्तनां कुर्वन्निदमाह– **तंजहा – सामाइय**मित्यादि सूत्रसिद्धं यावत् **तत्थ पढममज्झयणं सामाइयं** । **तत्र**शब्दो वाक्योपन्यासार्थो निर्द्धारणार्थो वा, **प्रथमम्** आद्यम् अशेषचरणादिगुणाधारत्वात् प्रधानं मुक्तिहेतुत्वात् । उक्तं च –

*सामायिकं गुणानामाधारः खमिव सर्वभावानाम् ।*
*न हि सामायिकहीनाश्चरणादिगुणान्विता येन ॥१॥*
*तस्माज्जगाद भगवान् सामायिकमेव निरुपमोपायम् ।*
*शारीर-मानसानेकदुःखनाशस्य मोक्षस्य ॥२॥* [ ]

बोधादेरधिकमयन**मध्ययनं** प्रपञ्चतो वक्ष्यमाणशब्दार्थं **सामायिकम्** । इह च समो राग-द्वेषवियुतो यः सर्वभूतान्यात्मवत् पश्यति, आयो लाभः प्राप्तिरिति पर्यायाः, समस्य आयः समायः, समो हि प्रतिक्षणमपूर्वैर्ज्ञान-दर्शन-चरणपर्यायैर्भवाटवीभ्रमण-संक्लेशविच्छेदकैर्निरुपमसुखहेतुभिरधःकृतचिन्तामणिकल्पद्रुमोपमैर्युज्यते, स एव समायः प्रयोजनमस्याध्ययनसंवेदनानुष्ठानवृन्दस्येति सामायिकम्, समाय एव [वा] ।

**तस्य** सामायिकस्य, **ण**मिति वाक्यालङ्कारे, **इमे** त्ति अमूनि वक्ष्यमाणलक्षणानि महापुरस्येव **चत्वारी**ति संख्या, न त्रीणि नापि पञ्च, **अनुयोगद्वाराणि**, इहाध्ययनार्थकथन-विधिरनुयोगः, द्वाराणीव द्वाराणि नगरप्रवेशमुखानि, सामायिकपुरस्यार्थाधिगमोपाय-द्वाराणीत्यर्थः, भवन्ति । **तद्यथे**त्युपन्यासार्थः । **उवक्कमे**त्यादि, इह च नगरदृष्टान्तमाचार्याः प्रतिपादयन्ति – यथा ह्यकृतद्वारमनगरमेव भवति, कृतैकद्वारमपि दुरधिगमं[२] कार्यातिपत्तये च, चतुर्मूलद्वारं तु प्रतिद्वारानुगतं सुखाधिगमं कार्यानतिपत्तये च । एवं

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सामायिकपुरमप्यर्थाधिगमोपायद्वारशून्यमशक्याधिगमं भवति, एकद्वारानुगतमपि च दुरधिगमम्, सप्रभेदचतुर्द्वारानुगतं तु सुखाधिगममित्यतः फलवान् द्वारोपन्यास इति।

तत्रोपक्रमण**मुपक्रम** इति भावसाधनः शास्त्र[स्य] न्यासदेशसमीपीकरणलक्षणः। उपक्रम्यते वाऽनेन गुरुवाग्योगेनेत्युपक्रम इति करणसाधनः। [३]उपक्रम्यतेऽस्मिन्निति वा शिष्यश्रवणभावे सत्युपक्रम इत्यधिकरणसाधनः। उपक्रम्यतेऽस्मादिति वा विनीतविनेयविनयादित्युपक्रम इत्यपादानसाधनः, तथा च शिष्यो गुरुं विनयेनाऽऽराध्यानुयोगं कारयन्नात्मनाऽपादानार्थे वर्तते इति। एवं निक्षेपणं **निक्षेपः**, निक्षिप्यते वा अनेनास्मिन्नस्मादिति वा निक्षेपः न्यासः स्थापनेति पर्यायाः। एवमनुगमनमनुगमः, अनुगम्यतेऽनेनास्मिन्नस्मादिति वाऽनुगमः, सूत्रस्यानुकूलः परिच्छेद इत्यर्थः। एवं नयनं नयः, नीयतेऽनेनाऽस्मिन्नस्मादिति वा नयः, अनन्तधर्मात्मकस्य वस्तुन एकांशपरिच्छेद इत्यर्थः। आह— एषामुपक्रमादिद्वाराणां किमित्येवं क्रमः? इति, अत्रोच्यते— न ह्यनुपक्रान्तं सदसमीपीभूतं निक्षिप्यते, न चानिक्षिप्तं नामादिभिरर्थतोऽनुगम्यते, न चार्थतोऽननुगतं नयैर्विचार्यत इत्यतोऽयमेव क्रम इति। उक्तं च—

[४]*सम्बन्ध(द्ध)मुपक्रमतः समीपमानीय रचितनिक्षेपम्।*
*अनुगम्यतेऽथ शास्त्रं नयैरनेकप्रभेदैस्तु ॥१॥* [ ]

**[हे० ७४-७५]** इदानीमावश्यकस्य यद् व्याख्यातं यच्च व्याख्येयं तदुपदर्शयन्नाह - **आवस्सयस्स** गाहा। व्याख्या - **आवश्यकस्य** आवश्यकपदाभिधेयस्य शास्त्रस्य **एषः** पूर्वोक्तप्रकारः **पिण्डार्थः** समुदायार्थो **वर्णितः** कथितः **समासेन** संक्षेपेण। इदमत्र हृदयम् - आवश्यकश्रुतस्कन्ध इति शास्त्रनाम पूर्वं व्याख्यातम्, तच्च सान्वर्थम्, ततश्च यथा सान्वर्था**दाचारा**दिनामत एव तद्वाच्यशास्त्रस्य चारित्राद्याचारोऽत्राभिधास्यत इत्यादिलक्षणः समुदायार्थः प्रतिपादितो भवति, एवमत्राप्यावश्यकश्रुतस्कन्ध इति सान्वर्थनामकथनादेवावश्यं करणीयं सावद्ययोगविरत्यादिकं वस्त्वत्राभिधास्यत इति समुदायार्थः प्रतिपादितो भवति। **इत** ऊर्ध्वं **पुनरेकैकमध्ययनं कीर्तयिष्यामि** भणिष्यामीति गाथार्थः।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तत्कीर्तनार्थमेवाऽऽह - **तद्यथा - सामायिकं चतुर्विंशतिस्तवो वन्दनं प्रतिक्रमणं कायोत्सर्गः प्रत्याख्यानम्**। **तत्र** तेषु अनन्तरोद्दिष्टेषु षट्सु अध्ययनेषु मध्ये **प्रथमम्** आद्यम**ध्ययनं सामायिकम्**, आद्युपन्यासश्चास्य निःशेषचरणादिगुणाधारत्वेन प्रधानमुक्तिकारणत्वात्, उक्तं च -

*सामायिकं गुणानामाधारः खमिव सर्वभावानाम् ।*
*न हि सामयिकहीनाश्चरणादिगुणान्विता येन ॥१॥*
*तस्माज्जगाद भगवान् सामायिकमेव निरुपमोपायम् ।*
*शारीर-मानसानेकदुःखनाशस्य मोक्षस्य ॥२॥* [ ]

**तत्र** बोधादेरधिकमयनं प्रापणमध्ययनं प्रपञ्चतो वक्ष्यमाणशब्दार्थम्। सामायिकमित्यत्र यः सर्वभूतान्यात्मवत् पश्यति स रागद्वेषवियुक्तः समः, तस्याऽऽयः प्रतिक्षणं ज्ञानादिगुणोत्कर्षप्राप्तिः समायः, समो हि प्रतिक्षणमपूर्वैः ज्ञान-दर्शन-चरण-पर्यायैर्भवाटवीभ्रमणहेतुसंक्लेशविच्छेदकैर्निरुपमसुखहेतुभिः संयुज्यते। समायः प्रयोजनमस्याध्ययनस्य ज्ञान-क्रियासमुदायरूपस्येति सामायिकम्, समाय एव वा सामायिकम्, **तस्य** सामायिकस्य, **ण**मिति वाक्यालङ्कारे, **इमे** त्ति अमूनि वक्ष्यमाणलक्षणानि **चत्वार्यनुयोगद्वाराणि भवन्ति**। तत्राध्ययनार्थकथनविधि**रनुयोगः**, द्वाराणीव **द्वाराणि** महापुरस्येव सामायिकस्य, अनुयोगार्थं व्याख्यार्थं द्वाराण्यनुयोगद्वाराणि।

अत्र नगरदृष्टान्तं वर्णयन्त्याचार्याः - यथा हि अकृतद्वारं नगरमनगरमेव भवति, निर्गम-प्रवेशोपायाभावतोऽनधिगमनीयत्वात् । कृतैक-द्विकादिद्वारमपि दुरधिगमं कार्यातिपत्तये च भवति। चतुर्मूलद्वारं तु प्रतिद्वारानुगतं सुखाधिगमं कार्यानतिपत्तये च संपद्यते । एवं सामायिकपुरमप्यर्थाधिगमोपायद्वारशून्यमशक्याधिगमं स्यात्, एकादिद्वारानुगतमपि दुरधिगमं भवेत्, सप्रभेदचतुर्द्वारानुगतं तु सुखाधिगमं भवति, अतः फलवाँस्तदधिगमार्थो द्वारोपन्यासः।

कानि पुनस्तानीति तद्दर्शनार्थमाह - **तद्यथे**त्यादि। तत्रोपक्रमणं दूरस्थस्य वस्तुनस्तैः तैः प्रतिपादनप्रकारैः समीपमानीय निक्षेपयोग्यता-करण**मुपक्रमः**, उपक्रान्तं हि उपक्रमान्तर्गतभेदैर्विचारितं हि निक्षिप्यते, नान्यथेति भावः। उपक्रम्यते वा निक्षेपयोग्यं

Jain Education International For Private & Personal Use Only www.jainelibrary.org

क्रियतेऽनेन गुरुवाग्योगेनेत्युपक्रमः, अथवा उपक्रम्यते अस्मिन् शिष्यश्रवणभावे सतीत्युपक्रमः, अथवा उपक्रम्यते अस्माद्विनीतविनेयविनयादित्युपक्रमः, विनयेनाराधितो हि गुरुर्निक्षेपयोग्यं शास्त्रं करोतीति भावः । तदेवं करणा-ऽधिकरणा-ऽपादानकारकैर्गुरुवाग्योगादयोऽर्था भेदेनोक्ताः । यदि त्वेकोऽप्यन्यतरोऽर्थः करणादिकारकवाच्यत्वेन विवक्ष्यते तथापि न दोषः ।

एवं निक्षेपणं शास्त्रादेर्नाम-स्थापनादिभेदैर्न्यसनं व्यवस्थापनं **निक्षेपः**, निक्षिप्यते नामादिभेदैर्व्यवस्थाप्यते अनेनास्मिन्नस्मादिति वा निक्षेपः, वाच्यार्थविवक्षा तथैव ।

एवमनुगमनं सूत्रस्यानुकूलमर्थकथन**मनुगमः**, अथवा अनुगम्यते व्याख्यायते सूत्रमनेनास्मिन्नस्मादिति वाऽनुगमः, वाच्यार्थविवक्षा तथैव ।

एवं नयनं **नयः**, नीयते परिच्छिद्यते अनेनास्मिन्न- स्मादिति वा नयः, सर्वत्रानन्तधर्माध्यासिते वस्तुन्येकांशग्राहको बोध इत्यर्थः ।

अत्र चोपक्रान्तमेव निक्षेपयोग्यतामानीतमेव निक्षिप्यत इत्युपक्रमानन्तरं निक्षेप उपन्यस्तः, नामादिभेदैर्निक्षिप्तमेव चानुगम्यत इति निक्षेपानन्तरमनुगमः, अनुगम्यमानमेव च नयैर्विचार्यते नान्यथेति तदनन्तरं नय इति यथोक्तक्रमेणोपन्यासः फलवानिति ।

**[सू० ७६] [१]से किं तं उवक्कमे ? उवक्कमे छव्विहे पण्णत्ते । तंजहा— नामोवक्कमे १, ठवणोवक्कमे २, दव्वोवक्कमे ३, खेत्तोवक्कमे ४, कालोवक्कमे ५, भावोवक्कमे ६ ।**

**[सू० ७७] नाम-ठवणाओ गयाओ ।**

**[सू० ७८] से किं तं दव्वोवक्कमे ? दव्वोवक्कमे दुविहे पण्णत्ते । तंजहा— आगमओ य १, नोआगमओ [२]य २, जाव जाणगसरीरभवियसरीरवतिरित्ते दव्वोवक्कमे तिविहे पण्णत्ते । तंजहा सचित्ते १, अचित्ते २, मीसए ३ ।**

Jain Education International For Private & Personal Use Only www.jainelibrary.org

[सू० ७९] से किं तं सचित्तदव्वोवक्कमे ? सचित्तदव्वोवक्कमे तिविहे पण्णत्ते । तंजहा— दुपयाणं १, चउप्पयाणं २, अपयाणं ३ । एक्केक्के दुविहे— परिकम्मे य १, वत्थुविणासे य २ ।

[सू० ८०] से किं तं दुपए उवक्कमे ? दुपए उवक्कमे [३]दुपयाणं नडाणं नट्टाणं जल्लाणं मल्लाणं मुट्ठियाणं वेलंबगाणं कहगाणं पवगाणं लासगाणं आइक्खगाणं लंखाणं मंखाणं तूणइल्लाणं तुंबवीणियाणं [४]कायाणं मागहाणं । सेतं दुपए उवक्कमे ।

[सू० ८१] से किं तं चउप्पए उवक्कमे ? चउप्पए उवक्कमे चउप्पयाणं आसाणं हत्थीणं इच्चाइ । से तं चउप्पए उवक्कमे ।

[सू० ८२] से किं तं [५]अपए उवक्कमे ? अपए उवक्कमे अपयाणं अंबाणं [६]अंबाडगाणं इच्चाइ । सेतं [७]अपए उवक्कमे । सेतं सचित्त-दव्वोवक्कमे ।

[सू० ८३] से किं तं [८]अचित्तदव्वोवक्कमे ? अचित्तदव्वोवक्कमे खंडाईणं गुडादीणं [९]मत्स्यंडीणं । सेतं [१०]अचित्तदव्वोवक्कमे ।

[सू० ८४] से किं तं मीसए दव्वोवक्कमे ? मीसए दव्वोवक्कमे से चेव [११]थासग-आयंसगाइमंडिते आसादी ।[१२] → सेतं मीसए दव्वोवक्कमे । से तं जाणयसरीरभवियसरीरवइरित्ते दव्वोवक्कमे । सेतं नोआगमओ दव्वोवक्कमे । सेतं दव्वोवक्कमे ।←

[चू० ७६-८४] इदाणिं जं वुत्तं **छव्विधो उवक्कमो** त्ति तत्थ गुरू सीसहितत्थाय अत्थकते छ भेदे दंसेति- **तंजधा— णाम०ठ्ठवणा०दव्व०खेत्त०काल० भावोवक्कमे**

Jain Education International For Private & Personal Use Only www.jainelibrary.org

य। णाम-ट्ठवणा जधापुव्वं। दव्वे **आगमतो णोआगमतो य**। तत्थ णोआगमे **जाणय-भव्वसरीरातिरित्तो तिविधो सचित्ता-ऽचित्त-मीसो**। सचित्ते **दुपद-चतुप्पदा-ऽपदेसु, एक्केक्के परिकम्मणे वत्थुविणासे य**।

**[हा० ७६-८४]** तत्रोपक्रमो द्विप्रकारः- शास्त्रीय इतरश्च, तत्रेतराभिधित्सयाऽऽह — **से किं त**मित्यादि वस्तुतः भावितार्थमेव, यावत् **से किं तं जाणगसरीरभवियसरीरवइरित्ते दव्वोवक्कमे** इत्यादि। **त्रिविधः प्रज्ञप्तः, तद्यथा- सचित्त** इत्यादि, द्रव्योपक्रम इति वर्तते, शेषाक्षरार्थः सचित्तद्रव्योपक्रमनिगमनावसानः सूत्रसिद्ध एव। भावार्थस्त्वयमिह — **सचित्त** इत्यादि, द्रव्योपक्रमः द्विपद-चतुष्पदा-ऽपदभेदभिन्नः। **एकैको द्विविधः — परिकर्मणि वस्तुविनाशे च**। तत्र परिकर्म द्रव्यस्य गुणविशेषपरिणामकरणम्, तस्मिन् सति, तद्यथा — घृताद्युपयोगेन नटादीनां वर्णादिकरणम्, अथवा कर्ण-स्कन्धवर्द्धनादिक्रियेति। *अन्ये* शास्त्र-गान्धर्व-नृत्यादिकलासम्पादनमपि द्रव्योपक्रमं व्याचक्षते, इदं पुनरसाधु, विज्ञानविशेषात्मकत्वाच्छास्त्रादिपरिज्ञानस्य, तस्य च भावत्वादिति, किन्त्वात्मद्रव्य-संस्कारविवक्षापेक्षया शरीरवर्णादिकरणवत् स्यादपीति। एवं चतुष्पदानामपि हस्त्यश्वादीनां शिक्षागुणविशेषकरणम्। एवमपदानाम् [1]अप्याम्रादीनां वृक्षविशेषाणां वृक्षायुर्वेदोपदेशाद् वार्द्धि(र्द्ध)क्यादिगुणापादनमिति, एतत्फलानां वा गर्त्तप्रक्षेप-कोद्रव-पलालादिस्थगना-दिनेति। आह— यः स्वयं कालान्तरभाव्युपक्रम्यते यथा तरोर्वार्द्धि(र्द्ध)क्यादि तत्र परिकर्मणि द्रव्योपक्रमता युक्ता, वर्णकरण-कलादिसम्पादनस्य तु कालान्तरेऽपि विवक्षितहेतुजालमन्तरेणानुपपत्तेः कथं परिकर्मणि द्रव्योपक्रमः ? इति, अत्रोच्यते — विवक्षितहेतुजालमन्तरेणानुपपत्तेरित्यसिद्धम्, कथम् ? वर्णस्य तावन्नामकर्मविपाकित्वात् स्वयमपि भावात्, कलादीनां क्षायोपशमिकत्वात् तस्य च कालान्तरे स्वयमपि सम्भवात्, विभ्रम-विलासादीनां च युवावस्थायां दर्शनात्। तथा वस्तुविनाशे च पुरुषादीनां खड्गादिभिर्विनाश एवोपक्रम्यत इति। आह— परिकर्म-वस्तुनाशोपक्रमयोरभेद एव, उभयत्र पूर्वरूपपरित्यागेनोत्तरावस्थापत्तेरिति, अत्रोच्यते— परिकर्मोपक्रमजनितोत्तर-रूपापत्तावपि विशेषेण प्राणिनां प्रत्यभिज्ञानदर्शनात्, वस्तुनाशोपक्रमसम्पादितोत्तरधर्मरूपे

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तु वस्तुन्यदर्शनाद् विशेषसिद्धिरिति, अथवैकत्र नाशस्यैव विवक्षितत्वाददोषः ।

**से किं तं अचित्तदव्वोवक्कम** इत्यादि [ यावद् ] निगमनं निगदसिद्धमेव । नवरं **खण्डादीनां गुडादीना**मित्यत्रानलसंयोगादिना माधुर्यगुणविशेषकरणं विनाशश्च । मिश्रद्रव्योपक्रमस्तु **स्थासका**दिविभूषिताश्वादिविषय एवेति, विवक्षातश्च कारकयोजना द्रष्टव्या, द्रव्यस्य द्रव्येण द्रव्याद् द्रव्ये वोपक्रमो द्रव्योपक्रम इति ।

[हे० ७६-८४] तत्रोपक्रमो द्विधा - शास्त्रीय इतरश्च लोकप्रसिद्धः । तत्रेतराभिधित्सया प्राह - **से किं तं उवक्कमे ? उवक्कमे छव्विहे पण्णत्ते** इत्यादि । *अत्र क्वचिदेवं* दृश्यते- **उवक्कमे दुविहे पण्णत्ते** इत्यादि, अयं च पाठ आधुनिकोऽयुक्तश्च, '**अहवा उवक्कमे छव्विहे पण्णत्ते**' इत्यादिवक्ष्यमाणग्रन्थोपन्यासस्याघटमानताप्रसङ्गात् । यदि शास्त्रीयोपक्रमोऽत्र प्रतिज्ञातः स्यात्तदा [१]वक्ष्यमाणसूत्रमेवं स्यात् - **से किं तं सत्थोवक्कमे ? सत्थोवक्कमे छव्विहे पण्णत्ते** इत्यादि, न चैवम्, तस्मान्नेह सूत्रे द्वैविध्यप्रतिज्ञा, किन्त्वितरोपक्रमभणनं चेतसि विकल्प्य यथानिर्दिष्टमेव सूत्रमुक्तमित्यलं विस्तरेण ।

प्रकृतं प्रस्तुमः - तत्र नाम-स्थापनोपक्रमव्याख्या नाम-स्थापनावश्यकव्याख्यानुसारेण कर्तव्या । द्रव्योपक्रमव्याख्याऽपि द्रव्यावश्यकवदेव यावत् **से किं तं जाणगसरीरभवियसरीरवतिरित्ते दव्वोवक्कमे** ? इत्यादि । तत्र द्रव्यस्य नटादेरुपक्रमणं कालान्तरभाविनापि पर्यायेण सहेदानीमेवोपायविशेषतः संयोजनं द्रव्योपक्रमः, अथवा द्रव्येण घृतादिना द्रव्ये भूम्यादौ द्रव्याद् घृतादेर्वोपक्रमो द्रव्योपक्रम इत्यादिकारकयोजना विवक्षया कर्तव्येति । **स च त्रिविधः प्रज्ञप्तः, तद्यथा** - सचित्तद्रव्यविषयः **सचित्तः**, अचित्तद्रव्यविषयोऽ**चित्तः**, मिश्रद्रव्यविषयस्तु **मिश्रः**, द्रव्योपक्रम इति वर्तते । तत्र **सचित्तद्रव्योपक्रमस्त्रिविधः, तद्यथा - द्विपदानां** नट-नर्तकादीनाम्, **चतुष्पदानाम्** अश्व-हस्त्यादीनाम्, **अपदानाम्** आम्रादीनाम्, तत्रैकैकः पुनरपि द्विधा - **परिकर्मणि वस्तुविनाशे च** । तत्रावस्थितस्यैव वस्तुनो गुणविशेषाधानं परिकर्म, तत्र **परिकर्मणि** परिकर्मविषयो द्रव्योपक्रमः, यदा तु वस्तुनो विनाश एवोपायविशेषैरुपक्रम्यते तदा **वस्तुनाशे** वस्तुनाशविषयो द्रव्योपक्रमः । तत्र द्विपदानां नट-नर्तकादीनां घृताद्युपयोगेन

Jain Education International For Private & Personal Use Only www.jainelibrary.org

बल-वर्णादिकरणं कर्ण-स्कन्धवर्धनादिक्रिया वा परिकर्मणि सचित्तद्रव्योपक्रमः । द्विविधमप्येतमुपक्रमं बिभणिषुराह - **से किं त**मित्यादि । अत्र निर्वचनम् - **दुपयाणं नडाण**मित्यादि, तत्र नाटकानां नाटयितारो नटास्तेषाम् । **नट्टाणं** ति नृत्यविधायिनो नर्तकास्तेषाम्, **जल्लाणं** ति जल्ला वरत्राखेलकास्तेषाम्, राजस्तोत्रपाठकानामि**त्यन्ये**। **मल्लाणं** ति मल्लाः प्रतीतास्तेषाम् । **मुट्ठियाणं** ति मौष्टिका ये मुष्टिभिः प्रहरन्ति मल्लविशेषा एव तेषाम् । **वेलंबगाणं** ति विडम्बका विदूषका नानावेषादिकारिण इत्यर्थः, तेषाम्, **कहगाणं** ति कथकानां प्रतीतानाम् । **पवगाणं** ति प्लवका ये उत्प्लवन्ते गर्तादिकं झम्पाभिर्लङ्घयन्ति नद्यादिकं वा तरन्ति तेषाम् । **लासगाणं** ति लासका ये रासकान् गायन्ति तेषाम्, जयशब्दप्रयोक्तॄणां वा भण्डानामित्यर्थः । **आइक्खगाणं** ति ये शुभाशुभमाख्यान्ति ते आख्यायकास्तेषाम् । **लंखाणं** ति ये महावंशाग्रमारोहन्ति ते लङ्खास्तेषाम् । **मंखाणं** ति ये चित्रपटादिहस्ता भिक्षां चरन्ति ते मङ्खास्तेषाम् । **तूणइल्लाणं** ति तूणाभिधानवाद्यविशेषवताम् । **तुंबवीणियाणं**ति वीणावादकानाम् । **कावाणं**ति कावडिवाहकानाम् । **मागहाणं** ति मङ्गलपाठकानाम् । एषां सर्वेषामपि यद् घृताद्युपयोगेन बल-वर्णादिकरणं कर्ण-स्कन्धवर्द्धनादिक्रिया वा स परिकर्मणि सचित्तद्रव्योपक्रमः, यस्तु खड्गादिभिरेषां नाश एवोपक्रम्यते संपाद्यते स वस्तुनाशे 'सचित्तद्रव्योपक्रमः' इति वाक्यशेषः । **अन्ये** *तु* शास्त्र-गन्धर्व-नृत्यादिकलासम्पादनमपि परिकर्मणि द्रव्योपक्रम इति व्याचक्षते, एतच्चायुक्तम्, विज्ञानविशेषात्मकत्वात् शास्त्रादिपरिज्ञानस्य, तस्य च भावत्वादिति, अथवा यद्यात्मद्रव्यसंस्कारमात्रापेक्षया शरीरवर्णादिकरणवदित्थमुच्यते तर्ह्येतदप्यदुष्टमेवेति । **सेत**मित्यादि निगमनम् ।

अथ चतुष्पदानां द्विविधमप्युपक्रमं बिभणिषुराह - **से किं त**मित्यादि । अत्र निर्वचनम् - **चउप्पयाणं आसाणं हत्थीण**मित्यादि । अश्वादयः प्रतीता एव, एतेषां शिक्षागुणविशेषकरणं परिकर्मणि, खड्गादिभिस्त्वेषां नाशोपक्रमणं वस्तुनाशे, 'सचित्तद्रव्योपक्रमः' इतीहापि वाक्यशेषः । **सेत्त**मित्यादि निगमनम् ।

अथापदानां द्विविधमप्युपक्रमं बिभणिषुराह - **से किं त**मित्यादि । अत्र निर्वचनम्- **अपयाणं अंबाणं अंबाडगाण**मित्यादि । इहाऽऽम्रादयो देशप्रतीता एव, नवरं

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**चाराणं** ति येषु चारकुलिका उत्पद्यन्ते ते चारवृक्षाः। आम्रादिशब्दैश्च वृक्षास्तत्फलानि वा गृह्यन्ते। तत्र वृक्षाणां वृक्षायुर्वेदोपदेशाद्वार्द्धक्यादिगुणापादनं तत्फलानां तु गर्तप्रक्षेप-कोद्रवपलालस्थगनादिना आश्वेव पाकादिकरणं परिकर्मणि, शस्त्रादिभिस्तु मूलत एव विनाशनं वस्तुनाशे 'सचित्तद्रव्योपक्रमः' इत्यत्रापि वाक्यशेषः। **सेत्त**मित्यादि निगमनद्वयम्।

अथाचित्तद्रव्योपक्रमं विवक्षुराह - **से किं तं अचित्तदव्वोवक्कमे** इत्यादि। **खण्डादयः** प्रतीता एव, नवरं **मत्स्यण्डी**[2] खण्डशर्करा, एतेषां खण्डाद्यचित्तद्रव्याणा-मुपायविशेषतो माधुर्यादिगुणविशेषकरणं परिकर्मणि, सर्वथा विनाशकरणं वस्तुनाशे, 'अचित्तद्रव्योपक्रमः' इति शेषः। **सेत्त**मित्यादि निगमनम्।

अथ मिश्रद्रव्योपक्रममाह - **से किं त**मित्यादि। **स्थासको**ऽश्वाभरणविशेषः, **आदर्श**स्तु वृषभादिग्रीवाभरणम्, **आदि**शब्दात् कुङ्कुमादिपरिग्रहः। ततश्च तेषामश्वादीना-मेडकान्तानां कुङ्कुमादिभिर्मण्डितानां स्थासकादिभिस्तु विभूषितानां यच्छिक्षादिगुण-विशेषकरणं खड्गादिभिर्विनाशो वा स 'मिश्रद्रव्योपक्रमः' इति शेषः। अश्वादीनां सचेतनत्वात् स्थासकादीनामचेतनत्वात् मिश्रद्रव्यत्वमिह भावनीयम्। *अत्र च* संक्षिप्ततरा अपि **वाचनाविशेषा** दृश्यन्ते तेऽप्युक्तानुसारेण भावनीयाः। **सेत**मित्यादि निगमनचतुष्टयम्। उक्तो द्रव्योपक्रमः।

**[सू० ८५] से किं तं खेत्तोवक्कमे ? खेत्तोवक्कमे - जण्णं हल-कुलियादीहिं[1] खेत्ताइं उवक्कामिज्जंति[2]। सेतं खेत्तोवक्कमे।**

**[सू० ८६] से किं तं कालोवक्कमे ? कालोवक्कमे — जं णं नालियादीहिं कालस्सोवक्कमणं[3] कीरति। सेतं कालोवक्कमे।**

**[चू० ८५-८६]** खेत्त-कालेसु य सवित्थरं भाणितव्वं।

**[हा० ८५-८६] से किं त**मित्यादि, क्षेत्रस्योपक्रमः क्षेत्रोपक्रम[1] इति। आह—

Jain Education International For Private & Personal Use Only www.jainelibrary.org

क्षेत्रममूर्त्तं नित्यं च, अतस्तस्य कथं करण-विनाशाविति ? अत्रोच्यते – तद्व्यवस्थितद्रव्यकरण-विनाशभावादुपचारतः खल्वदोषः, तथा चाह – *तात्स्थ्यात् तद्व्यपदेशो युक्त एव, मञ्चाः क्रोशन्तीति यथा* [ ], तथा चाह सूत्रकारः – **जमिण**मित्यादि, यद् हल-कुलिकादिभिः क्षेत्राण्युपक्रम्यन्ते योग्यतामापाद्यन्ते, **आदि**शब्दाद् विनाशकारणगजेन्द्रवधा(बन्धा)दिपरिग्रहः । **सेत**मित्यादि निगमनम् ।

**से किं त**मित्यादि, कालस्य वर्त्तनादिरूपत्वाद् द्रव्योपक्रम एवोपचारात् कालोपक्रम इति, चन्द्रोपरागादिपरिज्ञानलक्षणो वा, यद्वा **जं ण**मित्यादि, यन्नालिकादिभिः काल उपक्रम्यते ज्ञानयोग्यतामापाद्यते, **नालिका** घटिका, **आदि**शब्दात् प्रहरादिपरिग्रहः । **सेत्त**मित्यादि निगमनवाक्यम् ।

[**हे० ८५-८६**] इतः क्षेत्रोपक्रममभिधित्सुराह - **से किं त**मित्यादि। क्षेत्रस्योपक्रमः परिकर्म-विनाशकरणं क्षेत्रोपक्रमः, स क इत्याह - **खेत्तोवक्कमे जं णं हल-कुलियादीहिं खेत्ताइं उवक्कामिज्जंति** त्ति, तत्र **हलं** प्रतीतम्, अधोनिबद्धतिर्यक्तीक्ष्णलोहपट्टिकं मयिकाल्लघुतरं काष्ठं तृणादिच्छेदार्थं यत् क्षेत्रे वाह्यते तत् मरुमण्डलादिप्रसिद्धं **कुलिक**मुच्यते, ततश्च **यद**त्र **हल-कुलिकादिभिः क्षेत्राण्युपक्रम्यन्ते** बीजवपनादियोग्यतामानीयन्ते **स** परिकर्मणि क्षेत्रोपक्रमः, **आदि**शब्दाद् गजेन्द्रबन्धनादिभिः क्षेत्राण्युपक्रम्यन्ते विनाश्यन्ते स वस्तुनाशे क्षेत्रोपक्रमः, गजेन्द्रमूत्र-पुरीषादिदग्धेषु हि क्षेत्रेषु बीजानामप्ररोहणाद् विनष्टानि क्षेत्राणि इति व्यपदिश्यन्ते । आह - यद्येवं क्षेत्रगतपृथिव्यादिद्रव्याणामेव एतौ परिकर्म-विनाशौ, इत्थं च द्रव्योपक्रम एवायम्, कथं क्षेत्रोपक्रमः ? इति, सत्यम्, किन्तु क्षेत्रमाकाशं तस्य चामूर्तत्वात् मुख्यतयोपक्रमो न संभवति, किन्तु तदाधेयद्रव्याणां पृथिव्यादीनां य उपक्रमः स क्षेत्रेऽपि उपचर्यते, दृश्यते च आधेयधर्मोपचार आधारे, यथा मञ्चाः क्रोशन्ति इति, उक्तं च-

*खित्तमरूवं निच्चं न तस्स परिकम्मणं न य विणासो ।*[१]
*आहेयगयवसेण उ करणविणासोवयारोऽत्थ ॥१॥* [*विशेषावश्यकभा० ९२४*]

*इत्यादि* । **सेत्त**मित्यादि निगमनम् ।

इदानीं कालोपक्रमः। तत्र कालो द्रव्यपर्याय एव, द्रव्य-पर्यायौ च मेचकमणिवत् संवलितरूपाविति द्रव्योपक्रमाभिधाने कालोपक्रम उक्त एव भवति, अथवा [२]*समयावलिय-मुहुत्तेत्यादि*रूपस्य कालस्य स्वतन्त्रमेवोपक्रममभिधित्सुराह सूत्रकारः-**से किं तमित्यादि**। कालस्योपक्रमः कालोपक्रमः, स क इत्याह- **जं णं नालिआईहिं कालो उवक्कमिज्जइ त्ति**, **णमिति** वाक्यालङ्कारे, यदिह नाडिकादिभिरादिशब्दात् शङ्कुच्छाया-नक्षत्रचारादिपरिग्रहस्तैः काल उपक्रम्यते, स कालोपक्रम इति शेषः, तत्र **नाडिका** ताम्रादिमयघटिका, तया, शङ्कुच्[३]छायादिना वा एतावान् पौरुष्यादिकालोऽतिक्रान्त इति यत् परिज्ञानं भवति स परिकर्मणि कालोपक्रमः, यथावत् परिज्ञानमेव हि तस्येह परिकर्म, यत्तु नक्षत्रादिचारैः कालस्य विनाशनं स वस्तुनाशे कालोपक्रमः, तथाहि-अनेन ग्रह-नक्षत्रादिचारेण विनाशितः कालः, न भविष्यन्त्यधुना धान्यादिसम्पत्तय इति वक्तारो भवन्त्येवेति, उक्तं च पूज्यैः-

*[४]छायाएँ नालियाए व परिकम्मं से जहत्थविन्नाणं।*
*रिक्खाइचारेहिं व तस्स विणासो विवज्जासो ॥१॥* [ *विशेषावश्यकभा० ९२७* ]

इत्यादि। **सेत्त**मित्यादि निगमनम्।

**[सू० ८७] से किं तं भावोवक्कमे ? भावोवक्कमे दुविहे पण्णत्ते। तं जहा— आगमतो य १, नोआगगमतो य २।**

**[सू० ८८] [[१]से किं तं ] आगमओ भावोवक्कमे ? आगमओ भावोवक्कमे जाणए उवउत्ते। [ सेतं आगमओ भावोवक्कमे ]।**

**[सू० ८९] [ से किं तं ] नोआगमतो भावोवक्कमे ? नोआगमतो भावोवक्कमे दुविहे पण्णत्ते। तंजहा - पसत्थे य १, अपसत्थे य २।**

**[सू० ९०] [ से किं तं ] अपसत्थे भावोवक्कमे ? अपसत्थे भावोवक्कमे डोडिणि-गणिया-ऽमच्चाईणं। [ सेतं अपसत्थे भावोवक्कमे। ]**

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[सू० ९१] [से किं तं] पसत्थे भावोवक्कमे ? पसत्थे भावोवक्कमे गुरुमादीणं। [सेतं पसत्थे भावोवक्कमे। सेतं नोआगमतो भावोवक्कमे। सेतं भावोवक्कमे ।]**

**[चू० ८७-९१]** भावतो वि **णोआगमे पसत्थे अप्पसत्थे य**। अप्पसत्थे *मरुइणि-गणिया-अमच्च*दिट्ठंता । पसत्थे **गुरुमादिभावोवक्कमो** । एतं सव्वं सवित्थरं जधा *आवस्सगादि*सु तधा भाणितव्वं।

**[हा० ८७-९१]** भावोपक्रमो द्विधा-आगमतो नोआगमतश्च । आगमतो ज्ञाता उपयुक्तः । नोआगमतस्तु प्रशस्तोऽप्रशस्तश्चेति । तत्राप्रशस्तो डोड्डिणि-गणिका-ऽमात्यादीनाम् । एत्थोदाहरणानि –

एगा मरुगिणी, सा चिंतेति – किह धूताओ सुहिताओ होज्ज त्ति ?। तो जेट्ठिता धूया सिक्खाविया, जहा [१]वरं मत्थए पण्हीए आहणिज्जासि। ताए आहतो। सो तुट्ठो पादं मद्दितुमारद्धो णहु दुक्खाविय त्ति। तीए मायाए कहियं। ताए भणियं – जं करेहि तं करेहि, ण एस किंचि तुज्झ अवरज्झति त्ति। बितिया सिक्खविया, तीए वि आहओ। सो झिंखित्ता उवसंतो। सा भणति – तुमं पि वीसत्था विहराहि, णवरं झिंखणओ एसो त्ति। तइया सिक्खविया। तीए वि आहओ। सो रुट्ठो, तेण दढं पिट्टिया धाडिया य – तं अकुलपुत्ती, जा एवं करेसि। तीए मायाए कहियं। पच्छा कह वि अणुगमिओ अम्ह एस कुलधम्मो त्ति। धूया य भणिया – जहा देवयस्स तहा वट्टिज्जासि त्ति, मा छड्डिहि त्ति।

एगम्मि णगरे चउसट्ठिकलाकुसला गणिया। तीए परभावोवक्कमणनिमित्तं रतिघरम्मि सव्वाओ पगतीओ नियनियवावारं करेमाणीओ आलिहावियाओ। तत्थ य जो जो वड्ढइमाइ [एइ] सो सो नियं सिप्पं पसंसति, णायभावो त सुअणुयत्तो भवति, अणुयत्तिओ य उवयारगहिओ खद्धं खद्धं दव्वजातं वितरेति। एस वि अपसत्थो भावोवक्कमो।

एगम्मि णगरे कोई राया अस्सवाहणियाए सहऽमच्चेण णिग्गओ। तत्थ य से अस्सेण वथेणं(वच्चंतेणं ?) खलिणे काइया वोसिरिया। खल्लरं बद्धं। तं च

Jain Education International For Private & Personal Use Only www.jainelibrary.org

पुढवीथिरत्तणओ तहट्ठियं चेव रण्णा पडिणियत्तमाणेण सुइरं निज्झाइयं, चिंतियं च णेण — इह तलागं सोहणं हवइ त्ति, ण उण वुत्तं। अमच्चेणं इंगितागारकुसलेण रायाणमणापुच्छिय महासरं खणावियं चेव, पालीए आरामो से पवरो कओ। तेणं कालेणं अस्सवाहणियाए गच्छंतेण दिट्ठं, भणियं च णेण — केणेयं खणावितं ?। अमच्चेण भणियं- सामिराय ! तुम्हेहिं चेव। कहं पिय ?। अवलोयणाणाए, कहिए परितुट्ठेण संवड्ढणा कता। एस वि अपसत्थो भावोवक्कमो त्ति।

उक्तोऽप्रशस्तः। इदानीं प्रशस्त उच्यते — तत्र श्रुतादिनिमित्तमाचार्यभावोपक्रमः प्रशस्त इति। आह — व्याख्याङ्गप्रतिपादनाधिकारे गुरुभावोपक्रमाभिधानमनर्थकमिति, [न,] तस्यापि व्याख्याङ्गत्वात्, उक्तं च —

*गुर्वायत्ता यस्माच्छास्त्रारम्भा भवन्ति सर्वेऽपि।*
*तस्माद् गुर्वाराधनपरेण हितकाङ्क्षिणा भाव्यम्॥१॥* [*प्रशम०* ६९]

तथा **भाष्यकारेणा**ऽप्यभ्यधायि —

[२]*गुरुचित्तायत्ताइं वक्खाणंगाइं जेण सव्वाइं।*
*जेण पुण सुप्पसण्णं होति तयं तं तहा कुज्जा॥१॥*
*आगारिंगितकुसलं जइ सेयं वायसं वदे पुज्जा।*
*तह वि य सिं ण विकूडे विरहम्मि य कारणं पुच्छे॥२॥*
*निवपुच्छिएण भणिओ गुरुणा गंगा कओमुही वहति ?।*
*संपाडितवं सीसो जह तह सव्वत्थ कायव्वं॥३॥*

[*विशेषावश्यकभा०गा०* ९३१, ३३-३४] इत्यादि।

आह — यद्येवं गुरुभावोपक्रम एवाभिधातव्यो न शेषाः निष्प्रयोजनत्वात्, न, गुरुचित्तप्रसादनार्थमेव तेषामुपयोगित्वात्, तथा च देश-कालावपेक्ष्य परिकर्म-नाशौ द्रव्याणामुदकौदनादीनामाहारादिकार्येषु कुर्वन् विनेयो गुरोर्हरति चेतः, अथवोपक्रमसाम्यात् प्रकृते निरुपयोगिनोऽप्यन्यत्रोपयोक्ष्यन्त इत्यलं प्रसङ्गेन। उक्त इतरः।

**[हे० ८७-९१]** अथ भावोपक्रमाभिधानार्थमाह- **से किं तमित्यादि**।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**भावोपक्रमो द्विविधः प्रज्ञप्तः, तद्यथा-आगमतश्च नोआगमतश्च,** तत्रोपक्रमशब्दार्थज्ञः तत्र चोपयुक्त आगमतो भावोपक्रमः । **से किं तं नोआगमओ** इत्यादि, अत्रोत्तरम्- **नोआगमओ भावोवक्कमे दुविहे** इत्यादि, इहाभिप्रायाख्यो जीवद्रव्यपर्यायो भावशब्देनाभिप्रेतः, उक्तं च- *भावाभिख्याः पञ्च स्वभाव-सत्ता-ऽऽत्म-योन्यभिप्रायाः* [ ] ततश्च **भावस्य** परकीयाभिप्रायस्योपक्रमणं यथावत् परिज्ञानं भावोपक्रमः । स च **द्विविधः-प्रशस्तोऽप्रशस्तश्चे**ति, तत्राप्रशस्ताभिधित्सया आह- **से किं त**मित्यादि । अत्र निर्वचनम्- **अप्पसत्थो डोडिणि-गणिआ-अमच्चाईणं** ति, इदमिह तात्पर्यम्- ब्राह्मण्या वेश्यया अमात्येन च यत् परकीयभावस्य यथावत् परिज्ञानलक्षणमुपक्रमणं कृतं सोऽप्रशस्तो भावोपक्रमः, संसारफलत्वात् । तत्र कथं ब्राह्मण्यादिभिः परभावोपक्रमणमकारीति ?, अत्रोच्यते -

एकस्या ब्राह्मण्यास्तिस्रः पुत्रिकाः । तासां च परिणयनानन्तरं तथा करोमि यथैताः सुखिता भवन्तीति विचिन्त्य माता ज्येष्ठदुहितरं प्रत्यवोचत्-यदुत त्वया वासभवनसमागमे स्वभर्ता कश्चिदपराधमुद्भाव्य मूर्ध्नि पादप्रहारेण हन्तव्यः, हतश्च यदनुतिष्ठति तन्ममाऽऽख्येयम्, कृतं च तया तथैव, सोऽप्यतिस्नेहतरलितमना 'अयि प्रियतमे ! पीडितस्ते सुकुमालश्चरणो भविष्यति' इत्यभिधानपूर्वकं तस्याश्चरणोपमर्दनं चकार, अमुं च व्यतिकरं सा मात्रे निवेदितवती, साऽप्युपक्रान्तजामातृभावा हृष्टा दुहितरं प्रत्यवादीत्- पुत्रिके ! यद् रोचते तत् तदीयगृहे कुरु त्वम्, न तवाऽवचनकरो भर्ता भविष्यतीति । द्वितीयाऽपि तथैव शिक्षिता, तयाऽपि च तथैव स्वभर्ता शिरसि प्रहतः, केवलमसौ 'नैतच्छिष्टानां युज्यते' इत्यादि किञ्चित् क्षणमेकं झषित्वा उपरतः, तस्मिंश्च तया मातुर्निवेदिते मात्रा प्रोक्तम् - वत्से ! त्वमपि यथेष्टं तद्गृहे विजृम्भस्व, केवलं त्वद्भर्ता क्षणमेकं झषित्वा स्थास्यति । एवं च तृतीययाऽपि प्रहतः, केवलममुना समुच्छलदतुच्छकोपेन 'नूनमकुलीना त्वम् ?, यैवं शिष्टजनानुचितं विचेष्टसे' इत्याद्यभिधाय गाढं कुट्टयित्वा गृहान्निष्काशिता । तया चाऽऽगत्य सर्वं मात्रे निवेदितम्, तयाऽपि विज्ञातजामातृभावया गत्वा तत्समीपं 'वत्स ! कुलस्थितिरस्माकमियं यदुत प्रथमसमागमे वध्वा वरस्येत्थं कर्तव्यम्' इत्यादि किञ्चिदभिधाय कथमप्यनुनयितोऽसौ, दुहिता च प्रोक्ता- वत्से ! दुराराधस्ते भर्ता भविष्यति, परमदेवतावदप्रमत्तया समाराधनीय इति ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तथैकस्मिन्नगरे चतुःषष्टिविज्ञानसहिता गणिका, तया च पराभिप्रायपरिज्ञानार्थं रतिभवनभित्तिषु स्वस्वव्यापारं कुर्वत्यः सर्वा अपि राजपुत्रादिजातयश्चित्रकर्मणि लेखिताः, तत्र च यः कश्चिद् राजपुत्रादिरागच्छति स तत्रैव कृताभ्यासतया स्वकीयस्वकीयव्यापारमेव बाढं प्रशंसति, ततोऽसौ विलासिनी राजपुत्रादीनामन्यतरत्वेन तं विनिश्चित्य यथौचित्येनोपचरति, आनुकूल्येनोपचरिताश्च भुजङ्गाः प्रचुरमर्थजातं तस्यै प्रयच्छन्तीति ।

तथैकस्मिन्नगरे कश्चिद्राजा अमात्येन सहाश्ववाहनिकायां निर्गतः, तत्र च पथि गच्छता राजतुरङ्गमेन क्वचित् खिलप्रदेशे प्रश्रवणमकारि, तच्च तत्प्रदेशपृथिव्याः स्थिरत्वेन बद्धच्छिल्लरकं चिरेणाप्यशुष्कं व्यावर्तमानो राजा तथैव व्यवस्थितमद्राक्षीत्, चिरावस्थायिजलं शोभनमत्र प्रदेशे तडागं भवतीति चिन्तयँश्चिरमवलोकितवाँश्च, तदिङ्गिताकारपरिज्ञानकुशलतया चामात्येन राज्ञाऽभणितेनापि विदिततदभिप्रायेण खानितं तत्र प्रदेशे महासरः, तत्पाल्यां च रोपिताः सर्वर्तुकपुष्पफलसमृद्धयो नानाजातीयतरुनिवहाः, अन्यदा च तेनैव प्रदेशेन गच्छता भूपेन दृष्टं पृष्टं चाहो ! मानससरोवद्रमणीयं केनेदं खानितं सरः ?, अमात्यो जगाद-देव ! भवद्भिरेव, राजा सविस्मयं प्राह-कदा कश्च मयैतत्कारणाय निरूपित इति, अतः सचिवो यथावृत्तं सर्वं कथितवान्, अहो ! परचित्तोपलक्षकत्वममात्यस्येति विचिन्त्य परितुष्टो राजा तस्य वृत्तिं वर्द्धयामासेति । तदेवमित्यादिकः संसारफलोऽपरोऽप्यप्रशस्तभावोपक्रमः ।

अथ प्रशस्तभावोपक्रममाह- **पसत्थो गुरुमाईणं** ति, तत्र श्रुतादिनिमित्तं गुर्वादीनां यद् भावोपक्रमणं स प्रशस्तभावोपक्रमः ।

आह-नन्वनुयोगद्वारविचारोऽत्र प्रक्रान्तः, अनुयोगश्च व्याख्यानम्, ततश्च यदेव तदुपकारि किञ्चित् तदेव वक्तव्यं भवति, गुरुभावोपक्रमस्त्वप्रस्तुतः, व्याख्यानानुपकारित्वात्, तदेतदयुक्तम्, गुरुभावोपक्रमस्यैव मुख्यव्याख्याङ्गत्वात्, उक्तं च-

*गुर्वायत्ता यस्माच्छास्त्रारम्भा भवन्ति सर्वेऽपि ।*
*तस्माद् गुर्वाराधनपरेण हितकाङ्क्षिणा भाव्यम् ॥१॥* [प्रशम० ६९], *अन्यच्च-*
*जुत्तं गुरुमयगहणं नाऊण तयं जहट्ठियं तत्तो ।*
*जह होइ सुप्पसन्नं तह जइयव्वं गुणत्थीहिं ॥१॥*

Jain Education International For Private & Personal Use Only www.jainelibrary.org

*[२]गुरुचित्तायत्ताइं वक्खाणंगाइं जेण सव्वाइं ।*
*तेण जह सुप्पसन्नं होइ तयं तं तहा कुज्जा ॥२॥*
*आगारिंगियकुसलं जइ सेयं वायसं वए पुज्जा ।*
*तह वि य सिं न विकूडे विरहम्मि य कारणं पुच्छे ॥३॥*
*निवपुच्छिएण भणिओ गुरुणा गंगा कओमुही वहइ ? ।*
*संपाइयवं सीसो जह तह सव्वत्थ कायव्वं ॥४॥*
[*विशेषावश्यकभाष्ये ९३५, ९३१, ९३३, ९३४*] इत्यादि ।

भवत्वेवं तर्हि भावोपक्रमस्य सार्थकत्वम्, शेषास्तु नाम-स्थापना-द्रव्याद्युपक्रमा अनर्थका एव, नैतदेवम्, यतो गुरोस्तथाविधप्रयोजनोत्पत्तौ तच्चित्तप्रसादनार्थमेवाशन-पान-वस्त्र-पात्रौषधादिद्रव्यं व्याख्यास्थानादिक्षेत्रं प्रव्रज्यालग्नादिकालमुपक्रा[३]मतो विनेयस्य द्रव्य-क्षेत्र-कालोपक्रमा अपि सार्थका एव, नाम-स्थापनोपक्रमौ तु प्रकृतानुपयोगित्वेऽप्युपक्रमसाम्यादत्रोक्तौ, अथवा सर्वेऽप्यमी प्रकृतानुपयोगिनो-ऽप्यन्यत्रोपयोक्ष्यन्ते उपक्रमसाम्याच्चात्रोक्ता इत्यदोषः ।

**[सू० ९२] अहवा उवक्कमे छव्विहे पण्णत्ते। तं[१]जहा — आणुपुव्वी १, नामं २, पमाणं ३, वत्तव्वया ४, अत्थाहिगारे ५, समोयारे ६ ।**

**[चू० ९२] अहवा** सुत्ताभिहितो **उवक्कमो छव्विधो** इमो **आणुपुव्विमादी** ।

**[हा० ९२]** अधुना शास्त्रीयप्रतिपादनायाह — **अहवेत्यादि**, यद्वा प्रशस्तो द्विविधः — गुरुभावोपक्रमः शास्त्रभावोपक्रमश्च । तत्र गुरुभावोपक्रमः प्रतिपादित एव । शास्त्रभावोपक्रमं तु प्रतिपादयन्नाह — **अहवेत्यादि, अथवे**ति विकल्पार्थः, **उपक्रमः** भावोपक्रमः **षड्विधः प्रज्ञप्तः, तद्यथा — आनुपुव्वी**त्यादि उपन्याससूत्रं निगदसिद्धमेव ।

**[हे० ९२]** तदेवं लौकिकोपक्रमप्रकारेणोक्त उपक्रमः, साम्प्रतं तु तमेव शास्त्रीयोपक्रमलक्षणेन प्रकारान्तरेणाभिधित्सुराह — **अहवा उवक्कमे** इत्यादि । अथवा

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अनन्तरं यः प्रशस्तभावोपक्रमः उक्तः स द्विविधो द्रष्टव्यः-गुरुभावोपक्रमः शास्त्रभावोपक्रमश्च, शास्त्रलक्षणो भावः शास्त्रभावस्तस्योपक्रमः शास्त्रभावोपक्रमः, तत्रैकेन गुरुभावोपक्रमलक्षणेन प्रकारेणोक्तः, अथ द्वितीयेन शास्त्रभावोपक्रमलक्षणेन प्रकारान्तरेण तमभिधित्सुराह- **अहवा उवक्कमे** इत्यादि, **अथवे**ति पक्षान्तरसूचकः उपक्रमः, प्रथमपातनापक्षे शास्त्रीयोपक्रमो द्वितीयपातनापक्षे तु शास्त्रभावोपक्रमः, **षड्विधः** षट्प्रकारः **प्रज्ञप्तः, तद्यथा-आनुपूर्वी १, नाम २, प्रमाणम् ३, वक्तव्यता ४, अर्थाधिकारः ५, समवतारः ६** । एतेषां च शब्दव्युत्पत्त्यादिस्वरूपं यथावसरं पुरस्तादेव वक्ष्यामः ।

**[सू० ९३] से किं तं आणुपुव्वी ? आणुपुव्वी दसविहा पण्णत्ता। तं जहा — नामाणुपुव्वी १, ठवणाणुपुव्वी २, दव्वाणुपुव्वी ३, खेत्ताणुपुव्वी ४, कालाणुपुव्वी ५, उक्कित्तणाणुपुव्वी ६, गणणाणुपुव्वी ७, संठाणाणुपुव्वी ८, [१]सामायारियाणुपुव्वी ९, भावाणुपुव्वी १० ।**

**[सू० ९४] [२]→ से किं तं णामाणुपुव्वी ? नाम-ठवणाओ तहेव ।**

**[सू० ९५] दव्वाणुपुव्वी जाव ← से किं तं जाणगसरीर-भवियसरीरवइरित्ता दव्वाणुपुव्वी ? जाणगसरीर-भवियसरीरवइरित्ता दव्वाणुपुव्वी दुविहा पण्णत्ता। तंजहा — [३]उवणिहिया य १, अणोवणिहिया य २ ।**

**[चू० ९३-९५] से किं तं आणुपुव्वी ? आणुपुव्वी दसविधे**त्यादि। अकारस्स दीहत्तं अनुपूर्वशब्दप्रकृतेर्व्युत्पादितत्वाद् अनुगामिकादिषु च प्रत्ययान्तरश्रवणात् प्राकृते तु *एते छच्च समाणा* [ ] इति ह्रस्वत्वं [१]क्वचिदिष्टे विषये क्रियत इति, जधा अणुगामी आणुगामी अभिणिबोधो आभिणिबोधियं, एवं अणुपुव्वी आणुपुव्वी, सा य अणुपरिवाडी, अणुजेट्ठपरिवाडि त्ति वुत्तं भवति। अहवा पुव्वुद्दिट्ठस्स जं पच्छा उद्दिट्ठं तं अणु भण्णति, तं अणुपूर्वत्वं लभते जत्थ तं भणंति आणुपुव्वी, [२]तृतीयस्य द्वितीयः पूर्व

Jain Education International For Private & Personal Use Only www.jainelibrary.org

इत्यर्थः। अणु पच्छाभावे, पुव्वं ति आदिभावे, अत्थतो पडुप्पन्नं मज्झभावो य, एतं जत्थऽत्थि खंधे सा होति आणुपुव्वी। अहवा पढमातो परं जत्थ अणु पुव्वं च अत्थि स भवति आणुपुव्वी। एसा **आणुपुव्वी दसविधा णामा**दी।

**से किं तं णामे**त्यादि कंठं जाव **ओवणिधिके**त्यादि। **ओवणिहिय** त्ति दुपदं सुत्तं। इदाणिं पदत्थो इमं अज्झयणं गुरुवतिजोगो आणुपुव्वीए ओवयति त्ति वा पक्खिवति त्ति वा छुभति त्ति वा। अहवा इमं अज्झयणं आणुपुव्वीए आतभावेणं ओवतति त्ति वा उत्तरति त्ति वा अवतरति त्ति वा एगट्ठं। अहवा आणुपुव्वी इमस्स अज्झयणस्स उवयोगो त्ति वा उवयुज्जति त्ति वा उवकरेति त्ति वा एगट्ठं, णिधि त्ति वा णिधाणं ति वा ठवणिज्जं ति वा एगट्ठं, अहवा णिधितं ति वा ठवितं ति वा एगट्ठं, णिहेति त्ति वा ठवेति त्ति वा एगट्ठं। एवं ब[३]हुधा पदत्थं भ[४]णितुं इमस्स अज्झयणस्स उवणिधित्तेण द्वि[५]ता जा आणुपुव्वी सा ओवणिहिया भन्नति, फुडतरं भन्नति, जा आणुपुव्वी इमं अज्झयणं पुव्वाणुपुव्वि-पच्छाणुपुव्वि-अणाणुपुव्वीहि य अणेगधा ओवतति उवक्कमेति, पक्खिवइ त्ति वुत्तं भवति। जधासंभवं पक्खित्ते य इमं अज्झयणं णिधीकतं भवति, एवं ओवणिधिया भवति, सिस्सभावे वा णिहितं इत्यर्थः। इमो समुदायत्थो। उवक्कमाधिकारे जा उवयोज्जा सा ओवणिधिया, अनया अधिकार इत्यर्थः। जा पुण अणेगधा अत्थपरूवणाए परूविता वि इमस्स अज्झयणस्स णोवयोज्जा ण उवणिधिभावदंसिगा आणुपुव्वी सा अणोवणिहिया, इहाध्ययने अनया अनधिकार इत्यर्थः।

**[हा० ९३-९५] से किं त**मित्यादि, इह पूर्वं प्रथममादिरिति पर्यायाः, पूर्वस्य पश्चादनुपूर्वम्, तस्य भाव इति *गुणवचनब्राह्मणादिभ्यः कर्मणि च [पा० ५।१।१२४]* इति ष्यञ्, स चायं भावप्रत्ययो नपुंसकलिङ्गे षित्करणसामर्थ्याच्च स्त्रीलिङ्गेऽपि, तथाहि-तस्मादनुपूर्वभावः आनुपूर्वी अनुक्रमोऽनुपरिपाटीति पर्यायाः, त्र्यादिवस्तुसंहतिरिति भावः।

इयमानुपूर्वी **दशविधा** दशप्रकारा **प्रज्ञप्ता, तद्यथा — नामानुपूर्वी**त्यादि वस्तुतो भावितार्थत्वात् सूत्रसिद्धमेव तावद् यावत् **ओवणिहिया य अणोवणिहिया य**। तत्र निधानं निधिर्न्यासो विरचना निक्षेपः प्रस्तावः स्थापनेति पर्यायाः, तथा च लोके 'निधेहीदम्,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

निहितमिदम्' इत्यत्र निक्षेपार्थो गम्यते, **उप** सामीप्येन निधान**मुपनिधिः**, विवक्षितस्यार्थस्य विरचनायाः प्रत्यासन्नता, उपनिधिः प्रयोजनमस्या इति प्रयोजनार्थे ठक्[1] औपनिधिकी। एतदुक्तं भवति- अधिकृताध्ययनपूर्वानुपूर्व्यादिरचनाश्रयप्रस्तारोपयोगिनी औपनिधिकीत्युच्यते। न तथा अनौपनिधिकी।

**[हे० ९३-९५]** तत्राऽऽनुपूर्वीस्वरूपनिरूपणार्थमाह- **से किं त**मित्यादि। अथ किं तदानुपूर्वीवस्त्विति प्रश्नार्थः। अत्र निर्वचनम्- **आणुपुव्वी दसविहे**त्यादि, इह हि पूर्वं प्रथममादिरिति पर्यायाः, पूर्वस्य अनु पश्चादनुपूर्वम्, तस्य भाव[1] इति यण्प्रत्यये स्त्रियामीकारे चानुपूर्वी, अनुक्रमोऽनुपरिपाटीति पर्यायाः, त्र्यादिवस्तुसंहतिरित्यर्थः। इयमानुपूर्वी **दशविधा** दशप्रकारा **प्रज्ञप्ता, तद्यथा- नामानुपूर्वी, स्थापनानुपूर्वी, द्रव्यानुपूर्वी, क्षेत्रानुपूर्वी, कालानुपूर्वी, उत्कीर्तनानुपूर्वी, गणनानुपूर्वी, संस्थानानुपूर्वी, सामाचार्यानुपूर्वी, भावानुपूर्वी**ति।

अत्र नाम-स्थापनानुपूर्वीसूत्रे नाम-स्थापनावश्यकसूत्रव्याख्यानुसारेण व्याख्येये, द्रव्यानुपूर्वीसूत्रमपि द्रव्यावश्यकवदेव भावनीयं यावत् **जाणगसरीरभवियसरीरवइरित्ता दव्वाणुपुव्वी दुविहे**त्यादि। तत्र निधानं निधिर्निक्षेपो न्यासो विरचना[2] प्रस्तारः स्थापनेति पर्यायाः, तथा च लोके निधेहीदं निहितमिदमित्यत्र निपूर्वस्य धाञो निक्षेपार्थः प्रतीयत एव, उप सामीप्येन निधिरुपनिधिः, एकस्मिन् विवक्षितेऽर्थे पूर्वं व्यवस्थापिते तत्समीप एवापरापरस्य वक्ष्यमाणपूर्वानुपूर्व्यादिक्रमेण यन्निक्षेपणं स उपनिधिरित्यर्थः, उपनिधिः प्रयोजनं यस्या आनुपूर्व्याः सा **औपनिधिकी**ति प्रयोजनार्थे इकण्[3]प्रत्ययः, सामायिकाध्ययनादिवस्तूनां वक्ष्यमाणपूर्वानुपूर्व्यादिप्रस्तारप्रयोजना आनुपूर्वी औपनिधिकीत्युच्यत इति तात्पर्यम्। अनुपनिधिः वक्ष्यमाणपूर्वानुपूर्व्यादिक्रमेणाविरचनं प्रयोजनमस्या इत्य**नौपनिधिकी**, यस्यां वक्ष्यमाणपूर्वानुपूर्व्यादिक्रमेण विरचना न क्रियते सा त्र्यादिपरमाणुनिष्पन्नस्कन्धविषया आनुपूर्वी अनौपनिधिकीत्युच्यते इति भावः। आह- नन्वानुपूर्वी परिपाटिरुच्यते, भवतां च त्र्यणुकादिकोऽनन्ताणुकावसान एकैकः स्कन्धोऽनौपनिधिक्यानुपूर्वीत्वेनाभिप्रेतः, न च स्कन्धगतत्र्यादिपरमाणूनां नियता काचित्

Jain Education International For Private & Personal Use Only www.jainelibrary.org

परिपाटिरस्ति विशिष्टैकपरिणामपरिणतत्वात् तेषाम्, तत् कथमिहानुपूर्वीत्वम् ? सत्यम्, किन्तु त्र्यादिपरमाणूनामादि-मध्या-ऽवसानभावेन नियतपरिपाट्या व्यवस्थापनयोग्यता-ऽस्तीति योग्यतामाश्रित्यात्राप्यानुपूर्वीत्वं न विरुध्यते ।

**[सू० ९६] तत्थ णं जा सा उ[1]वणिहिया[2] सा ठप्पा ।**

**[सू० ९७] तत्थ णं जा सा अणोवणिहिया[3] सा दुविहा पन्नत्ता । तंजहा— णेगम-ववहाराणं १, संगहस्स य २ ।**

**[चू० ९६-९७] ओवणिहिया ठप्प** त्ति चिट्ठतु ताव ओवणिधिया, अणोवणिधियं ताव वक्खाणेति, तस्स पिट्ठतो ओवणिधिया भण्णिहिति । किं पुण उक्कमकरणं ? उच्यते— अणोवणिधिया महत्था । तत्थ जो सामण्णत्थो सो परूवितो चेव लब्भति त्ति कातुं अतो उक्कमो कतो ।

सा य अणोवणिहिया दव्वट्ठियणयमतेणं पज्जवट्ठियणयमतेण त दुविधा । ते य णया सत्त णेगमादी एवंभूतपज्जंता । ते दुधा कता- दव्वट्ठितो पज्जवट्ठितो य । आदिमा तिण्णि दव्वट्ठितो, सेसा पज्जवट्ठितो । पुणो दव्वट्ठितो दुविधो — अविसुद्धो विसुद्धो य । अविसुद्धो णेगम-ववहारा, विसुद्धतरो संगहो । कहं ? उच्यते — जम्हा णेगम-ववहारा दव्वं इच्छंति किण्हादिअणेगविधगुणाहिट्ठियं तिकालभवितं अणेगभेदट्ठितं णिच्चमणिच्चं च तम्हा ते अविसुद्धो दव्वट्ठितो । एतेहिंतो विसुद्धतरो दव्वट्ठितो संगहो । कहं ? उच्यते — जम्हा संगहो विसेसभेदं परमाणुमादियं एगं चेव दव्वमिच्छति किण्हादिअणेगगुणपरमाणुत्तसामण्ण-ऽणतो, एवमादिसंगहो विसुद्धतरो ।

**[हा० ९६-९७] तत्थ ण**मित्यादि, तत्र याऽसावौपनिधिकी सा **स्थाप्या** सांन्यासिकी, तिष्ठतु तावत्, अल्पतरवक्तव्यत्वात् तस्याः, किन्तु यत्रैव बहु वक्तव्यमस्ति तत्र यः सामान्यार्थः सोऽन्यत्रापि प्ररूपित एव लभ्यत इति गुणाधिक्यसम्भवात् सैव प्रथममुच्यत इति । आह च सूत्रकारः— **तत्थ ण**मित्यादि, **तत्र याऽसावनौपनिधिकी**

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**सा** नयवक्तव्यताश्रयणाद् द्रव्यास्तिकनयमतेन **द्विविधा प्रज्ञप्ता, तद्यथा— नैगम-व्यवहारयोः सङ्ग्रहस्य च,** अयमत्र भावार्थः- इहौघतः सप्त नया भवन्ति नैगमादयः। उक्तं च– [१]*नैगम-सङ्ग्रह-व्यवहार-ऋजुसूत्र-शब्द-समभिरूढैवम्भूता नयाः* [*तत्त्वार्थ०* १/३३]। एते च नयद्वयेऽवस्थाप्यन्ते– द्रव्यास्तिकः पर्यायास्तिकश्च, तत्राद्यास्त्रयो द्रव्यास्तिकः, शेषाः पर्यायास्तिक इति। पुनः द्रव्यास्तिकोऽप्योघतो द्विभेदः – अविशुद्धो विशुद्धश्च। अविशुद्धो नैगम-व्यवहारौ, विशुद्धः सङ्ग्रह इति। कथम्? येन नैगम-व्यवहारौ कृष्णाद्यनेकगुणाधिष्ठितं त्रिकालविषयम् अनेकभेदस्थितं नित्यानित्यं द्रव्यमित्येवंवादिनौ, सङ्ग्रहस्तु परमाण्वादिसामान्यवादीत्यलं विस्तरेण।

[हे० ९६-९७] **तत्थ ण**मित्यादि, **तत्र याऽसावौपनिधिकी** द्रव्यानुपूर्वी **सा स्थाप्या** सांन्यासिकी, तिष्ठतु तावदल्पतरवक्तव्यत्वेन तस्या उपरि वक्ष्यमाणत्वादिति भावः। अनौपनिधिकी तु पश्चान्निर्दिष्टाऽपि बहुतरवक्तव्यत्वेन प्रथमं व्याख्यायते, बहुतरवक्तव्ये हि वस्तुनि प्रथममुच्यमानेऽल्पतरवक्तव्यवस्तुगतः कश्चिदर्थस्तन्मध्येऽप्युक्त एव लभ्यत इति गुणाधिक्यं पर्यालोच्य सूत्रकारोऽनौपनिधिकीस्वरूपं विवरीषुराह - **तत्थ ण**मित्यादि, तत्र **याऽसावनौपनिधिकी** द्रव्यानुपूर्वी **सा** नयवक्तव्यताश्रयणात् द्रव्यास्तिकनयमतेन **द्विविधा प्रज्ञप्ता, तद्यथा - नैगम-व्यवहारयोः सङ्ग्रहस्य च,** नैगम-व्यवहारसंमता सङ्ग्रहसंमता चेत्यर्थः, अयमत्र भावार्थः - इहौघतः सप्त नया भवन्ति नैगमादयः, उक्तं च- *नैगम-सङ्ग्रह-व्यवहार-ऋजुसूत्र-शब्द-समभिरूढैवंभूता नयाः* [ *तत्त्वार्थ०* १/३३ ]। एते च द्रव्यास्तिक-पर्यायास्तिकलक्षणे नयद्वयेऽन्तर्भाव्यन्ते, द्रव्यमेव परमार्थतोऽस्ति न पर्याया इत्यभ्युपगमपरो द्रव्यास्तिकः, पर्याया एव वस्तुतः सन्ति न द्रव्यमित्यभ्युपगमपरः पर्यायास्तिकः, तत्राऽऽद्यास्त्रयो द्रव्यास्तिकः, शेषास्तु पर्यायास्तिकः, पुनर्द्रव्यास्तिकोऽपि सामान्यतो द्विविधः- अविशुद्धो विशुद्धश्च, तत्र नैगम-व्यवहाररूपोऽविशुद्धः, सङ्ग्रहरूपस्तु विशुद्धः, कथम्? यतो नैगम-व्यवहारावनन्तपरमाण्वनन्तद्व्यणुकाद्यनेकव्यक्त्यात्मकं कृष्णाद्यनेकगुणाधारं त्रिकालविषयं चाऽविशुद्धं द्रव्यमिच्छतः, सङ्ग्रहश्च परमाण्वादिकं परमाणुत्वादिसाम्यादेकं तिरोभूतगुणकलापमविद्यमानपूर्वापरविभागं नित्यं सामान्यमेव

Jain Education International For Private & Personal Use Only www.jainelibrary.org

द्रव्यमिच्छति, एतच्च किलानेकताद्यभ्युपगमकलङ्केनाकलङ्कितत्वाच्छुद्धम्, ततः शुद्धद्रव्याभ्युपगमपरत्वादयमेव शुद्धः। अत्र च द्रव्यानुपूर्व्येव विचारयितुं प्रक्रान्ता, अतः शुद्धाशुद्धस्वरूपद्रव्यास्तिकमतेनैवासौ दर्शयिष्यते, न पर्यायास्तिकमतेन, पर्यायविचारस्याऽप्रक्रान्तत्वादित्यलं विस्तरेण।

**[सू० ९८] [१]से किं तं णेगम-ववहाराणं अणोवणिहिया दव्वाणुपुव्वी? णेगम-ववहाराणं अणोवणिहिया दव्वाणुपुव्वी पंचविहा पण्णत्ता। तंजहा — अट्ठपयपरूवणया १, भंगसमुक्कित्तणया २, भंगोवदंसणया ३, समोयारे ४, अणुगमे ५।**

**[चू० ९८]** एत्थ अविसुद्धदव्वट्ठियणेगम-ववहारमतेण **अणोवणिधिया पंचविधा — अत्थपदपरूवणे**त्यादि। अर्थ्यत इति अर्थः, अर्थयुक्तं पदं **अर्थपदम्**, तस्स **परूवणा** कथनमित्यर्थः। तेसिं चेव अत्थपदाण विकप्पकरणं भंगो, तेसिं जहासंभवं उच्चारणा उक्कित्तणा **भंगसमुक्कित्तणा**। जो भंगो जेण अत्थपदेण जेहिं वा अत्थपदेहिं भवति तं तहा दंसेइ त्ति **भंगोवदंसणा** भण्णति। अणुपुव्विमादियाणं दव्वाणं सट्ठाणपरट्ठाणावतारगवेसणमग्गो जो सो **समोतारो**। अणुपुव्विमादियाण चेव दव्वाणं संतपदादिएहिं अणेगधा जं अत्थाणुसरणं तं **अणुगमो** त्ति भण्णति।

**[हा० ९८] से किं त**मित्यादि, अत्राप्यल्पवक्तव्यत्वात् सङ्ग्रहाभिधानं पश्चादिति। **पञ्चविधा प्रज्ञप्ता, तद्यथा — अर्थपदप्ररूपणते**त्यादि, तत्र अर्यत इत्यर्थः, तद्युक्तं तद्विषयं तदर्थं वा पदम् अर्थपदम्, तस्य प्ररूपणा कथनम्, तद्भावोऽर्थपदप्ररूपणता, संज्ञासंज्ञिसम्बन्धप्ररूपणतेत्यर्थः। तथा **भङ्गसमुत्कीर्त्तनता,** इहार्थपदानामेव समुदितविकल्पकरणं भङ्गः, भङ्गस्य भङ्गानां वा समुत्कीर्त्तनम् उच्चारणं भङ्गसमुत्कीर्तनम्, तद्भाव इति समासः। तथा **भङ्गोपदर्शनता,** इह यो भ[१]ङ्गः येनार्थपदेन यैर्वाऽर्थपदैरुपजायते तस्य तथोपदर्शनम्, तद्भाव इति विग्रहः, सूत्रतोऽर्थतश्च प्ररूपणेत्यर्थः। तथा **समवतारः,** इहाऽऽनुपूर्वीद्रव्याणां स्वस्थान-परस्थानसमवतारान्वेषणाप्रकारः समवतार इति। तथा

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**अनुगमः** आनुपूर्व्यादीनामेव सत्पदप्ररूपणादिभिरनुयोगद्वारैरनेकधाऽनुगमनमनुगम इति।

[हे० ९८] तत्र नैगम-व्यवहारसंमतामिमां दर्शयितुमाह- **से किं त**मित्यादि। अत्र निर्वचनम् - **नेगम-ववहाराणं अणोवणिहिआ दव्वाणुपुव्वी पंचविहे**त्यादि । अर्थपदप्ररूपणतादिभिः पञ्चभिः प्रकारैर्विचार्यमाणत्वात् **पञ्चविधा** पञ्चप्रकारा **प्रज्ञप्ता, तद्यथा - अर्थपदप्ररूपणता, भङ्गसमुत्कीर्तनता, भङ्गोपदर्शनता, समवतारः, अनुगमः** । एभिः पञ्चभिः प्रकारैर्नैगम-व्यवहारनयमतेन अनौपनिधिक्याः द्रव्यानुपूर्व्याः स्वरूपं निरूप्यत इतीह तात्पर्यम्। तत्र अर्यत इत्यर्थः त्र्यणुकस्कन्धादिस्तद्युक्तं तद्विषयं वा पदमानुपूर्व्यादिकम्, तस्य प्ररूपणं कथनम्, तद्भावोऽ**र्थपदप्ररूपणता** 'इयमानुपूर्व्यादिका संज्ञा, अयं च तदभिधेयस्त्र्यणुकादिरर्थः संज्ञी' इत्येवं संज्ञासंज्ञिसम्बन्धकथनमात्रं प्रथमं कर्तव्यमिति भावार्थः। तेषामेवानुपूर्व्यादिपदानां समुदितानां वक्ष्यमाणन्यायेन सम्भविनो विकल्पा भङ्गा उच्यन्ते, भज्यन्ते विकल्प्यन्ते इति कृत्वा, तेषां समुत्कीर्तनं समुच्चारणं भङ्गसमुत्कीर्तनम्, तद्भावो **भङ्गसमुत्कीर्तनता,** आनुपूर्व्यादिपदनिष्पन्नानां प्रत्येकभङ्गानां द्व्यादिसंयोगभङ्गानां च समुच्चारणमित्यर्थः । तेषामेव सूत्रमात्रतया अनन्तर-समुत्कीर्तितभङ्गानां प्रत्येकं स्वाभिधेयेन त्र्यणुकाद्यर्थेन सहोपदर्शनं भङ्गोपदर्शनम्, तद्भावो **भङ्गोपदर्शनता**। भङ्गसमुत्कीर्तने भङ्गकविषयं सूत्रमेव केवलमुच्चारणीयम्, भङ्गोपदर्शने तु तदेव स्वविषयभूतेनार्थेन सहोच्चारयितव्यमिति विशेषः। तथा तेषामेवानुपूर्व्यादिद्रव्याणां स्वस्थान-परस्थानान्तर्भावचिन्तनप्रकारः **समवतारः** । तथा तेषामेवानुपूर्व्यादिद्रव्याणां सत्पदप्ररूपणतादिभिरनुयोगद्वारैरनुगमनं विचारण**मनुगमः** ।

**[सू० ९९] से किं तं णेगम-ववहाराणं अट्ठपयरूवणया ? णेगम-ववहाराणं अट्ठपयरूवणया तिपएसिए आणुपुव्वी, चउपएसिए आणुपुव्वी जाव दसपएसिए आणुपुव्वी, संखेज्जपदेसिए आणुपुव्वी, असंखेज्जपदेसिए आणुपुव्वी, अणंतपएसिए आणुपुव्वी। परमाणुपोग्गले अणाणुपुव्वी। दुपएसिए अवत्तव्वए। तिपएसिया आणुपुव्वीओ जाव**

**अणंतपएसिया[२] आणुपुव्वीओ । परमाणुपोग्गला अणाणुपुव्वीओ । दुपएसिया अवत्तव्वगाइं । से तं णेगम-ववहाराणं अट्ठपयपरूवणया ।**

**[चू० ९९]** इमा अत्थपदपरूवणा – **तिपदेसिते आणुपुव्वी** इत्यादि । तिपदेसो खंधो आणुपुव्वी, जतो तस्स अणु त्ति पच्छाभागो पुव्व त्ति आदिभागो अत्थतो मज्झभागो य, *अहवा **तिसद्दा**तो मज्झभागो दट्ठव्वो । एवं **चउप्पदेसा**दयो वि उवयुज्ज वत्तव्वा । परमाणुत्तणतो **परमाणू**, तस्स किण्हादिभावेहिं पूरण-गलणत्तणतो य **पुग्गलत्तं**, सो **अणाणुपुव्वी** भन्नति, जतो तस्स ण अणुभागे पुव्वभागे वा अण्णो परमाणू तेण सो **अणाणुपुव्वी** । दो पदेसा जस्स खंधस्स सो **दुपदेसो**, अतो अत्थपदपरूवणाए **अवत्तव्वो** भाणितव्वो, जतो तस्स पुव्वभागो पच्छभागो य अत्थि, ण मज्झभागो, सो एवंविधरूवो णो आणुपुव्वीअणाणुपुव्विलक्खणेसु अवतरति त्ति द्विप्रदेशिकः अवक्तव्यतां प्राप्तः । एतदेव अणुपुव्विमादी त्रितयं बहुवचनेन वक्तव्यम्, अनन्तद्रव्यसम्भवात् । चोदक आह – किं एते अत्थपदा उक्कमेणं कता, जुत्तमेवं अणाणुपुव्वी अव्वत्तव्वतं आणुपुव्वी य कातुं ? आचार्याऽऽह-अणाणुपुव्वी वि वक्खाणंगं ति ण दोसो, किञ्चान्यत्, आनुपुर्वीद्रव्य-बहुत्वज्ञापनार्थं स्थानबहुत्वज्ञापनार्थं च पूर्वनिर्देशः, ततोऽल्पतरद्रव्यज्ञापनार्थं अणाणुपुव्वी, ततोऽल्पतरावक्तव्यज्ञापनार्थमुत्क्रमः कृत इति न दोषः । गता अत्थपदपरूवणा ।

**[हा० ९९] से किं त**मित्यादि, **तिपदेसिए आणुपुव्वी** त्रिप्रदेशिकः स्कन्धः आनुपूर्वी । अयमत्र भावार्थः- इहाऽऽदि-मध्या-ऽन्तांशपरिग्रहेण सावयवं वस्तु निरूप्यते । तत्र कः आदिः किं मध्यं कोऽन्त इति लोकप्रसिद्धमेव, यस्मात् परमस्ति न पूर्वं स आदिः, यस्मात् पूर्वमस्ति न परमन्तः सः, तयोरन्तरं मध्यमुपचरति, तदेतत् त्रयमपि यत्र वस्तुरूपेण मुख्यमस्ति तत्र गणनाक्रमः सम्पूर्ण इति कृत्वा पूर्वस्य[१] पश्चादनुपूर्वं तस्य भाव आनुपूर्वी । एतदुक्तं भवति- सम्बन्धिशब्दा ह्येते परस्परसापेक्षाः प्रवर्त्तन्त इति यत्रैषां मुख्यो व्यपदेश्यव्यपदेशकभावोऽस्ति अयमस्यादिरयमस्यान्त इति तत्राऽऽनुपूर्वीव्यपदेश इति त्रिप्रदेशादिषु सम्भवति नान्यत्रेति, यः पुनरसंसक्तं रूपं केनचिद् वस्त्वन्तरेण शुद्ध एव

---

* अहवा इतिसद्दातो ह० ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

परमाणुस्तस्य द्रव्यतः अनवयवत्वाद् आदि-मध्या-ऽवसानत्वाभावाद् अनानुपूर्वीत्वम्। यस्तु द्विप्रदेशिकः स्कन्धस्तस्याप्याद्यन्तव्यपदेशः परस्परापेक्षयाऽस्तीति कृत्वा अनानुपूर्वीत्वमशक्यं प्रतिपत्तुम्, अथाऽऽनुपूर्वीत्वं प्रसक्तं तदपि चावधिभूतवस्तुरूपस्या-सम्भवाद् अपरिपूर्णत्वाद् न शक्यते वक्तुमिति उभाभ्यामवक्तव्यत्वाद् अवक्तव्यकमुच्यते, यस्मान्मध्ये सति मुख्य आदिर्लभ्यते मुख्यश्चान्तः परस्परासङ्करेण, तदत्र मध्यमेव नास्तीति कृत्वा कस्याऽऽदिः कस्य वाऽन्त इति कृत्वा व्यपदेशाभावात् स्फुटमवक्तव्यकम्। **तिपदेसिया आणुपुव्वीओ** इत्यादि, बहुवचननिर्देशः किमर्थोऽयम् ? इति चेत्, आनुपूर्व्यादीनां प्रतिपदमनन्तव्यक्तिख्यापनार्थः, नैगम-व्यवहारयोश्चेत्थम्भूताभ्युपगम-प्रदर्शनार्थ इति। अत्राह — एषां पदानां द्रव्यवृद्ध्यनुक्रमादेवमुपन्यासो युज्यते — अनानुपूर्वी अवक्तव्यकम् आनुपूर्वी च, पश्चानुपूर्व्या च व्यत्ययेन, तत् किमर्थमुभयमुल्लङ्घ्यान्यथा कृत इति, अत्रोच्यते — अनानुपूर्व्यपि व्याख्यानाङ्गमिति ख्यापनार्थम्। किञ्चान्यत्, आनुपूर्वीद्रव्यबहुत्वज्ञापनार्थं स्थानबहुत्वज्ञापनार्थं चादावानुपूर्व्या उपन्यासः, ततोऽल्पतरद्रव्यत्वादवक्तव्यकस्येत्यलं विस्तरेण। **सेत्त** मित्यादि निगमनम्।

**[हे० ९९]** तत्राऽऽद्यभेदं विवरीषुराह- **से किं तं नेगम-ववहाराण**मित्यादि। अथ केयं नैगम-व्यवहारयोः सम्मता **अर्थपदप्ररूपणते**ति। अत्रोत्तरमाह - **नेगम-ववहाराण-**मित्यादि। तत्र त्रयः प्रदेशाः परमाणुत्रयलक्षणा यत्र स्कन्धे स आनुपूर्वीत्युच्यते, एवं यावदनन्ता अणवो यत्र सोऽनन्ताणुकः सोऽप्यानुपूर्वीत्युच्यते। **परमाणुपोग्गले** त्ति एकः परमाणुः परमाण्वन्तरासंसक्तो**ऽनानुपूर्वी**त्यभिधीयते, द्वौ प्रदेशौ यत्र स **द्विप्रदेशिकः** स्कन्धो**ऽवक्तव्यक**मित्याख्यायते, बहवस्त्रिप्रदेशिकादयः स्कन्धा **आनुपूर्व्यः**, बहवश्चैकाकिपरमाणवो**ऽनानुपूर्व्यः**, बहूनि च द्व्यणुकस्कन्धद्रव्या**ण्यवक्तव्यकानि**। आनुपूर्व्यां प्रक्रान्तायामनानुपूर्व्यवक्तव्यकयोः प्ररूपणमसङ्गतमिति चेत्, न, तत्प्रतिपक्षत्वात्तयोरपि प्ररूपणीयत्वात्, प्रतिपक्षपरिज्ञाने च प्रस्तुतवस्तुनः सुखावसेय-त्वादिति भावार्थः। इहाऽऽनुपूर्वी अनुपरिपाटिरिति पूर्वमुक्तम्, सा च यत्रैवादि-मध्या-ऽन्तलक्षणः सम्पूर्णो गणनानुक्रमोऽस्ति तत्रैवोपपद्यते, नान्यत्र, एतच्च त्रिप्रदेशिकादि-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

स्कन्धेष्वेव, तथाहि-यस्मात् परमस्ति न पूर्वं स आदिः, यस्मात् पूर्वमस्ति न परं सोऽन्तः, तयोश्चान्तरं मध्यमुच्यते, अयं संपूर्णो गणनानुक्रमस्त्रिप्रदेशादिस्कन्ध एव, न परमाणौ, तस्यैकद्रव्यत्वेनाऽऽदि-मध्या-ऽन्तव्यवहाराभावात्, अत एवायमनानुपूर्वीत्वेनोक्तः, नापि द्व्यणुकस्कन्धे, तत्रापि मध्याभावेन सम्पूर्णगणनानुक्रमाभावात्।

अत्राऽऽह - ननु पूर्वस्यानु पश्चादनुपूर्वं तस्य भाव आनुपूर्वीति पूर्वं व्याख्यातम्, एतच्च द्व्यणुकस्कन्धेऽपि घटत एव, परमाणुद्वयस्यापि परस्परापेक्षया पूर्व-पश्चाद्भावस्य विद्यमानत्वात्, ततः सम्पूर्णगणनानुक्रमाभावेऽपि कस्मादयमप्यानुपूर्वी न भवति? नैतदेवम्, यतो यथा **मेर्वादिके** क्वचित् पदार्थे मध्येऽवधौ व्यवस्थापिते लोके पूर्वादिविभागः प्रसिद्धस्तथा यद्यत्रापि स्यात्तदा स्यादप्येवम्, न चैवमत्रास्ति, मध्येऽवधिभूतस्य कस्यचिदभावतोऽसाङ्कर्येण पूर्व-पश्चाद्भावस्यासिद्धत्वात्। यद्येवं परमाणुवद् द्व्यणुकस्कन्धोऽप्यनानुपूर्वीत्वेन कस्मान्नोच्यते? सत्यम्, किन्तु परस्परापेक्षया पूर्व-पश्चाद्भावमात्रस्य सद्भावादेवमप्यभिधातुमशक्योऽसौ, तस्मादानुपूर्व्यनानुपूर्वीप्रकाराभ्यां वक्तुमशक्यत्वादवक्तव्यकमेव द्व्यणुकस्कन्धः। तस्माद्व्यवस्थितमिदम्- आदि-मध्या-ऽन्तभावेनावधिभूतं मध्यवर्तिनमपेक्ष्यासाङ्कर्येण मुख्यस्य पूर्व-पश्चाद्भावस्य सद्भावात् त्रिप्रदेशादिस्कन्ध एवाऽऽनुपूर्वी, परमाणुस्तूक्तयुक्त्याऽनानुपूर्वी, द्व्यणुकोऽवक्तव्यकमिति। एवं संज्ञासंज्ञिसम्बन्धकथनरूपा अर्थपदप्ररूपणा कृता भवति। यद्येवं **त्रिप्रदेशिका आनुपूर्व्य** इत्यादिबहुवचननिर्देशः किमर्थम्, एकत्वमात्रेणैव संज्ञासंज्ञिसम्बन्धकथनस्य सिद्धत्वात्? सत्यम्, किन्त्वानुपूर्व्यादिद्रव्याणां प्रतिभेदमनन्तव्यक्तिख्यापनार्थो नैगम-व्यवहारयोरित्थंभूताभ्युपगमप्रदर्शनार्थश्च बहुत्वनिर्देश इत्यदोषः।

अत्राऽऽह - नन्वनानुपूर्वीद्रव्यमेकेन परमाणुना निष्पद्यते, अवक्तव्यकद्रव्यं परमाणुद्वयेन, आनुपूर्वीद्रव्यं तु जघन्यतोऽपि परमाणुत्रयेणेति, इत्थं द्रव्यवृद्ध्या पूर्वानुपूर्वीक्रममाश्रित्य प्रथममनानुपूर्वी ततोऽवक्तव्यकं ततश्चाऽऽनुपूर्वीत्येवं निर्देशो युज्यते, पश्चानुपूर्वीक्रमाश्रयणे तु व्यत्ययेन युक्तः, तत् कथं क्रमद्वयमुल्लङ्घ्यान्यथा निर्देशः कृतः? सत्यमेतत्, किन्त्वनानुपूर्व्यपि व्याख्याङ्गमिति ख्यापनार्थः, यदि वा त्र्यणुक-चतुरणुकादीन्यानुपूर्वीद्रव्याण्यनानुपूर्व्यवक्तव्यकद्रव्येभ्यो बहूनि तेभ्योऽनानुपूर्वी-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

द्रव्याण्यल्पानि तेभ्योऽप्यवक्तव्यकद्रव्याण्यल्पतराणीत्यत्रैव वक्ष्यते, ततश्चेत्थं द्रव्यहान्या पूर्वानुपूर्वीक्रमनिर्देश एवायमित्यलं विस्तरेण। **सेतमि**त्यादि निगमनम्।

**[सू० १००] एयाए णं णेगम-ववहाराणं अट्ठपयपरूवणयाए किं [१]पओयणं? एयाए णं णेगम-ववहाराणं अट्ठपयपरूवणयाए भंगसमुक्कित्त[२]-णया [३]कीरइ।**

**[सू० १०१] से किं तं णेगम-ववहाराणं भंगसमुक्कित्तणया? णेगम-ववहाराणं भंगसमुक्कित्तणया— अत्थि आणुपुव्वी १, अत्थि अणाणुपुव्वी २, अत्थि अवत्तव्वए ३, अत्थि आणुपुव्वीओ ४, अत्थि अणाणुपुव्वीओ ५, अत्थि अवत्तव्वयाइं ६।**

**अहवा अत्थि आणुपुव्वी य अणाणुपुव्वी य १, अहवा अत्थि आणुपुव्वी य अणाणुपुव्वीओ य २, अहवा अत्थि आणुपुव्वीओ य अणाणुपुव्वी य ३, अहवा अत्थि आणुपुव्वीओ य अणाणुपुव्वीओ य ट्क [=४]।**

**अहवा अत्थि आणुपुव्वी य अवत्तव्वए य १, अहवा अत्थि आणुपुव्वी य अवत्तव्वयाइं च २, अहवा अत्थि आणुपुव्वीओ य अवत्तव्वए य ३, अहवा अत्थि आणुपुव्वीओ य अवत्तव्वयाइं च [४]ट्क [=४]।**

**अहवा अत्थि अणाणुपुव्वी य अवत्तव्वए य १, अहवा अत्थि अणाणुपुव्वी य अवत्तव्वयाइं च २, अहवा अत्थि अणाणुपुव्वीओ य अवत्तव्वए य ३, अहवा अत्थि अणाणुपुव्वीओ य अवत्तव्वयाइं च ट्क [=४]।**

**अहवा अत्थि आणुपुव्वी य अणाणुपुव्वी य अवत्तव्वए य १, अहवा अत्थि आणुपुव्वी य अणाणुपुव्वी य अवत्तव्वयाइं च २, अहवा अत्थि**

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**आणुपुव्वी य अणाणुपुव्वीओ य अवत्तव्वए य ३, अहवा अत्थि आणुपुव्वी य अणाणुपुव्वीओ य अवत्तव्वयाइं च ट्क [=४], अहवा अत्थि आणुपुव्वीओ य अणाणुपुव्वी य अवत्तव्वए य ५, अहवा अत्थि आणुपुव्वीओ य अणाणुपुव्वी य अवत्तव्वयाइं च ६, अहवा अत्थि आणुपुव्वीओ य अणाणुपुव्वीओ य अवत्तव्वए य ७, अहवा अत्थि आणुपुव्वीओ य अणाणुपुव्वीओ य अवत्तव्वयाइं च ८, एए अट्ठ भंगा। एवं सव्वे वि छव्वीसं भंगा २६। सेतं नेगम-ववहाराणं भंगसमुक्कित्तणया।**

**[चू० १००-१०१]** इदाणिं भंगुक्कित्तणा। तत्थ तिण्हं अत्थपदाणं एगवयणेण तिन्नि भंगा, बहुवयणेण तिन्नि, आणुपुव्वि-अणाणुपुव्वीए य चतुभंगो, आणुपुव्वि-अवत्तव्वए य चतुभंगो, अणाणुपुव्वी-अवत्तव्वए वि चतुभंगो, आणुपुव्वी-अणाणुपुव्वी-अवत्तव्वए य अट्ठभंगी, एवं एते छव्वीसं भंगा। स्याद् बुद्धिः – किमर्थं भङ्गोत्कीर्तनम्? उच्यते – वक्तुरभिप्रेतार्थप्रतिपत्तये [१]नयानुमतप्रदर्शनार्थं च, किं च असंजुत्तं संजुत्तं वा समाणमसमाणं वा अण्णदव्वसंजोगं जह चेव वत्ता दव्वविवक्खं करेति तह चेवेच्छति णेगमववहार त्ति भंगसमुक्कित्तणा कता।

**[हा० १००-१०१] एताए ण**मित्यादि, **एतयाऽर्थपदप्ररूपणया किं प्रयोजनम्**? इति, अत्राऽऽह – **एतया** भङ्गसमुत्कीर्त्तनता **क्रियते**। सा चैवमवगन्तव्या – त्रयाणामानुपूर्व्यादिपदानामेकवचनेन त्रयो भङ्गाः, बहुवचनेनापि त्रयः, एते चासंयोगतः, संयोगेन तु आनुपूर्व्यनानुपूर्व्योश्चतुर्भङ्गी, तथा आनुपूर्व्यवक्तव्यकयोरपि सैव, तथाऽनानुपूर्व्यवक्तव्यकयोश्चेति, त्रिकसंयोगतस्तु आनुपूर्व्यनानुपूर्व्यवक्तव्यकेष्वष्टभङ्गीति **एवमेते षड्विंशतिर्भङ्गाः**। अत्राह – भङ्गोत्कीर्त्तनं किमर्थम्? उच्यते – वक्तुरभिप्रेतार्थप्रतिपत्तये नयानुमतप्रदर्शनार्थम्। तथाहि – असंयुक्तं संयुक्तं समानमसमानम्, अन्यद्रव्यसंयोगे(गं ? गि ?) च यथा वक्ता प्रतिपादयति तथैवेमौ प्रतिपाद्येते इति नयानुमतप्रदर्शनम्, एषोऽत्र भावार्थः। भङ्गकास्तु ग्रन्थत एवानुसर्त्तव्याः। **सेत्त**मित्यादि निगमनम्।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[हे० १००-१०१] एताए ण**मित्यादि, **एतया अर्थपदप्ररूपणतया किं प्रयोजन**मिति, अत्राऽऽह- **एताए ण**मित्यादि । **एतया अर्थपदप्ररूपणतया भङ्गसमुत्कीर्तना क्रियते**, इदमुक्तं भवति - अर्थपदप्ररूपणतायां संज्ञा-संज्ञिव्यवहारो निरूपितः, तस्मिंश्च सति एव भङ्गकाः समुत्कीर्तयितुं शक्यन्ते, नान्यथा, संज्ञामन्तरेण निर्विषयाणां भङ्गानां प्ररूपयितुमशक्यत्वात्, तस्माद् युक्तमुक्तम् - एतया अर्थपदप्ररूपणतया भङ्गसमुत्कीर्तना क्रियत इति ।

तामेव भङ्गसमुत्कीर्तनां निरूपयितुमाह - **से किं त**मित्यादि प्रश्नः[1], अत्र चानुपूर्व्यादिपदत्रयेणैकवचनान्तेन त्रयो भङ्गा भवन्ति, बहुवचनान्तेनापि तेन त्रय एव भङ्गाः, एवमेतेऽसंयोगतः प्रत्येकं भङ्गाः षड् भवन्ति । संयोगपक्षे तु पदत्रयस्यास्य त्रयो द्विकसंयोगाः, एकैकस्मिंस्तु द्विकसंयोगे एकवचन-बहुवचनाभ्यां चतुर्भङ्गीसद्भावतः त्रिष्वपि द्विक[2][सं]योगेषु द्वादश भङ्गाः संपद्यन्ते । त्रिकसंयोगस्त्वत्रैक एव, तत्र च एकवचन-बहुवचनाभ्यामष्टौ भङ्गाः, सर्वेऽप्यमी षड्विंशतिः । अत्र स्थापना -

आनुपूर्वी १, अनानुपूर्वी १, अवक्तव्यक १, इत्येकवचनान्तास्त्रयः । आनुपूर्वी ३, अनानुपूर्वी ३, अवक्तव्यक ३, एते बहुवचनान्तास्त्रयः । आनुपूर्वी १, अनानुपूर्वी १ । आनुपूर्वी १, अनानुपूर्वी ३ । आनुपूर्वी ३, अनानुपूर्वी १ । आनुपूर्वी ३, अनानुपूर्वी ३ । इति प्रथमद्विकयोगे चतुर्भङ्गी । आनुपूर्वी १, अवक्तव्यक १ । आनुपूर्वी १, अवक्तव्यक ३ । आनुपूर्वी ३, अवक्तव्यक १ । आनुपूर्वी ३, अवक्तव्यक ३ । इति द्वितीयद्विकयोगे चतुर्भङ्गी । अनानुपूर्वी १, अवक्तव्यक १ । अनानुपूर्वी १, अवक्तव्यक ३ । अनानुपूर्वी ३, अवक्तव्यक १ । अनानुपूर्वी ३, अवक्तव्यक ३ । इति तृतीयद्विकयोगे चतुर्भङ्गी । आनुपूर्वी १, अनानुपूर्वी १, अवक्तव्यक १ । आनुपूर्वी १, अनानुपूर्वी १, अवक्तव्यक ३ । आनुपूर्वी १, अनानुपूर्वी ३, अवक्तव्यक १ । आनुपूर्वी १, अनानुपूर्वी ३, अवक्तव्यक ३ । आनुपूर्वी ३, अनानुपूर्वी १, अवक्तव्यक १ । आनुपूर्वी ३, अनानुपूर्वी १, अवक्तव्यक ३ । आनुपूर्वी ३, अनानुपूर्वी ३, अवक्तव्यक १ । आनुपूर्वी ३, अनानुपूर्वी ३, अवक्तव्यक ३ । इति त्रिकयोगे अष्टौ भङ्गाः । इति सर्वेऽपि षड्विंशतिः । एते चोत्तरं प्रयच्छता अनेनैव क्रमेण

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सूत्रेऽपि लिखिता: सन्तीति भावनीया: ।

अथ किमर्थं भङ्गकसमुत्कीर्तनं क्रियत इति चेत्, उच्यते, इहानुपूर्व्यादिभिस्त्रिभि: पदैरेकवचन-बहुवचनान्तै: प्रत्येकचिन्तया संयोगचिन्तया च षड्विंशतिर्भङ्गा: संजायन्ते, तेषु च मध्ये येन केनचिद्भङ्गेन वक्ता द्रव्यं वक्तुमिच्छति तेन प्रतिपादयितुं सर्वानपि प्रतिपादनप्रकाराननेकरूपत्वान्नैगम-व्यवहारनयाविच्छत इति प्रदर्शनार्थं भङ्गकसमुत्कीर्तनमिति । सेत्तमित्यादि निगमनम् ।

**[सू० १०२] एयाए[१] णं णेगम-ववहाराणं भंगसमुक्कित्तणयाए किं पओयणं ? एयाए णं णेगम-ववहाराणं भंगसमुक्कित्तणयाए भंगोवदंसणया कीरइ[२] ।**

**[सू० १०३] से किं तं णेगम-ववहाराणं भंगोवदंसणया ? णेगम-ववहाराणं भंगोवदंसणया— तिपदेसिए आणुपुव्वी[३] १, परमाणुपोग्गले अणाणुपुव्वी २, दुपदेसिए अवत्तव्वए ३, तिपदेसिया आणुपुव्वीओ[४] ४, परमाणुपोग्गला अणाणुपुव्वीओ ५, दुपदेसिया अवत्तव्वयाइं ६ ।[५] →अहवा तिपदेसिए य परमाणुपोग्गले य आणुपुव्वी य अणाणुपुव्वी य १, अहवा तिपदेसिए य परमाणुपोग्गला य आणुपुव्वी य अणाणुपुव्वीओ य २, अहवा तिपदेसिया य परमाणुपोग्गले य आणुपुव्वीओ य अणाणुपुव्वी य ३, अहवा तिपदेसिया य परमाणुपोग्गला य आणुपुव्वीओ य अणाणुपुव्वीओ य ४, अहवा तिपदेसिए य दुपदेसिए य आणुपुव्वी य अवत्तव्वए य १, अहवा तिपदेसिए य दुपदेसिया य आणुपुव्वी य अवत्तव्वयाइं च २, अहवा तिपदेसिया य दुपदेसिए य आणुपुव्वीओ य अवत्तव्वए य ३, अहवा तिपदेसिया य दुपदेसिया य आणुपुव्वीओ य अवत्तव्वयाइं च ४, अहवा परमाणुपोग्गले य दुपदेसिए य अणाणुपुव्वी य अवत्तव्वए य १, अहवा**

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**परमाणुपोग्गले य दुपदेसिया य अणाणुपुव्वी य अवत्तव्वयाइं च २, अहवा परमाणुपोग्गला य दुपदेसिए य अणाणुपुव्वीओ य अवत्तव्वए य ३, अहवा परमाणुपोग्गला य दुपदेसिया य अणाणुपुव्वीओ य अवत्तव्वयाइं च ४। अहवा तिपदेसिए य परमाणुपोग्गले य दुपदेसिए य आणुपुव्वी य अणाणुपुव्वी य अवत्तव्वए य १, अहवा तिपदेसिए य परमाणुपोग्गले य दुपदेसिया य आणुपुव्वी य अणाणुपुव्वी य अवत्तव्वयाइं च २, अहवा तिपदेसिए य परमाणुपोग्गला य दुपदेसिए य आणुपुव्वी य अणाणुपुव्वीओ य अवत्तव्वए य ३, अहवा तिपएसिए य परमाणुपोग्गला य दुपदेसिया य आणुपुव्वी य अणाणुपुव्वीतो य अवत्तव्वयाइं च ट्क [=४], अहवा तिपदेसिया य परमाणुपोग्गले य दुपदेसिए य आणुपुव्वीओ य अणाणुपुव्वी य अवत्तव्वए य ५, अहवा तिपदेसिया य परमाणुपोग्गले य दुपदेसिया य आणुपुव्वीओ य अणाणुपुव्वी य अवत्तव्वयाइं च ६, अहवा तिपदेसिया य परमाणुपोग्गला य दुपदेसिए य आणुपुव्वीओ य अणाणुपुव्वीओ य अवत्तव्वए य ७, अहवा तिपदेसिया य परमाणुपोग्गला य दुपदेसिया य आणुपुव्वीओ य अणाणुपुव्वीओ य अवत्तव्वयाइं च ८। से तं नेगम-ववहाराणं भंगोवदंसणया।←**

**[चू० १०२-१०३]** इदाणिं भंगोवदंसणा – **तिपदेसितेणं आणुपुव्वी**ति भंगो, **परमाणुपोग्गलेणं अणाणुपुव्वि** त्ति भंगो, **दुपदेसितेणं अव्वत्तव्वे** त्ति भंगो भवति, एवं बहुवयणेण वि तिण्णि भंगा भावेतव्वा। तधा **तिपदेसिएण परमाणुपोग्गलेण य आणुपुव्विअणाणुपुव्वि** त्ति भंगो भवति। एवं सव्वे संजोगभंगा भावेतव्वा। चोदक आह – नणु अट्ठपदपरूवणाए त्रिप्रदेशात्मिका आनुपुर्वीत्याद्युपलब्धं, भंगुक्कित्तणाए य भणाति **अत्थि आणुपुव्वी**त्यादि, आणुपुव्विग्गहणे य कते अवगतमेव भवति जधा

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तिपदेसिएण आणुपुव्वि त्ति भंगो, किं पुणो भंगोवदंसणाए भणाति जधा **तिपदेसिता आणुपुव्वी**त्यादि ? आचार्य आह— सुणेहि, जहा संहितादिछव्विधे व्याख्यानलक्षणे पदत्थं भाणिऊण पुणो तमेवऽत्थं सवित्थरं सुत्तप्फासियाए समास-चालणा-पसिद्धीहि भणंतस्स ण दोसो, तधा इहं पि अट्ठपदपरूवणाए पदत्थमेत्ते उवदिट्ठे भंगुक्कित्तणे य हेतुविकले कते भंगोवदंसणाए सहेतुभंगोवदंसणे सवित्थरे ण दोसो भवति। सेसं कंठं। गता भंगोवदंसणा।

**[हा० १०२-१०३]** शेषमनिगूढार्थं यावत् **तिपदेसिए आणुपुव्वी** इत्यादि । त्रिप्रदेशिकोऽर्थ: आनुपूर्वीत्युच्यते, एवमर्थकथनपुरस्सरा: शेषभङ्गा अपि भावनीया इति। एतदुक्तं भवति- तैरेव भङ्गकाभिधानैस्त्रिप्रदेश-परमाणुपुद्गल-द्विप्रदेशार्थकथनविशिष्टैस्तदभिधेयान्वाख्यानं भङ्गोपदर्शनतेति । आह— अर्थपदप्ररूपणा-भङ्गसमुत्कीर्त्तनाभ्यां भङ्गोपदर्शनार्थतावगमाद् भेदतस्तदभिधानमयुक्तमिति, अत्रोच्यते — न, उभयसंयोगस्य वस्त्वन्तरत्वाद् नयमतवैचित्र्यप्रदर्शनार्थत्वाच्चादोष इति। शेषम् आनिगमनं सूत्रसिद्धमिति।

**[हे० १०२-१०३]** उक्ता भङ्गोत्कीर्तनता, अथ भङ्गोपदर्शनतां प्रतिपिपादयिषुराह- **एताए ण**मित्यादि। एतया भङ्गसमुत्कीर्तनतया किं प्रयोजनमिति। अत्रोत्तरमाह - **एताए ण**मित्यादि, एतया भङ्गसमुत्कीर्तनतया भङ्गोपदर्शनता क्रियते, इदमुक्तं भवति-भङ्गसमुत्कीर्तनतायां भङ्गकसूत्रमुक्तम्, भङ्गोपदर्शनतायां तस्यैव वाच्यं त्र्यणुकस्कन्धादिकं कथयिष्यते। तच्च सूत्रे समुत्कीर्तित एव कथयितुं शक्यते, वाचकमन्तरेण वाच्यस्य कथयितुमशक्यत्वात्, अतो युक्तं भङ्गकसमुत्कीर्तनतायां भङ्गोपदर्शनताप्रयोजनम् । अत्राऽऽह- ननु भङ्गोपदर्शनतायां वाच्यस्य त्र्यणुकस्कन्धादे: कथनकाले आनुपूर्व्यादिसूत्रं पुनरप्युत्कीर्तयिष्यते, तत् किं भङ्गसमुत्कीर्तनतया प्रयोजनमिति, सत्यम्, किन्तु भङ्गसमुत्कीर्तनतासिद्धस्यैव सूत्रस्य भङ्गोपदर्शनतायां वाच्यवाचकभावसुखप्रतिपत्त्यर्थं प्रसङ्गत: पुनरपि समुत्कीर्तनं करिष्यते, न मुख्यतयेत्यदोष:, यथा हि [1]*संहिता च पदं चैव* [ ] इत्यादिव्याख्याक्रमे सूत्रं संहिताकाले समुच्चारितमपि पदार्थकथनकाले पुनरप्यर्थकथनार्थमुच्चार्यते तद्वदत्रापीति भाव:।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अथ केयं पुनर्भङ्गोपदर्शनतेति प्रश्नपूर्वकं तामेव निरूपयितुमाह - **से किं त**मित्यादि। **तिपदेसिए आणुपुव्वि** त्ति त्रिप्रदेशिकोऽर्थः आनुपूर्वीत्युच्यते, त्रिप्रदेशिकस्कन्धलक्षणेनार्थेनानुपूर्वीति भङ्गको निष्पद्यत इत्यर्थः १, एवं परमाणुपुद्गललक्षणोऽर्थोऽनानुपूर्वीत्युच्यते २, द्विप्रदेशिकस्कन्धलक्षणः अर्थोऽवक्तव्यकमुच्यते ३, एवं बहवस्त्रिप्रदेशिका आनुपूर्व्यः ४, बहवः परमाणुपुद्गला अनानुपूर्व्यः ५, बहवो द्विप्रदेशिकस्कन्धा अवक्तव्यकानि ६, इति षण्णां प्रत्येकभङ्गानामर्थकथनम्। एवं द्विकसंयोगेऽपि त्रिप्रदेशिकस्कन्धः परमाणुपुद्गलश्चानुपूर्व्यनानुपूर्वीत्वेनोच्यते, यदा त्रिप्रदेशिकस्कन्धः परमाणुपुद्गलश्च प्रतिपादयितुमभीष्टो भवति तदा **अत्थि आणुपुव्वी य अणाणुपुव्वी य** इत्ययं भङ्गो निष्पद्यत इत्यर्थः, एवमर्थकथनपुरस्सराः शेषभङ्गा अपि भावनीयाः। अत्राह - नन्वर्थोऽप्यानुपूर्व्यादिपदानां त्र्यणुकस्कन्धादिकोऽर्थपदप्ररूपणतालक्षणे प्रथमद्वारे कथित एव, तत् किमनेन ? सत्यम्, किन्तु तत्र पदार्थमात्रमुक्तम्, अत्र तु तेषामेवाऽऽनुपूर्व्यादिपदानां भङ्गकरचनासमाविष्टानामर्थः कथ्यत इत्यदोषः, नयमतवैचित्र्यप्रदर्शनार्थं वा पुनरित्थमर्थोपदर्शनमित्यलं विस्तरेण। **सेत**मित्यादि निगमनम्।

**[सू० १०४] [१] से किं तं समोयारे ? समोयारे — णेगम-ववहाराणं आणुपुव्वीदव्वाइं कहिं समोयरंति ? किं आणुपुव्वीदव्वेहिं समोयरंति ? अणाणुपुव्वीदव्वेहिं समोयरंति ? अवत्तव्वयदव्वेहिं समोयरंति ? नेगम-ववहाराणं आणुपुव्वीदव्वाइं आणुपुव्वीदव्वेहिं समोयरंति, णो अणाणुपुव्वीदव्वेहिं समोयरंति, नो अवत्तव्वयदव्वेहिं समोयरंति।**

**[२] →[1] णेगम-ववहाराणं अणाणुपुव्विदव्वाइं कहिं समोयरंति ? किं आणुपुव्विदव्वेहिं समोयरंति ? अणाणुपुव्विदव्वेहिं समोयरंति ? अवत्तव्वयदव्वेहिं समोयरंति ? णेगम-ववहाराणं अणाणुपुव्विदव्वाइं णो आणुपुव्विदव्वेहिं समोयरंति, अणाणुपुव्विदव्वेहिं समोयरंति, णो अवत्तव्वयदव्वेहिं समोयरंति।**

Jain Education International For Private & Personal Use Only www.jainelibrary.org

[३] **णेगम-ववहाराणं अवत्तव्वयदव्वाइं कहिं समोयरंति ? किं आणुपुव्विदव्वेहिं समोयरंति ? अणाणुपुव्विदव्वेहिं समोयरंति ? अवत्तव्वयदव्वेहिं समोयरंति ? णेगम-ववहाराणं अवत्तव्वयदव्वाइं नो आणुपुव्विदव्वेहिं समोयरंति, णो अणाणुपुव्विदव्वेहिं समोयरंति अवत्तव्वयदव्वेहिं समोयरंति। सेतं समोयारे।**←

**[चू० १०४] से किं तं समोतारे** इत्यादि। सम्यग् अवतारो **समोतारो**, अर्थाविरोधेनेत्यर्थः। समसंख्यावतारो वा **समोतारो**, जधा एगपदेसितो एगपदेसिए, दुपदेसितो दुपदेसिए, तिपदेसितो तिपदेसिए एवमादि। समाभिधाने वा ओतारो **[समोतारो]**, जहा उरालत्तणतो ओरालियदव्वा सव्वे ओरालियवग्गणाते समोयरंति, तहा **आणुपुव्विदव्वा** आणुपुव्विभावत्तणतो **आणुपुव्विदव्वेसु** चेव ओयरंति। एवं सेसा वि सट्ठाणे भाणितव्वा, ण परट्ठाणेसु त्ति। गतो समोतारो।

**[हा० १०४] से किं तं समोतारे** इत्यादि, अवतरणमवतारः, सम्यगविरोधतः स्वस्थान एवावतारः समवतारः। इहानुपूर्वीद्रव्याणामानुपूर्वीद्रव्येष्वेवावतारः, न शेषे[षु], स्वजातावेव वर्त्तन्ते न तु स्वजातिव्यतिरेकेणेति भावना। एवमनानुपूर्व्यादिष्वपि भावनीयम्। अकृच्छ्रावसेया चाक्षरगमनिकेति न प्रतिपदं विवरणं प्रति प्रयास इति।

**[हे० १०४]** उक्ता भङ्गोपदर्शनता, अथ समवतारं बिभणिषुराह - **से किं त**मित्यादि। अथ कोऽयं **समवतार** इति प्रश्ने सत्याह - **समोयारे** त्ति अयं समवतार 'उच्यते' इति शेषः, कः पुनरयमित्याह - **नेगम-ववहाराणं आणुपुव्वीदव्वाइं कहिं समोयरंती**त्यादिप्रश्नः। अत्रोत्तरम् - **नेगम-ववहाराणं आणुपुव्वी**त्यादि, आनुपूर्वीद्रव्याणि आनुपूर्वीद्रव्यलक्षणायां स्वजातावेव वर्तन्ते, न स्वजात्यतिक्रमेणेत्यर्थः, इदमुक्तं भवति - सम्यग् अविरोधेनावतरणं वर्तनं समवतारः अविरोधवर्तिता प्रोच्यते, सा च स्वजातिवृत्तावेव स्यात्, परजातिवृत्तेर्विरुद्धत्वात्, ततो नानादेशादिवृत्तीन्यपि सर्वाण्यानुपूर्वीद्रव्याणि आनुपूर्वीद्रव्येष्वेव वर्तन्ते इति स्थितम्। एवमनानुपूर्व्यादीनामपि स्वस्थानावतारो

Jain Education International For Private & Personal Use Only www.jainelibrary.org

भावनीयः । **सेत्त**मित्यादि निगमनम् ।

**[सू० १०५] से किं तं अणुगमे ? अणुगमे णवविहे पण्णत्ते। तंजहा—**
**संतपयपरूवणया १, दव्वपमाणं च २, खेत्त ३, फुसणा य ४।**
**कालो य ५, अंतरं ६, भाग ७, भाव ८, अप्पाबहुं ९, चेव ॥८॥**

**[चू० १०५]** इदाणिं **से किं तं अणुगमे** इत्यादि । अर्थानुगमन**मनुगमः** अनुरूपार्थगमनं वा **अनुगमः**, अणु सूत्रम्, तस्यानुगमनाद्वा **अनुगमः**, सूत्रानुकूलगमनं वा **अनुगमः**, एवं अर्थोभयेष्वपि वक्तव्यम्। **[संतपय०** गाधा**] संतं** विद्यमानं, किं तं ? **पदं**, तस्स अत्थकहणा **परूवणा** सा **संतपदपरूवणा** भण्णति । ते य अणुपुव्विमादिया तयो पदा। तेसिं अणुपुव्विमादियाणं **दव्वाणं पमाणं** वत्तव्वं । तेसिं चेव **खेत्ता**वगाहो **फुसणा** य, तेसिं चेव दव्वाणं तब्भावअपरिच्चाएण ठिति**कालो** भाणितव्वो, तद्दव्वत्तेण सुण्णता **अंतरं**, आणुपुव्विदव्वा लोगस्स कति**भागे**, एवं सेसा वि । ते दव्वा कतरंमि **भावे**, आणुपुव्वि-अणाणुपुव्वी-अवत्तव्वाण य परोप्परं **अप्पबहु**त्तणं वत्तव्वं ।

**[हा० १०५] से किं त**मित्यादि । **अनुगमः** प्राग्निरूपितशब्दार्थ एव **नवविधो** नवप्रकारः **प्रज्ञप्तः**, तद्यथा — **सन्तपदपरूवणा(णया)** गाहा। व्याख्या — सच्च तत् पदं च सत्पदम्, तस्य प्ररूपणं सत्पदप्ररूपणम्, तस्य भावः **सत्पदप्ररूपणता** सदर्थगोचरा आनुपूर्व्यादिपदप्ररूपणता कार्या । तथा आनुपूर्व्यादिद्र**व्यप्रमाणं** च वक्तव्यम् । तथाऽऽनुपूर्व्यादिद्रव्याधारः **क्षेत्रं** वक्तव्यम्। तथा **स्पर्शना** च वक्तव्या। क्षेत्र-स्पर्शनयोरयं विशेषः — *एगपदेसोगाढं सत्तपदेसा य से फुसणा* [ ]। **कालश्च** आनुपूर्व्यादिस्थिति-कालो वक्तव्यः। तथा **अन्तरं** स्वभावपरित्यागे सति पुनस्तद्भावप्राप्तिविरह इत्यर्थः। तथा **भागः** इत्यानुपूर्वीद्रव्याणि शेषद्रव्याणां कतिभाग इत्यादि । तथा **भावो** वक्तव्यः आनुपूर्व्यादिद्रव्याणि कस्मिन् भावे वर्त्तन्त इति । तथा**ऽल्पबहुत्वं** वक्तव्यम्, आनुपूर्व्यादीनामेव मिथो द्रव्यार्थ-प्रदेशार्थोभयार्थैः। व्यासार्थं तु प्रत्यवयवं ग्रन्थकार एव प्रपञ्चतो वक्ष्यति इति।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

[हे० १०५] उक्तः समवतारः, अथानुगमं बिभणिषुरुपक्रमते - **से किं तं**मित्यादि। अत्रोत्तरम् - **अणुगमे नवविहे** इत्यादि। तत्र सूत्रस्यानुकूलमनुरूपं वा गमनं व्याख्यानमनुगमः, अथवा सूत्रपठनादनु पश्चाद्गमनं व्याख्यानमनुगमः, यदिवा अनुसूत्रमर्थो गम्यते ज्ञायते अनेनेत्यनुगमो व्याख्यानमेव, इत्याद्यन्यदपि वस्त्वविरोधेन स्वधिया वाच्यमिति। स च **नवविधो** नवप्रकारो भवति। तदेव नवविधत्वं दर्शयति - **तद्यथे**त्युपदर्शनार्थः।

**संतपय** गाहा, व्याख्या- सदर्थविषयं पदं **सत्पदम्**, तस्य **प्ररूपणं** प्रज्ञापनं सत्पदप्ररूपणम्, तस्य भावः **सत्पदप्ररूपणता**, सा प्रथमं कर्तव्या। इदमुक्तं भवति - इह स्तम्भ-कुम्भादीनि पदानि सदर्थविषयाणि दृश्यन्ते, खरशृङ्ग-व्योमकुसुमादीनि त्वसदर्थविषयाणि, तत्राऽऽनुपूर्व्यादिपदानि किं स्तम्भादिपदानीव सदर्थविषयाण्याहोश्वित् खरविषाणादिपदवत् असदर्थगोचराणीत्येतत् प्रथमं पर्यालोचयितव्यम् १, तथा आनुपूर्व्यादिपदाभिधेय**द्रव्याणां प्रमाणं** सङ्ख्यास्वरूपं प्ररूपणीयम् २, **चः** समुच्चये, एवमन्यत्रापि, तथा तेषामेव **क्षेत्रं** तदाधारस्वरूपं प्ररूपणीयम्, कियति क्षेत्रे तानि भवन्तीति चिन्तनीयमित्यर्थः ३, तथा **स्पर्शना** च वक्तव्या, कियत् क्षेत्रं तानि स्पृशन्तीति चिन्तनीयमित्यर्थः ४, तथा **कालश्च** तत्स्थितिलक्षणो वक्तव्यः ५, तथा **अन्तरं** विवक्षितस्वभावपरित्यागे सति पुनस्तद्भावप्राप्तिविरहलक्षणं प्ररूपणीयम् ६, तथा आनुपूर्वीद्रव्याणि शेषद्रव्याणां कतिभागे वर्तन्ते इत्यादिलक्षणो **भागः** प्ररूपणीयः ७, तथा आनुपूर्व्यादिद्रव्याणि कस्मिन् भावे वर्तन्ते इत्येवंरूपो **भावः** प्ररूपणीयः ८, तथा **अल्पबहुत्वं चा**नुपूर्व्यादिद्रव्याणां द्रव्यार्थ-प्रदेशार्थोभयार्थताश्रयणेन परस्परं स्तोकबहुत्वचिन्तालक्षणं प्ररूपणीयम् ९, **एव**कारोऽवधारणे, एतावत्प्रकार एवानुगम इति गाथासमासार्थः।

**[सू० १०६] [१] नेगम[1]-ववहाराणं आणुपुव्वीदव्वाइं किं अत्थि [2]णत्थि ? णियमा अत्थि।**

**[२] [3]→ नेगम-ववहाराणं अणाणुपुव्वीदव्वाइं किं अत्थि णत्थि ? णियमा अत्थि।**

**[३] नेगम-ववहाराणं अवत्तव्वगदव्वाइं किं अत्थि णत्थि ? णियमा अत्थि।←**

**[चू० १०६]** एतं सव्वं सवित्थरं सुत्तेणेव भण्णति— **आणुपुव्विदव्वाइं किं अत्थि णत्थि** त्ति पुच्छा। पण्णवग आह— कुतस्ते संशयः ?

*भण्णति दुहाऽभिहाणं सत्थयमितरं च घड-खपुप्फादी।*
*दिट्ठमतो मे संका किमत्थि णत्थि त्ति तो पुच्छा ॥१॥*
*णियमऽत्थि ति गुरुवयणं अभिधाणं सत्थयं जतो सव्वं।*
*[1]अभिहाणऽक्खरमतियं तं च सुतंसो सदत्थो य ॥२॥* [ ]

**[हा० १०६]** तत्राऽऽद्यमवयवमधिकृत्याऽऽह— **णेगम-ववहाराणं आणुपुव्वि-दव्वाइं किं अत्थि णत्थी**त्यादि, कुतस्ते संशयः ? घटादौ विद्यमाने खकुसुमादौ चाविद्यमाने चाऽविशेषेणाभिधानप्रवृत्तेः। तत्र निर्वचनमाह— **नियमा अत्थि**। तथा वृद्धैरप्युक्तम्—

*जम्हा दुविहऽभिहाणं सत्थयमितरं च घड-खपुप्फादी।*
*दिट्ठमओ मे संका किमत्थि णत्थि त्ति सिस्साऽऽह ॥१॥*
*अत्थि त्ति य गुरुवयणं अभिहाणं सत्थयं जतो सव्वं।*
*[1]अत्था-ऽभिहाण-पच्चयतुल्लभिधेया सदत्थमिणं ॥२॥* [ ]

यश्चास्य सदर्थः स उक्त एव। द्वारम् १।

**[हे० १०६]** व्यासार्थं तु ग्रन्थकारः स्वयमेव बिभणिषुराद्यावयवमधिकृत्याऽऽह - **नेगम-ववहाराण**मित्यादि। नैगम-व्यवहारयोरानुपूर्वीशब्दाभिधेयानि द्रव्याणि त्र्यणुकस्कन्धादीनि किं सन्ति नेति प्रश्नः, अत्रोत्तरम् - **नियमा अत्थि** त्ति। एतदुक्तं भवति- नेदं खरशृङ्गादिवदानुपूर्वीपदमसदर्थगोचरम्, अतो नियमात् सन्ति तदभिधेयानि द्रव्याणि,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तानि च त्र्यणुकस्कन्धादीनि पूर्वं दर्शितान्येवेति । एवमनानुपूर्व्यवक्तव्यकपक्षद्वयेऽपि वाच्यम् ।

**[सू० १०७] [१] नेगम-ववहाराणं आणुपुव्वीदव्वाइं किं संखेज्जाइं असंखेज्जाइं, अणंताइं ? नो संखेज्जाइं, नो असंखेज्जाइं, अणंताइं ।**

**[२] [1]→ एवं दोण्णि वि ।←**

**[चू० १०७]** त[1] इमं दव्वप्पमाणं— **किं संखेज्जा[इं?]** इत्यादि पुच्छा उत्तरं च सुत्तसिद्धं,

*तिण्णि वि दव्वाऽणंता, जिणवयणे दिट्ठतप्पमाणातो ।*
*केवलणेयत्तणतो संदिट्ठियहेतुतो णेया ॥१॥* [ ]

**[हा० १०७]** द्रव्यप्रमाणमधुना— **णेगमववहाराणं आणुपुव्विदव्वाइं किं संखेज्जाइं** इत्यादि निगमनान्तं सूत्रसिद्धमेव। असंख्येयप्रदेशात्मके च लोकेऽनन्तानामानुपूर्व्यादिद्रव्याणामचिन्त्यपरिणामयुक्तत्वादवस्थानं भावनीयमिति, दृश्यते चैकगृहान्तर्वर्त्याकाशप्रदेशेष्वेक[प्रदीप]प्रभापरमाणुव्याप्तेष्वपि प्रतिप्रदीपं तावतामेवानेकप्रदीपप्रभापरमाणूनामवस्थानमिति, न च दृष्टेऽनुपपन्नं नामेत्यलं प्रसङ्गेन। द्वारम् २ ।

**[हे० १०७]** कृता सत्पदप्ररूपणा, द्रव्यप्रमाणमभिधित्सुराह - **नेगम-ववहाराणं आणुपुव्वीदव्वाइं किं संखेज्जाइ**मित्यादि । अयमत्र निर्वचनभावार्थः - इहानुपूर्व्यनानुपूर्व्यवक्तव्यकद्रव्याणि प्रत्येकमनन्तान्येकैकस्मिन्नप्याकाशप्रदेशे प्राप्यन्ते, किं पुनः सर्वलोके, अतः सङ्ख्येयासङ्ख्येयप्रकारद्वयनिषेधेन त्रिष्वपि स्थानेष्वानन्त्यमेव वाच्यमिति । न च वक्तव्यं कथमसङ्ख्येये लोके अनन्तानि द्रव्याणि अवतिष्ठन्ते ? अचिन्त्यत्वात् पुद्गलपरिणामस्य, दृश्यते चैकगृहान्तर्वर्त्याकाशप्रदेशेष्वेकप्रदीपप्रभापरमाणुव्याप्तेष्वप्यनेकापरापरप्रदीपप्रभापरमाणूनां तत्रैवावस्थानम्, न चाक्षदृष्टे[1]ऽप्यर्थेऽनुपपत्तिः, अतिप्रसङ्गात्, इत्यलं प्रपञ्चेन ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[सू० १०८] [१] णेगम-ववहाराणं आणुपुव्वीदव्वाइं लोगस्स →[1] कतिभागे होज्जा ← ? किं संखेज्जइभागे होज्जा[2] ? असंखेज्जइभागे होज्जा ? संखेज्जेसु भागेसु होज्जा ? असंखेज्जेसु भागेसु होज्जा ? सव्वलोए होज्जा ? एगदव्वं पडुच्च लोगस्स संखेज्जइभागे वा होज्जा, असंखेज्जइभागे वा होज्जा, संखेज्जेसु भागेसु वा होज्जा, असंखेज्जेसु भागेसु वा होज्जा, सव्वलोए वा होज्जा, नाणादव्वाइं पडुच्च नियमा सव्वलोए होज्जा।**

**[२] नेगम-ववहाराणं अणाणुपुव्वीदव्वाइं किं लोगस्स संखेज्जइभागे होज्जा ? असंखेज्जइभागे होज्जा ? संखेज्जेसु भागेसु होज्जा ? असंखेज्जेसु भागेसु होज्जा ? सव्वलोए वा होज्जा ? एगदव्वं पडुच्च नो संखेज्जइभागे होज्जा, असंखेज्जइभागे होज्जा, नो संखेज्जेसु भागेसु होज्जा ,नो असंखेज्जेसु भागेसु होज्जा, नो सव्वलोए होज्जा, णाणादव्वाइं पडुच्च नियमा सव्वलोए होज्जा।**

**[३] एवं अवत्तव्वगदव्वाणि[3] वि।**

**[चू० १०८]** इदाणिं खेत्तओगाहो **लोगस्स किं संखेज्जतिभागे** इत्यादि पंचविधा पुच्छा सुत्तसिद्धा। उत्तरं **एगदव्वं पडुच्चे**त्यादि, आणुपुव्विदव्वविसेसा परिणतिविसेसेण अप्प-मज्झ-महत्तत्तणतो य जधाविभत्तखेत्तभागे पूरे(रें)ति त्ति पुच्छासमं चेव उत्तरं वाच्यम्, किञ्चान्यत्, जम्हा एक्केक्के आगासपदेसे सुहुमपरिणामपरिणता अणंता [1]आणुपुव्विदव्वा संति तम्हा णाणादव्वमग्गणाए **नियमा सव्वलोए** ,ण सेसविभागेसु त्ति। अणाणुपुव्विएगदव्वे पंच पुच्छा । उत्तरं-**लोगस्स असंखेज्जइभागे**, एगपदेसा-वगाहणत्तणतो, ण सेसविभागेसु, **णाणादव्वे** पूर्ववत्। **एवं अव्वत्तव्वगदव्वा** वि, णवरं दुपदेसावगाहणत्तणतो एगपदेसावगाहणत्तणतो वा।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

[हा० १०८] क्षेत्रमधुना, तत्रेदं सूत्रम्– **णेगमववहाराणं आणुपुव्विदव्वाइं लोयस्स किं संखेज्जइभागे होज्जा** इत्यादि प्रश्नसूत्रम्, एकानुपूर्वीद्रव्यापेक्षया तत्प्रमाणसम्भवे सति प्रश्नसमं निर्वचनसूत्रं च ग्रन्थादेव भावनीयम्। नवरं **सव्वलोए वा होज्ज** त्ति यदुक्तम् अत्राचित्तमहास्कन्धः सर्वलोकव्यापकः समयावस्थायी सकललोकप्रमाणोऽवसेय इति। **णाणादव्वाइं पडुच्च** इत्यादि, नानाद्रव्याण्यानुपूर्वीपरिणामवन्त्येव **प्रतीत्य प्रकृत्य** वा, अधिकृत्येत्यर्थः **नियमात्** नियमेन **सर्वलोके**, न शेषभागेष्विति, **होज्ज** त्ति आर्षत्वाद् भवन्ति, वर्त्तन्त इत्यर्थः, यस्मादेकैकस्मिन्नाकाशप्रदेशे सूक्ष्मपरिणामपरिणतान्यनन्तान्यानुपूर्वीद्रव्याणि विद्यन्त इति भावना। अनानुपूर्व्यवक्तव्यकद्रव्ये तु एकद्रव्यं प्रतीत्य [अ]संख्येयभाग एव वर्त्तेते न शेषभागेषु, यस्मात् परमाणुरेकप्रदेशावगाढ एव भवति, अवक्तव्यकं त्वेकप्रदेशावगाढं [द्विप्रदेशावगाढं] च। नानाद्रव्यभावना पूर्ववदिति। द्वारम् ३।

[हे० १०८] इदानीं क्षेत्रद्वारमुच्यते-**नेगम-ववहाराण**मित्यादि। **आनुपूर्वीद्रव्याणि किं** लोकस्यैकस्मिन् **सङ्ख्याततमे भागे होज्ज** त्ति आर्षत्वाद्भवन्ति, अवगाहन्त इति यावत्, यदिवा एकस्मिन्**नसङ्ख्याततमे भागे** भवन्ति, उत बहुषु **सङ्ख्येयेषु भागेषु** भवन्ति, आहोश्विद्बहु**ष्वसङ्ख्येयेषु भागेषु** भवन्ति, अथ **सर्वलोके** भवन्तीति पञ्च पृच्छास्थानानि। अत्र निर्वचनसूत्रस्येयं भावना- इहानुपूर्वीद्रव्याणि त्र्यणुकस्कन्धादीन्यनन्ताणुकस्कन्धपर्यवसानान्युक्तानि, तत्र च सामान्यत एकं द्रव्यमाश्रित्य तथाविधपरिणामवैचित्र्यात् किञ्चिल्लोकस्यैकस्मिन् सङ्ख्याततमे भागे भवति, एकं तत्सङ्ख्यातभागमवगाह्य तिष्ठतीत्यर्थः, अन्यत्तु तदसङ्ख्येयभागमवगाहते, अपरं तु बहूँस्तत्सङ्ख्येयान् भागानवगाहते, अन्यत्तु बहूँस्तदसङ्ख्येयभागानवगाह्य वर्तते। **सव्वलोए वा होज्ज** त्ति इहानन्तानन्तपरमाणुप्रचयनिष्पन्नं **प्रज्ञापना**दिप्रसिद्धाचित्तमहास्कन्धलक्षणमानुपूर्वीद्रव्यं समयमेकं सकललोकावगाहि प्रतिपत्तव्यमिति। कथं पुनरयमचित्तमहास्कन्धः सकललोकावगाही स्यात्? उच्यते, समुद्घातवर्तिकेवलिवत्, तथाहि- लोकमध्यव्यवस्थितोऽसौ प्रथमसमये तिर्यगसङ्ख्यातयोजनविस्तरं सङ्ख्यातयोजनविस्तरं वा

Jain Education International For Private & Personal Use Only www.jainelibrary.org

ऊर्ध्वाधस्तु चतुर्दशरज्ज्वायतं विश्रसापरिणामेन वृत्तं दण्डं करोति, द्वितीये कपाटम्, तृतीये मन्थानम्, चतुर्थे लोकव्याप्तिं प्रतिपद्यते, पञ्चमे अन्तराणि संहरति, षष्ठे मन्थानम्, सप्तमे कपाटम्, अष्टमे तु समये दण्डं संहृत्य खण्डशो भिद्यत इत्येके। **अन्ये** त्वन्यथापि व्याचक्षते, तत्तु **विशेषावश्यका**[१]दवसेयमिति। वाशब्दाः समुच्चये, एवं यथासम्भवमन्यत्रापि।

**णाणादव्वाइं पडुच्चे**त्यादि, नानाद्रव्याण्यानुपूर्वीपरिणामवन्ति **प्रतीत्य प्रकृत्य** वा, अधिकृत्येत्यर्थः, **नियमात्** नियमेन **सर्वलोके** भवन्ति, न सङ्ख्येयादिभागेषु, यतः स लोकाकाशस्य प्रदेशोऽपि नास्ति यत्र सूक्ष्मपरिणामवन्त्यनन्तान्यानुपूर्वीद्रव्याणि न सन्तीति। अनानुपूर्व्यवक्तव्यकद्रव्येषु त्वेकं द्रव्यमाश्रित्य लोकस्यासङ्ख्येयभाग एव वृत्तिः, न सङ्ख्येयभागादिषु, यतोऽनानुपूर्वी तावत् परमाणुरुच्यते, स चैकाकाशप्रदेशावगाढ एव भवति, अवक्तव्यकं तु द्व्यणुकस्कन्धः, स चैकप्रदेशावगाढो द्विपदेशावगाढो वा स्यादिति यथोक्तभागवृत्तितैवेति। नानाद्रव्यभावना पूर्ववद् इति ३।

**[सू० १०९] [१] [१]णेगम-ववहाराणं आणुपुव्विदव्वाइं लोगस्स किं संखेज्जइभागं फुसंति? असंखेज्जइभागं फुसंति? संखेज्जे भागे फुसंति? असंखेज्जे भागे फुसंति? सव्वलोयं फुसंति? एगदव्वं पडुच्च लोगस्स संखेज्जइभागं वा फुसंति, [२]→ असंखेज्जइभागं वा फुसंति, संखेज्जे वा भागे फुसंति, असंखेज्जे वा भागे फुसंति ←, सव्वलोगं वा फुसंति, णाणादव्वाइं पडुच्च नियमा सव्वलोगं फुसंति।**

**[२] णेगम-ववहाराणं अणाणुपुव्वि[३]दव्वाणं पुच्छा। एगं दव्वं पडुच्च नो संखेज्जइभागं फुसंति, असंखेज्जइभागं फुसंति, नो संखेज्जे भागे फुसंति, नो असंखेज्जे भागे फुसंति, नो सव्वलोगं फुसंति, नाणादव्वाइं पडुच्च नियमा सव्वलोगं फुसंति।**

**[३] एवं अवत्तव्वगदव्वाणि वि भाणियव्वाणि।**

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[चू० १०९]** इदाणिं फुसणा — **किं संखेज्जतिभागे** इत्यादि सव्वं सुत्तसिद्धं। णवरं अवगाहणाणंतरट्ठिते छद्दिसिं पदेसे फुसति त्ति भावेतव्वं।

**[हा० १०९]** साम्प्रतं स्पर्शनाद्वारावसरः, तत्रेदं सूत्रं **णेगम-ववहाराण**मित्यादि निगमनान्तं निगदसिद्धमेव। नवरं क्षेत्र-स्पर्शनयोरयं विशेषः — क्षेत्रमवगाहमात्रम्, स्पर्शना तु षट्स्वपि दिक्षु तद्बहिरपि वेदितव्येति यथेह परमाणोरेकप्रदेशं क्षेत्रं सप्तप्रदेशा स्पर्शनेति। स्यादेतद् — एवं सति अणोरेकत्वं हीयत इति, उक्तं च — *दिग्भागभेदो यस्यास्ति तस्यैकत्वं न युज्यते*। [*विंशतिका विज्ञप्तिमात्रतासिद्धिः १४*] इति, एतदयुक्तम्, अभिप्रायापरिज्ञानात्, न ह्यंशतः स्पर्शना नाम काचित्, अपि तु नैरन्तर्यमेव स्पर्शनां ब्रूम इति, अत्र बहु वक्तव्यम्, तत्तु नोच्यते विस्तरभयादिति। द्वारम् ४।

**[हे० १०९]** उक्तं क्षेत्रद्वारम्, साम्प्रतं स्पर्शनाद्वारमुच्यते - **नेगम-ववहाराण**-मित्यादि। भावना क्षेत्रद्वारवदेव कर्तव्या, नवरं क्षेत्र-स्पर्शनयोरयं विशेषः - क्षेत्रम् अवगाहाक्रान्तप्रदेशमात्रम्, स्पर्शना तु षड्दिक्कैः प्रदेशैस्तद्बहिरपि भवति, तथा च परमाणुद्रव्यमाश्रित्य तावदवगाहना-स्पर्शनयोरन्यत्रोक्तो भेदः - *एगपएसोगाढं सत्तपएसा य से फुसण* [ ]त्ति, अस्यार्थः - परमाणुद्रव्यमवगाढं तावदेकस्मिन्नेवाकाशप्रदेशे, स्पर्शना तु **से** तस्य सप्तप्रदेशा भवति[1], षड्दिग्व्यवस्थितान् षट् प्रदेशान् यत्रावगाहस्तं च स्पृशतीत्यर्थः, एवमन्यत्रापि क्षेत्र-स्पर्शनयोर्भेदो भावनीयः।

अत्र **सौगताः** प्रेरयन्ति - यदि परमाणोः षड्दिक्स्पर्शनाऽभ्युपगम्यते तर्ह्येकत्वमस्य हीयते, तथाहि - प्रष्टव्यमत्र किं येनैव स्वरूपेणासौ पूर्वाद्यन्यतरदिशा सम्बद्धस्तेनैवान्य-दिग्भिरुत स्वरूपान्तरेण ? यदि तेनैव तदा अयं पूर्वदिक्सम्बन्धोऽयं चापरदिक्सम्बन्ध इत्यादिविभागो न स्यात्, एकस्वरूपत्वात्, विभागाभावे च षड्दिक्सम्बन्धवचनमुपप्लवत एव। अथापरो विकल्पः कल्प्यते तर्हि तस्य षट्स्वरूपापत्त्या एकत्वं विशीर्यते, उक्तं च - *दिग्भागभेदो यस्यास्ति तस्यैकत्वं न युज्यते* [*विंशतिका विज्ञप्तिमात्रतासिद्धिः १४*] इति।

अत्र प्रतिविधीयते - इह परमाणुद्रव्यमादि-मध्या-ऽन्तादिविभागरहितं निरंशमेकस्वरूपमिष्यते, अतः सांशवस्तुसम्भवित्वात् परोक्तं विकल्पद्वयं निरास्पदमेव।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अथानभ्युपगम्यमानाऽपि परमाणोः सांशताऽनन्तरोक्तविकल्पबलेनाऽऽपाद्यते, ननु भवन्तोऽपि तर्हि प्रष्टव्याः - क्वचिद् विज्ञानसन्ताने विवक्षितः कश्चिद्विज्ञानलक्षणः क्षणः स्वजनकपूर्वक्षणस्य कार्यं स्वजन्योत्तरक्षणस्य कारणमित्यत्र **सौगतानां** तावदविप्रतिपत्तिः, तत्रेहापि विचार्यते- किमसौ येन स्वरूपेण पूर्वक्षणस्य कार्यं तेनैवोत्तरक्षणस्य कारणमुत स्वरूपान्तरेण ? यद्याद्यः पक्षस्तर्हि यथा पूर्वापेक्षयाऽसौ कार्यं तथोत्तरापेक्षयापि स्यात्, यथा वा उत्तरापेक्षया कारणं तथा पूर्वापेक्षयाऽपि स्यात्, एकस्वरूपत्वात् तस्येति। अथ द्वितीयः पक्षस्तर्हि तस्य सांशत्वप्रसङ्गोऽत्रापि दुर्वारः स्यात् । अथ निरंश एवासौ ज्ञानक्षणोऽकार्याकारणरूपतत्तद्वस्तुव्यावृत्तत्वात् तथा तथा व्यपदिश्यते न पुनस्तस्यानेकस्वरूपत्वमस्ति, नन्वस्माकमपि नेदमुत्तरमतिदुर्लभं स्यात्, यतो द्रव्यतया निरंश एव परमाणुस्तथाविधाचिन्त्यपरिणामत्वात् दिक्षट्केन सह नैरन्तर्येणावस्थितत्वात् तत्स्पर्शक उच्यते, न पुनस्तत्रांशैः काचित् स्पर्शना समस्तीति, अत्र बहु वक्तव्यम्, तत्तु नोच्यते स्थानान्तरेषु चर्चितत्वादित्यलं विस्तरेण ४।

**[सू० ११०] [१] णेगम-ववहाराणं आणुपुव्विदव्वाइं कालओ केवचिरं होंति ? [१]एगं दव्वं पडुच्च जहण्णेणं एगं समयं उक्कोसेणं असंखेज्जं कालं, नाणादव्वाइं पडुच्च णियमा सव्वद्धा।**

**[२] [२]→ एवं दोन्नि वि।←**

**[चू० ११०] कालतो केवचिरं** इत्यादि । आणुपुव्विदव्वाण आनुपूर्वित्वोत्पादप्रथमसमयारद्धं संताणतो अव्वोच्छिन्नं जहण्णुक्कोसतो कालमग्गणाते एगा-ऽणेगदव्वेसु समयादि यावत् परा असंख्येयैव स्थितिः, सेसं सुत्तसिद्धं। अणाणुपुव्वि -अव्वत्तव्वेसु वि एवं चेव।

**[हा० ११०]** साम्प्रतं कालद्वारम्, तत्रेदं सूत्रं **णेगम-ववहाराण**मित्यादि आनिगमनं पाठसिद्धमेव। णवरमियमित्थं भावणा – दोण्हं परमाणूणं एक्को परमाणू संजुत्तो समयं चिट्ठिऊण विजुत्तो, एवं आणुपुव्विदव्वं **जहण्णेणं एगं समयं** होति, **उक्कोसेणं**

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**असंखेज्जं कालं** चिट्ठिऊण विउत्तो, एवमसंखेज्जं कालं । **णाणादव्वाइं** पुण **पडुच्च सव्वद्धा** सर्वकालमेव विद्यन्ते । अणाणुपुव्वीसु तु एगो परमाणू एगसमयं एक्कल्लगो होऊण एक्केण वा दोहि वा बहूहि वा परमाणूहिं समं जुज्जइ, एवं जहण्णेणं एक्कं समयं होति, उक्कोसेणं असंखेज्जकालं एक्कल्लगो होऊण संजुज्जइ, एवमसंखेज्जं कालं । णाणादव्वाइं पुण पडुच्च सव्वकालं विज्जंति । एवं अवत्तव्वगेसु वि एगदव्वं पडुच्च दो परमाणू एगसमयं ठाऊण विजुज्जंति अण्णेणं वा संजुज्जंति एवं अवत्तव्वगदव्वं जहण्णेणं एक्कं समयं होइ, उक्कोसेणं असंखेज्जं कालं चिट्ठिऊण विउज्जति संजुज्जति वा, एवं असंखेज्जं कालं । णाणादव्वाइं पडुच्च सव्वद्धं चिट्ठंति । द्वारम् ५ ।

[हे० ११०] उक्तं स्पर्शनाद्वारम्, इदानीं कालद्वारं बिभणिषुराह - **नेगम-ववहाराण**मित्यादि । **नैगम-व्यवहारयोरानुपूर्वीद्रव्याणि कालतः** कालमाश्रित्य **कियच्चिरं** कियन्तं कालं **भवन्ति** आनुपूर्वीत्वपर्यायेणावतिष्ठन्ते ? अत्रोत्तरम्-**एगं दव्व-**मित्यादि, इयमत्र भावना - परमाणुद्वयादेरपरैकादिपरमाणुमीलनेऽपूर्वं किञ्चिदानुपूर्वीद्रव्यं समुत्पन्नम्, ततः समयादूर्ध्वं पुनरप्येकाद्यणौ वियुक्तेऽपगतस्तद्भाव इत्येकमानुपूर्वीद्रव्यमधिकृत्य जघन्यतः समयोऽवस्थितिकालः, यदा तु तदेवासङ्ख्यातं कालं तद्भावेन स्थित्वाऽनन्तरोक्तरूपेण वियुज्यते तदा उत्कृष्टतोऽसङ्ख्येयोऽवस्थितिकालः प्राप्यते, अनन्तं कालं पुनर्नावतिष्ठते, उत्कृष्टाया अपि पुद्गलसंयोगस्थितेरसङ्ख्येयकालत्वादिति। नानाद्रव्याणि बहूनि पुनरानुपूर्वीद्रव्याण्यधिकृत्य सर्वाद्धा स्थितिर्भवति, नास्ति स कश्चित् कालो यत्रानुपूर्वीद्रव्यविरहितोऽयं लोकः स्यादिति भावः । अनानुपूर्व्यवक्तव्यकद्रव्येष्वपि जघन्यादिभेदभिन्न एतावानेव स्थितिकालः । तथाहि-कश्चित् परमाणुरेकं समयमेकाकी भूत्वा ततः परमाण्वादिना अन्येन सह संयुज्यते, इत्थमेकमनानुपूर्वीद्रव्यमधिकृत्य जघन्यतः समयोऽवस्थितिकालः, यदा तु स एवासङ्ख्यातं कालं तद्भावेन स्थित्वा अन्येन परमाण्वादिना सह संयुज्यते तदोत्कृष्टतोऽसङ्ख्येयोऽवस्थितिकालः संप्राप्यते, नानाद्रव्यपक्षस्तु पूर्ववदेव भावनीयः । अवक्तव्यकद्रव्यमपि परमाणुद्वयलक्षणं यदा समयमेकं संयुक्तं स्थित्वा ततो वियुज्यते तदवस्थमेव वाऽन्येन परमाण्वादिना संयुज्यते तदा तस्यावक्तव्यकद्रव्यतया

Jain Education International For Private & Personal Use Only www.jainelibrary.org

जघन्यत: समयोऽवस्थानं लभ्यते, यदा तु तदेवासङ्ख्यातं कालं तद्भावेन स्थित्वा विघटते तदवस्थमेव वाऽन्येन परमाण्वादिना संयुज्यते तदोत्कृष्टत: अवक्तव्यकद्रव्यतयाऽसंख्यातं कालमवस्थानं प्राप्यते, नानाद्रव्यपक्षस्तु तथैव भावनीय इति ५।

**[सू० १११] [१] णेगम-ववहाराणं आणुपुव्विदव्वाणमंतरं[१] कालतो केवचिरं होति ? एगं[२] दव्वं पडुच्च जहण्णेणं एगं[३] समयं, उक्कोसेणं अणंतं कालं, नाणादव्वाइं पडुच्च णत्थि अंतरं।**

**[२] णेगम-ववहाराणं अणाणुपुव्विदव्वाणं[४] अंतरं कालतो केवचिरं होइ ? एगं दव्वं पडुच्च जहण्णेणं एगं समयं, उक्कोसेणं असंखेज्जं कालं, नाणादव्वाइं पडुच्च णत्थि अंतरं।**

**[३] [५]→ णेगम-ववहाराणं अवत्तव्वगदव्वाणं[६] अंतरं कालतो केवचिरं होति ? एगं दव्वं पडुच्च जहण्णेणं एगं समयं, उक्कोसेणं अणंतं कालं, नाणादव्वाइं पडुच्च णत्थि अंतरं।←**

**[चू० १११] केवतियं कालं अंतरं** इत्यादि। **आणुपुव्विदव्वाणं अंतरं** ति जं तिपदेसादि आदिट्ठं आणुपुव्विदव्वं तं ततो विगतं जाव पुणो तव्विहं दव्वत्तं ण पावत्ति(ति) तावंतरं भन्नति, जं आणुपुव्विदव्वं जेहिं परमाणूहिं णिप्फण्णं तं तेण परमाणुसंघातदव्वत्तणेण विद्धत्थं ते परमाणू अण्णदव्वत्तणं गंता पुणो केवतिकालेणं ते चेव समेया तं आदिट्ठं पुव्वदव्वत्तणं पाविस्संति, उत्तरं सुत्तसिद्धं। एगादिसमयंतरं विस्ससापरिणामहेतुतो वाच्यं। अणंतकालंतरं पुण दव्वाण एगदुपदेसिगादि जाव अणंतपदेसुत्तरो खंधो ताव अणंतट्ठाण-हेतुत्तणतो भाणितव्वं। णाणादव्वेहिं लोगस्स असुन्नत्तणतो **णत्थि अंतरं। अणाणुपुव्वि-दव्वाणं अंतरं उक्कोसतो असंखेज्जं कालं** । कहं ? उच्यते– अणाणुपुव्विदव्वं अन्नेण अणाणुपुव्विदव्वेण वा अव्वत्तव्वगदव्वेण वा आणुपुव्विदव्वेण वा सह संजुत्तं उक्कोसठितिं होतुं ठितिअंते ततो भिण्णं णियमा परमाणू चेव भवति, अण्णदव्वा-णवेक्खत्तणतो, एवं उक्कोसेण असंखेज्जो अंतरकालो भणितो, सेसं सुत्तसिद्धं,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**अवत्तव्वगदव्वाण** वि **अंतरं उक्कोसेण अणंतकालो**, कहं ? उच्यते— जं आदिट्ठं अवत्तव्वगदव्वं तं जहा(दा?) तद्दव्वत्तेण विगतं ततो ते तस्स परमाणवो अण्णअवत्तव्वग-दव्वेहिं आणुपुव्विदव्वेहिं अणाणुपुव्विदव्वेहिं संजुत्ता जहण्णमज्झुक्कोससंठितीहि य अणंतकालं परोप्परतो विसंघया होतुं पुणो ते चेव दो वि आदिट्ठअवत्तवगदव्वपरमाणू विस्ससापरिणामहेतुतो परोप्परं संबद्धा पुव्वसमं चेव अवत्तव्वगदव्वत्तं लभंति, एवं तेसिं अंतरं अणंतकालो दिट्ठो।

**[हा० १११]** अधुनाऽन्तरद्वारम्, तत्रेदं सूत्रं **णेगम-ववहाराणं आणुपुव्विदव्वाणं अंतरं कालओ केच्चिरं होती**त्यादि। इह त्र्यादिस्कन्धास्त्र्यादिस्कन्धतां विहाय पुनर्यावता कालेन त एव तथा भवन्तीत्यसावन्तरम्। **एगदव्वं** आणुपुव्विदव्वं **पडुच्च जहण्णेणं** सव्वत्थोवतया **एगं समयं** काललक्खणं। कहं ? तिपदेसियादियाओ परमाणुमादी विउत्तो समयं चिट्ठिऊण पुणो तेणं दव्वेणं विस्ससा-पओगातो तहेव संजुज्जइ एवमेगं समयं अंतरं ति। **उक्कोसेणं** सव्वबहुगतया **अणंतं कालं**। कहं ? ताओ चेव तिपदेसियादियाओ सो चेव परमाणुमाई विउत्तो अण्णेसु परमाणु-द्व्यणुक-त्र्यणुकाद्येकोत्तरवृद्ध्या अनन्ताणुकावसानेषु स्वस्थाने प्रतिभेदमनन्तव्यक्तिव(म)त्सु ठाणेसु उक्कोसमंतराधिकारातो असइं [उक्कोसग]ठितीए अच्छिऊण कालस्स अणन्तत्तणओ घंसणघोलणाए पुणो वि नियमेण चेव तेणं दव्वेणं पओग-विस्ससाभावओ तहेव संजुज्जइ त्ति, एवमुक्कोसतो अणंतं कालं अंतरं भवति। **णाणादव्वाइं पडुच्च णत्थि अंतरं**, इह लोके सदैव तद्भावादिति भावना। अणाणुपुव्विचिंताए **एगं दव्वं पडुच्च जहण्णेणं एगं समयं ति**, कहं ? एगो परमाणू अण्णेणाऽणुमादिणा घडिऊण समयं चिट्ठित्ता विउज्जति, एवं एगसमयमन्तरं। **उक्कोसेणं असंखेज्जं कालं**, कहं ? अणाणुपुव्विदव्वं अण्णेण अणाणुपुव्विदव्वेण अवत्तव्वगदव्वेणं आणुपुव्विदव्वेण वा संजुत्तं उक्कोसट्ठितिय-मसंखेज्जकालनियमिति(त)लक्खणं होऊण ठितिअन्ते तओ भिण्णो नियमा परमाणू चेव भवति अण्णदव्वाणवेक्खत्तणओ, एवं उक्कोसेणं असंखेज्जकालं ति। एत्थ चोदगो भणति— णणु अणंतपदेसगाणुपुव्वीदव्वसंजुत्तं खंडखंडेहिं विचडिऊण



Jain Education International For Private & Personal Use Only www.jainelibrary.org

द्व्यणुकादिभावमपरित्यजदेवान्यान्यस्कन्धसम्बन्धस्थित्यपेक्षयाऽस्यानन्तकालमेवान्तरं कस्मान्न भवति ? इति, अत्रोच्यते – परमसंयोगस्थितेरप्यसंख्येय-कालादूर्ध्व-मभावादणुत्वेन तस्य संयुक्तत्वादणुत्वत एव वियोगभावादिति । कथमिदं ज्ञायते इति चेत्, उच्यते – आचार्यप्रवृत्तेः, तथाहि – इदमेव सूत्रं ज्ञापकमित्यलं चसूर्येति ।

**णाणादव्वाइं** तु पूर्ववत् । अवत्तव्वगचिंताए एगदव्वं पडुच्च जहण्णेणं एगं समयं एवं दुपरमाणुखंधो विउज्जिऊण एगं समयं ठाऊण पुणो संजुज्जइ अण्णेण वा आणु-पुव्वादिणा संजुज्जिय समयमेगं तहा चिट्ठिऊण पुणो विजुज्जइ त्ति, अवत्तव्वगं चेव भवतीत्यर्थः । **उक्कोसेणं अणंतकालं,** कहं ? एगमवत्तव्वगदव्वं अवत्तव्वगत्तेण विजुज्जिऊण अण्णेसु परमाणु-द्व्यणुक-त्र्यणुकाद्येकोत्तरवृद्ध्याऽनन्ताणुकावसानेषु स्वस्थाने प्रतिभेदमनन्तव्यक्तिव(म)त्सु ठाणेसुक्कोसंतराधिकारतो असतिं उक्कोसगठितीए अच्छिऊण कालस्स अणंतत्तणओ घंसणघोलणातो पुणो वि ते चेव परमाणू विस्ससापओगतो तहेव जुज्जंति, एवमुक्कोसतो अणंतं कालं अंतरं हवति । **णाणादव्वाइं पडुच्च णत्थि अंतरं,** इह लोके सदैव तद्भावादिति भावना । द्वारम् ६ ।

**[हे० १११]** अन्तरद्वारं प्रतिपिपादयिषुराह - **नेगम-ववहाराण**मित्यादि । **नैगम-व्यवहारयोरानुपूर्वीद्रव्याणामन्तरं कालतः कियच्चिरं भवती**ति प्रश्नः, **अन्तरं** व्यवधानम्, तच्च क्षेत्रतोऽपि भवति, यथा भूतल-सूर्ययोरष्टौ योजनशतान्यन्तरमित्यत-स्तद्व्यवच्छेदार्थमुक्तं **कालतः** कालमाश्रित्य । तदयमत्रार्थः - आनुपूर्वीद्रव्याण्यानुपूर्वी-स्वरूपतां परित्यज्य कियता कालेन तान्येव पुनस्तथा भवन्ति ? आनुपूर्वीत्वपरित्याग-पुनर्लाभयोरन्तरे कियान् कालो भवतीत्यर्थः । अत्र निर्वचनम्-**एगं दव्व**मित्यादि, इयमत्र भावना-इह विवक्षितं त्र्यणुकस्कन्धादिकं किमप्यानुपूर्वीद्रव्यं विश्रसापरिणामात् प्रयोगपरिणामाद्वा खण्डशो वियुज्य परित्यक्तानुपूर्वीभावं सञ्जातम्, एकस्माच्च समयादूर्ध्वं विश्रसादिपरिणामात् पुनस्तैरेव परमाणुभिस्तथैव तन्निष्पन्नमित्येवं जघन्यतः सर्वस्तोकतया एकं द्रव्यमाश्रित्याऽऽनुपूर्वीत्वपरित्याग-पुनर्लाभयोरन्तरे समयः प्राप्यते, उत्कृष्टतः सर्वबहुतया पुनरन्तरमनन्तं कालं भवति, तथाहि-तदेव विवक्षितं किमप्यानुपूर्वीद्रव्यं तथैव

Jain Education International For Private & Personal Use Only www.jainelibrary.org

भिन्नम्, भित्त्वा च ते परमाणवोऽन्येषु परमाणु-द्व्यणुक-त्र्यणुकादिषु अनन्ताणुक-स्कन्धपर्यन्तेषु अनन्तस्थानेषूत्कृष्टान्तराधिकारादसकृत् प्रतिस्थानमुत्कृष्टां स्थितिमनुभवन्तः पर्यटन्ति, कृत्वा चेत्थं पर्यटनं कालस्यानन्तत्वाद् विश्रसादिपरिणामतो यदा तैरेव परमाणुभिस्तदेव विवक्षितमानुपूर्वीद्रव्यं निष्पद्यते तदाऽनन्त उत्कृष्टान्तरकालः प्राप्यते। नानाद्रव्याण्यधिकृत्य पुनर्नास्त्यन्तरम्, न हि स कश्चित् कालोऽस्ति यत्र सर्वाण्यप्यानुपूर्वीद्रव्याणि युगपदानुपूर्वीभावं परित्यजन्ति, अनन्तानन्तैरानुपूर्वीद्रव्यैः सर्वदैव लोकस्याशून्यत्वादिति भावः।

अनानुपूर्वीद्रव्यान्तरकालचिन्तायाम् **एगं दव्वं पडुच्च जहन्नेणं एक्कं समयं** ति, इह यदा किञ्चिदनानुपूर्वीद्रव्यं परमाणुलक्षणमन्येन परमाणु-द्व्यणुक-त्र्यणुकादिना केनचिद् द्रव्येण सह संयुज्य समयादूर्ध्वं वियुज्य पुनरपि तथास्वरूपमेव भवति तदा समयलक्षणो जघन्यान्तरकालः प्राप्यते, **उक्कोसेणं असंखेज्जं कालं** ति तदेवानानुपूर्वीद्रव्यं यदान्येन परमाणु-द्व्यणुक-त्र्यणुकादिना केनचिद् द्रव्येण सह संयुज्यते, तत्संयुक्तं चासङ्ख्येयं कालं स्थित्वा वियुज्य पुनस्तथास्वरूपमेव भवति, तदाऽसङ्ख्यात उत्कृष्टान्तरकालो लभ्यते।

अत्राह - ननु अनानुपूर्वीद्रव्यं यदा अनन्तानन्तपरमाणुप्रचितस्कन्धेन सह संयुज्यते, तत्संयुक्तं चासङ्ख्येयं कालमवतिष्ठते, ततोऽसौ स्कन्धो भिद्यते, भिन्ने च तस्मिन् यस्तस्माल्लघुस्कन्धो भवति तेनापि सह संयुक्तमसङ्ख्येयं कालं तिष्ठति, ततस्तस्मिन्नपि भिद्यमाने यस्तस्माल्लघुतरः स्कन्धो भवति तेनापि संयुक्तमसङ्ख्यातं कालमवतिष्ठते, पुनस्तस्मिन्नपि भिद्यमाने यस्तस्माल्लघुतमः स्कन्धो भवति तेनापि संयुक्तमसङ्ख्येयं कालमवतिष्ठते, इत्येवं तत्र भिद्यमाने क्रमेण कदाचिदनन्ता अपि स्कन्धाः संभाव्यन्ते, तत्र च प्रतिस्कन्धसंयुक्तमनानुपूर्वीद्रव्यं यदा यथोक्तां स्थितिमनुभूय तत एकाक्येव भवति तदा तस्य यथोक्तानन्तस्कन्धस्थित्यपेक्षया अनन्तोऽपि कालोऽन्तरे प्राप्यते, किमित्यसङ्ख्येय एवोक्तः ? अत्रोच्यते-स्यादेवं हन्त यदि संयुक्तोऽणुरेतावन्तं कालं तिष्ठेत्, एतच्च नास्ति, पुद्गलसंयोगस्थितेरुत्कृष्टतोऽप्यसङ्ख्येयकालत्वादित्युक्तमेव। अथ ब्रूयात् - यस्मिन् स्कन्धे संयुज्यतेऽसौ परमाणुः स चेत् स्कन्धोऽसङ्ख्येयकालाद्भिद्यते तर्ह्येतावतैव चरितार्थः पुद्गलसंयोगासङ्ख्येयकालनियमः, विवक्षितपरमाणुद्रव्यस्य तु वियोगो मा भूदपीति,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

नैतदेवम्, यस्यान्येन संयोगो जातस्तस्यासङ्ख्येयकालाद् वियोगश्चिन्त्यते, यदि च परमाण्वाश्रयः स्कन्धो वियुज्यते तर्हि परमाणोः किमायातम्, तस्यान्यसंयोगस्य तदवस्थत्वात् ? तस्मादणुत्वेनासौ संयुक्तोऽसङ्ख्येयकालादणुत्वेनैव वियोजनीय इति यथोक्त एवान्तरकालो न त्वनन्त इति। कथं पुनरणुत्वेनैव तस्य वियोगश्चिन्तनीय इति ज्ञायते इति चेत्, सूत्रप्रामाण्यात्, प्रस्तुतसूत्रे **व्याख्याप्रज्ञप्त्या**दिषु च परमाणोः पुनः परमाणुभवनेऽसङ्ख्येयरूपस्यैवान्तरकालस्योक्तत्वादित्यलं विस्तरेण। **णाणादव्वाइं पडुच्चे**त्यादि पूर्ववद्भावनीयम्।

अवक्तव्यकद्रव्याणामन्तरचिन्तायाम् **एगं दव्वं पडुच्चे**त्यादि, अत्र भावना-इह कश्चिद् द्विप्रदेशिकः स्कन्धो विघटितः स्वतन्त्रं परमाणुद्वयं जातम्, समयं चैकं तथा स्थित्वा पुनस्ताभ्यामेव परमाणुभ्यां द्विप्रदेशिकः स्कन्धो निष्पन्न; अथवा विघटित एव द्विप्रदेशिकः स्कन्धोऽन्येन परमाण्वादिना संयुज्य समयादूर्ध्वं पुनस्तथैव वियुक्त इत्यवक्तव्यकस्य पुनरप्यवक्तव्यकभवने उभयथाऽपि समयोऽन्तरे लभ्यते। **उक्कोसेणं अणंतं कालं** ति, कथम् ? अत्रोच्यते - अवक्तव्यकद्रव्यं किमपि विघटितं विशकलितपरमाणुद्वयं जातम्, तच्चानन्तैः परमाणुभिरनन्तैर्द्व्यणुकस्कन्धैरनन्तैस्त्र्यणुकस्कन्धैर्यावदनन्तैरनन्ताणुकस्कन्धैः सह क्रमेण संयोगमासाद्य उत्कृष्टान्तराधिकाराच्च प्रतिस्थानमसकृदुत्कृष्टां संयोगस्थितिमनुभूय कालस्यानन्तत्वात् यदा पुनरपि तथैव द्व्यणुकस्कन्धतया संयुज्यते तदा अवक्तव्यकैकद्रव्यस्य पुनस्तथाभवने अनन्तोऽन्तरकालः प्राप्यते। नानाद्रव्यपक्षभावना लोके सर्वदैव तद्भावात् पूर्ववद् वक्तव्या ६।

**[सू० ११२] [१] णेगम-ववहाराणं आणुपुव्वीदव्वाइं[१] सेस[२]दव्वाणं[३] कइभागे होज्जा ? किं संखेज्जइभागे होज्जा ? असंखेज्जइभागे होज्जा ? संखेज्जेसु भागेसु होज्जा ? असंखेज्जेसु भागेसु होज्जा ? नो संखेज्जइभागे होज्जा, नो असंखेज्जइभागे होज्जा, नो संखेज्जेसु भागेसु होज्जा, नियमा असंखेज्जेसु भागेसु होज्जा।**

**[२] णेगम-ववहाराणं अणाणुपुव्वीदव्वाइं सेसदव्वाणं कइभागे**

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**होज्जा ? किं संखेज्जइभागे होज्जा ? असंखेज्जइभागे होज्जा ? संखेज्जेसु भागेसु होज्जा ? असंखेज्जेसु भागेसु होज्जा ? नो संखेज्जइभागे होज्जा, असंखेज्जइभागे होज्जा, नो संखेज्जेसु भागेसु होज्जा, नो असंखेज्जेसु भागेसु होज्जा।**

**[३] एवं अवत्तव्वगदव्वाणि[४] वि।**

[चू० ११२] **आणुपुव्विदव्वाइं सेसगदव्वाणं कतिभागे** इत्यादि, **सेसगदव्व** त्ति अणाणुपुव्वीदव्वा अवत्तव्वगदव्वा य दो वि एक्को रासी कतो, ततो पुच्छा चउरो, एत्थ णिदरिसणं इमं— सतस्स संखेज्जतिभागो पंच, पंचभागे सतस्स वीसा भवति, सतस्स असंखेज्जइभागो दस, दसभागे दस चेव भवंति[१], सतस्स संखेज्जेसु भागेसु दोमादिगेसु पंचभागेसु चत्तालीसादी भवंति[१], सतस्स असंखेज्जेसु भागेसु अट्ठसु दसभागेसु असीती भवति, चोदक आह— णणु एतेण णिदंसणेण सेसगदव्वाण आणुपुव्विदव्वा थोवतरा भवंति, जतो सतस्स असीती थोवतर त्ति। आचार्य आह— ण मया भन्नति तब्भागसमा ते दव्वा तब्भागत्थेसु वा दव्वेसु ते समा मया भन्नति, सेसदव्वाणं आणुपुव्विदव्वा असंखेज्जेसु भागेसु अधिया भवंति, सेसदव्वा असंखेज्जे भागे भवंतीत्यर्थः, अणाणुपुव्विदव्वा अवत्तव्वगदव्वा य आणुपुव्विदव्वाणं असंखेज्जतिभागे भवंति। सेसं सुत्तसिद्धं।

[हा० ११२] इदानीं भागद्वारम्। तत्रेदं सूत्रं **णेगमववहाराणं आणुपुव्विदव्वाइं सेसदव्वाणं कतिभागे होज्जा** इत्यादि, **सेसदव्व** त्ति अणाणुपुव्विदव्वा अवत्तव्वगदव्वा य, यद्वा एको रासी कतो ततो पुच्छा[१] चतुरो। एत्थ णिदरिसणं इमं-सतस्स संखेज्जतिभागो[२] पंच, पंचभागे सतस्स वीसा भवति, सतस्स असंखेज्जतिभागो दस, दसभागे दस चेव भवंति, सतस्स संखेज्जेसु भागेसु दोमाइएसु पंचभागेसु चत्तालीसादी भवंति, सतस्स असंखेज्जेसु भागेसु अट्ठसु दसभागेसु असीति भवति। चोदग आह— णणु एतेण णिदंसणेण सेसगदव्वाण आणुपुव्विदव्वा थोवतरा भवंति, जतो सतस्स असीति थोवतर त्ति।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

आचार्य आह — ण मया भण्णइ तब्भागसमा ते दव्वा[३] तब्भागत्थेसु वा दव्वेसु ते समा, किंतु सेसदव्वाणं आणुपुव्विदव्वा **असंखेज्जेसु भागेसु** अधिया भवंतीति वक्कसेसो, सेसदव्वा असंखेज्जभागे भवन्तीत्यर्थः। अणाणुपुव्विदव्वा अवत्तव्वगदव्वा य आणुपुव्विदव्वाणं असंखेज्जभागे भवंति। सेसं सुत्तसिद्धमिति। द्वारम् ७।

[हे० ११२] उक्तमन्तरद्वारम्, साम्प्रतं भागद्वारं निर्दिदिक्षुराह- **नेगम-ववहाराण-** मित्यादि। नैगम-व्यवहारयोस्त्र्यणुकस्कन्धादीन्यनन्ताणुकस्कन्धपर्यन्तानि सर्वाण्याप्यानु**-पूर्वीद्रव्याणि शेषद्रव्याणां** समस्तानामनानुपूर्व्यवक्तव्यकद्रव्यलक्षणानां **कतिभागे होज्ज** त्ति कतिथे भागे भवन्तीत्यर्थः, किं सङ्ख्याततमे भागे भवन्ति यथा असत्कल्पनया शतस्य विंशतिः, उताऽसङ्ख्याततमे भागे भवन्ति यथा शतस्यैव दश ? अथ सङ्ख्यातेषु भागेषु भवन्ति यथा शतस्यैव चत्वारिंशत् षष्टिर्वा, आहोश्विदसङ्ख्यातेषु भागेषु भवन्ति यथा शतस्यैवाशीतिरिति प्रश्नः। अत्र निर्वचनम्-**नो संखेज्जइभागे होज्जा** इत्यादि। **नियमा असंखेज्जेसु भागेसु होज्ज** त्ति, इह तृतीयार्थे सप्तमी, ततश्चानुपूर्वीद्रव्याणि शेषेभ्योऽनानुपूर्व्यवक्तव्यकद्रव्येभ्योऽसङ्ख्येयैर्भागैः अधिकानि भवन्तीति वाक्यशेषो द्रष्टव्यः। ततश्चायमर्थः प्रतिपत्तव्यः- आनुपूर्वीद्रव्याणि शेषद्रव्येभ्योऽसङ्ख्येयगुणानि, शेषद्रव्याणि तु तदसङ्ख्येयभागे वर्तन्ते, न पुनः शतस्याशीतिरिवानुपूर्वीद्रव्याणि शेषेभ्यः स्तोकानीति। कस्मादेवं व्याख्यायते ? स्तोकान्यपि तानि भवन्त्विति चेत्, नैतदेवम्, अघटमानकत्वात्, तथाहि-अनानुपूर्व्यवक्तव्यकद्रव्येषु एकाकिनः परमाणुपुद्गला द्व्यणुकाश्च स्कन्धा इत्येतावन्त्येव द्रव्याणि लभ्यन्ते, शेषाणि तु त्र्यणुकस्कन्धादीन्यनन्ताणुस्कन्धपर्यन्तानि द्रव्याणि[१] समस्तान्यप्यानुपूर्वीरूपाण्येव, तानि च पूर्वेभ्योऽसङ्ख्येयगुणानि, यत उक्तम्- *एएसि णं भंते ! परमाणुपोग्गलाणं संखेज्जपएसियाणं असंखेज्जपएसियाणं अणंतपएसियाण य खंधाणं कयरे कयरेहिंतो अप्पा वा बहुया वा तुल्ला वा विसेसाहिया वा ? गोयमा ! सव्वत्थोवा अणंतपएसिया खंधा, परमाणुपोग्गला अणंतगुणा, संखेज्जपएसिया खंधा संखेज्जगुणा, असंखेज्जपएसिया खंधा असंखेज्जगुणा [प्रज्ञापनासूत्रे तृतीयपदे सू० ३३०]*। तदत्र सूत्रे पुद्गलजातेः सर्वस्या अपि सकाशादसङ्ख्यातप्रदेशिकाः स्कन्धा असङ्ख्यातगुणा उक्ताः,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

ते चाऽऽनुपूर्व्यामन्तर्भवन्ति, अतस्तदपेक्षया आनुपूर्वीद्रव्याणि शेषात् समस्तादपि द्रव्यादसङ्ख्यातगुणानि, किं पुनरनानुपूर्व्यवक्तव्यकद्रव्यमात्रात्, ततो यथोक्तमेव व्याख्यानं कर्तव्यमित्यलं विस्तरेण। **अणाणुपुव्वीदव्वाइ**मित्यादि इहानानुपूर्वीद्रव्याण्यवक्तव्यकद्रव्याणि च शेषद्रव्याणां यथाऽसङ्ख्याततम एव भागे भवन्ति, न शेषभागेषु, तथाऽनन्तरोक्तन्यायादेव भावनीयमिति ७।

**[सू० ११३] [१] णेगम-ववहाराणं आणुपुव्वीदव्वाइं कयरम्मि भावे होज्जा? किं उदइए भावे[१] होज्जा? उवसमिए भावे[२] होज्जा? खाइए भावे होज्जा? खाओवसमिए भावे होज्जा? पारिणामिए भावे होज्जा? सन्निवाइए भावे होज्जा? णियमा साइपारिणामिए भावे होज्जा।**

**[२] [३]→ अणाणुपुव्विदव्वाणि अवत्तव्वयदव्वाणि य एवं चेव भाणियव्वाणि।←**

[चू० ११३] **कतरम्मि भावे** इत्यादि। भवनं भूतिर्वा भावः औदयिकादिः, स पञ्चधा सन्निपातिकश्च। एत्थ परिणतिलक्खणो **पारिणामिको**। सो दुविधो-सादि अणादी य। अब्भिंदधणुमादिएसु सादी, धम्मा-ऽधम्मादिएसु[१] अणादी य। आणुपुव्विमादिया तिण्णि वि दव्वविकप्पा सातिपारिणामिते भावे भवंति। सेसा उस्सण्णं जीवसंभवा भावा, तेण तेसिं पडिसेधो। सेसं सुत्तसिद्धं।

[हा० ११३] साम्प्रतं भावद्वारम्, तत्रेदं सूत्रं **णेगम-ववहाराणं आणुपुव्विदव्वाइं कतरम्मि भावे होज्ज** ती(त्ती)त्यादि, इह कर्मविपाक उदयः, उदय एवौदयिकः, स चाष्टानां कर्मप्रकृतीनामुदयः, तत्र भवस्तेन वा निर्वृत्त औदयिकः। उपशमो मोहनीयकर्मणोऽनुदयः, स एवौपशमिकस्तत्र भवस्तेन वा निर्वृत्त इति। क्षयः कर्मणोऽत्यन्तविनाशः, स एव क्षायिकस्तत्र भवस्तेन वा निर्वृत्त इति। कर्मण एव कस्यचिदंशस्य क्षयः कस्यचिदुपशमः, ततश्च क्षयश्चोपशमश्च क्षयोपशमौ, ताभ्यां निर्वृत्तः क्षायोपशमिकः। परिणमनं परिणामः, द्रव्यस्य तथा भाव इत्यर्थः, स एव पारिणामिकः, तत्र भवस्तेन वा निर्वृत्त

Jain Education International For Private & Personal Use Only www.jainelibrary.org

इति। सान्निपातिको य एषामेव द्विकादिसंयोगादुपजायते। एष शब्दार्थः, भावार्थं पुनरमीषां स्वस्थाने एवोपरिष्टाद् वक्ष्यामः। नवरं निर्वचनसूत्रोपयोगीति कृत्वा पारिणामिकभावार्थो लेशतः प्रतिपाद्यत इति। इह परिणामो द्विविधः– सादिरनादिश्च। तत्र धर्मास्तिकायादिद्रव्यत्वाद्यनादिपरिणामः, रूपिद्रव्येष्वादिमान्, तद्यथा अभ्रेन्द्रधनुरादिपरिणाम इति, एवम[व]स्थिते सतीदं निर्वचनसूत्रम्– **णियमा** इत्यादि, **नियमेन** अवश्यन्तया सादिप(पा)रिणामिके भावे भवन्ति, तथापरिणतेरनादित्वाभावाद् उत्कृष्टतो द्रव्याणां विशिष्टैकपरिणामित्वेनासंख्येयकालस्थितेः। शेषं सूत्रसिद्धम्। द्वारम् ८।

**[हे० ११३]** उक्तं भागद्वारम्, साम्प्रतं भावद्वारमाह - **णेगम-ववहाराण**मित्यादि प्रश्नः। अत्र च औदयिकादिभावानां शब्दार्थो भावार्थश्च विस्तरेणोपरिष्टात् स्वस्थान एव वक्ष्यते। अत्र निर्वचनसूत्रे **नियमा साइपारिणामिए भावे होज्ज** त्ति, परिणमनं द्रव्यस्य तेन तेन रूपेण वर्तनं भवनं परिणामः, स एव पारिणामिकः, तत्र भवस्तेन वा निर्वृत्त इति वा पारिणामिकः, स च द्विविधः - सादिरनादिश्च, तत्र धर्मास्तिकायाद्यरूपिद्रव्याणामनादिः परिणामः अनादिकालात्तद्द्रव्यत्वेन तेषां परिणतत्वात्, रूपिद्रव्याणां तु सादिः परिणामः, अभ्रेन्द्रधनुरादीनां तथापरिणतेरनादित्वाभावात्, एवं स्थिते **नियमाद्** अवश्यंतयाऽऽनुपूर्वीद्रव्याणि **सादिपारिणामिक** एव भावे भवन्ति, आनुपूर्वीत्वपरिणतेरनादित्वासम्भवात् विशिष्टैकपरिणामेन पुद्गलानामसङ्ख्येयकालमेवावस्थानादिति भावः। अनानुपूर्व्यवक्तव्यकद्रव्येष्वपीत्थमेव भावना कार्या इति ८।

**[सू० ११४] [१] एएसि णं भंते! णेगम-ववहाराणं आणुपुव्वीदव्वाणं अणाणुपुव्वीदव्वाणं अवत्तव्वयदव्वाण य दव्वट्ठयाए पएसट्ठयाए दव्वट्ठ-पएसट्ठयाए कयरे कयरेहिंतो अप्पा वा बहुया वा तुल्ला वा विसेसाहिया वा ? गोतमा ! सव्वत्थोवाइं णेगम-ववहाराणं अवत्तव्वयदव्वाइं दव्वट्ठयाए, अणाणुपुव्वीदव्वाइं दव्वट्ठयाए विसेसाहियाइं, आणुपुव्वीदव्वाइं दव्वट्ठयाए असंखेज्जगुणाइं।**

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[२] पएसट्ठयाए णेगम-ववहाराणं सव्वत्थोवाइं अणाणुपुव्वीदव्वाइं अपएसट्ठयाए, अवत्तव्वयदव्वाइं पएसट्ठयाए विसेसाहियाइं, आणुपुव्वीदव्वाइं पएसट्ठयाए अणंतगुणाइं।**

**[३] दव्वट्ठ-पएसट्ठयाए सव्वत्थोवाइं णेगम-ववहाराणं अवत्तव्वगदव्वाइं दव्वट्ठयाए, अणाणुपुव्वीदव्वाइं दव्वट्ठयाए अपएसट्ठयाए विसेसाहियाइं, अवत्तव्वगदव्वाइं पएसट्ठयाए विसेसाहियाइं, आणुपुव्वीदव्वाइं दव्वट्ठयाए असंखेज्जगुणाइं, ताइं चेव पएसट्ठयाए अणंतगुणाइं। सेतं अणुगमे। सेतं णेगम-ववहाराणं अणोवणिहिया दव्वाणुपुव्वी।**

**[चू० ११४]** इदाणिं आणुपुव्विमादियाणं दव्वट्ठ-पदेसट्ठा[१]दिपदेहिं अप्पबहुयचिंता। तत्थ **दव्वट्ठया** एगा-ऽणेगपुग्गलदव्वेसु जधासंभवतो पदेस-गुण-पज्जायाधारया जा सा दव्वट्ठता भण्णति। **पदेसट्ठता** पुण तेसु चेव दव्वेसु प्रतिप्रदेसं गुण-पज्जायाधारता जा सा पदेसट्ठया। उभयरूवा **उभयट्ठया**। एतेहिं आणुपुव्विमादियाण दव्वाण अप्पबहुसंखा इमा सुत्तसिद्धा। णवरं **अव्वत्तव्वगदव्वा दव्वट्ठताए सव्वत्थोवा**। कहं ?, उच्यते— संघात-भेदउप्पत्तिहेतुअप्पत्तणतो। तेहिंतो **अणाणुपुव्विदव्वा विसेसाधिया**। कहं ?, उच्यते— बहुतरभेदउप्पत्तिहेतुत्तणतो। तेहिंतो **आणुपुव्विदव्वा असंखेज्जगुणा**। कहं ?, उच्यते— तिमादिएगपदेसुत्तरवड्ढिदव्वट्ठाणबहुत्तणतो संघात-भेदहेतुबहुत्तणतो। एत्थ भावणविही इमा— एग दु ति चतुपदेसो य ठविता १-२-३-४, एत्थ संघात-भेदतो पंच अवत्तव्वग-दव्वा भवंति, दस अणाणुपुव्विदव्वा भेदतो भवंति, संघाततो भे[२]दसंघाततो वा एगकाले तिन्नि आणुपुव्विदव्वा भवंति, क्रमेण वा एग-दुगादिसंजोग-भेदतो य चोद्दस आणुपुव्वि-दव्वा भवंति। एवं पंचपदेसादीसु वि भावेतव्वं। सव्वण्णुवयणतो य अप्पबहुयचिंता सद्धेया इति। सेसं कंठं। इदाणिं पदेसट्ठताए अप्पबहुत्तं— तत्थ **पदेसट्ठताए सव्वत्थोवा अणाणुपुव्विदव्वा**। कहं ? उच्यते— तेसिं अणाणुपुव्विदव्वाणं **अपदेसट्ठताए**, अपदेसहेतुत्तणतो त्ति वुत्तं भवति। चोदक आह— पएसट्ठताए थोव त्ति भणितुं पुणो

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अपदेसट्ठयं भणह, णणु विरुद्धं । आचार्य आह– जं अणाणुपुव्विदव्वं तं णियमा एकप्रदेशात्मकम्, ण तस्स अण्णो दव्वरूवो पदेसो अत्थि त्ति अपदेसट्ठता भणिया, अतो पदेसट्ठता अपदेसट्ठया य ण तत्थ परोप्परं विरुद्धा इति । **अवत्तव्वगदव्वा** अणाणुपुव्विदव्वेहिंतो **पदेसट्ठताए** त्ति प्रदेशादेशत्वेन सप्रदेशहेतुत्तणतो वा विसिट्ठ**विसेसाहिया** भवंति । एत्थ उदाहरणं– बुद्धीए सतमेत्ता अवत्तव्वगदव्वा कता, अणाणुपुव्विदव्वा पुण दिवड्ढसतमेत्ता कता, एवं द्रव्यत्वेन विशिष्ट**विशेषाधिका** भवंति। पदेसत्तेणं पुण अणाणुपुव्विदव्वा अप्पणो दव्वट्ठताए तुल्ला चेव, अपदेसत्तणतो, अव्वत्तव्वगदव्वा पुण पदेसत्तणतो विसिट्ठविसेसाधिका दुसतमेत्ता भवंति । तेहिंतो **आणुपुव्विदव्वा पदेसट्ठताए अणंतगुणा** भणिता। कधं ? उच्यते– आणुपुव्विदव्वाणं ट्ठाणबहुत्तणतो तेसिं च संखा-ऽसंख-मणंतपदेसत्तणतो य । इदाणिं उभयट्ठता सुत्तसिद्धा उवयुज्जिउं भाणितव्वा ।

**[हा० ११४]** साम्प्रतमल्पबहुत्वद्वारम्, तत्रेदं सूत्रम्– **एतेसि ण**मित्यादि। द्रव्यं च तदर्थश्च द्रव्यार्थः, तस्य भावो द्रव्यार्थता, एकानेकपुद्गलद्रव्येषु यथासम्भवतः प्रदेश-गुण-पर्यायाधारतेत्यर्थः, तया, द्रव्यत्वेनेति यावत् । प्रकृष्टो देशः प्रदेशः, प्रदेशश्चासावर्थश्च प्रदेशार्थः, तस्य भावः प्रदेशार्थता, तेष्वेव द्रव्येषु प्रतिप्रदेशं गुण-पर्यायाधारतेति भावना, तया, अणुत्वेनेत्यर्थः। द्रव्यार्थप्रदेशार्थता तु यथोक्तोभयरूपा, तया। शेषं सूत्रसिद्धं यावत् **सव्वत्थोवाइं णेगम-ववहाराणं अवत्तव्वगदव्वाइं दव्वट्ठयाए** त्ति, का तत्र भावना ? उच्यते– सङ्घात-भेदनिमित्ताल्पत्वात् । तेभ्य एव **अणाणुपुव्विदव्वाइं दव्वट्ठयाए विसेसाधिताइं**, कथम् ? उच्यते– बहुतरद्रव्योत्पत्तिनिमित्तत्वात् । तेभ्योऽपि **आणुपुव्विदव्वाइं दव्वट्ठयाए असंखेज्जगुणाइं**, कथम् ? उच्यते– त्र्याद्येकप्रदेशोत्तरवृद्ध्या द्रव्यस्थानानां निसर्गत एव बहुत्वात् सङ्घात-भेदनिमित्तबहुत्वाच्च। इह विनेयानुग्रहार्थं भावनाविधिरुच्यते– एग दुग तिग चउप्पदेसो य ठाविता १, २, ३, ४, एत्थ सङ्घात-भेदतो पञ्च अवत्तव्वगदव्वाइं हवंति, दस अणाणुपुव्विदव्वा भेदतो, सङ्घाततो [भेदसंघाततो ?] वा एककाले तिण्णि य आणुपुव्विदव्वा, कमेण पुण एगदुगादिसंजोग-भेदतो

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अणेगे भवन्ति । *अण्णे* भणंति-चोद्दस हवंति, तदभिप्रायं तु न वयं सम्यगवगच्छाम: अतिगंभीरत्वादिति । एवं [1]पञ्च[प]देसादिसु भावेयव्वं, सव्वण्णुवयेसतो य सद्धेयं, नान्यथावादिनो जिना: । **पदेसट्ठयाए सव्वत्थोवाइं णेगम-ववहाराण**मित्यादि, स्तोकत्वे कारणं **अपदेसट्ठयाए** त्ति अप्रदेशार्थत्वेन, नास्य प्रदेशो विद्यत इत्यप्रदेश: परमाणु: । उक्तं च– *परमाणुरप्रदेश:* [*प्रशम० २०८*] इति, तद्भावस्तेन, अणोर्निरवयवत्वादित्यर्थ: । आह– प्रदेशार्थतया सर्वस्तोकानीत्यभिप्राये अप्रदेशार्थत्वेनेति कारणाभिधानमयुक्तम्, विरोधात्, स्वभावो हि हेतुर्यदि प्रदेशार्थता कथमप्रदेशार्थता ? इति, अत्रोच्यते– आत्मीयैकप्रदेशव्यतिरिक्त-प्रदेशान्तरप्रतिषेधापेक्षा ह्यप्रदेशार्थता, न पुनर्निजैकप्रदेशप्रतिषेधापेक्षाऽपि, धर्म्मिण एवाभावप्रसङ्गाद् विचारवैयर्थ्यप्रसङ्गात्, अलं विस्तरेण । **अवत्तव्वगदव्वाइं पदेसट्ठताए विसेसाधिताइं** अनानुपूर्वीद्रव्येभ्य इति । अत्र विनेयासम्मोहार्थमुदाहरणम्– बुद्धीए सयमेत्तं अवत्तव्वगदव्वा कया, अणाणुपुव्विदव्वा पुण दिवड्ढसयमेत्तगा, एवं द्रव्यत्वेन विशिष्टविशेषाधिका भवन्ति, पदेसत्तेणं पुण अणाणुपुव्विदव्वा अप्पणो दव्वट्ठताए तुल्ला चेव, अपदेसत्तणओ, [अवत्तव्वगदव्वा पुण पदेसत्तणओ] विसिट्ठविसेसाधिता दुसयमेत्ता भवंति । **आणुपुव्विदव्वाइं पदेसट्ठताए अणंतगुणाइं**, तेहिंतो वि पदेसट्ठताए आणुपुव्विदव्वाइं अणंतगुणाइं । कथम् ? उच्यते– आणुपुव्विदव्वाणं ठाणबहुत्तणओ तेसिं च संखा-ऽसंखा-ऽणंतपदेसत्तणओ । उभयार्थता सूत्रसिद्धैव । **सेत्त**मित्यादि निगमनद्वयम् ।

**[हे० ११४]** उक्तं भावद्वारम्, इदानीमल्पबहुत्वद्वारं बिभणिषुराह - **एतेसु ण**मित्यादि, द्रव्यमेवार्थो द्रव्यार्थ:, तस्य भावो **द्रव्यार्थता**, तया, द्रव्यत्वेन इत्यर्थ: । प्रकृष्टो निरंशो देश: प्रदेश: स चासावर्थश्च प्रदेशार्थ:, तस्य भाव: **प्रदेशार्थता**, तया, परमाणुत्वेनेति भाव: । **द्रव्यार्थप्रदेशार्थतया** तु यथोक्तोभयरूपतयेति भाव: । तदयमर्थ:-**एतेषां भदन्त ! आनुपूर्व्यादिद्रव्याणां** मध्ये **कयरे कयरेहिंतो** त्ति कतराणि कान्याश्रित्य द्रव्यापेक्षया प्रदेशापेक्षया उभयापेक्षया वाऽ**ल्पानि** विशेषहीनत्वादिना, **बहूनि** असङ्ख्येय-गुणत्वादिना, **तुल्यानि** समसङ्ख्यत्वेन, **विशेषाधिकानि** किञ्चिदाधिक्येनेति, **वा**शब्दा: पक्षान्तरवृत्तिद्योतका:, इति पृष्टे वाच: क्रमवर्तित्वाद् द्रव्यार्थतापेक्षया तावदुत्तरमुच्यते-तत्र

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**सव्वत्थोवाइं नेगम-ववहाराणं अवत्तव्वगदव्वाइं दव्वट्ठयाए** त्ति नैगम-व्यवहारयोः द्रव्यार्थतामपेक्ष्य तावदवक्तव्यकद्रव्याणि सर्वेभ्योऽन्येभ्यः स्तोकानि **सर्वस्तोकानि,** अनानुपूर्वीद्रव्याणि तु द्रव्यार्थतामेवापेक्ष्य विशेषाधिकानि, कथम् ? वस्तुस्थिति-स्वाभाव्यात्, उक्तं च -*एएसिं णं भंते ! परमाणुपोग्गलाणं दुपएसियाण य खंधाणं कयरे कयरेहिंतो बहुया ? **गोयमा !** दुपएसिएहिंतो खंधेहिंतो परमाणुपोग्गला बहुग* [ ] त्ति । तेभ्योऽपि आनुपूर्वीद्रव्याणि द्रव्यार्थतयैवासङ्ख्येयगुणानि, यतोऽनानुपूर्वीद्रव्येष्ववक्तव्यक-द्रव्येषु च परमाणुलक्षणं द्व्यणुकस्कन्धलक्षणं चैकैकमेव स्थानं लभ्यते, आनुपूर्वीद्रव्येषु तु त्र्यणुकस्कन्धादीन्येकोत्तरवृद्ध्याऽनन्ताणुकस्कन्धपर्यन्तान्यनन्तानि स्थानानि प्राप्यन्ते, अतः स्थानबहुत्वादानुपूर्वीद्रव्याणि पूर्वेभ्योऽसङ्ख्यातगुणानि। ननु यदि तेषु स्थानान्यनन्तानि तर्ह्यनन्तगुणानि पूर्वेभ्यस्तानि कस्मान्न भवन्तीति चेत्, नैवम्, यतोऽनन्ताणुकस्कन्धाः केवलानानुपूर्वीद्रव्येभ्योऽप्यनन्तभागवर्तित्वात् स्वभावादेव स्तोका इति न किञ्चित्तैरिह वर्द्धते, अतो वस्तुवृत्त्या किलासङ्ख्यातान्येव तेषु स्थानानि, तदपेक्षया त्वसङ्ख्यात-गुणान्येव तानि, एतच्च पूर्वं भागद्वारे लिखित**प्रज्ञापना**सूत्रात् सर्वं भावनीयमित्यलं विस्तरेण ।

उक्तं द्रव्यार्थतया अल्पबहुत्वम्, इदानीं प्रदेशार्थतया तदेवाऽऽह-**पएसट्ठयाए सव्वत्थोवाइं नेगमववहाराण**मित्यादि, नैगमव्यवहारयोः प्रदेशार्थतया अल्पबहुत्वे चिन्त्यमाने अनानुपूर्वीद्रव्याणि सर्वेभ्यः स्तोकानि, कुत इत्याह-**अपएसट्ठयाए** त्ति प्रदेशलक्षणस्यार्थस्य तेष्वभावादित्यर्थः, यदि हि तेषु प्रदेशाः स्युस्तदा द्रव्यार्थतायामिव प्रदेशार्थतायामप्यवक्तव्यकापेक्षयाऽधिकत्वं स्यात्, न चैतदस्ति, *परमाणुरप्रदेशः* [*प्रशम०* २०८] इति वचनात् । अतः **सर्वस्तोका**न्येतानि । ननु यदि प्रदेशार्थता तेषु नास्ति तर्हि तया विचारोऽपि तेषां न युक्त इति चेत्, नैतदेवम्, प्रकृष्टः सर्वसूक्ष्मः पुद्गलास्तिकायस्य देशो निरंशो भागः प्रदेश इति व्युत्पत्तेः प्रतिपरमाणु प्रदेशार्थताऽभ्युपगम्यत एव, आत्मव्यतिरिक्तप्रदेशान्तरापेक्षया त्वप्रदेशार्थतेत्यदोषः । अवक्तव्यकद्रव्याणि प्रदेशार्थ-तयाऽनानुपूर्वीद्रव्येभ्यो विशेषाधिकानि, यतः किलासत्कल्पनया अवक्तव्यकद्रव्याणां षष्टिः अनानुपूर्वीद्रव्याणां तु शतम्, ततो द्रव्यार्थताविचारे एतानीतरापेक्षया

Jain Education International For Private & Personal Use Only www.jainelibrary.org

विशेषाधिकान्युक्तानि, अत्र तु प्रदेशार्थता-विचारेऽनानुपूर्वीद्रव्याणां निष्प्रदेशत्वात् तदेव शतमवस्थितम्, अवक्तव्यकद्रव्याणां तु प्रत्येकं द्विप्रदेशत्वाद् द्विगुणितानां विंशत्युत्तरं प्रदेशशतं जायत इति तेषामितरेभ्यः प्रदेशार्थतया विशेषाधिकत्वं भावनीयम् । आनुपूर्वीद्रव्याणि प्रदेशार्थतया अवक्तव्यकद्रव्येभ्योऽनन्तगुणानि भवन्ति, कथम् ? यतो द्रव्यार्थतयाऽपि तावदेतानि पूर्वेभ्योऽसङ्ख्यातगुणान्युक्तानि, यदा तु सङ्ख्यातप्रदेशिकस्कन्धानामसङ्ख्यातप्रदेशिकस्कन्धानामनन्ताणुकस्कन्धानां च सम्बन्धिनः सर्वेऽपि प्रदेशा विवक्ष्यन्ते तदा महानसौ राशिर्भवतीति प्रदेशार्थतयाऽमीषां पूर्वेभ्योऽनन्तगुणत्वं भावनीयम् ।

उक्तं प्रदेशार्थतयाऽप्यल्पबहुत्वम्, इदानीमुभयार्थतामाश्रित्य तदाह- **दव्वट्ठपएसट्ठयाए** इत्यादि, इहोभयार्थताधिकारेऽपि यदेवाल्पं तदेवादौ दर्श्यते, अवक्तव्यकद्रव्याणि च सर्वाल्पानि इति प्रथममेवोक्तम्, **सव्वत्थोवाइं णेगम-ववहाराणं अवत्तव्वगदव्वाइं दव्वट्ठयाए** त्ति, अपरं चोभयार्थताधिकारेऽपि **अणाणुपुव्वीदव्वाइं दव्वट्ठयाए** इत्यादौ[१] यदुक्तम् **अपएसट्ठयाए** त्ति तदात्मव्यतिरिक्तप्रदेशान्तराभावतोऽनानुपूर्वीद्रव्याणामप्रदेशकत्वादिति मन्तव्यम्, ततश्चेदमुक्तं भवति- द्रव्यार्थतया अप्रदेशार्थतया च विशिष्टान्यनानुपूर्वीद्रव्याण्यवक्तव्यकद्रव्येभ्यो विशेषाधिकानि, शेषभावना तु प्रत्येकचिन्तावत् सर्वा कार्या । आह- यद्येवं प्रत्येकचिन्तायामेव प्रस्तुतोऽर्थः सिद्धः, किमनयोभयार्थताचिन्तयेति ? नैवम्, यत आनुपूर्वीद्रव्येभ्यस्तत्प्रदेशाः कियताऽप्यधिका इति प्रत्येकचिन्तायां न निश्चितम्, अत्र तु **ताइं चेव पएसट्ठयाए अणंतगुणाइं** इत्यनेन तन्निर्णीतमेव, ततोऽनवगतार्थप्रतिपादनार्थत्वात् प्रत्येकावस्थातो भिन्नैवोभयावस्था वस्तूनामिति दर्शनार्थत्वाच्च युक्तमेवोभयार्थताचिन्तनमित्यदोषः । तदेवमुक्तो नवविधोऽप्यनुगम इति निगमयति-**सेत्तं अणुगमे** त्ति, तद्भणने च समर्थिता नैगम-व्यवहारयोरनौपनिधिकी द्रव्यानुपूर्वी इति निगमयति- **सेत्तं नेगमे**त्यादि ।

**[सू० ११५] से किं तं संगहस्स अणोवणिहिया दव्वाणुपुव्वी ? संगहस्स अणोवणिहिया दव्वाणुपुव्वी पंचविहा पण्णत्ता । तंजहा-**

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**अट्ठपयपरूवणया १, भंगसमुक्कित्तणया २, भंगोवदंसणया ३, समोयारे ४, अणुगमे ५।**

**[सू० ११६] से किं तं संगहस्स अट्ठपयपरूवणया ? संगहस्स अट्ठपयपरूवणया- तिपएसिया आणुपुव्वी[१] → चउप्पएसिया आणुपुव्वी जाव दसपएसिया आणुपुव्वी संखिज्जपएसिया आणुपुव्वी, असंखिज्जपएसिया आणुपुव्वी, ← अणंतपदेसिया आणुपुव्वी, परमाणुपोग्गला अणाणुपुव्वी, दुपदेसिया अवत्तव्वए। सेतं संगहस्स अट्ठपयपरूवणया।**

**[चू० ११५-११६]** गता णेगम-ववहाराणं अणोवणिधिया दव्वाणुपुव्वी। इदाणिं संगहणयमतेण अणोवणिधिया दव्वाणुपुव्वी भण्णति, सा पंचविधा **अट्ठपदपरूवणे**त्यादि। 'संगहितपिंडितत्थं संगहणतो इच्छइ' त्ति कातुं सव्वे तिपदेसा खंधा तिपदेसाविसेसत्तणतो [१]एक्का **तिपएसाणुपुव्वी,** एवं **चउप्पदेसा**दयो वि भाणितव्वा। पुणो आणुपुव्वि-अविसेसत्तणतो सव्वे ति-चउप्पदेसादिए एक्कं अविसिट्ठं अणुपुव्विपक्खं इच्छति त्ति एक्का आणुपुव्वी। ← एवं अणाणुपुव्वि-अवत्तव्वगाइं पि।

**[हा० ११५-११६]**[१] **से किं त**मित्यादि, इह सामान्यमात्रसङ्ग्रहणशीलः सङ्ग्रहः, शेषं सूत्रसिद्धं यावत् **तिपदेसिया आणुपुव्वी**त्यादि। इह सङ्ग्रहस्य सामान्यमात्रप्रतिपादन-परत्वाद् यावन्तः केचन त्रिप्रदेशिकास्ते त्रिप्रदेशिकत्वसामान्याव्यतिरेकाद् व्यतिरेके च त्रिप्रदेशिकत्वानुपपत्तेः सामान्यस्य चैकत्वादेकैव त्रिप्रदेशिकानुपूर्वीति, एवं चतुष्प्रदेशिका-दिष्वपि भावनीयम्। पुनश्च विशुद्धतरसङ्ग्रहापेक्षया सर्वासामेवाऽऽनुपूर्वीत्वसामान्या-भेदादेकैवानुपूर्वीति, एवमनानुपूर्व्यवक्तव्यकेष्वपि स्वजात्यभेदतो वाच्यमेकत्वमिति। **सेत्त**मित्यादि निगमनम्, बहुत्वाभावाद् बहुवचनाभावः।

**[हे० ११५-११६]** व्याख्याता नैगम-व्यवहारनयमतेन अनौपनिधिकी द्रव्यानुपूर्वी,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

साम्प्रतं संग्रहनयमतेन तामेव व्याचिख्यासुराह- **से किं त**मित्यादि। सामान्यमात्रसंग्रहणशीलः संग्रहो नयः, अथ तस्य **संग्रह**नयस्य किं तद्वस्त्व**नौपनिधिकी द्रव्यानुपूर्वी**ति प्रश्नः। आह-न[१]नु *नैगम-संग्रह-व्यवहारे* [*तत्वार्थ० १।३३*] त्यादिसूत्रक्रमप्रामाण्यान्नैगमानन्तरं संग्रहस्योपन्यासो युक्तः, तत् किमिति व्यवहारमपि निर्दिश्य ततोऽयमुच्यते ? इति, सत्यम्, किन्तु नैगम-व्यवहारयोरत्र तुल्यमतत्वाल्लाघवार्थं युगपत् तन्निर्देशं कृत्वा पश्चात् संग्रहो निर्दिष्ट इत्यदोषः ।

अत्र निर्वचनमाह-**संगहस्स अणोवणिहिया दव्वाणुपुव्वी पंचविहा पण्णत्त**त्ति संग्रहनयमतेनाप्यनौपनिधिकी **द्रव्यानुपूर्वी** प्राग्निरूपितशब्दार्था पञ्चभिरर्थपदप्ररूपणतादिभिः प्रकारैर्विचार्यमाणत्वात् **पञ्चविधा** पञ्चप्रकारा **प्रज्ञप्ता**। तदेव दर्शयति- **तंजहे**त्यादि । अत्र व्याख्या पूर्ववदेव यावत् **तिपएसिया आणुपुव्वी** इत्यादि, इह [२]पूर्वमेकस्त्रिप्रदेशिक आनुपूर्वी, अनेके त्रिप्रदेशिका आनुपूर्व्य इत्याद्युक्तम्, अत्र तु संग्रहस्य सामान्यवादित्वात् सर्वेऽपि त्रिप्रदेशिका एकैवाऽऽनुपूर्वी, इमां चात्र युक्तिमयमभिधत्ते- त्रिप्रदेशिकाः स्कन्धास्त्रिप्रदेशिकत्वसामान्याद् व्यतिरेकिणोऽव्यतिरेकिणो वा ? यद्याद्यः पक्षस्तर्हि ते त्रिप्रदेशिका एव न भवन्ति, तत्सामान्यव्यतिरिक्तत्वात्, द्विप्रदेशिकादिवदिति। अथ चरमः पक्षस्तर्हि सामान्यमेव ते, तदव्यतिरेकात्, तत्स्वरूपवत्, सामान्यं चैकस्वरूपमेवेति सर्वेऽपि त्रिप्रदेशिका एकैवानुपूर्वी, एवं चतुष्प्रदेशिकत्वसामान्याव्यतिरेकात् सर्वेऽपि चतुष्प्रदेशिका एकैवानुपूर्वी, एवं यावदनन्तप्रदेशिकत्वसामान्याव्यतिरेकात् सर्वेऽप्यनन्तप्रदेशिका एकैवानुपूर्वीति अविशुद्धसंग्रहनयमतम् । विशुद्धसंग्रहनयमतेन तु सर्वेषां त्रिप्रदेशिकादीनामनन्ताणुकपर्यन्तानां स्कन्धानामानुपूर्वीत्वसामान्याव्यतिरेकाद् व्यतिरेके चानुपूर्वीत्वाभावप्रसङ्गात् सर्वाऽप्येकैवानुपूर्वीति । एवमनानुपूर्वीत्वसामान्याव्यतिरेकात् सर्वेऽपि परमाणुपुद्गला एकैवानानुपूर्वी, तथाऽवक्तव्यकत्वसामान्याव्यतिरेकात् सर्वेऽपि द्विप्रदेशिकस्कन्धा एकमेवावक्तव्यकमिति। सामान्यवादित्वेन सर्वत्र बहुवचनाभावः। **सेत**मित्यादि निगमनम्।

## [सू० ११७] एयाए [१]णं संगहस्स अट्ठपयपरूवणयाए किं पओयणं ?

Jain Education International For Private & Personal Use Only www.jainelibrary.org

एयाए [2]णं संगहस्स अट्ठपयपरूवणयाए संगहस्स भंगसमुक्कित्तणया [3]कीरइ।

[सू० ११८] से किं तं संगहस्स भंगसमुक्कित्तणया ? संगहस्स भंगसमुक्कित्तणया— अत्थि आणुपुव्वी १ , अत्थि अणाणुपुव्वी २, अत्थि अवत्तव्वए ३, अहवा अत्थि आणुपुव्वी य अणाणुपुव्वी य ४, अहवा अत्थि आणुपुव्वी य अवत्तव्वए य ५, अहवा अत्थि अणाणुपुव्वी य अवत्तव्वए य ६, अहवा अत्थि आणुपुव्वी य अणाणुपुव्वी य अवत्तव्वए य ७। एवं एए सत्त भंगा। सेतं संगहस्स भंगसमुक्कित्तणया।

[सू० ११९] एयाए णं संगहस्स भंगसमुक्कित्तणयाए किं पओयणं ? एयाए णं संगहस्स भंगसमुक्कित्तणयाए संगहस्स भंगो[4]वदंसणया [5]कज्जति।

[सू० १२०] से किं तं संगहस्स भंगोवदंसणया ? संगहस्स भंगोवदंसणया — [6]तिपएसिया आणुपुव्वी १, परमाणुपोग्गला अणाणुपुव्वी २, दुपएसिया अवत्तव्वए ३, अहवा तिपएसिया य परमाणुपोग्गला य आणुपुव्वी य अणाणुपुव्वी य ४, अहवा तिपएसिया य दुपएसिया य आणुपुव्वी य अवत्तव्वए य ५ अहवा परमाणुपोग्गला य दुपएसिया य अणाणुपुव्वी य अवत्तव्वए य ६, अहवा तिपएसिया य परमाणुपोग्गला य दुपएसिया य आणुपुव्वी य अणाणुपुव्वी य अवत्तव्वए य ७। सेतं संगहस्स भंगोवंदसणया।

[चू० ११७-१२०] भंगसमुकित्तणाए भंगोवदंसणाए य सत्त भंगे कित्तयति दंसेइ य। सेसो अक्खरत्थो जधा [1]णेगम-ववहाराणं तहा वत्तव्वो।

[हा० ११७-१२०] एताए णमित्यादि पाठसिद्धं यावत् अत्थि आणुपुव्वी

Jain Education International For Private & Personal Use Only www.jainelibrary.org

इत्यादि सप्त भङ्गाः, व्यक्तिबहुत्वाभावाद् बहुवचनानुपपत्तितः शेषभङ्गाभाव इति, एवं भङ्गोपदर्शनायामपि भावनीयम्।

[हे० ११७-१२०] भङ्गसमुत्कीर्तनतां निर्दिदिक्षुराह- **एयाए ण**मित्यादि। अत्रापि व्याख्या कृतैव द्रष्टव्या यावत् **अत्थि आणुपुव्वी**त्यादि, इहैकवचनान्तास्त्रय एव प्रत्येकभङ्गाः, सामान्यवादित्वेन व्यक्तिबहुत्वाभावतो बहुवचनाभावात्। आनुपूर्व्यादिपदत्रयस्य च त्रयो द्विकसंयोगा भवन्ति, एकैकस्मिँश्च द्विकयोगे एकवचनान्त एकैक एव भङ्गः, त्रिकयोगेऽपि एक एवैकवचनान्त इति, सर्वेऽपि सप्त भङ्गाः संपद्यन्ते, शेषास्त्वेकोनविंशतिर्बहुवचनसम्भवित्वान्न भवन्ति अत्र। स्थापना-आनुपूर्वी १ अनानुपूर्वी १ अवक्तव्यक १ इति त्रयः प्रत्येकभङ्गाः। आनुपूर्वी १ अनानुपूर्वी १ इति प्रथमो द्विकयोगः। आनुपूर्वी १ अवक्तव्यक १ इति द्वितीयो द्विकयोगः। अनानुपूर्वी १ अवक्तव्यक १ इति तृतीयो द्विकयोगः। आनुपूर्वी १ अनानुपूर्वी १ अवक्तव्यक १ इति त्रिकयोगः। एवमेते सप्त भङ्गाः। **सेत्त**मित्यादि निगमनम्।

भङ्गोपदर्शनतां बिभणिषुराह - **एयाए ण**मित्यादि। अत्रापि सप्त भङ्गास्त एवार्थकथनपुरस्सरा भावनीयाः। भावार्थस्तु सर्वः पूर्ववत्। **सेत्त**मित्यादि निगमनम्।

**[सू० १२१] से किं [1]तं समोयारे ? समोयारे – संगहस्स आणुपुव्विदव्वाइं कहिं समोयरंति ? किं आणुपुव्वीदव्वेहिं समोयरंति ? अणाणुपुव्वीदव्वेहिं समोयरंति ? अवत्तव्वयदव्वेहिं समोयरंति ? [2]→ संगहस्स आणुपुव्वीदव्वाइं आणुपुव्वीदव्वेहिं समोयरंति, नो अणाणुपुव्वीदव्वेहिं समोयरंति, नो अवत्तव्वयदव्वेहिं समोयरंति। [3]एवं दोण्णि वि सट्ठाणे सट्ठाणे समोयरंति। ← सेतं समोयारे।**

[चू० १२१] संगहस्स समोयारो सट्ठाणे पूर्ववद् वाच्यः। चोदक आह – जं 'सट्ठाणे समोयरंति'त्ति भणह किं तं आतभावसट्ठाणं ? परदव्वं वा समभावपरिणामत्तणतो सट्ठाणं ?, जति आतभावसट्ठाणं तो आतभावे ठितत्तणतो ण समोयारो भवति, अध परदव्वं तो

Jain Education International For Private & Personal Use Only www.jainelibrary.org

आणुपुव्विदव्वस्स अणाणुपुव्वि-अव्वत्तव्वगदव्वा वि मुत्तित्त-वण्णादिएहिं समभावत्तणतो सट्ठाणं भविस्स(स्सं)ति। एवं चोदिते गुरू भणति- सव्वदव्वा आतभावेसु वण्णिज्जमाणा आतभावे समोयारे भवंति, जतो जीवदव्वं जीवभावेसु समोतारिज्जति णाजीवभावेसु, अजीवदव्वं पि अजीवभावेसु न जीवभावेष्वित्यर्थः, परदव्वं पि समभावविसेसादेसमेत्तत्तणतो सट्ठाणं घेप्पति त्ति न दोसो । इह पुण अधिकारे आणुपुव्विभावविसेससमत्तणतो आणुपुव्विदव्वपक्खे समोतरति त्ति सट्ठाणं भणितं । एवं अणाणुपुव्वि-अव्वत्तव्वेसु वि सट्ठाणसमोतारो भाणितव्वो इति ।

[हा० १२१] **से किं तं समोतारे** इत्यादि सूत्रसिद्धं यावत् **संगहस्स आणुपुव्वि-दव्वाइं आणुपुव्विदव्वेहिं समोतरंति** तज्जातौ वर्त्तन्ते, आनुपूर्वीत्वेन भवन्तीत्यर्थः । एवमनानुपूर्व्यवक्तव्यकद्रव्यचिन्तायामपि भावना कार्या। पाठान्तरं वा **सट्ठाणे समोतरंति** स्वं स्थानं स्वस्थानं तस्मिन् समवतरन्तीति । अत्राह चोदकः – जं सट्ठाणे समोतरंति त्ति भणह, किं तं आतभावसट्ठाणं परदव्वं वा समभावपरिणामत्तणओ सट्ठाणं ? जदि आतभावसट्ठाणं तो आतभावे ठितत्तणतो [ण] समोतारो भवति, अह परदव्वं तो आणुपुव्विदव्वस्स अणाणुपुव्वि-अवत्तव्वगदव्वा वि मुत्तित्त-वण्णादिएहिं समभावत्तणतो सट्ठाणं भविस्संति । एवं चोदिते गुरू भणति– सव्वदव्वा आतभावेसु वण्णिज्जमाणा आतभावे समोतारे भवंति, जतो जीवदव्वं जीवभावेसु समोतारिज्जइ णोऽजीवभावेसु, अजीवदव्वं पि अजीवभावेसु न जीवभावेष्वित्यर्थः, परदव्वं पि समभावविसेसादेस-मेत्तत्तणओ सट्ठाणं घेप्पइ त्ति ण दोसो, इह पुण अधिकारे आणुपुव्विभावविसेसत्तणओ आणुपुव्विदव्वपक्खे समोतरति त्ति सट्ठाणं भणितं। एवं अणाणुपुव्वि-अवत्तव्वेसु वि सट्ठाणे समोतारो भाणियव्वो इति। **सेत्त**मित्यादि निगमनम् ।

[हे० १२१] अथ समवताराभिधित्सया प्राह- **से किं तं समोयारे** इत्यादि, इदं च द्वारं पूर्ववद् निखिलं भावनीयम् ।

**[सू० १२२] से किं तं अणुगमे ? अणुगमे अट्ठविहे पन्नत्ते। तंजहा –**

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**संतपयपरूवणया १, दव्वपमाणं २, च, खेत्त ३, फुसणा ४, य ।
कालो ५ य, अंतरं ६, भाग ७, भाव ८, अप्पाबहुं नत्थि ।।१।।**

[चू० १२२] इदाणिं अणुगमो संतपदपरूवणादितो अट्ठविधो। कहं ?, उच्यते – भागद्दारऽप्पबहुआण दोण्ह वि एगत्तणतो। तत्थ **संतपदं** पूर्ववत्।

[हा० १२२] **से किं तं अणुगमे ? अणुगमे अट्ठविहे पण्णत्ते, तंजहा— सन्तपद** गाहा, णवरं **अप्पाबहुं णत्थि** त्ति विशेषत इयं च नयान्तराभिप्रायतो व्याख्यातैव, य एवेह विशेषोऽसावेव प्रतिद्वारं प्रतिपाद्यत इति।

[हे० १२२] अथानुगमं व्याचिख्यासुराह - **से किं तं अणुगमे** त्ति। अत्रोत्तरम् - **अणुगमे अट्ठविहे पण्णत्ते** त्ति, पूर्वं नवविध उक्तोऽत्र त्वष्टविध एव, अल्पबहुत्वद्वाराभावात्, तदेवाष्टविधत्वं दर्शयति-**तद्यथे**[1]त्युपदर्शनार्थः, **संतपय**गाहा, इयं पूर्वं व्याख्यातैव, नवरम् **अप्पाबहुं नत्थि** त्ति संग्रहस्य सामान्यवादित्वात् सामान्यस्य च सर्वत्रैकत्वादल्पबहुत्वविचारोऽत्र न संभवतीत्यर्थः।

[सू० १२३] **संगहस्स आणुपुव्वीदव्वाइं किं अत्थि णत्थि ? नियमा अत्थि। ए[1]वं दोण्णि वि।**

[सू० १२४] **संगहस्स आणुपुव्वीदव्वाइं किं संखेज्जाइं, असंखेज्जाइं, अणंताइं ? नो संखेज्जाइं, नो असंखेज्जाइं, नो अणंताइं, नियमा एगो रासी। एवं [2]दोण्णि वि।**

[चू० १२३-१२४] संगहस्स दव्वप्पमाणं **णियमा एक्को रासी**। चोदक आह – दव्वप्पमाणे पुट्ठे असिलिट्ठमुत्तरं, जं एक्को रासि त्ति पमाणं कधितं, जतो बहूणं सालिबीयाणं एगो रासी भण्णति, एवं बहूणं आणुपुव्विदव्वाणं एको रासी भविस्सति, बहू पुण दव्वा पडिवज्जितव्वा। आचार्य आह – एकरासिग्गहणेणं बहूसु वि आणुपुव्विदव्वेसु एक्कं चेव

Jain Education International For Private & Personal Use Only www.jainelibrary.org

आणुपुव्विभावं दंसेति, जधा [१]भूतेसु कंठे गुणसुत्तं, अहवा जधा बहू परमाणवो खंधभावपरिणता एगखंधो भण्णति एवं बहू आणुपुव्विदव्वा आणुपुव्विभावपरिणतत्तणतो एगाऽऽणुपुव्वि त्ति, एगत्तणतो य **एगो रासि** त्ति भणितं, ण दोसो।

**[हा० १२३-१२४]** तत्र **संगहस्से**त्यादि ग्रन्थसिद्धमेव यावद् **नियमा एक्को रासी**। एत्थ सुत्तुच्चारणसमणंतरमेव आह चोदकः — णणु दव्वप्पमाणे पुट्ठे असिलिट्ठमुत्तरं जं एक्को रासि त्ति पमाणं कहियं, जओ बहूणं सालिबीयाणं एक्को रासी भण्णति, एवं बहूणं आणुपुव्विदव्वाणं एक्को रासी भविस्सति, बहू पुण दव्वा पडिवज्जितव्वा, आचार्य आह — एकरासिग्गहणेण बहुसु वि आणुपुव्विदव्वेसु एक्कं चेव आणुपुव्विभावं दंसेति जहा [१]भूतेसु कंठे गुणसुत्तं। अहवा जहा बहवो परमाणवो खंधभावपरिणता एगखंधो भण्णति एवं बहू आणुपुव्विदव्वा आणुपुव्विभावपरिणयत्तणतो एगाणुपुव्वि त्ति एगत्तणओ एगो रासीति भणितं, न दोसो।

**[हे० १२३-१२४]** तत्र सत्पदप्ररूपणताभिधानार्थमाह - **संगहस्से**[१]त्यादि, ननु संग्रहविचारे प्रक्रान्ते आनुपूर्वीद्रव्याणि सन्तीत्यनुपपन्नम्, आनुपूर्वीसामान्यस्यैवैकस्य तेनास्तित्वाभ्युपगमात्, सत्यम्, मुख्यरूपतया सामान्यमेवास्ति, गुणभूतं च व्यवहारमात्रनिबन्धनं द्रव्यबाहुल्यमप्यसौ वदतीत्यदोषः। शेषभावना पूर्ववदिति। द्रव्यप्रमाणद्वारे यदुक्तं **नियमा एगो रासि** त्ति, अत्राह-ननु यदि सङ्ख्येयादिस्वरूपाणि एतानि न भवन्ति तर्ह्येको राशिरित्यपि नोपपद्यते, द्रव्यबाहुल्ये सति तस्योपपद्यमानत्वात्, व्रीह्यादिराशिषु तथैव दर्शनात्, सत्यम्, किन्त्वेको राशिरिति वदतः कोऽभिप्रायः ? बहूनामपि तेषामानुपूर्वीत्वसामान्येनैकेन क्रोडीकृतत्वादेकत्वमेव; किञ्च, यथा विशिष्टैकपरिणामपरिणते स्कन्धे तदारम्भकावयवानां बाहुल्येऽप्येकतैव मुख्या तद्वदत्रानुपूर्वीद्रव्यबाहुल्येऽपि तत्सामान्यस्यैकरूपत्वादेकत्वमेव मुख्यमसौ नयः प्रतिपद्यते, तद्वशेनैव तेषामानुपूर्वीत्वसिद्धेः, अन्यथा तदभावप्रसङ्गात्, तस्मान्मुख्यस्यैकत्वस्यानेन कक्षीकृतत्वात् सङ्ख्येयरूपतादिनिषेधः, गुणभूतानि द्रव्याण्याश्रित्य राशिभावोऽपि न विरुध्यते, एवमन्यत्रापि भावनीयमित्यलं प्रपञ्चेन।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[सू० १२५] संगहस्स आणुपुव्वीदव्वाइं लोगस्स [१] → कतिभागे होज्जा ?← किं संखेज्जतिभागे होज्जा [२] ? असंखेज्जतिभागे होज्जा [३] ? संखेज्जेसु भागेसु होज्जा ? असंखेज्जेसु भागेसु होज्जा ? सव्वलोए होज्जा [४] ? नो संखेज्जतिभागे होज्जा, नो असंखेज्जतिभागे होज्जा, नो संखेज्जेसु भागेसु होज्जा, नो असंखेज्जेसु भागेसु होज्जा, नियमा सव्वलोए होज्जा। एवं [५] दोण्णि वि।**

**[सू० १२६] संगहस्स आणुपुव्वीदव्वाइं लोगस्स किं संखेज्जतिभागं [६] फुसंति ? असंखेज्जतिभागं फुसंति ? संखेज्जे भागे फुसंति ? असंखेज्जे भागे फुसंति ? सव्वलोगं फुसंति ? नो संखेज्जतिभागं फुसंति, नो असंखेज्जतिभागं फुसंति, नो संखेज्जे भागे फुसंति, नो असंखेज्जे भागे फुसंति, नियमा सव्वलोगं फुसंति। एवं दोन्नि वि।**

**[सू० १२७] संगहस्स आणुपुव्वीदव्वाइं कालओ केवचिरं होंति ? सव्वद्धा। [७] एवं दोण्णि वि।**

**[सू० १२८] संगहस्स आणुपुव्वीदव्वाणं कालतो केवचिरं अंतरं होति ? नत्थि अंतरं। [८] एवं दोण्णि वि।**

[चू० १२५-१२८] संगहखेत्तावगाहमग्गणाए आणुपुव्विमादियाण णिग्गमो भणितो। **णियमा सव्वलोगे** त्ति सेसविभागेसु पडिसेहो, एगाणुपुव्वित्तणतो आणुपुव्वीए सव्वगतत्तणतो य। फुसणा वि एवं चेव भाणितव्वा। कालतो वि अवट्ठाणं भणितं **सव्वद्धा** आणुपुव्वीए, एगरासित्तणतो णिच्चत्तणतो य। अंतराभावत्तणे वि ते चेव हेतवो भाणितव्वा।

**[हा० १२५-१२८] संगहस्स आणुपुव्विदव्वाइं लोयस्स किं संखेज्जतिभागे**

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**होज्जा** इत्यादौ निर्वचनसूत्रम् **नियमा सव्वलोए होज्जा** सामण्णावेक्खाए आणुपुव्वीए एगत्तणओ सव्वगयत्तणओ य। एवमणाणुपुव्वि-अवत्तव्वगा वि भाणितव्वा। फुसणा वि एवं चेव भाणितव्वा। कालतो पुण **सव्वद्धं**, आणुपुव्वीसामान्यस्य सर्वकालमेव भावात्। एवमणाणुपुव्वि-अवत्तव्वगा वि भाणियव्वा । अन्तरचिन्ताए **णत्थि अन्तरं**, प्रयोजनमनन्तरोक्तमेव।

[हे० १२५-१२८] क्षेत्रद्वारे **नियमा सव्वलोए होज्ज** त्ति आनुपूर्वीसामान्यस्यैकत्वात् सर्वलोकव्यापित्वाच्चेति भावनीयम् । एवमितरद्वयेऽप्यभ्यूह्यमिति । स्पर्शनाद्वारमप्येवमेव चिन्तनीयमिति । कालद्वारेऽपि [१]तत्सामान्यस्य सर्वदाऽव्यवच्छिन्नत्वात् त्रयाणामपि सर्वाद्धाऽवस्थानं भावनीयमिति । अत एवान्तरद्वारे नास्त्यन्तरमित्युक्तं तद्भावव्यवच्छेदस्य कदाचिदप्यभावादिति।

**[सू० १२९] संगहस्स आणुपुव्वीदव्वाइं सेसदव्वाणं कतिभागे होज्जा ? [१]→ किं संखेज्जतिभागे होज्जा ? असंखेज्जतिभागे होज्जा ? संखेज्जेसु भागेसु होज्जा ? असंखेज्जेसु भागेसु होज्जा ? नो संखेज्जतिभागे होज्जा, नो असंखेज्जतिभागे होज्जा, णो संखेज्जेसु भागेसु होज्जा, णो असंखेज्जेसु भागेसु होज्जा, नियमा तिभागे होज्जा। एवं दोण्णि वि।←**

**[सू० १३०] संगहस्स आणुपुव्वीदव्वाइं कयरम्मि भावे होज्जा ? नियमा सादिपारिणामिए भावे होज्जा। [२]एवं दोण्णि वि। अप्पाबहुं नत्थि। सेतं अणुगमे । सेतं संगहस्स अणोवणिहिया दव्वाणुपुव्वी । सेतं अणोवणिहिया दव्वाणुपुव्वी।**

[चू० १२९-१३०] आणुपुव्विदव्वा सेसदव्वाणं **नियमा तिभागे** त्ति। चोदक आह— णणु आदीए अवत्तव्वगेहिंतो अणाणुपुव्वी विसेसाधिया, तेहिंतो आणुपुव्वि असंखेज्जगुणा । आचार्य आह— तं णेगम-ववहाराभिप्पायतो, इमं संगहाभिप्पाएण

Jain Education International For Private & Personal Use Only www.jainelibrary.org

भणितं। किञ्चान्यत्, जहा एगस्स रन्नो तयो पुत्ता, तेसिं अस्से मग्गंताण एक्कस्स एक्को आसो दिण्णो, सो छ सहस्से लभति, बितियस्स दो आसा दिण्णा, ते तिण्णि तिण्णि सहस्से लभंति, ततियस्स बारस आसा दिण्णा, ते पंच पंच सते लभंति, विसमा वि ते मुल्लभावं पडुच्च तिभागपडिता[१] भवंति, एवं आणुपुव्विमादिया विसमा[२] वि दव्वा आणुपुव्वि-अणाणुपुव्वि-अवत्तव्वगतिभागसमत्तणतो **णियमा तिभागे** त्ति भणितं, ण दोसो। **सातिपरिणामिते भावे** पूर्ववत्। गता अणोवणिधिया दव्वाणुपुव्वी।

[हा० १२९-१३०] भागद्वारेऽपि नियमात् त्रिभागे जेण तिण्णि चेवेत्थ रासी। एत्थ बुद्धचोदगो भणति– णणु आदीए अवत्तव्वगेहिंतो अणाणुपुव्वी विसेसाधिता, तेहिंतो आणुपुव्वी असंखेज्जगुणा। आचार्य आह– तं नेगम-ववहाराभिप्पायओ, इमं पुण संगहाभिप्पायतो भणितं। किञ्चान्यत्, जहा एगस्स रण्णो तओ पुत्ता, तेसिं अस्से मग्गन्ताणं एगस्स एगो आसो दिण्णो, सो छ सहस्से लब्भति, बितियस्स दो आसा दिण्णा ते तिण्णि तिण्णि सहस्से लभंति, तइयस्स बारस आसा दिण्णा ते पंच पंच सए लभंति, विसमा वि ते मुल्लभावं पडुच्च तिभागपडिता भवंति एवं आणुपुव्विमादी वि दव्वा आणुपुव्वि-अणाणुपुव्वि-अवत्तव्वगतिभागसमत्तणतो **नियमा तिभागे** त्ति भणितं, ण दोसो। **सादिपारिणामिए भावे** पूर्ववत्। गता अणोवणिहिया दव्वाणुपुव्वी।

[हे० १२९-१३०] भागद्वारे **नियमा तिभागे होज्ज** त्ति त्रयाणां राशीनामेको राशिस्त्रिभाग एव वर्तत इति भावः। यत्तु राशिगतद्रव्याणां पूर्वोक्तमल्पबहुत्वं तदत्र न गण्यते, द्रव्याणां प्रस्तुतनयमते व्यवहारसंवृतिमात्रेणैव[१] सत्त्वादिति। भावद्वारे **सादिपारिणामिए भावे होज्ज** त्ति, यथा आनुपूर्व्यादिद्रव्याणामेतद्भाववर्तित्वं पूर्वं भावितं तथाऽत्रापि भावनीयम्, तेषां यथास्वं सामान्यादव्यतिरिक्तत्वादिति। अल्पबहुत्वद्वारासम्भवस्तूक्त एवेति समर्थितोऽनुगमः, तत्समर्थने च समर्थिता संग्रहमतेनानौपनिधिकी द्रव्यानुपूर्वी, तत्समर्थने च व्याख्याता सर्वथाऽपीयम्, अतः **सेतं**मित्यादि निगमनत्रयम्।

**[सू० १३१] से किं तं ओवणिहिया दव्वाणुपुव्वी ? ओवणिहिया**

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**दव्वाणुपुव्वी तिविहा पण्णत्ता। तंजहा — पुव्वाणुपुव्वी १, पच्छाणुपुव्वी २, अणाणुपुव्वी ३ य।**

**[सू० १३२] से किं तं पुव्वाणुपुव्वी? पुव्वाणुपुव्वी — धम्मत्थिकाए १, अधम्मत्थिकाए २,[1] आगासत्थिकाए ३, जीवत्थिकाए ४, पोग्गलत्थिकाए ५, अद्धासमए ६। सेतं पुव्वाणुपुव्वी।**

**[सू० १३३] से किं तं पच्छाणुपुव्वी? पच्छाणुपुव्वी — अद्धासमए ६, पोग्गलत्थिकाए ५, जीवत्थिकाए ४, आगासत्थिकाए ३, अधम्मत्थिकाए २, धम्मत्थिकाए १। सेतं पच्छाणुपुव्वी।**

**[चू० १३१-१३३]** इदाणिं ओवणिधिया दव्वाणुपुव्वी— सा **तिविधा पुव्वाणुपुव्वी**त्यादि। **पुव्वं** ति पढमं, तस्स जं बितियं तं **अणु** त्ति पच्छिमं, तं च ततियं पडुच्च **पुव्वं** गणिज्जमाणं पुव्विल्लं होइ, एवं इच्छितट्ठाणेसु गणणा जा सा **पुव्वाणुपुव्वी**। अहवा पढमातो आरब्भ अणुपरिवाडीए जं गणिज्जति जाव चरिमं तं **पुव्वाणुपुव्वी** भण्णति १। इच्छितट्ठाणेसु चेव ओमत्थगं गणिज्जमाणे **पच्छिमं** ति चरिमं तं चेव पुव्वं गणिज्जति, ततो जं बितियं तं **अणु**, तं पि ततियं पडुच्च **पुव्वं** भवति, एवं **पच्छाणुपुव्वी** भवति। अहवा चरिमातो[1] ओमत्थगं अणुपरिवाडीए गणिज्जमाणं **पच्छाणुपुव्वी** भण्णति २। **अणाणुपुव्वि** त्ति, जा गणणा **अणु** त्ति पच्छाणुपुव्वी ण भवति **पुव्वि** त्ति पुव्वाणुपुव्वी य ण भवति सा अणाणुपुव्वी भण्णति ३।

एतासिं तिण्हं पि अत्थपसाधकं इमं सुत्ताभिहितं उदाहरणं — **धम्मत्थिकाए** इत्यादि। जीव-पोग्गलदव्वाण गतिकिरियापरिणताण उवग्गहकरणत्तणतो **धम्मो**, **अस्ती**ति ध्रौव्यं, आय त्ति कायः उत्पाद-विनाशौ, अस्तिश्चासौ कायश्च **अस्तिकायः**, धर्मश्चासावस्तिकायश्च **धर्मास्तिकायः** १। ठितिहेतुत्तणतो अधम्मो, जीव-पोग्गलाण ठितिपरिणताण उवग्गहकरणतो **अधम्मो** त्ति, अस्तिकायशब्दः पूर्ववत्, अधर्मश्चासावस्तिकायश्च **अधर्मास्तिकायः**। सव्वदव्वाण अवकासदाणत्तणतो **आकासं**। अहवा *काशृ*

Jain Education International For Private & Personal Use Only www.jainelibrary.org

*दीप्तौ [का०धा० ३/१०५, पा० धा० ३/५६ ]*, सर्वद्रव्यस्वभावदीपना**दाकाशम्**, स्वभावलाभावस्थानादित्यर्थः। आङ्शब्दो मर्यादा-ऽभिविधिवाची, मर्यादया तावदाकाशे तिष्ठन्ति भावाः, तत्संयोगेऽपि स्वभावेनैव नाऽऽकाशात्मकत्वं यान्ति, अभिविधिरपि सर्वभावव्यापनात्, सर्वसंयोगादित्यर्थः । जीवास्तिकायस्तु यस्माज्जीवितवान् जीवति जीविष्यति च तस्माद् **जीवः**, **अस्ती**ति वा प्रदेशाः, **अस्ति**शब्दो वाऽस्तित्वप्रसाधकः, **काय**स्तु समूहः, स च समूहः प्रदेशानाम्, जीवानां वा, उभयथाऽप्यविरुद्धमिति, अतो **जीवास्तिकायः**। **पुद्गलास्तिकायः** पूरण-गलणभावत्तणतो **पुद्गलाः**, इहापि **अस्ति**शब्दः प्रदेशवाचकोऽस्तित्वे वा, **काय**शब्दोऽप्यत्र समूहवचनः, समूहः प्रदेशानाम्, सावयवद्रव्य-समूहवचनो वा। **अद्धासमये** त्ति **अद्धा** इति कालसमूहवचनः, तद्विभागः **समयः**, अहवा आदिच्चादिधावणकिरिया चेव परिमाणविसिट्ठा वत्थुगता **अद्धा**, एवं कालो उभयधा वि, तस्स समयो **→अद्धासमयो←** । सो य णिच्छयणताभिप्पायतो एक एव वर्त्तमानसमयः, तस्स य एगत्तणतो खंध-देसादिकायकप्पणा णत्थि, तीता-ऽणागताण य विणट्ठा-ऽणुप्पन्नत्तणतो अभावो । चोदक आह— णणु आवलिकादिग्रहणम् । आचार्य आह— संववहारमात्रं तत्, जहा अण्णदव्वाण खंधभावो तहा कालस्य न भवतीत्यर्थः । शिष्य आह— किं कारणं सव्वसुत्तेसु धम्मादियो कमो कतो ? । आचार्याऽऽह— सव्वकिरियाधारत्तणतो मंगलाभिधाणतो य पुव्वं धम्मत्थिकायो, तव्विपक्खत्तणतो तदंते अधम्मो, किञ्च— ते दो वि लोगागासखेत्तोवलक्खणं, सेसमलोगो त्ति तेण तेसंते आगासं, किञ्च, पुग्गल-जीवाणाधारणत्तणतो तेसिं पुव्वमागासं, आगासे णियमा पोग्गलाणाऽऽधेयत्तणतो बहुत्तणतो य आगासाणंतरं पुग्गला, सव्वत्थिकाया जीवोवयोज्ज त्ति तेणंते जीवत्थिकायो, जीवा-ऽजीवपज्जायत्तणतो कालस्स णियमा आधेयत्तणतो य अंते अद्धासमय इति। गता पुव्वाणुपुव्वी। इदाणिं पच्छाणुपुव्वी— **अद्धासमए** इत्यादि सूत्रं कंठं।

**[हा० १३१-१३३] से किन्त**मित्यादि, अथ केय**मौपनिधिकी द्रव्यानुपूर्वी** ? **[औपनिधिकी द्रव्यानुपूर्वी] त्रिविधा प्रज्ञप्ता, तद्यथा— पूर्वानुपूर्वी**त्यादि, तस्मात् (पूर्वस्मात्) प्रथमात् प्रभृति आनुपूर्वी अनुक्रमः परिपाटी पूर्वानुपूर्वी । पाश्चात्यात्

Jain Education International For Private & Personal Use Only www.jainelibrary.org

चरमादारभ्य व्यत्ययेनैवानुपूर्वी पश्चानुपूर्वी । न आनुपूर्वी [अनानुपूर्वी] यथोक्तप्र[१]कार-द्वयातिरिक्तरूपेत्यर्थः ।

**से किन्त**मित्यादि । तत्र द्रव्यानुपूर्व्यधिकाराद् धर्मास्तिकायादीनामेव च द्रव्यत्वादिदमाह– **धम्मत्थिकाए** इत्यादि, तत्र जीव-पुद्गलानां स्वाभाविके क्रियावत्त्वे गतिपरिणतानां तत्स्वभावधारणाद् **धर्मः**, **अस्तयः** प्रदेशाः, तेषां **कायः** सङ्घातः अस्तिकायः, धर्मश्चासावस्तिकायश्चेति समासः। त[२]था जीव-पुद्गलानां स्वाभाविके क्रियावत्त्वे तत्परिणतानां तत्स्वभा[३]वाधारणा**दधर्मः**, शेषं धर्मास्तिकायवत् । त[४]था सर्वद्रव्य-स्वभावाऽऽदीपना**दाकाशम्**, स्वभावलाभावस्थानभावादित्यर्थः, आङ्शब्दो मर्यादा-ऽभिविधिवाची, मर्यादायामाकाशे भवन्ति भावाः स्वात्मनि च, तत्संयोगेऽपि स्वभाव एवावतिष्ठन्ते नाकाशभावमेव यान्ति, अभिविधौ तु सर्वभावव्यापनादाकाशम्, सर्वात्मसंयोगादिति भावः, शेषं धर्मास्तिकायवत् । तथा जीवति जीविष्यति जीवितवान् **जीवः**, शेषं पूर्ववत्। तथा पूरण-गलनधर्माणः पुद्गलाः, त एवास्तिकायः **पुद्गलास्तिकाय** इति, अनेन सावयवानेकप्रदेशिकस्कन्धग्रहोऽप्यवगन्तव्यः। तथाऽद्धेत्ययं कालवचनः, स एव निरंशत्वादतीता-ऽनागतयोर्वि[५]नष्टा-ऽनुत्पन्नत्वेनासत्त्वात् **समयः**, समूहाभाव इत्यर्थः। आवलिकादयः सन्तीति चेत्, न, तेषां व्यवहारमात्रतयैव शब्दात्, तथाहि– नानेकपरमाणु-निर्वृत्तस्कन्धसमूहवद् आवलिकादिषु समयसमूह इति ।

आह– एषां कथमस्तित्वमवगम्यते ? इति, अत्रोच्यते– प्रमाणात्, तच्चेदं प्रमाणम्– इह गतिः स्थितिश्च सकललोकप्रसिद्धा कार्यं वर्त्तते, कार्यं च परि[६]णाम्यपेक्षाकारणायत्तात्मलाभं वर्त्तते, घटादिकार्येषु तथा दर्शनात्, तथा च मृत्पिण्डभावेऽपि दिग्-देश-काला-ऽऽकाश-प्रकाशाद्यपेक्षाकारणमन्तरेण न घटो भवति, यदि स्याद् मृत्पिण्डमात्रादेव स्यात्, न [च] भवति, गति-स्थिती अपि जीवपुद्गलाख्य-परिणामिकारणभावेऽपि न धर्मा-[ऽधर्मा] स्तिकायाख्यापेक्षाकारणमन्तरेण भवत एव, यतश्च भावो दृश्यते अतस्तत्सत्ता गम्यत इति भावार्थः । गतिपरिणामपरिणतानां जीव-पुद्गलानां गत्युपष्टम्भको धर्मास्तिकायः, मत्स्यानामिव जलम्। तथा स्थितिपरिणामपरिणतानां स्थित्युपष्टम्भकः अधर्मास्तिकायः, मत्स्यानामिव मेदिनी विवक्षया जलं वा। प्रयोगश्च –

Jain Education International For Private & Personal Use Only www.jainelibrary.org

गति-स्थिती अपेक्षाकारणवत्यौ कार्यत्वाद् घटवत्, विपक्षस्त्रैलोक्यशुषिरमभावो वेत्यलं प्रसंगेन, गमनिकामात्रमेतत्।

आह— आकाशास्तिकायसत्ता कथमवगम्यते ? उच्यते— अवगाहदर्शनात्, तथा चोक्तम् — *अवगाहलक्षणमाकाशम्* [ ] इति। आह — जीवास्तिकाय-सत्ता कथमवगम्यते ? उच्यते — अवग्रहादीनां स्वसंवेदनसिद्धत्वात्। पुद्गलास्तिकायसत्ताऽनुमानतः, घटादिकार्योपलब्धेः, सांव्यवहारिकप्रत्यक्षतश्चेति । आह— कालसत्ता कथमवगम्यते ? उच्यते— बकुल-चम्पका-ऽशोकादिपुष्प-फलप्रदानस्यानियमेनाऽदर्शनात्, नियामकश्च काल इति।

आह— पूर्वानुपूर्वीत्वममीषामित्थमेव किं कृतम् ? इति, अत्रोच्यते— इत्थमेवोपन्यासवृत्तेः। आह— इत्थमेव क्रमेण धर्मास्तिकायाद्युपन्यास एव किमर्थम् ? इति, उच्यते— धर्मास्तिकायादिपदस्य माङ्गलिकत्वाद् धर्मास्तिकायस्य प्रथममुपन्यासः गतिक्रियाहेतुत्वाच्च, पुनर्धर्मास्तिकायप्रतिपक्षत्वादधर्मास्तिकायस्य, पुनस्तदाधारत्वादाकाशास्तिकायस्य, पुनः प्रकृत्याऽमूर्त्तिसाम्याज्जीवास्तिकायस्य, पुनस्तदुपयोगित्वात् पुद्गलास्तिकायस्य, पुनर्जीवा-ऽजीवपर्यायत्वादद्धासमयस्येति।

**से किं तं पच्छाणुपुव्वी**त्यादि, पश्चात्प्रभृति प्रतिलोमपरिपाटी पश्चानुपूर्वी, उदाहरणमुत्क्रमेणेदमेव **अद्धासमय** इत्यादि निगदसिद्धम्।

[हे० १३१-१३३] गताऽनौपनिधिकी द्रव्यानुपूर्वी, साम्प्रतं प्रागुद्दिष्टामेवौपनिधिकीं तां व्याचिख्यासुराह - **से किं त**मित्यादि। अथ केयं प्राग्निर्णीतशब्दार्थमात्रा **औपनिधिकी द्रव्यानुपूर्वीति** प्रश्नः। अत्र निर्वचनम्- **औपनिधिकी द्रव्यानुपूर्वी त्रिविधा प्रज्ञप्ता, तद्यथा-पूर्व्वानुपूर्वी**त्यादि, उपनिधिर्निक्षेपो विरचनं प्रयोजनमस्या इत्यौपनिधिकी द्रव्यविषयाऽऽनुपूर्वी परिपाटिर्द्रव्यानुपूर्वी, सा त्रिप्रकारा, तत्र विवक्षितधर्म्मास्तिकायादिद्रव्यविशेषसमुदाये यः पूर्वः प्रथमस्तस्मादारभ्यानुपूर्वी अनुक्रमः परिपाटिः निक्षिप्यते विरच्यते यस्यां सा पूर्वानुपूर्वी। तत्रैव यः पाश्चात्त्यः चरमस्तस्मादारभ्य व्यत्ययेनैवानुपूर्वी परिपाटिः विरच्यते यस्यां सा निरुक्तविधिना पश्चानुपूर्वी । न आनुपूर्वी अनानुपूर्वी, यथोक्तप्रकारद्वयातिरिक्तस्वरूपेत्यर्थः।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तत्राद्यभेदं तावन्निरूपयितुं प्रश्नमाह- **से किं त**मित्यादि। इह च द्रव्यानुपूर्व्यधिकाराद् धर्मास्तिकायादीनामेव च द्रव्यत्वादित्थं निर्वचनमाह- **धम्मत्थिकाए** इत्यादि, तत्र जीव-पुद्गलानां स्वतः एव गतिक्रियापरिणतानां तत्स्व[१]भावधरणाद् धर्मः, अस्तयः प्रदेशाः, तेषां कायः सङ्घातोऽस्तिकायः, धर्मश्चासावस्तिकायश्चेति समासः, सकललोकव्याप्यसङ्ख्येय-प्रदेशात्मकोऽमूर्तद्रव्यविशेषः इत्यर्थः। जीव-पुद्गलानामेव तथैव गतिपरिणतानां तत्स्व[२]भावाधरणा**दधर्मः**, जीव-पुद्गलानां स्थित्युपष्टम्भकारक इत्यर्थः। शेषं धर्मास्तिकायवत् सर्वम्। सर्व[३]भावाकाशनादाकाशम्, आ मर्यादया तत्संयोगेऽपि स्वकीयस्वकीयस्वरूपे-ऽवस्थानतः सर्वथा तत्स्वरूपत्वाप्राप्तिलक्षणया काशन्ते स्वभावलाभेन अवस्थितिकरणेन च दीप्यन्ते पदार्थसार्था यत्र तदाकाशमिति, अथवा आ अभिविधिना सर्वात्मना तत्संयोगानुभवनलक्षणेन काशन्ते [४]तथैव दीप्यन्ते पदार्था यत्र तदाकाशमिति भावः। तच्च तदस्तिकायश्चेति **आकाशास्तिकायः**, लोकालोकव्याप्यनन्तप्रदेशात्मकोऽमूर्तद्रव्यविशेष इत्यर्थः। जीवन्ति जीविष्यन्ति जीवितवन्त इति जीवाः, ते च ते**ऽस्तिकायाश्चे**ति समासः, प्रत्येकमसंख्येयप्रदेशात्मकसकललोकभाविनानाजीवद्रव्यसमूह इत्यर्थः। पूरण-गलनधर्म्माणः **पुद्गलाः** परमाण्वादयोऽनन्ताणुकस्कन्धपर्यन्ताः, ते हि कुतश्चिद् द्रव्याद् गलन्ति वियुज्यन्ते, किञ्चित्तु द्रव्यं तत्संयोगतः पूरयन्तीति भावः। ते च ते**ऽस्तिकायाश्चेति** समासः। **अद्धा**शब्दः कालवचनः, समयः सङ्केतादिवाचकोऽप्यस्ति, ततो [५]विशेष्यते-अद्धारूपः समयोऽद्धासमयः, वक्ष्यमाणपट्टसाटिकादिपाटनदृष्टान्तसिद्धः सर्वसूक्ष्मः पूर्वा-ऽपरकोटिविप्रमुक्तो वर्तमान एकः कालांश इत्यर्थः, अत एवात्र अस्तिकायत्वाभावः बहुप्रदेशत्व एव तद्भावात्, अत्र त्वतीता-ऽनागतयोर्विनष्टा-ऽनुत्पन्नत्वेन वर्तमानस्यैकस्यैव कालप्रदेशस्य सद्भावात्। नन्वेवमावलिकादिकालाभावः, समयबहुत्व एव तदुपपत्तेरिति चेत्, भवतु तर्हि, को निवारयिता ? [६]*समयावलियमुहुत्ता दिवसमहोरत्तपक्खमासा य* [*अनुयोगद्वारे सू० ३६५, आवश्यकनि० ६६३*] इत्याद्यागमविरोध इति चेत्, नैवम्, अभिप्रायापरिज्ञानात्, व्यवहारनयमतेनैव तत्र तत्सत्त्वाभ्युपगमात्, अत्र तु निश्चयनयमतेन तदसत्त्वप्रतिपादनात्, न हि पुद्गलस्कन्धे परमाणुसङ्घात इवावलिकादिषु समयसङ्घातः कश्चिदवस्थितः समस्तीति तदसत्त्वमसौ प्रतिपद्यत इत्यलं चर्चयेति।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अत्र च जीव-पुद्गलानां गत्यन्यथाऽनुपपत्तेर्धर्मास्तिकायस्य तेषामेव स्थित्यन्यथाऽनुपपत्तेरधर्मास्तिकायस्य सत्त्वं प्रतिपत्तव्यम्, न च वक्तव्यम् – तद्गति-स्थिती च भविष्यतो धर्माधर्मास्तिकायौ च न भविष्यत इति प्रतिबन्धाभावादनैकान्तिकतेति, तावन्तरेणापि तद्भवनेऽलोकेऽपि तत्प्रसङ्गात्। यदि तु अलोकेऽपि तद्गति-स्थिती स्यातां तदाऽलोकस्यानन्तत्वाल्लोकान्निर्गत्य जीव-पुद्गलानां तत्र प्रवेशादेकद्वित्रादिजीवपुद्गलयुक्तः सर्वथा तच्छून्यो वा कदाचिल्लोकः स्यात्, न चैतद् दृष्टमिष्टं वेत्याद्यन्यदपि दूषणजालमस्ति, न चोच्यते ग्रन्थविस्तरभयादिति। आकाशं तु जीवादिपदार्थानामाधारान्यथाऽनुपपत्तेरस्तीति श्रद्धेयम्। न च धर्माधर्मास्तिकायावेव तदाधारो भविष्यति इति वक्तव्यं तयोस्तद्गतिस्थितिसाधकत्वेनोक्तत्वात्, न चान्यसाध्यं कार्यमन्यः साधयति, अतिप्रसङ्गादिति। घटादिज्ञानगुणस्य प्रतिप्राणि स्वसंवेदनसिद्धत्वाज्जीवस्यास्तित्वमवसातव्यम्, न च गुणिनमन्तरेण गुणसत्ता युक्ता अतिप्रसङ्गात्, न च देह एवास्य गुणी युज्यते, यतो ज्ञानममूर्तं चिद्रूपं सदैवेन्द्रियगोचरातीतत्वादिधर्म्मोपेतम्, अतः तस्यानुरूप एव कश्चिद्गुणी समन्वेषणीयः, स च जीव एव, न तु देहो विपरीतत्वात्, यदि पुनरननुरूपोऽपि गुणानां गुणी कल्प्यते तर्ह्यनवस्था रूपादिगुणानामप्याकाशादेर्गुणित्वकल्पनाप्रसङ्गादिति। पुद्गलास्तिकायस्य तु घटादिकार्यान्यथानुपपत्तेः प्रत्यक्षत्वाच्च सत्त्वं प्रतीतमेवेति। कालोऽप्यस्ति, बकुलाऽशोक-चम्पकादिषु पुष्पफलप्रदानस्यानियमेनादर्शनात्, यस्तु तत्र नियामकः स कालः इति, स्वभावादेव तु तद्भवने *नित्यं सत्त्वमसत्त्वं वा* [*प्रमाणवा० ३/३५*] इत्यादिदूषणप्रसङ्गः, अत्र बहु वक्तव्यम्, तत्तु नोच्यते ग्रन्थदुरवगमताभयादिति। आह-धर्मास्तिकायस्य प्राथम्यमधर्मास्तिकायादीनां तु तदनन्तरं क्रमेणेत्थं निर्देशः कुतः सिद्धो येनात्र पूर्वानुपूर्वीरूपता स्यादिति ? अत्रोच्यते- आगमे इत्थमेव पठितत्वात्। तत्रापि कथमित्थमेव पाठ इति चेत्, उच्यते, धर्मास्तिकाय इत्यत्र यदाद्यं धर्मेतिपदं तस्य माङ्गलिकत्वाद्धर्मास्तिकायस्य प्रथममुपन्यासः ततस्तत्प्रतिपक्षत्वादधर्मास्तिकायस्य, ततस्तदाधारत्वादाकाशास्तिकायस्य, ततः स्वाभाविकामूर्तत्वसाम्याज्जीवास्तिकायस्य, ततस्तदुपयोगित्वात् पुद्गलास्तिकायस्य, ततो जीवाजीवपर्यायत्वात् तदनन्तरमद्धासमयस्योपन्यास इति पूर्वानुपूर्वीसिद्धिरिति।

अथ पश्चानुपूर्वीं निरूपयितुमाह- **से किं तं पच्छाणुपुव्वी**त्यादि, पाश्चात्त्यादारभ्य

Jain Education International For Private & Personal Use Only www.jainelibrary.org

प्रतिलोमं व्यत्ययेनैवानुपूर्वी परिपाटिः क्रियते यस्यां सा पश्चानुपूर्वी, अत्रोदाहरणमुत्क्रमेण इदमेवाऽऽह-**अद्धासमये**त्यादि गतार्थमेव।

**[सू० १३४] से किं तं अणाणुपुव्वी ? अणाणुपुव्वी— [१]एयाए चेव एगादियाए एगु[२]त्तरियाए छगच्छगयाए सेढीए अण्णमण्णब्भासो दुरू[३]वूणो। सेतं अणाणुपुव्वी।**

[चू० १३४] इदाणिं अणाणुपुव्वी-**एतेसिं चेव** इत्यादि। **एतेसिं** ति धम्मादियाणं। **चसद्दो** अत्थविसेससमुच्चये। **एवसद्दो** अवधारणे। एक्को आदी जाए गणणसेढीए एक्को य उत्तरं जाए गणणसेढीए ताए **एगादियाए एगुत्तराए**। पढमातो बितिए गणणट्ठाणे एक्को उत्तरं, एवं बितियातो ततिए एक्को उत्तरं, ततियातो चउत्थे एक्को उत्तरं, चउत्थातो पंचमे एक्को उत्तरं, पंचमातो छट्ठे एक्को उत्तरं, एवं एगुत्तरेण ताव गतं जाव छक्को गच्छो, **गच्छो** त्ति समूहो, **सेढि** त्ति सरिसाविच्छेदट्ठिताण पंती। एताए **छगच्छगताए सेढीए अण्णोण्णब्भासो** गुणणा पुव्वाणुपुव्वीए पच्छाणुपुव्वीए वा अणाणुपुव्वीहिं वा जहेव गुणितं तहेव सत्त सता वीसाहिया ७२० भवंति, ते पढमंतिमहीणा अट्ठारहुत्तरा सत्त सता ७१८ अणाणुपुव्वीणं भवंति। तेसिं आणणोवायो इमो —

*[१]पुव्वाणुपुव्विहेट्ठा* [*समयाभेदेण कुण जधाजेट्ठं*।
*उवरिमतुल्लं पुरतो, णसेज्ज पुव्वक्कमो सेसे*॥१॥] [*विशेषावश्यकभा० ९४३*] गाहा।

*पुव्वाणुपुव्वि* त्ति व्याख्या पूर्ववत्। *हेट्ठ* त्ति पढमाए पुव्वाणुपुव्विलताए अहो भंगरयणं बितियादिलतासु। *समयो* त्ति इह अणाणुपुव्विभंगरयणव्यवस्था समयः, तं अभिंदमाणो त्ति तं भंगरयणव्यवस्थां अविणासेमाणो। तस्स य विणासो जति सरिसंकं एगलताए ठवेति, जति वाऽभिहितलक्खणातो उ[२]क्कमेणं अंके ठवेति तो भिण्णो समयो। तं भेदं अकुव्वमाणो कुणसु *जधाजेट्ठं* ति जो जस्स आदीए स तहा तस्स जेट्ठो भवति, जहा दुगस्स एगो जेट्ठो, अणुजेट्ठो जहा तिगस्स एक्को, जेट्ठाणुजेट्ठो जहा चउक्कस्स एक्को, अतो परं सव्वे जेट्ठाणुजेट्ठा भाणितव्वा। एतेसिं अण्णतरे ठविते, *पुरतो* त्ति अग्गतो उवरिलतासरिसे अंके ट्ठवेज्जा। जेट्ठादिअंकट्ठवणातो जे एगादिया सेसा ठाणा तेसु जे अट्ठवितसेसका अंका ते

Jain Education International For Private & Personal Use Only www.jainelibrary.org

पुव्वक्कमेण ठवेज्ज, जो जस्स अणंतरो परंपरो वा पुव्वो अंको स पुव्वं ठविज्जंतो पुव्वक्कमो भण्णतीत्यर्थः । अहवा अणाणु[३]पुव्वीण इमो रयणविधी –

*पुव्वाणुपुव्वी[४]इच्छित, जति ठाणा ते परोप्परऽब्भत्था ।*
*अंतहितभागलद्धा, वोच्चत्थंकाण ठाणंते ॥१॥*
*आदिल्लेसु वि एवं, जे ज[५]त्थ ठिता य ते तु वज्जेज्जा*
*सेसेहि य वोच्चत्थं, कमुक्कमा पूर सरिसेहिं ॥२॥*
*भागहितलद्धठवणा, दुगादिएगुत्तरेहिं अब्भत्था ।*
*सरिसंकरयणठाणा, तिगादियाणं मुणेतव्वा ॥३॥*
*पढमदुगट्ठाणेसुं, जेट्ठादितिगेण अंतदिट्ठंको ।*
*अणुलोमं पडिलोमं, पूरे सेसेहिं उवउत्तो ॥४॥* [ ]

→[६]अहवा इमा अण्णा करणगाहा आणुपुव्वि-अणाणुपुव्वीणं आणयणे –

*इच्छित [अ?]ट्ठा फलपरिमाणा पंतीओ पढमविवरीता ।*
*तद्दिट्ठअंकवज्जा, सेसा चरिमा तु जेट्ठादी ॥१॥* [ ]←

[हा० १३४] **से किं तं अणाणुपुव्वी**त्यादि, न आनुपूर्वी अनानुपूर्वी, यत्रायं द्विप्रकारोऽपि क्रमो नास्ति [१]एवमेवोर्द्धमनिय[त]तया विवक्ष्यत इत्यर्थः । तथा चाह– **एयाए चेव** त्ति *एते छच्च समाणे* [ ] इति वचनादस्यामेवानन्तराधिकृतायां **एगादियाए** त्ति एकादिक्यां **एगुत्तरियाए** त्ति एकोत्तरायां **छगच्छगते** त्ति षण्णां गच्छः समुदायः षड्गच्छः, तं गता प्राप्ता षड्गच्छगता, तस्यां **सेढीए** त्ति श्रेण्याम्, किम् ? **अन्नमण्णब्भासो** त्ति अन्योन्यमभ्यासोऽन्योन्याभ्यासः, अभ्यासो गुणनेत्यनर्थान्तरम्, **दुरूवूणो** त्ति द्विरूपन्यूनः आद्यन्तरूपरहितोऽनानुपूर्वी[ति] सण्टङ्कः, एष तावदक्षरार्थः । भावार्थस्तु करण-गाथानुसारतोऽवगन्तव्यः, सा चेयं गाथा –

*[२]पुव्वाणुपुव्विहेट्ठा समयाभेदेण कुण जहाजेट्ठं ।*
*उवरिमतुल्लं पुरओ णसेज्ज पुव्वक्कमो सेसे ॥१॥* [विशेषावश्यकभा० ९४३]*त्ति* ।

पुव्वाणुपुव्विसद्दत्थो पुव्वं वण्णितो, हेट्ठ त्ति पढमाए पुव्वाणुपुव्विलताए अधो भङ्गरयणं बितियादिलतादिसु, समउ त्ति इह अणाणुपुव्विभङ्गरयणव्यवस्था समयः, तं अभिंदमाणो

त्ति तां भङ्गरचनाव्यवस्थाम् अविणासेमाणो, तस्स य विणासो जति सरिसभंगं लताए ठवेति जति वाऽभिहितलक्खणतो उक्कमेणं ठवेइ तो भिण्णो समओ। उक्तं च –

*जहियम्मि उ निक्खित्ते पुणरवि सो चेव होइ दायव्वो।*
*सो होति समयभेओ वज्जेयव्वो पयत्तेणं ॥१॥* [ ]

तं भेदं अकुव्वमाणो *कुणसु जहाजेट्ठ* न्ति जो जस्स आदीए स तधा तस्स जेट्ठो हवति। जहा दुगस्स एक्को जेट्ठो, अणुजेट्ठो जहा तिगस्स एक्को, जेट्ठाणुजेट्ठो जधा चउक्कस्स एक्को, अतो परं सव्वे जेट्ठाणुजेट्ठा भाणितव्वा। एतेसिं अण्णतरे ठविते पुरओ त्ति अग्गओ उवरिलतासरिसे अंके ठवेज्जा। जेट्ठादिअंकठवणतो जे एगादिया सेसट्ठाणा तेसु जे अट्ठवियसेसगा अंका ते पुव्वक्कमेण ठवेज्जा, जस्स अणंतरो परंपरो वा पुव्वो अंको स पुव्वं ठविज्जंतो पुव्वक्कमो भण्णतीत्यर्थः। तत्थ तिण्हं पदाणं इमा ठवणा – अहवा अणाणुपुव्वीणं परिमाणजाणणत्थो सुहविण्णेयो इमो उवाओ धम्मादिए चेव छप्पदे पडुच्च दंसिज्ज[इ] -एगादिएसु छसु परोप्परब्भासेण सत्त सता वीसुत्तरा भवंति, एक्केण दुगो गणिओ दोण्णि चेव, दोहिं तिगओ गणिओ दो तिगा च्छ, एवं छ चउक्क चउव्वीसं, चउवीसं पंच वीसुत्तरं सतं, वीसुत्तरं सतं छक्कगाण सत्त सता वीसुत्तरा। एते पढमंतिमहीणा अणाणुपुव्वीण सत्त सता अट्ठारसुत्तरा हवंति। आणणोवातो भणिओ चेव *पुव्वाणुपुव्वी हेट्ठा* इत्यादिना, एवमन्येऽपि भूयांस एवोपाया विद्यन्ते, न च तैरप्रस्तुतैरिहाधिकार इति न दर्श्यन्ते। **सेत्तं अणाणुपुव्वी**ति निगमनम्।

| | | |
|---|---|---|
| १ | २ | ३ |
| २ | १ | ३ |
| १ | ३ | २ |
| ३ | १ | २ |
| २ | ३ | १ |
| ३ | २ | १ |

[हे० १३४] अथानानुपूर्वीं निरूपयति-**से किं त**मित्यादि, अत्र निर्वचनम्- **अणाणुपुव्वी एताए चेवे**त्यादि, न विद्यते आनुपूर्वी यथोक्तपरिपाटिद्वयरूपा यस्यां सा अनानुपूर्वी विवक्षितपदानामनन्तरोक्तक्रमद्वयमुल्लङ्घ्य परस्परासदृशैः सम्भवद्भिर्भङ्गकैर्यस्यां विरचना क्रियते साऽनानुपूर्वीत्यर्थः। का पुनरियमित्याह- **अन्नमन्नब्भासो** त्ति अन्योन्यं परस्परमभ्यासो गुणनमन्योन्याभ्यासः **दुरूवोणो** त्ति द्विरूपन्यूनः आद्यन्तरूपरहितः अनानुपूर्वीति सण्टङ्कः। कस्यां विषये योऽसावभ्यास इत्याह-**श्रेण्यां** पंक्तौ, कस्यां पुनः श्रेणावित्याह-**एताए चेव** त्ति, अस्यामेव अनन्तराधिकृतधर्मास्तिकायादिसम्बन्धिन्याम्,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

कथंभूतायामित्याह-एक आदिर्यस्यां सा **एकादिकी,** एकैक उत्तरः प्रवर्द्धमानो यस्यां सा तथोक्ता, तस्यां पुनः कथंभूतायामित्याह-**छगच्छगताए** त्ति, षण्णां गच्छः समुदायः षड्गच्छस्तं गता प्राप्ता षड्गच्छगता, तस्याम्, धर्मास्तिकायादिवस्तुषट्कविषयायामित्यर्थः। आदौ व्यवस्थापितैककायाः पर्यन्ते न्यस्तषट्कायाः धर्मास्तिकायादिवस्तुषट्कविषयायाः पङ्क्तेर्या परस्परगुणने भङ्गकसङ्ख्या भवति सा आद्यन्तभङ्गद्वयरहिता अनानुपूर्वीति भावार्थः।

तत्रोर्ध्वाधः किलैककादयः षट्पर्यन्ता अङ्काः स्थापिताः। तत्र चैककेन द्विके गुणिते[1] जातौ द्वावेव, ताभ्यां त्रिको गुणितो जाताः षट्, तैरपि चतुष्कको गुणितो जाता चतुर्विंशतिः, पञ्चकस्य तु तद्गुणने जातं विंशं शतम्, षट्कस्य च तद्गुणने जातानि विंशत्यधिकानि सप्त भङ्गशतानि, स्थापना-

| |
|---|
| ६ |
| ५ |
| ४ |
| ३ |
| २ |
| १ |

आगतम् ७२०, अत्राऽऽद्यो भङ्गः पूर्वानुपूर्वी, अन्त्यस्तु पश्चानुपूर्वीति तदपगमे शेषाण्यष्टादशोत्तराणि सप्त भङ्गकशतान्यनानुपूर्वीति मन्तव्यानि। अत्र च भङ्गकस्वरूपानयनार्थं करणगाथा —

[2]*पुव्वाणुपुव्विहिट्ठा समयाभेएण कुरु जहाजेट्ठं।*
*उवरिमतुल्लं पुरओ नसेज्ज पुव्वक्कमो सेसे ॥११॥* [विशेषावश्यकभा० ९४३]*इति।*

व्याख्या- इह विवक्षितपदानां क्रमेण स्थापना पूर्वानुपूर्वीत्युच्यते, तस्याः हेट्ठ त्ति अधस्ताद् द्वितीयादिभङ्गकान् जिज्ञासुः कुरु त्ति स्थापय, एकादीनि पदानीति शेषः, कथमित्याह-ज्येष्ठस्यानतिक्रमेण यथाज्येष्ठम्, यो यस्यादौ स तस्य ज्येष्ठो यथा द्विकस्यैकको ज्येष्ठः, त्रिकस्य त्वेककोऽनुज्येष्ठः, चतुष्कादीनां तु स एव ज्येष्ठानुज्येष्ठ इति, एवं त्रिकस्य द्विको ज्येष्ठः, स एव चतुष्कस्यानुज्येष्ठः, पञ्चकादीनां तु स एव ज्येष्ठानुज्येष्ठ इत्यादि, एवं च सति उपरितनाङ्कस्य अधस्ताज्ज्येष्ठो निक्षिप्यते, तत्रालभ्यमाने अनुज्येष्ठः, तत्राप्यलभ्यमाने ज्येष्ठानुज्येष्ठ इति यथाज्येष्ठं निक्षेपं कुर्यात्, कथमित्याह-समयाभेदेनेति, समयः संकेतः प्रस्तुतभङ्गकरचनव्यवस्था, तस्य अभेदः अनतिक्रमः, तस्य च भेदस्तदा भवति यदा तस्मिन्नेव भङ्गके निक्षिप्ताङ्कसदृशोऽपरोऽङ्कः पतति, ततो यथोक्तं समयभेदं वर्जयन्नेव ज्येष्ठाद्यङ्कनिक्षेपं कुर्यात्,, उक्तं च-

*जहियंमि उ निक्खित्ते पुणरवि सो चेव होइ कायव्वो।*
*सो होइ समयभेदो वज्जेयव्वो पयत्तेणं ॥१॥* [ ]

Jain Education International For Private & Personal Use Only www.jainelibrary.org

निक्षिप्तस्य चाङ्कस्य यथासम्भवं पुरओ त्ति अग्रतः उपरितनाङ्कैस्तुल्यं सदृशं यथा भवत्येवं न्यस्येत्, उपरितनाङ्कसदृशानेवाङ्कान्निक्षिपेदित्यर्थः, पुव्वक्कमो सेसे त्ति स्थापित-शेषानङ्कान्निक्षिप्ताङ्कस्य यथासम्भवं पृष्ठतः पूर्वक्रमेण स्थापयेदित्यर्थः । यः सङ्ख्यया लघुरेककादिः स प्रथमं स्थाप्यते, यस्तु तया महान् द्विकादिः स पश्चादिति पूर्वक्रमः पूर्वानुपूर्वीलक्षणे प्रथमभङ्गके इत्थमेव दृष्टत्वादिति भाव इत्यक्षरघटना । भावार्थस्तु दिग्मात्रदर्शनार्थं सुखाधिगमाय च त्रीणि पदान्याश्रित्य तावद् दर्श्यते, तेषां च परस्पराभ्यासे षड् भङ्गा भवन्ति, ते चैवमानीयन्ते, पूर्वानुपूर्वीलक्षणस्तावत् प्रथमो भङ्गः, तद्यथा १२३, अस्याश्च पूर्वानुपूर्व्या अधस्ताद् भङ्गकरचने क्रियमाणे एककस्य तावज्ज्येष्ठ एव नास्ति, द्विकस्य तु विद्यते एकः स तदधो निक्षिप्यते, तस्य चाग्रतस्त्रिको दीयते उवरिमतुल्लमित्यादि-वचनात्, पृष्ठतस्तु स्थापितशेषो द्विको दीयते, ततोऽयं द्वितीयो भङ्गः २१३, अत्र च द्विकस्य विद्यते एकको ज्येष्ठः परं नासौ तदधस्तान्निक्षिप्यते, अग्रतः सदृशाङ्कपातेन समयभेदप्रसङ्गात्, एककस्य तु ज्येष्ठ एव नास्ति, त्रिकस्य तु विद्यते द्विको ज्येष्ठः, स तदधस्तान्निक्षिप्यते, अत्र चाग्रभागस्य तावदसम्भव एव, पृष्ठतस्तु स्थापितशेषावेकक-त्रिकौ क्रमेण स्थाप्येते, पुव्वक्कमो सेसे त्ति वचनात्, ततस्तृतीयोऽयं भङ्गः १३२, अत्राप्येककस्य ज्येष्ठ एव नास्ति, त्रिकस्य तु ज्येष्ठोऽस्ति द्विको न च निक्षिप्यते, अग्रे सदृशाङ्कपातेन समयभेदापत्तेः, ततोऽस्यैवानुज्येष्ठ एककः स्थाप्यते, अग्रतस्तु द्विकः, *उवरिमतुल्ल*मित्यादिवचनात्, पृष्ठतस्तु स्थापितशेषस्त्रिको दीयते इति चतुर्थोऽयं भङ्गः ३१२, एवमनया दिशा पञ्चम-षष्ठावप्यभ्यूह्यौ, सर्वेषां चामीषामियं स्थापना-

| | | |
|---|---|---|
| १ | २ | ३ |
| २ | १ | ३ |
| १ | ३ | २ |
| ३ | १ | २ |
| २ | ३ | १ |
| ३ | २ | १ |

अत्राप्याद्यभङ्गस्य पूर्वानुपूर्वीत्वादन्त्यस्य च पश्चानुपूर्वीत्वान्मध्यमा एव चत्वारोऽनानुपूर्वीत्वेन मन्तव्याः, एवमनयोद्दिष्टया चतुरादिपदसम्भविनोऽपि भङ्गा भावनीयाः । भूयांसश्चे**होत्तराध्ययनटीका**दि-निर्दिष्टाः प्रस्तुतभङ्गानयनोपायाः सन्ति, न चोच्यन्तेऽतिविस्तरभयात्, तदर्थिना तु तत एवावधारणीयाः । तदिदमत्र तात्पर्यम्-पूर्वानुपूर्व्यां तावद्धर्मास्तिकायस्य प्रथमत्वमेव, तदनुक्रमेणाधर्मास्तिकायादीनां द्वितीयादित्वम्, पश्चानुपूर्व्यां त्वद्धासमयस्य प्रथमत्वम्, पुद्गलास्तिकायादीनां तु प्रतिलोमतया द्वितीयादित्वम्, अनानुपूर्व्यां त्वनियमेन क्वचिद्भङ्गके कस्यचित् प्रथमादित्वमित्यलं विस्तरेण । **सेतं**मित्यादि निगमनम् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[सू० १३५] अहवा ओवणिहिया दव्वाणुपुव्वी तिविहा पन्नत्ता। तं जहा — पुव्वाणुपुव्वी १, पच्छाणुपुव्वी २, अणाणुपुव्वी ३।**

**[सू० १३६] से किं तं पुव्वाणुपुव्वी ? पुव्वाणुपुव्वी — परमाणुपोग्गले दुपएसिए ति[1]पएसिए जाव दसपएसिए जाव संखिज्जपएसिए असंखिज्जपएसिए अणंतपएसिए। सेतं पुव्वाणुपुव्वी।**

**[सू० १३७] से किं तं पच्छाणुपुव्वी ? पच्छाणुपुव्वी — अणंतपएसिए असंखिज्जपएसिए संखिज्जपएसिए जाव दसपएसिए जाव तिपएसिए दुपएसिए परमाणुपोग्गले। सेतं पच्छाणुपुव्वी।**

**[सू० १३८] से किं तं अणाणुपुव्वी ? अणाणुपुव्वी — [2]एयाए चेव एगाइयाए एगुत्तरियाए अणंतगच्छगयाए सेढीए अन्नमन्नब्भासो दुरूवू[3]णो। सेतं अणाणुपुव्वी। सेतं ओवणिहिया दव्वाणुपुव्वी। [4]→ सेतं जाणगवइरित्ता दव्वाणुपुव्वी। सेतं नोआगमओ दव्वाणुपुव्वी। ← सेतं दव्वाणुपुव्वी।**

[चू० १३५-१३८] **अहवा तिविहा दव्वाणुपुव्वी**त्यादि । **परमाणुमादिसु** तिविहा वि सुत्तसिद्धा। सिस्स आह- किं पत्तेयं पुग्गलेसु तिविहा उवणिधी दंसिता ? ण धम्मादिएसु ? । आचार्याऽऽह— धम्मा-धम्मा-ऽऽगासाण पत्तेयमेगदव्वत्तणतो अणुपुव्विमादी ण घडति, जीवत्थिकाए वि सव्वजीवाण तुल्लपदेसत्तणतो एगादिएगुत्तरवड्ढी णत्थि त्ति, अहवाऽवगाहेण विसेसो होज्ज तत्थ वि आणुपुव्वी चेव णो अणाणुपुव्वी-अव्वत्तव्वगाइं ति, कालस्स वि एगसमयत्तणतो स्वतो नोक्ता इत्यर्थः, पुद्गलेसु तु एगादिएगुत्तरदव्वड्ढा[णा ]णमणंतसंभवप्रदर्शनार्थं प्रत्येकमुक्ता इति । गता दव्वाणुपुव्वी।

[हा० १३५-१३८] अहवेत्यादि, अहवेति प्रकारान्तरदर्शनार्थः। **औपनिधिकी द्रव्यानुपूर्वी त्रिविधा प्रज्ञप्ता, तद्यथा- पूर्वानुपूर्वी**त्यादि सूत्रसिद्धं यावन्निगमनमिति।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

नवरमाह चोदकः — अथ कस्मात् पुद्गलास्तिकाये एव त्रिविधा दर्शिता, न शेषास्तिकायेषु धर्मादिषु ? इति, अत्रोच्यते — असम्भवात्, असम्भवश्च धर्मा-ऽधर्मा-ऽऽकाशानां प्रत्येकमेकद्रव्यत्वाद् एकद्रव्येषु च पूर्वानुपूर्व्याद्ययोगात्, जीवास्तिकायेऽपि सर्वजीवानामेव तुल्यप्रदेशत्वादेकाद्येकोत्तरवृद्ध्यभावादयोग इति, अद्धासमयस्यैकत्वादयोग इत्यलं प्रसङ्गेन। प्रकृतं प्रस्तुमः। गता द्रव्यानुपूर्वी।

[हे० १३५-१३८] तदेवमत्र पक्षे धर्मास्तिकायादीनि षडपि द्रव्याणि पूर्वानुपूर्व्यादित्वेनोदाहृतानि, साम्प्रतं त्वेकमेव पुद्गलास्तिकायमुदाहर्तुमाह- **अहवेत्यादि**। अत्र चौपनिधिक्या द्रव्यानुपूर्व्या ज्ञातमपि त्रैविध्यं यत् पुनरप्युपन्यस्तं तत् प्रमाणान्तरभणनप्रस्तावादेवेति मन्तव्यम्, **अणंतगच्छगताए** त्ति अत्रैकोत्तरवृद्धिमत्स्कन्धानामनन्तत्वादनन्तानां गच्छः समुदायोऽनन्तगच्छः, तं गता अनन्तगच्छगता, तस्याम्, अत एव भङ्गा अत्रानन्ता एवावसेया इति। शेषभावना च सर्वा पूर्वोक्तानुसारतः स्वयमप्यवसेयेति।

आह- ननु यथैकः पुद्गलास्तिकायो निर्धार्य पुनरपि पूर्वानुपूर्व्यादित्वेनोदाहृतः एवं शेषा अपि प्रत्येकं किमिति नोदाह्रियन्ते ? अत्रोच्यते-द्रव्याणां क्रमः[1] परिपाट्यादिलक्षणः पूर्वानुपूर्व्यादिविचार इह प्रक्रान्तः, स च द्रव्यबाहुल्ये सति संभवति, धर्मा-ऽधर्मा-ऽऽकाशास्तिकायेषु च पुद्गलास्तिकायवन्नास्ति प्रत्येकं द्रव्यबाहुल्यम् एकैकद्रव्यत्वात्तेषाम्, जीवास्तिकाये त्वनन्तजीवद्रव्यात्मकत्वादस्ति द्रव्यबाहुल्यम्, केवलं परमाणु-द्विप्रदेशिकादिद्रव्याणामिव जीवद्रव्याणां पूर्वानुपूर्व्यादित्वनिबन्धनः प्रथम-पाश्चात्त्यादिभावो नास्ति प्रत्येकमसंख्येयप्रदेशत्वेन सर्वेषां तुल्यप्रदेशत्वात् परमाणु-द्विप्रदेशिकादिद्रव्याणां तु विषमप्रदेशत्वादिति, अद्धासमयस्यैकत्वादेव तदसम्भव इत्यलमतिचर्चितेन। तदेवं समर्थिता औपनिधिकी द्रव्यानुपूर्वी, तत्समर्थने च समर्थिता प्रागुद्दिष्टा द्विप्रकाराऽपि द्रव्यानुपूर्वी, ततः **सेत्त**मित्यादीनि निगमनानि, द्रव्यानुपूर्वी समाप्ता।

**[सू० १३९] से किं तं खेत्ताणुपुव्वी ? खेत्ताणुपुव्वी दुविहा पण्णत्ता। तंजहा— ओवणिहिया य अणोवणिहिया य।**

[सू० १४०] तत्थ णं जा सा ओवणिहिया सा ठप्पा।

[सू० १४१] तत्थ णं जा सा अणोवणिहिया सा दुविहा पन्नत्ता। तंजहा— णेगम-ववहाराणं १, संगहस्स य २।

[सू० १४२] से किं तं णेगम-ववहाराणं अणोवणिहिया खेत्ताणुपुव्वी? णेगम-ववहाराणं अणोवणिहिया खेत्ताणुपुव्वी पंचविहा पण्णत्ता। तंजहा— अट्ठपयपरूवणया १, भंगसमुक्कित्तणया २, भंगोवदंसणया ३, समोयारे ४, अणुगमे ५।

[सू० १४३] से किं तं णेगम-ववहाराणं अट्ठपयपरूवणया? णेगम-ववहाराणं अट्ठपयपरूवणया — तिपएसोगाढे आणुपुव्वी [1]जाव दसपएसोगाढे आणुपुव्वी जाव संखिज्जपएसोगाढे आणुपुव्वी, असंखेज्जपएसोगाढे आणुपुव्वी, एगपएसोगाढे अणाणुपुव्वी, दुपएसोगाढे अवत्तव्वए, तिपएसो[2]गाढा आणुपुव्वीओ [3]जाव दसपएसोगाढा आणुपुव्वीओ जाव संखेज्जपएसोगाढा आणुपुव्वीओ, असंखिज्जपएसोगाढा आणुपुव्वीओ, एगपएसोगाढा अणाणुपुव्वीओ, दुपएसो[4]गाढा अवत्तव्वगाइं। सेतं णेगम-ववहाराणं अट्ठपयपरूवणया।

[सू० १४४] एयाए[5] णं णेगम-ववहाराणं अट्ठपयपरूवणयाए किं [6]पओयणं? एयाए[7] णं णेगम-ववहाराणं अट्ठपयपरूवणयाए णेगम-ववहाराणं भंगसमुक्कित्तणया [8]कीरति।

[सू० १४५] से किं तं णेगम-ववहाराणं भंगसमुक्कित्तणया? णेगम-ववहाराणं भंगसमुक्कित्तणया— अत्थि आणुपुव्वी १, अत्थि

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अणाणुपुव्वी २, अत्थि अवत्तव्वए ३ ।[९] → [१०]एवं दव्वाणुपुव्विगमेणं खेत्ताणुपुव्वीए वि ते चेव छव्वीसं भंगा भाणियव्वा, जाव सेतं णेगम-ववहाराणं भंगसमुक्कित्तणया।

[सू० १४६] एयाए णं णेगम-ववहाराणं भंगसमुक्कित्तणयाए किं पओयणं ? एयाए णं णेगम-ववहाराणं भंगसमुक्कित्तणयाए णेगम-ववहाराणं भंगोवदंसणया कज्जति।

[सू० १४७] से किं तं णेगम-ववहाराणं भंगोवदंसणया ? णेगम-ववहाराणं भंगोवदंसणया— तिपएसोगाढे आणुपुव्वी, एगपएसोगाढे अणाणुपुव्वी, दुपएसोगाढे अवत्तव्वए, तिपएसोगाढाओ आणुपुव्वीओ, एगपएसोगाढाओ अणाणुपुव्वीओ, दुपएसोगाढाइं अवत्तव्वयाइं,[११] अहवा तिपएसोगाढे य एगपएसोगाढे य आणुपुव्वी य अणाणुपुव्वी य, एवं तहा चेव दव्वाणुपुव्विगमेणं छव्वीसं भंगा भाणियव्वा जाव सेतं णेगम-ववहाराणं भंगोवदंसणया।

[सू० १४८] [१] से किं[१२] तं समोयारे ? समोयारे-णेगम-ववहाराणं आणुपुव्वीदव्वाइं कहिं समोयरंति ? किं आणुपुव्वीदव्वेहिं समोयरंति ? अणाणुपुव्वीदव्वेहिं समोयरंति ? अवत्तव्वयदव्वेहिं समोयरंति ? आणुपुव्वीदव्वाइं आणुपुव्वीदव्वेहिं समोयरंति, नो अणाणुपुव्वीदव्वेहिं समोयरंति, नो अवत्तव्वयदव्वेहिं समोयरंति।

[२] एवं तिण्णि वि सट्ठाणे समोयरंति त्ति भाणियव्वं । सेतं समोयारे।←

Jain Education International For Private & Personal Use Only www.jainelibrary.org

[सू० १४९] से किं तं अणुगमे ? अणुगमे णवविहे पण्णत्ते। तंजहा —

संतपय[१३]परूवणया १, दव्वपमाणं २ च, खेत्त ३, फुसणा ४ य।

कालो ५, य अंतरं ६, भाग ७, भाव ८ , अप्पाबहुं ९ चेव ॥१०॥

[सू० १५०] [१४]→ से किं तं संतपयपरूवणया ? ← णेगम-ववहाराणं[१५] खेत्ताणुपुव्वीदव्वाइं किं अत्थि णत्थि ? णियमा अत्थि। [१६]→ एवं दोण्णि वि ।

[सू० १५१] णेगम-ववहाराणं आणुपुव्वीदव्वाइं किं संखेज्जाइं, असंखेज्जाइं, अणंताइं ? नो संखेज्जाइं, नो अणंताइं, नियमा असंखेज्जाइं। [१७]एवं दोण्णि वि।←

[चू० १३९-१५१] →इदाणिं खेत्ताणुपुव्वी← दव्वावगाधोवलक्खितं खेत्तं **खेत्ताणुपुव्वी** । अहवा अवगाह-ऽवगाहीण अण्णोण्णसिद्धिहेतुत्तणे वि आगासस्स-ऽवगाहलक्खणत्तणतो खेत्ताणुपुव्वी भन्नति । अहवा दव्वाण चेव खेत्तावगाहमग्गणा खेत्ताणुपुव्वी । सो य अवगाधो दव्वाण इमेण विहिणा- अणाणुपुव्विदव्वाण णियमा एगपदेसावगाहो, अव्वत्तव्वगदव्वाणं पुण एगपदेसावगाहो दुपदेसावगाहो वा, तिपदेसादयो पुण जहन्नतो एगपदेसे उक्कोसेणं पुण जो खंधो जत्तिएहिं परमाणूहिं [णिप्फण्णो] स तत्तिएहिं चेव पदेसेहि अवगाहति, एवं जाव संखा-ऽसंखपदेसा । अणंतपदेसा पुण खंधा एगपदेसारद्धा एगपदेसुत्तरवड्ढीए उक्कोसतो जाव असंखेज्जपदेसोगाढा भवंति, लोगागासखेत्तावगाहणत्तणतो नानन्तप्रदेशावगाढा इत्यर्थः । एवं खेत्ताणुपुव्विसमासत्थे दंसिते इदाणिं सभेदा खेत्ताणुपुव्वी भन्नति - **दुविधा- ओवणिही अणोवणिधिके**त्यादि। एता दो वि सभेदा जहा दव्वाणुपुव्वीए तहा खेत्ताभिलावेण सव्वं भाणितव्वं । पमाणे विसेसो- **णो संखेज्जा, णो अणंता, असंखेज्जा** तिन्नि वि भाणितव्वा, दव्वाण अवगाह[१]खेत्तासंखेज्जत्तणतो सरिसावगाहणाण य एगत्तणतो ।

[हा० १३९ - १५१] साम्प्रतं क्षेत्रानुपूर्वी प्रतिपाद्यते, तत्रेदं सूत्रम् — **से किं तं**

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**खेत्ताणुपुव्वी**, द्रव्यावगाहोपलक्षितं क्षेत्रमेव **क्षेत्रानुपूर्वी द्विविधा प्रज्ञप्ते**त्यादि, अत्र यथा द्रव्यानुपूर्व्यां तथैवाक्षरगमनिका कार्या, विशेषं तु वक्ष्यामः । **तिपदेसोगाढे**[१] **आणुपुव्वि** त्ति, त्रिप्रदेशावगाढः त्र्यणुकादिस्कन्धः अवगाह्या-ऽवगाहकयोरन्योन्य-सिद्धिभावेऽप्याकाशस्यावगाहलक्षणत्वात् क्षेत्रानुपूर्व्यधिकारात् क्षेत्रप्राधान्यात् क्षेत्रानुपूर्वीति, एवं यावदसङ्ख्येयप्रदेशावगाढोऽनन्तप्रदेशिकादिरानुपूर्वीति । **एगपदेसोगाढेऽणाणुपुव्वि** त्ति, एकप्रदेशावगाढः परमाणुः स्कन्धो वाऽनानुपूर्वी । **दुपदेसोगाढे अवत्तव्वए**, द्विप्रदेशावगाढो द्व्यणुकादिरवक्तव्यकम् । एत्थावगाहो दव्वाणं इमेण विहिणा - अणाणुपुव्विदव्वाणं परमाणूणं नियमा एगम्मि चेव पदेसेऽवगाहो भवति, अवत्तव्वयदव्वाणं पुण दुपदेसिगाणं एगम्मि वा दोसु वा, आणुपुव्विदव्वाणं पुण तिपदेसिगादीणं जहण्णेणं एगम्मि पदेसे उक्कोसेणं पुण जो खंधो जत्तिएहिं परमाणूहिं णिप्फण्णो सो तत्तिएहिं चेव पएसेहिं ओगाहति, एवं जाव संखेज्जा-ऽसंखेज्जपदेसितो, अणंतपदेसिओ पुण खंधो एगपदेसारद्धो एगपदेसुत्तरवुड्ढीए उक्कोसओ जाव असंखेज्जेसु पदेसेसु ओगाहति, नानन्तेषु, लोकाकाशस्यासंख्येय-प्रदेशात्मकत्वात् तत्परतश्चावगाहनाऽयोगादित्यलं प्रसंगेन।

शेषं सूत्रसिद्धं यावत् **णेगमववहाराणं आणुपुव्विदव्वाइं किं संखेज्जाइं असंखेज्जाइं अणंताइं ? नेगमवव० आणु० नो संखेज्जाइं, असंखेज्जाइं, नो अणंताइं,** एवं अणाणुपुव्विदव्वाणि वि । तत्र असङ्ख्येयानि क्षेत्रप्राधान्याद् द्रव्यावगाहक्षेत्रस्य चासंख्येयप्रदेशात्मकत्वात् तुल्यप्रदेशावगाढानां च द्रव्यतया बहूनामप्येकत्वादिति ।

**[हे० १३९-१५१]** उक्ता द्रव्यानुपूर्वी, अथ प्रागुद्दिष्टामेव क्षेत्रानुपूर्वीं व्याचिख्यासुराह- **से किं तं खेत्ताणुपुव्वि** त्ति । इह क्षेत्रविषया आनुपूर्वी क्षेत्रानुपूर्वी, का पुनरियमित्यत्र निर्वचनम्- **क्षेत्रानुपूर्वी द्विविधा प्रज्ञप्ता, तद्यथा-औपनिधिकी** पूर्वोक्तशब्दार्था **अनौपनिधिकी च । तत्र याऽसावौपनिधिकी सा स्थाप्या,** अल्पवक्तव्यत्वादुपरि वक्ष्यत इत्यर्थः, तत्र **याऽसावनौपनिधिकी सा** नयवक्तव्यताश्रयणाद् **द्विविधा प्रज्ञप्ता, तद्यथा-नैगम-व्यवहारयोः सङ्ग्रहस्य च** सम्मतेति शेषः ।

तत्र नैगम-व्यवहारसंमतां तावद्दर्शयितुमाह- **से किं त**मित्यादि । इह व्याख्या यथा

Jain Education International For Private & Personal Use Only www.jainelibrary.org

द्रव्यानुपूर्व्यां तथैव कर्तव्या, विशेषं तु वक्ष्यामः। तत्र **तिपएसोगाढे आणुपुव्वि** त्ति, त्रिषु नभःप्रदेशेष्ववगाढः स्थितः त्रिप्रदेशावगाढस्त्र्यणुकादिकोऽनन्ताणुकपर्यन्तो द्रव्यस्कन्ध एवानुपूर्वी। ननु यदि द्रव्यस्कन्ध एवानुपूर्वी कथं तर्हि तस्य क्षेत्रानुपूर्वीत्वम् ? सत्यम्, किन्तु क्षेत्रप्रदेशत्रयावगाहपर्यायविशिष्टोऽसौ द्रव्यस्कन्धो गृहीतो नाविशिष्टः, ततोऽत्र क्षेत्रानुपूर्व्यधिकारात् क्षेत्रावगाहपर्यायस्य प्राधान्यात् सोऽपि क्षेत्रानुपूर्वीति न दोषः, प्रदेशत्रयलक्षणस्य क्षेत्रस्यैवात्र मुख्यं क्षेत्रानुपूर्वीत्वम्, तदधिकारादेव, किन्तु तदवगाढं द्रव्यमपि तत्पर्यायस्य प्राधान्येन विवक्षितत्वात् क्षेत्रानुपूर्वीत्वेन न विरुध्यत इति भावः।

यद्येवं तर्हि मुख्यं क्षेत्रं परित्यज्य किमिति तदवगाढद्रव्यस्यानुपूर्व्यादिभावश्चिन्त्यते ? उच्यते- **संतपयपरूवणये**त्यादिवक्ष्यमाणबहुतरविचारविषयत्वेन द्रव्यस्य शिष्यमतिव्युत्पादनार्थत्वात्, क्षेत्रस्य तु नित्यत्वेन सदावस्थितमानत्वादचलत्वाच्च प्रायो वक्ष्यमाणविचारस्य सुप्रतीतत्वेन तथाविधशिष्यमतिव्युत्पत्त्यविषयत्वात्, एवमन्यदपि कारणमभ्यूह्यमित्यलं विस्तरेण। एवं चतुष्प्रदेशावगाढादिष्वपि भावना कार्या, यावद**सङ्ख्यातप्रदेशावगाढा(ढ?) आनुपूर्वी**ति, असङ्ख्यातप्रदेशेषु चावगाढोऽसङ्ख्याताणुकोऽनन्ताणुको वा द्रव्यस्कन्धो मन्तव्यः, यतः पुद्गलद्रव्याणामवगाहमित्थं जगद्गुरवः प्रतिपादयन्ति- परमाणुराकाशस्यैकस्मिन्नेव प्रदेशेऽवगाहते, द्विप्रदेशिकादयोऽसङ्ख्यातप्रदेशिकान्तास्तु स्कन्धाः प्रत्येकं जघन्यत एकस्मिन्नाकाशप्रदेशेऽवगाहन्ते, उत्कृष्टतस्तु यत्र स्कन्धे यावन्तः परमाणवो भवन्ति स तावत्स्वेव नभःप्रदेशेष्ववगाहते, अनन्ताणुकस्कन्धस्तु जघन्यतस्तथैव, उत्कृष्टतस्त्वसङ्ख्येयेष्वेव नभःप्रदेशेष्ववगाहते, नानन्तेषु, लोकाकाशस्यैवासङ्ख्येयप्रदेशत्वात्, अलोकाकाशे च द्रव्यावगाहाभावादित्यलं प्रसङ्गेन।

प्रकृतमुच्यते। तत्रानुपूर्वीप्रतिपक्षत्वादनानुपूर्व्यादिस्वरूपमाह- **एगपएसोगाढे अणाणुपुव्वि** त्ति, एकस्मिन्नभःप्रदेशे अवगाढः स्थित एकप्रदेशावगाढः परमाणुसङ्घातः स्कन्धसङ्घातश्च क्षेत्रतोऽनानुपूर्वीति मन्तव्यः। **दुपएसोगाढे अवत्तव्वए** त्ति [१]प्रदेशद्वयेऽवगाढो द्विप्रदेशिकादिस्कन्धः क्षेत्रतोऽवक्तव्यकम्, शेषो बहुवचननिर्देशादिको ग्रन्थो यथाऽधस्ताद् द्रव्यानुपूर्व्यां व्याख्यातस्तथेहापि तदुक्तानुसारतो व्याख्येयो यावद् द्रव्यप्रमाणद्वारे **नेगमववहाराणं आणुपुव्विदव्वाइं किं संखेज्जाइ**मित्यादि प्रश्नः। अत्रोत्तरम्- **नो**

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**संखेज्जाइ**मित्यादि, त्र्यादिप्रदेशविभागावगाढानि द्रव्याणि क्षेत्रत आनुपूर्वीत्वेन निर्दिष्टानि, त्र्यादिप्रदेशविभागाश्चासङ्ख्यातप्रदेशात्मके लोकेऽसङ्ख्याता भवन्ति, अतो द्रव्यतया बहूनामपि क्षेत्रावगाहमपेक्ष्य तुल्यप्रदेशावगाढानामेकत्वात् क्षेत्रानुपूर्व्यामसङ्ख्यातान्येवानुपूर्वीद्रव्याणि भवन्तीति भावः । एवमेकप्रदेशावगाढं बह्वपि द्रव्यं क्षेत्रत एकैवानानुपूर्वीत्युक्तम्, लोके च प्रदेशा असङ्ख्याता भवन्ति, अतस्तत्तुल्यसङ्ख्यत्वादनानुपूर्वीद्रव्याण्यप्यसङ्ख्येयानीति। एवं प्रदेशद्वयेऽवगाढं बह्वपि द्रव्यं क्षेत्रत एकमेवावक्तव्यकमुक्तम्, द्विप्रदेशात्मकाश्च विभागा लोकेऽसङ्ख्याता भवन्त्यतस्तान्यप्यसङ्ख्येयानीति।

**[सू० १५२] [१] णेगम-ववहाराणं[1] खेत्ताणुपुव्वीदव्वाइं लोगस्स[2] → कतिभागे होज्जा ? ← किं संखिज्जइभागे वा होज्जा[3] ? असंखेज्जइभागे वा होज्जा[4] ? जाव सव्वलोए वा होज्जा[5] ? एगदव्वं पडुच्च लोगस्स संखेज्जइभागे वा होज्जा, असंखेज्जइभागे वा होज्जा, संखेज्जेसु वा भागेसु होज्जा, असंखेज्जेसु वा भागेसु होज्जा, देसूणे वा लोए होज्जा, णाणादव्वाइं पडुच्च णियमा सव्वलोए होज्जा।**

**[२] [6] →अणाणुपुव्वीदव्वाणं[7] पुच्छा, एगं दव्वं पडुच्च नो संखिज्जतिभागे होज्जा, असंखिज्जतिभागे होज्जा, नो संखेज्जेसु० नो असंखेज्जेसु० नो सव्वलोए होज्जा, नाणादव्वाइं पडुच्च नियमा सव्वलोए होज्जा।**

**[३] एवं अवत्तव्वगदव्वाणि वि भाणियव्वाणि।←**

**[चू० १५२]** खेत्तदारे सुत्तं- **एगदव्वं पडुच्च देसूणे वा लोए होज्ज** त्ति, कहं ?, उच्यते – अणाणुपुव्विपदेसेण अव्वत्तव्वगपदेसेहि य दोहि ऊणो लोगो देसूणो भन्नति[1], सेसा सव्वे खेत्तपदेसा सेसखेत्तप्पदेसोगाढं वा दव्वं उक्कोसतो खेत्ताणुपुव्वी भण्णति । चोदक आह – जति दव्वाणुपुव्वीए एगदव्वं पडुच्च सव्वलोगावगाढं, कहं खेत्ताणुपुव्वीए देसूणे लोगे ? त्ति, णणु विरुद्धं । अत्रोच्यते – उक्तं पूर्वमुनिभिः –

Jain Education International For Private & Personal Use Only www.jainelibrary.org

*[२]महखंधापुन्ने वी, अवत्तव्वग-अणणुपुव्विदव्वाइं।*
*जद्देसोगाढाइं, तद्देसेणं स लोगूणो ॥१॥* [ ]

किञ्च, अचित्तमहाखंधेण पूरिए वि लोगो देस-पदेसादिदव्वकरणतो देसूणो भन्नति। जहा अजीव**पन्नवणाए** भणितं – *धम्मत्थिकाए, धम्मत्थिकायस्स देसे, धम्मत्थिकायस्स पदेसे, एवं अधम्मा-ऽऽगास-पुग्गलेसु वि* [*प्रज्ञा० पद १ सू० ३*]। जधा एतेसु देस-पदेसपरिकप्पणाए धम्मादयो तदूणा दिट्ठा, एवं विभागदव्वादेसतो अचित्तमहाखंधावगाधो तदूणो त्ति दे[३]सूणलोगे, ण दोसो। अहवा उग्गहो त्ति वा अवगाहो त्ति वा एगट्ठं, एगावगाहट्ठिताण वि [४]पच्छावगाहकालभेदतो अप्पतराणुभावत्तणतो वा उग्गहपाधण्णता दिट्ठा, जहा ***[५]उग्गहसुत्ते***[*बृहत्कल्पे उ० ३ सू० २८*] देविंदोग्गहादियाणं जाव साधम्मिउग्गहो, एतेसिं 'हेट्ठिल्ल' त्ति पुरिल्ला ते 'उवरिल्लेहिं' ति पच्छिमेहिं 'बाहिय' त्ति पीडिया 'पाधण्णं' ति प्राधान्यं अवग्रहात्मस्वभावं न लभंति इत्यर्थः, एवं इधं अचित्तमहाखंधेगदव्वस्स सव्वलोगावगाढस्स वि अणणुपुव्वी-अवत्तव्वगावगाहेहिं बाधितो त्ति तप्पदेसेसु पाधन्नं ण लभति त्ति तदूणो देसूणो भण्णति, ण दोसो। किञ्च, खेत्ताणुपुव्वीए अणुपुव्वि-अणणुपुव्वि-अवत्तव्वगदव्वविभागत्तणतो ण तेसिं परोप्परमवगाहो, परिणती वा, ण वा तेसिं खंधभावो अत्थि। कधं ?, उच्यते – पदेसाण अचलभावत्तणतो, सतो अपरिणामत्तणतो, तेसिं च भावप्पमाणणिच्चत्तणतो, अतो खेत्ताणुपुव्वीए **एगदव्वं पडुच्च देसूणे लोगे** त्ति भणितं। दव्वाणुपुव्वीए पुण दव्वाण एगपदेसावगाहत्तणतो एगावगाहे वि दव्वाण आतभावेण भिण्णत्तणतो अण्णोण्णपरिणामत्तणतो खंधभावपरिणामत्तणतो य, अतो एगदव्वं पडुच्च सव्वलोगे त्ति। भणितं च –

*कह ण वि दविए चेवं,* खद्देसवि[६]वक्खता पिधत्तेणं।
*[७]दव्वाणुपुव्वि ताइं, परिणमइ खंधभावेणं ॥१॥* [ ]

अण्णं च, बायरपरिणामेसु आणुपुव्विदव्वपरिणामो भवति, णो अणणुपुव्वि-अवत्तव्वगदव्वत्तेण, जतो बादरपरि[८]णामो खंधभावे चेव भवति। जे पुण सुहुमा ते तिविधा वि अत्थि। किं च, जदा अचित्तमहाखंधपरिणामो भवति तदा सव्वे ते सुहुमा आयभावपरिणामं अमुंचमाणा तप्परिणता भवंति, तस्स सुहुमत्तणतो सव्वगतत्तणतो य। कहमेवं ? उच्यते – छाया-ऽऽतपोद्द्योतबादरपुद्गलपरिणामवद् अग्निशोध्यवस्त्राग्निपरिणतिवत् स्फटिककृष्णादि-

वर्णोपरञ्जितवत्। सीसो पुच्छति-दव्वाणुपुव्वीए एगदव्वं सव्वलोगावगाढं ति, कहं पुण एमहंतं एगदव्वं भवति ?। उच्यते — केवलिसमुद्धातवत्। उक्तं च —

*केवलिउग्घातो इव,* समयट्ठक पूरेयति य लोगं।
अच्चित्तमहाखंधो, वेला विव अतरतोयस्स॥१॥ [ ]

अच्चित्तमहाखंधो सो लोगमज्झे वीससापरिणामतो भवति, तिरियमसंखेज्जजोयणप्पमाणो संखेज्जजोयणप्पमाणो वा अणियतकालट्ठाई वट्टो उड्ढ-अधो चोद्दसरज्जुप्पमाणो सुहुमपोग्गलपरिणामपरिणतो पढमसमए दंडो भवति, बितिए कवाडं, ततिए मंथकरणं, चउत्थे लोगपूरणं, पंचमादिसमएसु पडिलोमसंघारेण अट्ठमसमयंते सव्वहा तस्स खंधत्त-विणासो। एस जलणिधिवेला इव लोगापूरण-रेयकरणट्ठितो लोगपुग्गलाणुभावो सव्वण्णुवयणतो सद्धेतो इति। सेसं कंठं। **अणाणुपुव्विदव्वाण एगदव्वं पडुच्च असंखेज्जतिभागे होज्ज** त्ति, एगपदेसावगाहत्तणतो। **एवं अव्वत्तव्वगदव्वाण वि,** एग-दुपदेसावगाहत्तणतो, सेसं कंठं।

[हा० १५२] क्षेत्रद्वारे निर्वचनसूत्रम् — **एगं दव्वं पडुच्च लोगस्स संखेज्जतिभागे वा होज्जे**त्यादि, तथाविधस्कन्धसद्भावात्, एवं शेषेष्वपि भावनीयम्, यावद् **देसूणे वा लोए होज्ज** त्ति। आह— अचित्तमहास्कन्धस्य सकललोकव्यापित्वात् क्षेत्रप्राधान्यविवक्षायामपि कस्मात् सम्पूर्ण एव लोको नोच्यते ? इति, उच्यते - सदैवानानुपूर्व्यवक्तव्यक[द्रव्य]सद्भावाद् जघन्यतोऽपि तत्प्रदेशत्रयेणोनत्वाद् व्याप्तौ सत्यामपि तत्प्रदेशेष्वानुपूर्व्या: प्राधान्याभावात्। उक्तं च पूर्वमुनिभि: -

*महखंधापुण्णे वी, अवत्तव्वगऽणाणुपुव्विदव्वाइं।*
*जंदेसोगाढाइं, तद्देसेणं स लोगूणो॥१॥*
*ण य तत्थ तस्स जुज्जइ पाधण्णं वा वि ते वि देसम्मि।*
*तप्पाधण्णत्तणओ इहराऽभावो भवे तासिं॥२॥* [ ]

अधिकृतानुपूर्वीस्कन्ध-देश-प्रदेशकल्पनातो वा देशोन एव लोक इति। यथोक्तमजीव-**प्रज्ञापनायाम्** - [1] *धम्मत्थिकाए धम्मत्थिकायस्स देसे धम्मत्थिकायस्स पदेसे, एवमधम्मा-*

Jain Education International For Private & Personal Use Only www.jainelibrary.org

*ऽऽगास-पोग्गलेसु वि।* [*प्रज्ञापना० १।३* ] । इह चावयवा-ऽवयविरूपत्वाद् वस्तुनः अवयवाऽवयविनोश्च कथञ्चिद् भेदाद् देश-प्रदेशकल्पना साध्वीति। न च देश एव देशी, सर्वथा तदेकत्वे देशमात्र एवासौ स्याद् देशो वा देशिमात्र इति। अतः स्वदेशस्यैव कथञ्चिदन्यत्वाद् देशोनो लोक इति । किंच, खेत्ताणुपुव्वीए आणुपुव्वि-अणाणुपुव्वि-अवत्तव्वगदव्व-विभागत्तणओ ण तेसिं परोप्परमवगाहो परिणमंति वा, ण वा तेसिं खंधभावो अत्थि, कधं ? उच्यते- पदेसाण अचलभावत्तणओ, सतो य अपरिणामत्तणओ, तेसिं च भावप्पमाण-निच्चत्तणओ, अतो खेत्ताणुपुव्वीए **एगदव्वं पडुच्च देसूणे लोगे** त्ति भणियं। दव्वाणुपुव्वीए पुण दव्वाण एगपदेसावगाहत्तणओ एगावगाहे वि दव्वाण आयभावेण भिन्नत्तणओ अण्णोण्णपरिणामत्तणओ खंधभावपरिणामत्तणओ य, अतो एगं दव्वं पडुच्च सव्वलोगे त्ति भणितं। भणितं च -

*कह ण वि दविए चेवं, खद्देसविवक्खया पिधत्तेणं।*
*दव्वाणुपुव्वि ताइं, परिणमई खंधभावेण ॥१॥* [ ]

अण्णं च, बादरपरिणामेसु आणुपुव्विदव्वपरिणामो चेव भवति, नो अणाणुपुव्वि-अवत्तव्वगदव्वेण, जतो बादरपरिणामो खंधभावे चेव भवति; जे पुण सुहुमा ते तिविधा वि अत्थि । किंच, जदा अचित्तमहाखंधपरिणामो भवति तदा ते सव्वे सुहुमा आयभाव-परिणामं अमुंचमाणा तत्परिणता भवंति, तस्स सुहुमत्तणओ सव्वगतत्तणओ य। कधमेवम् ? उच्यते - छाया-ऽऽतपोद्द्योतबादरपुद्गलपरिणामवत्, स्फटिककृष्णादिवर्णोपरञ्जितवत्। सीसो पुच्छइ -दव्वाणुपुव्वीए एगदव्वं सव्वलोगावगाढं ति, कहं पुण एमहंतं एगं वा भवति ? उच्यते - केवलिसमुद्घातवत्। उक्तं च -

*केवलिउग्घाओ इव, समयट्ठग पूर रेयति य लोयं।*
*अच्चित्तमहाखंधो, वेला इव अतरणियतोय ॥१॥* [ ]

अचित्तमहाखंधो स लोगमज्झे वीससापरिणतो भवति, तिरियमसंखेज्जजोयणप्पमाणो अणियतकालट्ठाती वट्टो उड्ढमहो चोद्दसरज्जुप्पमाणो सुहुमपोग्गलपरिणामपरिणओ पढमसमए दंडो भवति, बितिए कवाडं, तइए मंथं करेइ, चउत्थे लोगपूरणं, पंचमादिसमएसु पडिलोम-संहारेण अट्ठसमयंते सव्वधा तस्स खंधत्तविणासो । एस जलनिहिवेला इव लोगपूरण-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

रेयकरणेण ट्ठितो लोगपुद्गलाणुभावो सव्वण्णुवयणतो सद्धेतो इत्यलं प्रसंगेन।

**णाणादव्वाइं पडुच्च णियमा सव्वलोए** [2]वीत्यादि, अस्य भावना-त्र्यादिप्रदेशावगाढैर्द्रव्यभेदैः सकललोकस्यैव व्याप्तत्वादिति । अनानुपूर्व्यालोचनायां त्वेकद्रव्यं प्रतीत्य असंख्येयभाग एव, तस्य नियमत एवैकप्रदेशावगाढत्वात्। **णाणादव्वाइं पडुच्च णियमा सव्वलोए** त्ति, विशिष्टैकपरिणामवद्भिरेकैकप्रदेशावगाढैरपि समग्रलोकव्याप्तेः, आधेयभेदेन चाऽऽधारभेदोपपत्तेः, वस्तुनश्चानन्तधर्मात्मकत्वात् तत्तत्सहकारिकारणसन्निधाने सति तस्य तस्य धर्मस्याभिव्यक्तेः धर्मभेदेन च क्षेत्रप्रदेशाविशेषेऽप्यानुपूर्वीतराभिधानप्रवृत्तेरपि(रिति) सूक्ष्मधिया भावनीयम्। **एवं अवत्तव्वगदव्वाणि वि**, भावार्थ उक्त एव, नवरमवक्तव्यकैकद्रव्यं द्विप्रदेशावगाढं भवति।

[हे० १५२] क्षेत्रद्वारे निर्वचनसूत्रे [1]**एगदव्वं पडुच्च लोयस्स संखे[2]ज्जइभागे वा होज्जे**त्यादि। इह स्कन्धद्रव्याणां विचित्रस्वरूपत्वात् कश्चित् स्कन्धो लोकस्य सङ्ख्येयं भागमवगाह्य तिष्ठति, अन्यस्त्वसङ्ख्येयं भागमवगाह्य तिष्ठति, अन्यस्तु सङ्ख्येयाँस्तद्भागानवगाह्य वर्तते, अन्यस्त्वसङ्ख्येयानित्यतस्तत्तत्स्कन्धद्रव्यापेक्षया सङ्ख्येयादिभागवर्तित्वं भावनीयम्, विशिष्टक्षेत्रावगाहोपलक्षितानां स्कन्धद्रव्याणामेव क्षेत्रानुपूर्वीत्वेनोक्तत्वादिति [ग्रन्थाग्रम् २०००] भावः।

**देसूणे वा लोए होज्ज**त्ति, देशोने वा लोके आनुपूर्वीद्रव्यं भवेदिति। अत्राऽऽह-नन्वचित्तमहास्कन्धस्य सर्वलोकव्यापित्वं पूर्वमुक्तम्, तस्य च समस्तलोकवर्त्यसङ्ख्येयप्रदेशलक्षणायां क्षेत्रानुपूर्व्यामवगाढत्वात् परिपूर्णस्यापि क्षेत्रानुपूर्वीत्वं न किञ्चिद् विरुध्यते, अतस्तदपेक्षं क्षेत्रतोऽप्यानुपूर्वीद्रव्यं सर्वलोकव्यापि प्राप्यते, किमिति देशोनलोकव्यापिता प्रोच्यते ? सत्यम्, किन्तु लोकोऽयमानुपूर्व्यनानुपूर्व्यवक्तव्यकद्रव्यैः सर्वदैवाशून्य एवैष्टव्य इति समयस्थितिः, यदि चात्रानुपूर्व्याः सर्वलोकव्यापिता निर्दिश्येत तदाऽनानुपूर्व्यवक्तव्यकद्रव्याणां निरवकाशतयाऽभावः [3]प्रतीयेत, [4]ततो महास्कन्धपूरितेऽपि लोके जघन्यतोऽप्येकः प्रदेशोऽनानुपूर्वीविषयत्वेन प्रदेशद्वयं चावक्तव्यकविषयत्वेन विवक्ष्यते, आनुपूर्वीद्रव्यस्य तत्र सत्त्वेऽप्यप्राधान्यविवक्षणादनानुपूर्व्यवक्तव्यकयोस्तु प्राधान्यविवक्षणादिति भावः, ततोऽनेन

Jain Education International For Private & Personal Use Only www.jainelibrary.org

प्रदेशत्रयलक्षणेन देशेन हीनोऽत्र लोकः प्रतिपादित इत्यदोषः। उक्तं च पूर्वमुनिभिः-

*महखंधा पुण्णे वी ऽवत्तव्वग-ऽणाणुपुव्विदव्वाइं।*
*जद्देसोगाढाइं तद्देसेणं स लोगूणो ॥१॥* [ ]

ननु यद्येवं तर्हि द्रव्यानुपूर्व्यामपि सर्वलोकव्यापित्वमानुपूर्वीद्रव्यस्य यदुक्तं तदसङ्गतं प्राप्नोति, अनानुपूर्व्यवक्तव्यकद्रव्याणामनवकाशत्वेन तत्राप्यभावप्रतीतिप्रसङ्गात्, सर्वकालं च तेषामप्यवस्थितिप्रतिपादनात्, नैतदेवम्, यतो द्रव्यानुपूर्व्यां द्रव्याणामेवानुपूर्व्यादिभाव उक्तः, न क्षेत्रस्य, तस्य तत्रानधिकृतत्वात्, द्रव्याणां चानुपूर्व्यादीनां परस्परभिन्नानामप्येकत्रापि क्षेत्रेऽवस्थानं न किञ्चिद्विरुध्यते, एकापवरकान्तर्गतानेकप्रदीपप्रभाऽवस्थानदृष्टान्तादिसिद्धत्वात्, अतो न तत्र कस्याप्यनवकाशः, अत्र तु द्रव्याणामौपचारिक एवानुपूर्व्यादिभावः, मुख्यस्तु क्षेत्रस्यैव, क्षेत्रानुपूर्व्यधिकारात्, ततो यदि लोकप्रदेशाः सामस्त्येनैवानुपूर्व्या क्रोडीकृताः स्युस्तदा किमन्यदनानुपूर्व्यवक्तव्यकतया प्रतिपद्येत ? यस्त्विहैव येष्वाकाशप्रदेशेष्वानुपूर्व्यास्तेष्वेवेतरयोरपि सद्भावः कथयिष्यते स द्रव्यावगाह भेदेन क्षेत्रभेदस्य विवक्षणात्, अत्र तु तदविवक्षणादिति, तस्मादनानुपूर्व्यवक्तव्यकविषयप्रदेशत्रयलक्षणेन देशेन लोकस्योनता विवक्षितेति। अथवा आनुपूर्वीद्रव्यस्य स्वावयवरूपा देशाः कल्प्यन्ते, यथा पुरुषस्याङ्गुल्यादयः, ततश्च विवक्षिते कस्मिंश्चिद्देशे देशिनोऽसद्भावो विवक्ष्यते यथा पुरुषस्यैवाङ्गुलीदेशे, देशत्वस्यैव तत्र प्राधान्येन विवक्षितत्वादिति भावः। न च वक्तव्यं देशिनो देशो न कश्चिद्भिन्नो दृश्यते, एकान्ताभेदे देशमात्रस्य देशिमात्रस्य वाऽभावप्रसङ्गात्, ततश्च समस्तलोकक्षेत्रावगाहपर्यायस्य प्राधान्याश्रयणादत्राचित्तमहास्कन्धस्याऽऽनुपूर्वीत्वेऽपि देशोन एव लोकः, स्वकीयैकस्मिन् देशे तस्याभावविवक्षणात्, तस्मिंश्चानुपूर्व्यव्याप्तदेशे इतरयोरवकाशः सिद्धो भवतीति भावः। न च देशदेशिभावः कल्पनामात्रम्, **सम्मत्यादि** - [गा० ३७] न्यायनिर्दिष्टयुक्तिसिद्धत्वादित्यलं प्रसङ्गेन । **णाणादव्वाइ**मित्यादि, त्र्यादिप्रदेशावगाढद्रव्यभेदतोऽत्रानुपूर्वीणां नानात्वम्, तैश्च त्र्यादिप्रदेशावगाढैर्द्रव्यभेदैः सर्वोऽपि लोको व्याप्त इति भावः।

अनानुपूर्वीचिन्तायामेकद्रव्यं प्रतीत्य लोकस्यासङ्ख्येयभागवर्तित्वमेव, एकप्रदेशावगाढस्यैवानानुपूर्वीत्वेन प्रतिपादनात्, एकप्रदेशस्य च लोकासङ्ख्येयभागवर्तित्वादिति।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**णाणादव्वाइं पडुच्च नियमा सव्वलोए होज्ज** त्ति एकैकप्रदेशावगाढैरपि द्रव्यभेदैः समग्रलोकव्याप्तेरिति । **एवं अवत्तव्वगदव्वाणि वि** त्ति, अवक्तव्यकद्रव्यमप्येकं लोकासंख्येयभाग एव वर्तते, द्विप्रदेशावगाढस्यैवावक्तव्यकत्वेनाभिधानात्, प्रदेशद्वयस्य च लोकासङ्ख्येयभाग[६]वृत्तित्वादिति, तथा प्रत्येकं द्विप्रदेशावगाढैरपि द्रव्यभेदैः समस्तलोकव्याप्तेर्नानाद्रव्याणामत्रापि सर्वलोकव्यापित्वमवसेयमिति।

अत्राह- नन्वानुपूर्व्यादिद्रव्याणि त्रीण्यपि सर्वलोकव्यापीनीत्युक्तानि, ततश्च येष्वेवाकाशप्रदेशेष्वानुपूर्वी तेष्वेवेतरयोरपि सद्भावः प्रतिपादितो भवति, कथं चैतत् परस्पर-विरुद्धं भिन्नविषयं व्यपदेशत्रयमेकस्य स्यात् ? अत्रोच्यते- इह त्र्यादिप्रदेशावगाढाद् द्रव्याद् भिन्नमेव तावदेकप्रदेशावगाढम्, ताभ्यां च भिन्नं द्विप्रदेशावगाढम्, ततश्चाधेयस्यावगाहक-द्रव्यस्य भेदादाधारस्याप्यवगाह्यस्य भेदः स्यादेव, तथा च व्यपदेशभेदो युक्त एव, अनन्त-धर्माध्यासिते च वस्तुनि तत्तत्सहकारिसन्निधानात् तत्तद्धर्माभिव्यक्तौ दृश्यत एव समकालं व्यपदेशभेदो यथा खड्ग-कुन्त-कवचादियुक्ते देवदत्ते खड्गी कुन्ती कवचीत्यादिरिति। इह क्वचिद् *वाचनान्तरे* **अणाणुपुव्वीदव्वाइं अवत्तव्वगदव्वाणि य जहेव हेट्ठे**ति अतिदेश एव दृश्यते, तत्र **हेट्ठ** त्ति यथाऽधस्ताद् द्रव्यानुपूर्व्यामनयोः क्षेत्रमुक्तं तथाऽत्रापि ज्ञातव्यमित्यर्थः, तच्च व्याख्यातमेवेति, एवमन्यत्रापि यथासम्भवं **वाचनान्तर**मवगन्तव्यमिति।

**[सू० १५३] [१] [१]→ णेगम-ववहाराणं आणुपुव्वीदव्वाइं लोगस्स किं संखेज्जइभागं, फुसंति ? असंखेज्जति० ? जाव सव्वलोगं फुसंति ? एगं दव्वं पडुच्च संखेज्जतिभागं वा फुसंति, असंखेज्जतिभागं वा, संखेज्जे वा भागे, असंखेज्जे वा भागे, देसूणं वा लोगं फुसंति, णाणादव्वाइं पडुच्च णियमा सव्वलोगं फुसंति।**

**[२] अणाणुपुव्वीदव्वाइं अवत्तव्वयदव्वाणि य जहा खेत्तं, नवरं फुसणा भाणियव्वा।←**

**[चू० १५३]** इदाणिं फुसणा — जति खप्पदेसाण फुसणा तो अणुपुव्विमादिदव्वत्तेणा-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

ऽऽदिट्ठप्पदेसाण छद्दिसिंठितमणंतरपदेसाण फुसणा भाणितव्वा । इह पुण सुत्ताभिप्पातो खप्पदेसावगाढदव्वस्स फुसणा भाणितव्वा, सा य दव्वाणुपुव्विसरिसा।

[हा० १५३] स्पर्शनायां तु यद्याकाशप्रदेशानामेव स्पर्शना ततः खल्वानुपूर्व्यादि-द्रव्याधारत्वादिष्टानामेव षड्दिक्स्थितानन्तरप्रदेशैरेव सहाऽवगन्तव्या ; इह पुनः किल सूत्राभिप्रायः - यथाऽऽकाशप्रदेशावगाढस्य द्रव्यस्यैव चिन्तनीया इति ***वृद्धा*** व्याचक्षते । भावार्थस्त्वनन्तरद्वारानुसारतो भावनीय इति।

[हे० १५३] गतं क्षेत्रद्वारम् । स्पर्शनाद्वारमपि चेत्थमेव निखिलं भावनीयम्, नवरमत्र **कस्याश्चिद्वाचनाया** अभिप्रायेणानुपूर्व्यामेकद्रव्यस्य सङ्ख्येयभागादारभ्य यावद्देशोन-लोकस्पर्शना भवतीति ज्ञायते, **अन्यस्यास्त्व**भिप्रायेण सङ्ख्येयभागादारभ्य यावत् सम्पूर्णलोकस्पर्शना स्यादित्यवसीयते, एतच्च द्वयमपि बुध्यत एव, यतो यदि मुख्यतया क्षेत्रप्रदेशानामानुपूर्वीत्वमङ्गीक्रियते तदा अनानुपूर्व्यवक्तव्यकयोर्निरवकाशताप्रसङ्गात् पूर्ववद्देशोनता लोकस्य वाच्या । अथानुपूर्वीरूपे क्षेत्रेऽवगाढत्वादचित्तमहास्कन्धस्यैवानु-पूर्वीत्वं तर्हि द्रव्यानुपूर्व्यामिवात्रापि सम्पूर्णता लोकस्य वाच्येति । न चात्रानुपूर्व्या सकलस्यापि लोकस्य स्पृष्टत्वादितरयोरवकाशाभाव इति वक्तव्यम्, एकैकप्रदेशरूपे द्विद्विप्रदेशरूपे च क्षेत्रेऽवगाढानां प्रत्येकमसङ्ख्येयानां द्रव्यभेदानां सद्भावतस्तयोरपि प्रत्येकमसङ्ख्येयभेदयोर्लोके सद्भावाद् द्रव्यावगाहभेदेन च क्षेत्रभेदस्येह विवक्षितत्वादिति भावः । ***वृद्धबहुमतश्चाय***मपि पक्षो लक्ष्यते, तत्त्वं तु केवलिनो विदन्ति । क्षेत्र-स्पर्शनयोस्तु विशेषः प्राग् निदर्शित एवेति गतं स्पर्शनाद्वारम्।

[सू० १५४] **णेगम-ववहाराणं आणुपुव्वीदव्वाइं कालतो केवचिरं होंति ? एगदव्वं पडुच्च जहन्नेणं एगं समयं, उक्कोसेणं असंखेज्जं कालं । णाणादव्वाइं पडुच्च सव्वद्धा । [१]एवं दोण्णि वि ।**

[चू० १५४] कालो खप्पदेसाण अणादिअपज्जवसितो भाणितव्वो । इह पुण सुत्ते

Jain Education International		For Private & Personal Use Only		www.jainelibrary.org

दव्वाण खप्पदेसावगाहट्ठितिकालो चिंतिज्जइ, सो वि दव्वाणुपुव्विसरिसो चेव।

**[हा० १५४]** कालचिन्तायामपि यद्याकाशप्रदेशानामेव कालश्चिन्त्यते ततः किल नभःप्रदेशानामनाद्यपर्यवसितत्वात् स एव वक्तव्यः, सूत्राभिप्रायस्त्वानुपूर्व्यादि-द्रव्याणामेवावगाहस्थितिकालश्चिन्त्यते ***इत्येके,*** न चेह क्षेत्रखण्डानामपि विशिष्टपरिणामपरिणताधेयद्रव्याधारभावोऽपि चिन्त्यमानो विरुध्यत इति, युक्तिपतितश्चायमेव, क्षेत्रानुपूर्व्यधिकारादिति। तत्र **एगदव्वं पडुच्च जहण्णेणं एक्कं समय**मित्यादि, अस्य भावना - द्विप्रदेशावगाह्यं तदन्यसन्निपाते त्रिप्रदेशावगाह्यं भूत्वा समयानन्तरमेव पुनर्द्विप्रदेशावगाह्यमेव भवति, **उत्कृष्टतस्त्वसंख्येयं कालं** भूत्वेति, आधेयभेदाच्चेहाऽऽधारभेदो भावनीय इति, शेषं भावितार्थम्।

**[हे० १५४]** अथ कालद्वारम् - तत्र क्षेत्रावगाहपर्यायस्य प्राधान्यविवक्षया त्र्यादिप्रदेशावगा[1]ढद्रव्याणामेवानुपूर्व्यादिभावः पूर्वमुक्तः, अतस्तेषामेवावगाढस्थितिकालं चिन्तयन्नाह- **एगदव्वं पडुच्चे**त्यादि। अत्र भावना- इह द्विप्रदेशावगाढस्य एकप्रदेशावगाढस्य वा द्रव्यस्य परिणामवैचित्र्यात् प्रदेशत्रयाद्यवगाहभवने आनुपूर्वीव्यपदेशः सञ्जातः, समयं चैकं तद्भावमनुभूय पुनस्तथैव द्विप्रदेशावगाढमेकप्रदेशावगाढं वा तद् द्रव्यं संजातमित्यानुपूर्व्याः समयो जघन्यावगाहस्थितिः, यदा तु तदेव द्रव्यमसङ्ख्येयं कालं तद्भावमनुभूय पुनस्तथैव द्विप्रदेशावगाढमेकप्रदेशावगाढं वा जायते तदा उत्कृष्टतया असङ्ख्येयोऽवगाहस्थितिकालः सिद्ध्यति, अनन्तस्तु न भवति, विवक्षितैकद्रव्यस्यैकावगाहेनोत्कृष्टतोऽप्यसङ्ख्यातकालमेवावस्थानादिति। **नानाद्रव्याणि** तु **सर्वाद्धा** सर्वकालमेव भवन्ति, त्र्यादिप्रदेशावगाढद्रव्यभेदानां सदैवावस्थानादिति।

एवं यदा समयमेकं किंचिद् द्रव्यमेकस्मिन् प्रदेशेऽवगाढं स्थित्वा ततो द्व्यादिप्रदेशावगाढं भवति तदाऽनानुपूर्व्याः समयो जघन्याऽवगाहस्थितिः, यदा तु तदेवासङ्ख्यातं कालं तद्रूपेण स्थित्वा ततो द्व्यादिप्रदेशावगाढं भवति तदोत्कृष्टतोऽसङ्ख्येयोऽवगाहस्थितिकालः, नानाद्रव्याणि तु सर्वकालम्, [2]एकप्रदेशावगाढद्रव्यभेदानां [3]सर्वदा भावादिति। अवक्तव्यकस्य तु द्विप्रदेशावगाढस्य समयादूर्ध्वमेकस्मिंस्त्र्यादिषु वा प्रदेशेष्ववगाहप्रतिपत्तौ जघन्या समयोऽवगाहस्थितिः, असङ्ख्येयकालादूर्ध्वं द्विप्रदेशावगाहं परित्यजत उत्कृष्टतोऽसङ्ख्येयोऽवगाह-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

स्थितिकाल: सिद्ध्यति, नानाद्रव्याणि तु सर्वकालम्, द्विप्रदेशावगाढद्रव्यभेदानां सदैव भावादिति। एवं समानवक्तव्यत्वादतिदिशति- **एवं दोण्णि वि** त्ति।

**[सू० १५५] णेगम[1]-ववहाराणं आणुपुव्वीदव्वाण[2]मंतरं कालतो केवचिरं होति? तिण्णि वि एगं दव्वं पडुच्च जहण्णेणं एगं समयं, उक्कोसेणं असंखेज्जं कालं। णाणादव्वाइं पडुच्च णत्थि अंतरं[3]।**

[चू० १५५] खप्पदेसाण अंतरं नत्थि, अणादिकालसभावट्ठितणिच्चत्तणतो। खप्पदेसावगाढदव्वाणं पुण अणंतकालमंतरं भाणितव्वं जहा दव्वाणुपुव्वीए। कहं ?, उच्यते - सव्वपोग्गलाण सव्वावगाहखेत्तस्स असंखेज्जत्तणतो ठितिकालासंखेज्जत्तणतो य।

[हा० १५५] अन्तरचिन्ता प्रकटार्था, नवरमु**त्कृष्टतः असंख्येयं कालम्**, नानन्तं यथा द्रव्यानुपूर्व्यामिति, कस्मात् ?, सर्वपुद्गलानामवगाहक्षेत्रस्य स्थितिकालस्य चासंख्येयत्वात् क्षेत्रानुपूर्व्यधिकारे च क्षेत्रप्राधान्याद् असंख्येयकालादारतश्च पुनस्तत्प्रदेशानां तथाविधाधेयभावेन तथाभूताधारपरिणामभावादित्यतिगहनमेतदवहितैर्भावनीयमिति।

[हे० १५५] इदानीमन्तरद्वारम् - **जहण्णेणं एगं समयं** ति, अत्र भावना- इह यदा त्र्यादिप्रदेशावगाढं किमप्यानुपूर्वीद्रव्यं समयमेकं तस्माद्विवक्षितक्षेत्रादन्यत्रावगाहं प्रतिपद्य तेष्वेव त्र्याद्याकाशप्रदेशेष्ववगाहते तदैकानुपूर्वीद्रव्यस्य समयो जघन्या[1]न्तरकालः प्राप्यते। **उक्कोसेणं असंखेज्जं कालं** ति, तदेव यदाऽन्येषु क्षेत्रप्रदेशेष्वसङ्ख्येयं कालं परिभ्रम्य केवलमन्यद्रव्ययुक्तं वा समागत्य पुनरपि तेष्वेव विवक्षितत्र्याद्याकाशप्रदेशेष्ववगाहते तदोत्कृष्टतोऽसङ्ख्येयोऽन्तरकालः प्राप्यते, न पुनर्द्रव्यानुपूर्व्यामिवानन्तः, यतो द्रव्यानुपूर्व्यां विवक्षितद्रव्यादन्ये द्रव्यविशेषा अनन्ताः प्राप्यन्ते, तैश्च सह क्रमेण संयोगे उक्तोऽनन्तः कालः, अत्र तु विवक्षितावगाहक्षेत्रादन्यत् क्षेत्रमसङ्ख्येयमेव, प्रतिस्थानं चावगाहनामाश्रित्य संयोग-स्थितिरत्राप्यसङ्ख्येयकालैव, ततश्चासङ्ख्येये क्षेत्रे परिभ्रमता द्रव्येण पुनरपि केवलेनाऽन्यसंयुक्तेन

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वाऽसङ्ख्येयकालात्तेष्वेव नभःप्रदेशेष्वागत्यावगाहनीयम्। न च वक्तव्यमसङ्ख्येयेऽपि क्षेत्रे पौनःपुन्येन तत्रैव भ्रमणे[2] कस्मादनन्तोऽपि कालो नोच्यत इति ? यत इहासङ्ख्येये क्षेत्रेऽसङ्ख्येयकालमेवान्यत्र तेन पर्यटितव्यम्, तत ऊर्ध्वं पुनस्तस्मिन्नेव विवक्षितक्षेत्रे नियमादवगाहनीयम्, वस्तुस्थितिस्वाभाव्यादिति *तावदेकीयं* व्याख्यानमादर्शितम्।

**अन्ये** *तु* व्याचक्षते- यस्मात् त्र्यादिप्रदेशलक्षणाद्विवक्षितक्षेत्रात् तदानुपूर्वीद्रव्यमन्यत्र गतम्, तस्य क्षेत्रस्य स्वभावादेवासङ्ख्येयकालादूर्ध्वं तेनैवानुपूर्वीद्रव्येण वर्ण-गन्ध-रस-स्पर्श-सङ्ख्यादिधर्मैः सर्वथा तुल्येनान्येन वा तथाविधाधेयेन संयोगे सति नियमात् तथाभूताधारतोपपत्तेरसङ्ख्येय एवान्तरकाल इति। तत्त्वं तु केवलिनो विदन्ति, गम्भीरत्वात् सूत्रप्रवृत्तेरिति।

**णाणादव्वाइ**मित्यादि, न हि त्र्यादिप्रदेशावगाढानुपूर्वीद्रव्याणि युगपत् सर्वाण्यपि तद्भावं विहाय पुनस्तथैव जायन्त इति कदाचिदपि सम्भवति, असङ्ख्येयानां तेषां सर्वदैवोक्तत्वादिति भावः। अनानुपूर्व्यवक्तव्यकद्रव्येष्वप्यसावेवैकानेकद्रव्याश्रया अन्तरकालवक्तव्यता, केवलमनानुपूर्वीद्रव्यस्यैकप्रदेशावगाढस्यावक्तव्यकद्रव्यस्य तु द्विप्रदेशावगाढस्य पुनस्तथाभवनेऽन्तरकालश्चिन्तनीयः। शेषा तु व्याख्याद्वयभावना सर्वाऽपि तथैवेति।

## [सू० १५६] णेगम-ववहाराणं आणुपुव्वीदव्वाइं सेसदव्वाणं कतिभागे होज्जा[1] ? तिण्णि वि जहा दव्वाणुपुव्वीए।

[चू० १५६] **भागे** त्ति जता खप्पदेसाणुपुव्विमादि चिंतिज्जं(ज्ज)ति तया →[1]पण्णवगा-(णा?)भिप्पायपरिकप्पणाए समूणातिरित्तभागो भाणितव्वो। जता पुणावगाहिदव्वा तदा असंखेज्जेसु भागेसु त्ति जहा **दव्वाणुपुव्वीए** तहा भाणितव्वं।

[हा० १५६] भागचिन्तायामानुपूर्वीद्रव्याणि शेषद्रव्येभ्योऽसंख्येयेषु भागेष्वित्युक्तम्। **अत्रैके** व्याचक्षते- यदा खप्पदेसाणमाणुपुव्विमादि चिंतिज्जति तदा **पण्णवण**ऽ-भिप्पायपरिकप्पणाए समूणातिरित्तभागो भाणितव्वो, जदा पुण अवगाहिदव्वा तदाऽसंखेज्जेसु

Jain Education International For Private & Personal Use Only www.jainelibrary.org

भागेसु त्ति जहा दव्वाणुपुव्वीए तहा भाणितव्वं।

तत्र विनेयजनानुग्रहार्थं क्षेत्रानुपूर्व्या एव प्रक्रान्तत्वाद् द्रव्यानुपूर्व्यास्तूपाधित्वेन गुणीभूतत्वात् क्षेत्रानुपूर्वीमेवाधिकृत्य **प्रज्ञापना**भिप्रायः प्रतिपाद्यते - तत्राऽऽनुपूर्वीद्रव्याणि शेषद्रव्येभ्योऽसंख्येयभागैरधिकानीति [१]वाक्यशेषः, इत्थं चैतदङ्गीकर्त्तव्यम्, यस्मादनानुपूर्व्य-वक्तव्यकद्रव्याणि तेभ्योऽसंख्येयभाग उक्तानि । आह - यदि क्षेत्रानुपूर्व्यधिकारात् क्षेत्रखण्डान्यधिकृत्येयमालोचना, ततः खल्वानुपूर्व्यादिद्रव्याधारलोकक्षेत्रस्य चतुर्दश-रज्ज्वात्मकत्वेन तुल्यत्वात्तदन्तर्गतप्रदेशानां च सर्वेषामेवानुपूर्व्यादिभिर्व्याप्तत्वात् प्रत्युत त्र्यादिप्रदेशसमुदायेष्वाकाशखण्डेषु प्रतिखण्डमेकैकानुपूर्वीगणनादानुपूर्वी[णा]मेवाल्पता युक्तिमती, अवक्तव्यका-ऽनानुपूर्वीणां तु द्विप्रदेशिकैकप्रदेशिकखण्डा[नां] गणनाद् बहुता, तत् किमर्थं विपर्ययः ? इति, [२]अत्रोच्यते - इह त्र्यादिप्रदेशाधेयपरिणामद्रव्याधारत्वेन क्षेत्रानुपूर्व्योऽभिधीयन्ते, तत्र च त्रिप्रदेशाधेयपरिणामवन्त्यनन्तान्यपि द्रव्याणि विशिष्टैक-त्रिप्रदेशसमुदायलक्षणक्षेत्रव्यवस्थितान्येकैव क्षेत्रानुपूर्वी, एवं चतुःप्रदेशाद्याधेय-परिणामवन्त्यपि असंख्येयप्रदेशाधेयपरिणामवत्पर्यन्तानि विशिष्टैकचतुःप्रदेशाद्यसंख्येयप्रदेशान्तसमुदायलक्षण-क्षेत्रव्यवस्थितानि प्रतिभेदमेकैकैवेति, किन्तु यदेकं त्रिप्रदेशसमुदायलक्षणमानुपूर्वीव्यपदेशार्हं क्षेत्रं तदेव तदन्यानन्तचतुःप्रदेशाद्याधेय-परिणामवद्द्रव्याध्यासितमेकैकक्षेत्रप्रदेशवृद्ध्या परिणामभेदतो भेदेनानुपूर्वीव्यपदेशमर्हति, असंख्येयाश्च तद्भेदकारिणः क्षेत्रप्रदेशा इति, न चायमवक्तव्यका-ऽनानुपूर्वीणां न्यायः सम्भवति, नियतप्रदेशात्मकत्वात् अतोऽसंख्येय-भागैरधिकानीति स्थितम्। न च तद् येनैव स्वभावेन त्रिप्रदेशाधेयपरिणामवतां द्रव्याणामाधारतां प्रतिपद्यते तेनैव चतुःप्रदेशाद्याधेयपरिणामवतामपि, तेषामपि त्रिप्रदेशाधेयपरिणा[३]मोपपत्तेः विपर्ययो वा। तदेवमनन्तधर्मात्मके वस्तुनि सति विवक्षितेतरधर्म-प्रधानोपसर्जनद्वारेणाखिलमिह भावनीयमित्यलं प्रसंगेन।

**[हे० १५६]** उक्तमन्तरद्वारम् । साम्प्रतं भागद्वारमुच्यते - तत्र यथा द्रव्यानुपूर्व्यां तथाऽत्राप्यानुपूर्वीद्रव्याणि अनानुपूर्व्यवक्तव्यकलक्षणेभ्यः शेषद्रव्येभ्योऽसङ्ख्येयैर्भागैरधिकानि, शेषद्रव्याणि तु तेषामसङ्ख्येयभागे वर्तन्ते इति । अत्राह- ननु त्र्यादिप्रदेशावगाढानि

Jain Education International For Private & Personal Use Only www.jainelibrary.org

द्रव्याण्यानुपूर्व्य एकैकप्रदेशावगाढान्यनानुपूर्व्यो द्विद्विप्रदेशावगाढान्यवक्तव्यकानीति प्राक् प्रतिज्ञातम्, एतानि चानुपूर्व्यादीनि सर्वस्मिन्नपि लोके सन्ति, अतो युक्त्या विचार्यमाणान्या-नुपूर्वीद्रव्याण्येव स्तोकानि ज्ञायन्ते, तथाहि- असत्कल्पनया किल लोके त्रिंशत् प्रदेशाः, तत्र चानानुपूर्वीद्रव्याणि त्रिंशदेव, अवक्तव्यकानि तु पञ्चदश, आनुपूर्वीद्रव्याणि तु यदि सर्वस्तोकतया त्रिप्रदेशनिष्पन्नानि गण्यन्ते तथापि दशैव भवन्तीति शेषेभ्यः स्तोकान्येव प्राप्नुवन्ति, कथमसङ्ख्येयगुणानि स्युरिति ? अत्रोच्यते- एकस्मिन्नानुपूर्वीद्रव्ये ये नभःप्रदेशा उपयुज्यन्ते ते यद्यन्यस्मिन्नपि नोपयुज्येरँस्तदा स्यादेवम्, तच्च नास्ति, यत एकस्मिन्नपि प्रदेशत्रयनिष्पन्ने आनुपूर्वीद्रव्ये ये त्रयः प्रदेशास्त एवान्यान्यरूपतयाऽ-वगाढेनाऽऽ-धेयद्रव्येणाक्रान्ताः सन्तः प्रत्येकमनेकेषु त्रिकसंयोगेषु[1] गण्यन्ते, प्रतिसंयोगमाधेयद्रव्यस्य भेदात्, तद्भेदे चाधारभेदादिति भावः, एवमन्यान्यचतुष्प्रदेशा-वगाढाद्याधेयेनाध्यासितत्वात्त एवानेकेषु चतुष्कसंयोगेष्वनेकेषु पञ्चकसंयोगेषु यावदनेकेष्वसङ्खच्येयकसंयोगेषु प्रत्येकमुपयुज्यन्ते, एवं चतुरादिप्रदेशनिष्पन्नेष्वप्यानुपूर्वी-द्रव्येषु ये चतुरादयः प्रदेशास्तेषामप्यन्यान्यसंयोगोपयोगिता भावनीया, तस्मादसङ्ख्येय-प्रदेशात्मके स्वस्थित्या व्यवस्थिते लोके यावन्तस्त्रिकसंयोगादयोऽसङ्ख्येयकसंयोगपर्यन्ताः संयोगा जायन्ते तावन्त्यानुपूर्वीद्रव्याणि भवन्ति प्रतिसंयोगमाधेयद्रव्यस्य भेदेनावस्थितिसद्भा-वात्, आधेयभेदे चाधारभेदात्, न हि नभःप्रदेशा येनैव स्वरूपेणैकस्मिन्नाधेये उपयुज्यन्ते तेनैव स्वरूपेणाधेयान्तरेऽपि, आधेयैकताप्रसङ्गात्, एकस्मिन्नाधारस्वरूपे तदवगाहाभ्युपगमात्, घट-तत्स्वरूपवत्। तस्मात् त्र्यादिसंयोगानां लोके बहुत्वादानुपूर्वीणां बहुत्वं भावनीयम्। अवक्तव्यकानि तु स्तोकानि, द्विकसंयोगानां तत्र स्तोकत्वात्। अनानुपूर्व्योऽपि स्तोका एव, लोकप्रदेशसङ्ख्यामात्रत्वात्।

अत्र सुखप्रतिपत्त्यर्थं लोके किल पञ्चाकाशप्रदेशाः कल्प्यन्ते, तद्यथा- । अत्रानानुपूर्व्यस्तावत् पञ्चैव प्रतीताः, अवक्तव्यकानि त्वष्टौ, द्विकसंयोगानामिहाष्टानामेव[2] सम्भवात्, आनुपूर्व्यस्तु षोडश संभवन्ति, दशानां त्रिकसंयोगानां[3] पञ्चानां चतुष्कसंयोगा-[4]नामेकस्य तु पञ्चकसंयोगस्येह[5] लाभात्, दश त्रिकसंयोगाः[6] कथमिह लभ्यन्ते ? इति चेत्, उच्यते- षट् तावत् मध्यव्यवस्थापितेन सह लभ्यन्ते, चत्वारस्तु त्रिकसंयोगा[7]

Jain Education International For Private & Personal Use Only www.jainelibrary.org

दिग्व्यवस्थापितैश्चतुर्भिरिव केवलैरिति, चतुष्क[८]संयोगास्तु चत्वारो मध्यव्यव[९]स्थितेन सह लभ्यन्ते, एकस्तु तन्निरपेक्षैर्दिग्व्यवस्थितैरेवेति सर्वे पञ्च, पञ्चक[१०]संयोगस्तु प्रतीत एवेति । तदेवं प्रदेशपञ्चकप्रस्तारेऽप्यानुपूर्वीणां बाहुल्यं दृश्यते, अत एव तदनुसारेण सद्भावतोऽसङ्ख्येय-प्रदेशात्मके लोकेऽत्रानुपूर्वीद्रव्याणां शेषेभ्योऽसङ्ख्यातगुणत्वं भावनीयमित्यलं विस्तरेण।

**[सू० १५७] णेगम-ववहाराणं आणुपुव्वीदव्वाइं कयरम्मि भावे हो[१]ज्जा ? तिन्नि वि णियमा सादिपारिणामिए भावे होज्जा।**

**[चू० १५७]** भावो खप्पदेसेसु अणादिपारिणामितो, मुत्तदव्वेसु साइपारिणामितो।

**[हा० १५७]** भावचिन्तायामानुपूर्वीद्रव्याणि **नियमात् सादिपारिणामिके भावे,** विशिष्टाधेयाधारभावस्य सादिपारिणामिकत्वात्, एवमनानुपूर्व्यवक्तव्यकान्यपि ।

**[हे० १५७ ]** उक्तं भागद्वारम् । साम्प्रतं भावद्वारम् - तत्र च द्रव्याणां त्र्यादिप्रदेशावगाहपरिणामस्य एकप्रदेशावगाहपरिणामस्य द्विप्रदेशावगाहपरिणामस्य च सादिप(पा)रिणामिकत्वात् त्रयाणामपि सादिपारिणामिकभाववर्त्तित्वं भावनीयमिति।

**[सू० १५८] [१] एएसि णं भंते ! णेगम-ववहाराणं आणुपुव्वीदव्वाणं अणाणुपुव्वीदव्वाणं अवत्तव्वयदव्वाण य दव्वट्ठयाए पएसट्ठयाए दव्वट्ठ-पएसट्ठयाए य कयरे कयरेहिंतो अप्पा वा बहुया वा तुल्ला वा विसेसाहिया [१]वा ? गोयमा ! सव्वत्थोवाइं णेगम-ववहाराणं अवत्तव्वयदव्वाइं दव्वट्ठयाए, अणाणुपुव्वीदव्वाइं दव्वट्ठयाए विसेसाहियाइं, आणुपुव्वीदव्वाइं दव्वट्ठयाए असंखेज्जगुणा[२]इं।**

**[२] पएसट्ठयाए सव्वत्थोवाइं णेगम-ववहाराणं अणाणुपुव्वीदव्वाइं अपएसट्ठयाए, अवत्तव्वयदव्वाइं पएसट्ठयाए विसेसाहियाइं, आणुपुव्वि-दव्वाइं पएसट्ठयाए असंखेज्जगुणाइं।**

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[३] दव्वट्ठ-पएसट्ठयाए सव्वत्थोवाइं णेगम-ववहाराणं अवत्तव्वयदव्वाइं दव्वट्ठयाए, अणाणुपुव्विदव्वाइं दव्वट्ठयाए[३] अपएसट्ठयाए विसेसाहियाइं, अवत्तव्वयदव्वाइं पएसट्ठयाए विसेसाहियाइं, आणुपुव्विदव्वाइं दव्वट्ठयाए असंखेज्जगुणाइं, ताइं चेव पएसट्ठयाए असंखेज्जगुणाइं। से तं अणुगमे। सेतं णेगम-ववहाराणं अणोवणिहिया खेत्ताणुपुव्वी।**

[चू० १५८ ] अप्पबहुत्तं खप्पदेसेसु← पण्णवगा(णा?)भिप्पायतो अप्प-सम-बहुविकप्पकरणतो भावेतव्वं। अवगाहिदव्वेसु पुण जधा दव्वाणुपुव्वीए तहा सव्वं णिव्विसेसं भाणितव्वं । नवरं जत्थ अणंतगुणं तत्थ असंखेज्जगुणं भाणितव्वं, अवगाहिखेत्तस्स असंखेज्जत्तणतो। गता णेगम-ववहाराणं अणोवणिधिया खेत्ताणुपुव्वी।

[हा० १५८]अल्पबहुत्वचिन्तायां द्रव्यार्थतां प्रत्यानुपूर्वीणामेकैकगणनम्, प्रदेशार्थता तु भेदेन तद्गतप्रदेशगणनम्, द्रव्यार्थप्रदेशार्थता तूभयगणनम्। तत्र **सव्वत्थोवाइं णेगमववहाराणं अवत्तव्वगदव्वाइं दव्वट्ठयाए**, कथम् ? द्विप्रदेशात्मकत्वादवक्तव्यक-द्रव्याणामिति । **अणाणुपुव्विदव्वाइं दव्वट्ठयाए विसेसाधियाइं**, कथम् ? एकप्रदेशात्मकत्वादनानुपूर्वीद्रव्याणामिति। आह - यद्येवं कस्माद् द्विगुणान्येव न भवन्ति, एकप्रदेशात्मकत्वेन द्विगुणत्वभावादिति, अत्रोच्यते - तदन्यसंयोगतोऽवधीकृतावक्तव्यक-प्रदेशयोरेवाऽऽधेयवशादवक्तव्यकान्तरभावेनापि परिणतिसद्भावादवक्तव्यकबाहुल्याच्च नाधिकृतद्रव्याणि द्विगुणानि, किन्तु विशेषाधिकान्येव। **आणुपुव्वीदव्वाइं दव्वट्ठयाए असंखेज्जगुणाइं**, अत्र भावना प्रतिपादितैव। **पदेसट्ठयाए सव्वत्थोवाइं णेगमववहाराणं अणाणुपुव्विदव्वाइं** ति प्रकटार्थम्। **अवत्तव्वगदव्वाइं पदेसट्ठयाए विसेसाधिताइं**, अस्य भावार्थः — इह खलु रुचकादारभ्य क्षेत्रप्रदेशात्मकावक्तव्यकश्रेणिव्यतिरिक्ततदन्य-प्रदेशसंसर्गनिष्पन्नावक्तव्यकगणनया तथा लोकनिष्कुटगतप्रदेशावक्तव्यकायोग्यानानुपूर्वी-योग्यभावतश्चातिसूक्ष्मबुद्ध्या भावनीय इति। इह च विनेयजनानुग्रहार्थं स्थापना लिख्यते -

Jain Education International For Private & Personal Use Only www.jainelibrary.org

 । शेषं भावितार्थं यावत् **सेत्तं णेगमववहाराणं अणोवणिहिया खेत्ताणुपुव्वी** सेयं नैगम-व्यवहारयोरनौपनिधिकी क्षेत्रानुपूर्वी।

[हे० १५८]अल्पबहुत्वद्वारे - इह द्रव्यगणनं द्रव्यार्थता, प्रदेशगणनं प्रदेशार्थता, उभयगणनं तूभयार्थता । तत्रानुपूर्व्यां विशिष्टद्रव्यावगाहोपलक्षितास्त्र्यादिनभःप्रदेशसमुदायास्तावद्द्रव्याणि, समुदायारम्भकास्तु प्रदेशाः । अनानुपूर्व्यां त्वेकैकप्रदेशावगाहिद्रव्योपलक्षिताः सकलनभःप्रदेशाः प्रत्येकं द्रव्याणि, प्रदेशास्तु न संभवन्ति, एकैकप्रदेशद्रव्ये प्रदेशान्तरायोगात् । अवक्तव्यकेषु तु यावन्तो लोके द्विकयोगाः संभवन्ति तावन्तस्ते प्रत्येकं द्रव्याणि, तदारम्भकास्तु प्रदेशा इति । शेषा त्वत्र व्याख्या द्रव्यानुपूर्वीवत् कर्तव्येति ।

नवरं **सव्वत्थोवाइं णेगम-ववहाराणं अवत्तव्वगदव्वाइ**मित्यादि । अत्राह- ननु यदा पूर्वोक्तयुक्त्या एकैको नभःप्रदेशोऽनेकेषु द्विकसंयोगेषूपयुज्यते, तदा अनानुपूर्वीद्रव्येभ्योऽवक्तव्यकद्रव्याणामेव बाहुल्यमवगम्यते, यतः पूर्वोक्तायामपि पञ्चप्रदेशनभःकल्पनायामवक्तव्यकद्रव्याणामेवाष्टसङ्ख्योपेतानां पञ्चसङ्ख्येभ्योऽनानुपूर्वीद्रव्येभ्यो बाहुल्यं दृष्टम्, तत् कथमत्र व्यत्ययः प्रतिपाद्यते ? सत्यम्, अस्त्येतत् केवलं लोकमध्ये, लोकपर्यन्तवर्तिनिष्कुटगतास्तु ये कण्टकाकृतयो विश्रेण्या निर्गता एकाकिनः प्रदेशास्ते विश्रेणिव्यवस्थितत्वादवक्तव्यकत्वायोग्या इत्यनानुपूर्वीसङ्ख्यायामेवान्तर्भवन्ति, अतो लोकमध्यगतां निष्कुटगतां च प्रस्तुतद्रव्यसङ्ख्यां मीलयित्वा यदा केवली चिन्तयति तदाऽवक्तव्यकद्रव्याण्येव स्तोकानि, अनानुपूर्वीद्रव्याणि तु तेभ्यो विशेषाधिकतां प्रतिपद्यन्ते, अत्र निष्कुटस्थापना  । अत्र विश्रेणिलिखितौ द्वौ अवक्तव्यकायोग्यौ द्रष्टव्याविति । एवम्भूताश्च किलामी सर्वतो लोकपर्यन्तेषु बहवः सन्तीत्यनानुपूर्वीणां बाहुल्यमित्यलं विस्तरेण ।

आनुपूर्वीद्रव्याणां तु तेभ्योऽसंख्यातगुणत्वं भावितमेव, शेषं द्रव्यानुपूर्व्यनुसारेण भावनीयम् । नवरमुभयार्थताविचारे आनुपूर्वीद्रव्याणि स्वद्रव्येभ्यः प्रदेशार्थतयाऽसङ्ख्येयगुणानि, कथम् ? एकैकस्य तद्द्रव्यस्य त्र्यादिभिरसङ्ख्येयान्तैर्नभःप्रदेशैरारब्धत्वात्, नभःप्रदेशानां च

Jain Education International For Private & Personal Use Only www.jainelibrary.org

समुदितानामप्यसङ्ख्येयत्वादिति। **सेत**मित्यादि निगमनद्वयम्।

**[सू० १५९][१] से किं तं संगहस्स[२] अणोवणिहिया खेत्ताणुपुव्वी ? जहेव दव्वाणुपुव्वी तहेव खेत्ताणुपुव्वी णेयव्वा। से तं संगहस्स अणोवणिहिया खेत्ताणुपुव्वी। सेतं अणोवणिहिया खेत्ताणुपुव्वी।**

**[चू० १५९]** इदाणिं संगहस्स अणोवणिहिता खेत्ताणुपुव्वी, सा य जहा[१] दव्वाणुपुव्वीए। जो य विसेसो सो सुत्ततो चेव नातव्वो।

**[हा० १५९ ]से किं तं संगहस्से**त्यादि । इयमानिगमनं द्रव्यानुपूर्व्यनुसारतो भावनीया। नवरमत्र क्षेत्रस्य प्राधान्यमिति।

**[हे० १५९]** उक्ता नैगम-व्यवहारमतेनानौपनिधिकी क्षेत्रानुपूर्वी, अथ तामेव संग्रहमतेन बिभणिषुराह - **से किं त**मित्यादि। इह संग्रहाभिमतद्रव्यानुपूर्व्यनुसारेण निखिलं भावनीयम्, नवरं क्षेत्रप्राधान्यादत्र **तिपएसोगाढा आणुपुव्वी जाव असंखेज्जपएसोगाढा आणुपुव्वी, एगपएसोगाढा अणाणुपुव्वी, दुपएसोगाढा अवत्तव्वए** इत्यादि वक्तव्यम्, शेषं तथैवेति।

**[सू० १६०] से किं तं ओवणिहिया खेत्ताणुपुव्वी ? ओवणिहिया खेत्ताणुपुव्वी तिविहा पण्णत्ता ? तंजहा— पुव्वाणुपुव्वी १, पच्छाणुपुव्वी २, अणाणुपुव्वी[१] ३।**

**[सू० १६१] से किं तं पुव्वाणुपुव्वी ? पुव्वाणुपुव्वी— अहोलोए १, तिरियलोए २, उड्ढलोए ३। सेतं पुव्वाणुपुव्वी।**

**[सू० १६२] से किं तं पच्छाणुपुव्वी ? पच्छाणुपुव्वी— उड्ढलोए ३, तिरियलोए २, अहोलोए १। से तं पच्छाणुपुव्वी।**

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[सू० १६३] से किं तं अणाणुपुव्वी ? अणाणुपुव्वी— एयाए चेव एगादियाए एगुत्तरियाए तिगच्छगयाए सेढीए अन्नमन्नब्भासो दुरूवूणो। सेतं अणाणुपुव्वी।**

[चू० १६०-१६३] [१]इदाणिं **ओवणिधिया तिविहा**। **अहेलोगे**त्यादि। पंचत्थिकायमतिओ लोगो, सो य आयामतो उड्ढमहट्ठितो। तस्स तिहा परिकप्पणा इमेण विधिणा - बहुसमभूमिभागरयणप्पभाभागे मेरुमज्झे अट्ठप्पदेसो रुयगो, तस्साधोपतरातो [२]अधेग नव जोयणसताणि जाव ताव तिरियलोगो, ततो परेण अहेट्ठितत्तणतो **अहेलोगो** साहियसत्तरज्जुप्पमाणो १, रुचगोवरिपतरातो ऊवरिहुत्तो नव जोयणसताणि जा जोतिसचक्कस्स उवरितलो ताव तिरियलोगो, ततो उड्ढभागठितत्तणतो **उड्ढलोगो** देसूणसत्तरज्जुप्पमाणो २, अह-उड्ढलोगाण मज्झे अट्ठारसजोयणसतप्पमाणो तिरियभागट्ठितत्तणतो **तिरियलोगो** ३।

*अहव अहोपरिणामो, खेत्तणुभावेण जेण उस्सण्णं।*
*असुभो अहो त्ति भणितो, [३]दव्वाणं तेणऽधोलोगो ॥१॥*
*उड्ढं उवरिं जं [४]ठित, सुभखेत्तं खेत्ततो य दव्वगुणा।*
*उप्पज्जंति सभावा, तेण ततो उड्ढलोगो त्ति ॥२॥*
*मज्झणुभावं खेत्तं, जं तं तिरियं ति वयणपज्जयतो।*
*भण्णति तिरिय विसालं, अतो व तं तिरियलोगो त्ति ॥३॥ [ ]*

सेसं कंठं।

[हा० १६०-१६३] औपनिधिक्यपि प्रायो निगदसिद्धैव। णवरं पंचत्थिकायमइओ लोगो सो आयामओ उड्ढमहे पतिट्ठिओ, तस्स तिहा परिकप्पणा इमेण विहिणा - बहुसमभूमिभागरयणप्पभाभागे मेरुमज्झे अट्ठपदेसो रुयगो, तस्स अहोपयराओ अहेण जाव णव जोयणसयाणि ताव तिरियलोगो। ततो परेण अहे ठितत्तणओ अहोलोगो साहियसत्तरज्जुप्पमाणो। रुजगोपरिहुत्तो णव जोयणसताणि जाव जोइसचक्कस्स उवरितलो ताव तिरियलोगो। तओ उड्ढभागठितत्तणओ उवरिं उड्ढलोगो देसूणसत्तरज्जुप्पमाणो।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अहोलोगुड्ढलोगाण मज्झे अट्ठारसजोयणसतप्पमाणो तिरियभागठियत्तणओ तिरियलोगो।

*अहव अहोपरिणामो खेत्तणुभावेण जेण उस्सण्णं।*
*असुभो अहो त्ति भणिओ दव्वाणं तेणऽहोलोगो ॥१॥*
*उड्डं ति उवरि जं ठिय सुहखेत्तं खेत्तओ य दव्वगुणा।*
*उप्पज्जंति य भावा तेण तओ उड्ढलोगो त्ति ॥२॥*
*मज्झणुभावं खेत्तं जं तं तिरियंति वयणपज्जयओ।*
*भण्णइ तिरिय विसालं अतो य तं तिरियलोगो त्ति ॥३॥* [ ]

**[हे० १६०-१६३]** उक्ता अनौपनिधिकी क्षेत्रानुपूर्वी । अथौपनिधिकीं तां निर्दिदिक्षुराह - **से किं तं ओवणिहिते**त्यादि। अत्र व्याख्या पूर्ववत् कर्तव्या, नवरं तत्र द्रव्यानुपूर्व्यधिकाराद् धर्मास्तिकायादिद्रव्याणि पूर्वानुपूर्व्यादित्वेनोदाहृतानि, अत्र तु क्षेत्रानुपूर्व्यधिकारादधोलोकादिक्षेत्रविशेषा इति।

इह चोर्ध्वाधश्चतुर्दशरज्ज्वायतस्य विस्तरतस्त्वनियतस्य पञ्चास्तिकायमयस्य लोकस्य त्रिधा परिकल्पनेऽधोलोकादिविभागः सम्पद्यते, तत्रास्यां रत्नप्रभायां बहुसमभूभागे मेरुमध्ये नभःप्रतरद्वयेऽष्टप्रदेशो रुचकः समस्ति, तस्य प्रतरद्वयस्य मध्ये एकस्मादधस्तनप्रतरादारभ्याऽधोऽभिमुखं नव योजनशतानि परिहृत्य परतः सातिरेकसप्तरज्ज्वायतोऽधोलोकः । तत्र लोक्यते केवलिप्रज्ञया परिच्छिद्यत इति लोकः, अधो व्यवस्थितो लोकोऽधोलोकः। अथवा अधःशब्दोऽशुभपर्यायः, तत्र च क्षेत्रानुभावाद् बाहुल्येनाऽशुभ एव परिणामो द्रव्याणां जायते, अतोऽशुभपरिणामवद्द्रव्ययोगादधः अशुभो लोकःऽधोलोकः। उक्तं च-

*अहव अहोपरिणामो खेत्तणुभावेण जेण ओसण्णं।*
*असुभो अहो त्ति भणिओ दव्वाणं तेणऽहोलोगो ॥१॥* [ ] त्ति

तस्यैव रुचकप्रतरद्वयस्य मध्ये एकस्मादुपरितनप्रतरादारभ्योर्ध्वं नव योजनशतानि परिहृत्य परतः किञ्चिन्न्यूनसप्तरज्ज्वायत ऊर्ध्वलोकः । ऊर्ध्वम् उपरि व्यवस्थितो लोकः ऊर्ध्वलोकः, अथवा ऊर्ध्वशब्दः शुभपर्यायः, तत्र च क्षेत्रस्य शुभत्वात्तदनुभावाद् द्रव्याणां प्रायः शुभा एव परिणामा भवन्ति, अतः शुभपरिणामवद्द्रव्ययोगादूर्ध्वः । शुभो लोक

Jain Education International For Private & Personal Use Only www.jainelibrary.org

ऊर्ध्वलोकः, उक्तं च-

*उड्ढं ति उवरि जं ठिय सुभखेत्तं खेत्तओ य दव्वगुणा।*
*उप्पज्जंति सुभा वा तेण तओ उड्ढलोगोत्ति ॥१॥ [ ]*

तयोश्चाधोलोकोर्ध्वलोकयोर्मध्ये अष्टादश योजनशतानि तिर्यग्लोकः। समयपरिभाषया तिर्यग् मध्ये व्यवस्थितो लोकस्तिर्यग्लोकः। अथवा तिर्यक्शब्दो मध्यमपर्यायः, तत्र च क्षेत्रानुभावात् प्रायो मध्यमपरिणामवन्त्येव द्रव्याणि भवन्ति, अतस्तद्योगात्तिर्यङ् मध्यमो लोकस्तिर्यग्लोकः। अथवा स्वकीयोर्ध्वा-ऽधोभागात्तिर्यग्भाग एवातिविशालतयाऽत्र प्रधानम्, अतस्तेन व्यपदेशः कृतः, तिर्यग्भागप्रधानो लोकस्तिर्यग्लोकः। उक्तं च-

*मज्झणुभावं खेत्तं जं तं तिरियंति वयणपज्जवओ।*
*भण्णइ तिरियं विसालं अतो व तं तिरियलोगो त्ति ॥१॥ [ ]*

वयणपज्जवओ त्ति मध्यानुभाववचनस्य तिर्यग्ध्वनेः पर्यायतामाश्रित्येत्यर्थः। अत्र च जघन्यपरिणामवद्द्रव्ययोगतो जघन्यतया गुणस्थानकेषु मिथ्यादृष्टेरिवादावेवाधोलोकस्योपन्यासः, तदुपरि मध्यमद्रव्यवत्त्वात् मध्यमतया तिर्यग्लोकस्य, तदुपरिष्टादुत्कृष्टद्रव्यवत्त्वादूर्ध्वलोकस्योपन्यास इति पूर्वानुपूर्वीत्वसिद्धिः। पश्चानुपूर्वी तु व्यत्ययेन प्रतीतैव। अनानुपूर्व्यां तु पदत्रयस्यास्य षड् भङ्गा भवन्ति, ते च पूर्वं दर्शिता एव। शेषभावना त्विह प्राग्वदेवेति। अत्र च क्वचिद्**वाचनान्तरे** एकप्रदेशावगाढादीनाम् असङ्ख्यातप्रदेशावगाढान्तानां प्रथमं पूर्वानुपूर्व्यादिभाव उक्तो दृश्यते सोऽपि क्षेत्रानुपूर्व्यधिकारादविरुद्ध एव, सुगमत्वाच्चोक्तानुसारेण भावनीय इति।

**[सू० १६४] अहोलोयखेत्ताणुपुव्वी तिविहा पण्णत्ता। तंजहा— पुव्वाणुपुव्वी १, पच्छाणुपुव्वी २, अणाणुपुव्वी ३।**

**[सू० १६५] से किं तं पुव्वाणुपुव्वी? पुव्वाणुपुव्वी— रयणप्पभा १, सक्करप्पभा २, वालुयप्पभा ३, पंकप्पभा ४, धूमप्पभा ५, तमप्पभा ६, तमतमप्पभा ७। सेतं पुव्वाणुपुव्वी।**

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[सू० १६६] से किं तं पच्छाणुपुव्वी ? पच्छाणुपुव्वी – तमतमा ७ जाव रयणप्पभा १। सेतं पच्छाणु[४]पुव्वी।**

**[सू० १६७] से किं तं अणाणुपुव्वी ? अणाणुपुव्वी – एयाए चेव एगादियाए एगुत्तरियाए सत्तगच्छगयाए सेढीए अण्णमण्णब्भासो दुरूवूणो। सेतं अणाणुपुव्वी।**

**[चू० १६४-१६७]** इदाणिं अहेलोगखेत्ताणुपुव्वी - **रयणप्पभा**दिसुत्तं। एतासिं रतणप्पभादीणं इमे अणादिकालसिद्धा जधासंखं णामधेज्जा भवंति -

*[१]घम्मा १ वंसा २ सेला ३ अंजण ४ रिट्ठा ५ मघा य ६ माघवती ७।*
*एते अणादिसिद्धा, णामा रयणप्पभादीणं ॥१॥ [ ]*

एतासिं चेव घम्मादियाणं सत्तण्हं इमा गोत्राख्या। कहं ?, उच्यते - इंदनीलादिबहुविहरयण-संभवातो **रतणप्पभा**, क्वचिद् रत्नप्रभाप्रभासनसम्भवाद्वा रतणप्रभा, रतणकण्डप्रविभाग-कप्पितोवलक्खिता वा रतणप्रभा नरकवर्जप्रदेशेषु। शर्करोपलस्थितपटलमधोऽधः एवंविधस्वरूपेण [२]प्रख्यातेति **सर्करप्रभा**। एवं वालिकास्थितस्वरूपेण प्रख्यातेति **वालिकप्रभा**, नरकवर्जेष्वेव। पङ्क इवाऽऽभाति **पङ्कप्रभा**। धूमाभा **धूमप्रभा**। कृष्णतमो(मे ?)वाऽऽभाति **तमःप्रभा**। अतीवकृष्णा महत्तम इवाऽऽभाति **महातमःप्रभा**।

**[हा० १६४-१६७]** अहोलोकक्षेत्रानुपूर्व्यां रत्नप्रभादीनामनादिकालसिद्धानि नामानि यथासंख्यममूनि विज्ञातव्यानि, तद्यथा –

*[१]घम्मा वंसा सेला अंजण रिट्ठा मघा च माघवती।*
*पुढवीणं नामाइं रयणादी होंति गोत्ताइं ॥१॥* [जिन० संग्र० २३९]

रत्नप्रभादीनि तु गोत्राणि। तत्रेन्द्रनीलादिबहुविध[रत्न]सम्भवान्नरकवर्जं प्रायो रत्नानां प्रभा ज्योत्स्ना यस्यां सा रत्नप्रभा, एवं शेषा अपि यथानुरूपा वाच्या इति। नवरं शर्करोपल-वालुका-पङ्क-धूम-[कृष्णा-ऽति]कृष्णद्रव्योपलक्षणद्वारेणेति।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

[हे० १६४-१६७]साम्प्रतं वस्त्वन्तरविषयत्वेन पूर्वानुपूर्व्यादिभावं दिदर्शयिषुरधोलोकादीनां च भेदपरिज्ञाने शिष्यव्युत्पत्तिं पश्यन्नाह - **अहोलोकखेत्ताणुपुव्वी तिविहे**त्यादि। अधोलोकक्षेत्रविषया आनुपूर्वी अधोलोकक्षेत्रानुपूर्वी, औपनिधिकीति प्रक्रमाल्लभ्यते, सा **त्रिविधा प्रज्ञप्ता, तद्यथे**त्यादि शेषं पूर्ववद्भावनीयं याव**द्रत्नप्रभे**त्यादि। इन्द्रनीलादिबहुविधरत्नसम्भवान्नरकवर्ज्जं प्रायो रत्नानां प्रभा ज्योत्स्ना यस्यां सा **रत्नप्रभा,** एवं शर्कराणाम् उपलखण्डानां प्रभा प्रकाशनं स्वरूपेणावस्थानं यस्यां सा **शर्कराप्रभा,** वालुकाया वालिकाया वा परुषपांशूत्कररूपायाः प्रभा स्वरूपावस्थितिर्यस्यां सा **वालुकाप्रभा** वालिकाप्रभा वेति, पङ्कस्य प्रभा यस्यां सा **पङ्कप्रभा**, पङ्काभद्रव्योपलक्षितेत्यर्थः, धूमस्य प्रभा यस्यां सा **धूमप्रभा,** धूमाभद्रव्योपलक्षितेत्यर्थः, तमसः प्रभा यस्यां सा **तमःप्रभा,** कृष्णद्रव्योपलक्षितेत्यर्थः, क्वचि**त्तमे**ति पाठः, तत्रापि तमोरूपद्रव्ययुक्तत्वा**त्तमा** इति, महातमसः प्रभा यस्यां सा **महातमःप्रभा,** अतिकृष्णद्रव्योपलक्षितेत्यर्थः, क्वचि**त्तमतमे**ति पाठः, तत्राप्यतिशयवत् तमस्तमस्तमः, तद्रूपद्रव्ययोगात् तमस्तमा इति। अत्र प्रज्ञापकप्रत्यासत्ते रत्नप्रभाया आदावुपन्यासः, ततः परं व्यवहितव्यवहिततरादित्वात् क्रमेण शर्कराप्रभादीनामिति पूर्वानुपूर्वीत्वम्, व्यत्ययेन पश्चानुपूर्वीत्वम्, अमीषां च सप्तानां पदानां परस्पराभ्यासे पञ्च सहस्राणि चत्वारिंशदधिकानि भङ्गानां भवन्ति, तानि चाद्यन्तभङ्गकद्वयरहितान्यनानुपूर्व्यां द्रष्टव्यानीति, शेषभावना पूर्ववदिति।

**[सू० १६८] तिरियलोयखेत्ताणुपुव्वी तिविहा पण्णत्ता। तंजहा- पुव्वाणुपुव्वी १, पच्छाणुपुव्वी २, अणाणुपुव्वी ३।**

**[सू० १६९] से किं तं पुव्वाणुपुव्वी ? पुव्वाणुपुव्वी —**

**जंबुद्दीवे लवणे धायइ-कालोय-पुक्खरे वरुणे।**
**खीर-घय-खोय-नंदी-अरुणवरे कुंडले रुयगे॥११॥**
**[1]जंबुद्दीवाओ खलु निरंतरा, सेसया असंखइमा।**
**भुयगवर-कुसवरा वि य कोंचवराऽऽभरणमाईया(ईय)॥१२॥**

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**आभरण-वत्थ-गंधे उप्पल[२]-तिलये य पउम-निहि-रयणे।**
**वासहर-दह-णदीओ विजया वक्खार-कप्पिंदा॥१३॥**
**कुरु[३]-मंदर[४]-आवासा कूडा[५] नक्खत्त-चंद-सूरा य।**
**देवे नागे जक्खे भूये य सयंभुरमणे[६] य॥१४॥**

**सेतं पुव्वाणुपुव्वी।**

[सू० १७०] **से किं तं पच्छाणुपुव्वी? पच्छाणुपुव्वी— सयंभुरमणे[७] य भूए य जाव जंबुद्दीवे। सेतं पच्छाणुपुव्वी।**

[सू० १७१] **से किं तं अणाणुपुव्वी? अणाणुपुव्वी— एयाए चेव एगादियाए एगुत्तरियाए असंखेज्जगच्छगयाए सेढीए अण्णमण्णब्भासो दुरूवूणो। सेतं अणाणुपुव्वी[८]।**

[चू० १६८-१७१] इदाणिं **तिरियलोगखेत्ताणुपुव्वी तिविहेत्यादि** सूत्रम्। जंबुद्दीवे दीवे, लवणे समुद्दे, धायतिसण्डे दीवे, कालोदे समुद्दे उदगरसे, पुक्खरवरे दीवे, पुक्खरोदे समुद्दे उदगरसे, वरुणवरे दीवे, वरुणोदे समुद्दे वारुणिरसे, खीरवरे दीवे, खीरोदे समुद्दे, घतवरे दीवे, घतोदे समुद्दे, खोतवरे दीवे, खोतरसे समुद्दे। अतो परं सव्वे दीवसरिण्णामता समुद्दा, ते य सव्वे खोयरसा भाणितव्वा। इमे दीवणामा - णंदिस्सरवरदीवो, अरुणवरो दीवो, अरुणावासो दीवो, कुंडलो दीवो, संखवरो दीवो, रुजगवरो दीवो। जंबुद्दीवातो एते णिरंतरा, अतो परं असंखेज्जे गंतुं भुजगवरे दीवे, पुणो असंखेज्जे गंतुं कुसवरो दीवो, एवं असंखेज्जे असंखेज्जे गंतुं इमेसिं एक्केक्कं णामं भाणितव्वं, कोंचवरो दीवो, एवं आभरणादयो जाव अंते सयंभुरमणे दीवे, सयंभुरमणे से अंते समुद्दे उदगरसे इति। जे अंतरंतरे दीवा तेसिं इहं जे सुभणामा केइ तण्णामाणो ते भाणितव्वा। सव्वेसिं इमं पमाणं -

*उद्धारसागराणं[१], अड्ढाइज्जाण जत्तिया समया।*
*दुगुणादुगुणपवित्थर, दीवोदधी रज्जु एवतिया॥१॥* [*जिन० संग्र० गा० ८०*]

Jain Education International For Private & Personal Use Only www.jainelibrary.org

[हा० १६८-१७१] तिर्यग्लोकक्षेत्रानुपूर्व्यां जंबुद्दीवे दीवे, [१]लवणे समुद्दे, धायइसंडे दीवे, कालोदे समुद्दे उदगरसे, [२]पुक्खरवरे दीवे, पुक्खरोदे समुद्दे उदगरसे, वरुणवरे दीवे, वरुणोदे समुद्दे वरुणरसे, खीरवरे दीवे, खीरोदे समुद्दे, घयवरे दीवे, घओदे समुद्दे, खोदवरे दीवे, खोदवरे समुद्दे, अतो परं सव्वे दीवसरिणामिया समुद्दा, ते य सव्वे खोदरसा भाणियव्वा। इमे दीवणामा, तंजहा – णंदीसरो दीवो, अरुणवरो दीवो, अरुणवासो दीवो, कुंडलो दीवो, संखवरो दीवो, रुयगवरो दीवो, एते जंबूदीवातो णिरंतरा, अतो परं असंखेज्जे गंतुं भुजगवरे दीवे, पुणो असंखेज्जे दीवे गंतुं कुसवरे दीवे, एवं असंखेज्जे असंखेज्जे गंतुं इमेसिं एक्केक्कं णामं भाणियव्वं, कोंचवरे दीवे, एवं आभरणादओ जाव अन्ते संयभुरमणे दीवे, सयंभुरमणे से अन्ते समुद्दे उदगरसे इति। जे अन्तरंतरे दीवे तेसिं इहं सुभणामा जे केइ तण्णामाणो ते भाणितव्वा। सव्वेसिं इमं पमाणं -

*[३]उद्धारसागराणं अड्ढाइज्जाण जत्तिया समया।*
*दुगुणादुगुणपवित्थर दीवोदहि रज्जु एवइया ॥१॥* [*जिन० संग्र० ८०*]

[हे० १६८-१७१] तिर्यग्लोकक्षेत्रानुपूर्व्यां **जंबुद्दीवे** इत्यादिगाथा। व्याख्या- द्वाभ्यां प्रकाराभ्यां स्थानदातृत्वा-ऽऽहाराद्युपष्टम्भहेतुत्वलक्षणाभ्यां प्राणिनः पान्तीति द्वीपाः जन्त्वावासभूतक्षेत्रविशेषाः, सह मुद्रया मर्यादया वर्तन्त इति समुद्राः, प्रचुरजलोपलक्षिताः क्षेत्रविशेषा एव, एते च तिर्यग्लोके प्रत्येकमसङ्ख्येया भवन्ति, तत्र समस्तद्वीप-समुद्राभ्यन्तरभूतत्वेनादौ तावज्जम्बूवृक्षेणोपलक्षितो द्वीपो जम्बूद्वीपः, ततस्तं परिक्षिप्य स्थितो लवणरसास्वादनीरपूरितः समुद्रो लवणसमुद्रः, एकदेशेन समुदायस्य गम्यमानत्वात्, एवं पुरस्तादपि यथासम्भवं द्रष्टव्यम्, **धायइ कालोय** त्ति, ततो लवणसमुद्रं परिक्षिप्य स्थितो [१]धातकीवृक्षषण्डोपलक्षितो द्वीपो धातकीषण्डः, तत्परितोऽपि शुद्धोदकरसास्वादः कालोदः समुद्रः, तं च परिक्षिप्य स्थितः पुष्करैः पद्मवरैरुपलक्षितो द्वीपः पुष्करवरद्वीपः, तत्परितोऽपि शुद्धोदकरसास्वाद एव पुष्करोदः समुद्रः, अनयोश्च द्वयोरप्येकेनैव पदेनात्र संग्रहो द्रष्टव्यः **पुक्खरे** त्ति, एवमुत्तरत्रापि, ततो **वरुणे** त्ति वरुणवरो द्वीपः, ततो [२]वारुणीरसास्वादो वारुणोदः समुद्रः, [३]**खीरे**ति क्षीरवरो द्वीपः, क्षीररसास्वादः क्षीरोदः समुद्रः, **घय** त्ति घृतवरो द्वीपः,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

घृतरसास्वादो घृतोदः समुद्रः, **खोय** त्ति इक्षुवरो द्वीपः, इक्षुरसास्वाद एवेक्षुरसः समुद्रः, इत ऊर्ध्वं सर्वेऽपि समुद्राः द्वीपसदृशनामानो मन्तव्याः । अपरं च, स्वयम्भुरमणवर्जाः सर्वेऽपीक्षुरसास्वादाः, तत्र द्वीपनामान्यमूनि, तद्यथा- नन्दी समृद्धिस्तया ईश्वरो द्वीपो **नन्दीश्वरः**, एव**मरुणवरः**, अरुणावासः, **कुण्डलवरः**, शङ्खवरः, **रुचक**वर इत्येवं षड् द्वीपनामानि **चूर्णौ** लिखितानि दृश्यन्ते, सूत्रे तु **नन्दी अरुणवरे कुंडले रुयगे** इत्येतस्मिन् गाथादले चत्वार्येव तान्युपलभ्यन्ते, अतः **चूर्णि**लिखितानुसारेण रुचकस्त्रयोदशः, सूत्रलिखितानुसारतस्तु स एवैकादशो भवति, तत्त्वं तु केवलिनो विदन्तीति गाथार्थः।

इदानीमनन्तरोक्तद्वीप-समुद्राणामवस्थितिस्वरूपप्रतिपादनार्थं शेषाणां तु नामाभिधानार्थमाह-

***जंबुद्दीवाओ खलु निरन्तरा सेसया असंखइमा ।***
***भुयगवर-कुसवरा वि य कोंचवरा-ऽऽभरणमाई य*** ॥१॥ *त्ति*।

व्याख्या- एते पूर्वोक्ताः सर्वेऽपि **जम्बूद्वीपा**दारभ्य **निरन्तरा** नैरन्तर्येण व्यवस्थिताः, न पुनरमीषामन्तरेऽपरो द्वीपः कश्चनापि समस्तीति भावः, ये तु **शेषका** भुजगवरादय इत ऊर्ध्वं वक्ष्यन्ते ते प्रत्येक**मसङ्ख्याततमा** द्रष्टव्याः, तथाहि- **भुयगवर** त्ति पूर्वोक्ताद् रुचकवराद् द्वीपादसङ्ख्येयान् द्वीप-समुद्रान् गत्वा भुजगवरो नाम द्वीपः समस्ति, **कुसवर** त्ति ततोऽप्यसङ्ख्येयाँस्तान् गत्वा कुशवरो नाम द्वीपः समस्ति, **अपि चे**ति समुच्चये, **कुंचवरो** त्ति, ततोऽप्यसङ्ख्येयाँस्तानतिक्रम्य क्रौञ्चवरो नाम द्वीपः समस्ति, **आभरणमाई य** त्ति एवमसङ्ख्येयानसङ्ख्येयान् द्वीप-समुद्रानुल्लङ्घ्याऽऽ**भरणादयश्च** आभरणादिनाम-सदृशनामानश्च द्वीपा वक्तव्याः, समुद्रास्तु तत्सदृशनामान एव भवन्तीत्युक्तमेवेति गाथार्थः। इयं च गाथा कस्याञ्चिद्**वाचनायां** न दृश्यत एव, केवलं क्वापि **वाचना**विशेषे दृश्यते, **टीका-चूर्ण्यो**स्तु तद्व्याख्यानमुपलभ्यत इत्यस्माभिरपि व्याख्यातेति।

तानेवाभरणादीनाह - **आभरणवत्थे**त्यादिगाथाद्वयम्, असङ्ख्येयानाम् असङ्ख्येयानां द्वीपानामन्ते आभरण-वस्त्र-गन्धोत्पल-तिलकादिपर्यायसदृशनामक एकैकोऽपि द्वीपस्तावद्वक्तव्यो यावदन्ते स्वयम्भुरमणो द्वीपः, शुद्धोदकरसः स्वयम्भुरमण एव समुद्र इति गाथाद्वयभावार्थः। ननु यद्येवं तर्ह्यसङ्ख्येयानसङ्ख्येयान् द्वीपानतिक्रम्य ये वर्तन्ते तेषामेव

Jain Education International For Private & Personal Use Only www.jainelibrary.org

द्वीपानामेतानि नामान्याख्यातानि, ये त्वन्तरालेषु द्वीपास्ते किंनामका इति वक्तव्यम्, ? सत्यम्, लोके पदार्थानां शङ्ख-ध्वज-कलश-स्वस्तिक-श्रीवत्सादीनि यावन्ति शुभनामानि तैः सर्वैरप्युपलक्षि[७]तास्ते द्वीपाः प्राप्यन्त इति स्वयमेव द्रष्टव्यम्, यत उक्तम्- *दीवसमुद्दा णं भंते! केवइया नामधिज्जेहिं पण्णत्ता? गोयमा! जावइया लोए सुभा नामा सुभा रूवा सुभा गंधा सुभा रसा सुभा फासा एवइया णं दीवसमुद्दा नामधिज्जेहिं पण्णत्ता* [ ] इति, सङ्ख्या तु सर्वेषामसङ्ख्येयस्वरूपा

*[८]उद्धारसागराणं अड्ढाइज्जाण जत्तिया समया।*
*दुगुणादुगुणपवित्थर दीवोदहि रज्जु एवइया ॥१॥* [*जिन० संग्र० गा० ८०*]

इति गाथाप्रतिपादिता द्रष्टव्या। तदेवमत्र क्रमोपन्यासे पूर्वानुपूर्वी, व्यत्ययेन पश्चानुपूर्वी, अनानुपूर्वी त्वमीषामसङ्ख्येयानां [९]पदानां परस्पराभ्यासे येऽसङ्ख्येया [१०]भङ्गा भवन्ति [११]भङ्गकद्वयोनतत्स्वरूपा द्रष्टव्येति।

**[सू० १७२] उड्ढलोगखेत्ताणुपुव्वी तिविहा पण्णत्ता। तंजहा— पुव्वाणुपुव्वी १, पच्छाणुपुव्वी २, अणाणुपुव्वी ३।**

**[सू० १७३] से किं तं पुव्वाणुपुव्वी? पुव्वाणुपुव्वी— सोहम्मे १, ईसाणे २, सणंकुमारे ३, माहिंदे ४, [१]बंभलोए ५, लंतए ६, महासुक्के ७, सहस्सारे ८, आणते ९, पाणते १०, आरणे ११, अच्चुते १२, गेवेज्जविमाणा १३, अणुत्तरविमाणा १४, ईसिपब्भारा १५। सेतं पुव्वाणुपुव्वी।**

**[सू० १७४] से किं तं पच्छाणुपुव्वी? पच्छाणुपुव्वी— ईसिपब्भारा १५ जाव सोहम्मे १। सेतं पच्छाणुपुव्वी।**

**[सू० १७५] से किं तं अणाणुपुव्वी? अणाणुपुव्वी एयाए चेव एगादिगाए एगुत्तरियाए पण्णरसगच्छगयाए सेढीए अण्णमण्णब्भासो दुरूवूणो। सेतं अणाणुपुव्वी।**

Jain Education International	For Private & Personal Use Only	www.jainelibrary.org

**[सू० [२]१७६] अहवा ओवणिहिया खेत्ताणुपुव्वी तिविहा पण्णत्ता। तंजहा— पुव्वाणुपुव्वी १, पच्छाणुपुव्वी २, अणाणुपुव्वी ३।**

**[सू० १७७] से किं तं पुव्वाणुपुव्वी ? पुव्वाणुपुव्वी— एगपएसोगाढे दुपएसोगाढे [३]जाव दसपएसोगाढे जाव असंखेज्जपएसोगाढे । सेतं पुव्वाणुपुव्वी।**

**[सू० १७८] से किं तं पच्छाणुपुव्वी ? पच्छाणुपुव्वी — असंखेज्ज-पएसोगाढे जाव एगपएसोगाढे। से तं पच्छाणुपुव्वी।**

**[सू० १७९] से किं तं अणाणुपुव्वी ? अणाणुपुव्वी— एयाए चेव एगादियाए एगुत्तरियाए असंखेज्जगच्छगयाए सेढीए अन्नमन्नब्भासो दुरूवूणो । सेतं अणाणुपुव्वी । से तं ओवणिहिया खेत्ताणुपुव्वी । सेतं खेत्ताणुपुव्वी।**

**[चू० १७२-१७९]** इदाणिं उड्ढलोगखेत्ताणुपुव्वीसुत्तं — तत्थ सोधम्मवडेंसयं णाम कप्पविमाणं, तण्णामोवलक्खितो **सोधम्मो** त्ति कप्पो भन्नति, एवं बारस वि कप्पा भाणितव्वा। लोगपुरुषस्य ग्रीवाविभागे भवानि विमानानि **ग्रैवेयकानि**। न तेषां अन्यान्युत्तरं विमानान्यस्तीत्यत **अनुत्तरविमानानीति**। ईषद्भाराक्रान्तपुरुष इव नता अन्तेषु **ईसीपब्भारा** पुढवी। सेसं कंठं। गता खेत्ताणुपुव्वी।

**[हा०१७२-१७९]** ऊर्ध्वलोकक्षेत्रानुपूर्व्यां तु सौधर्मावतंसकाभिधानसकलविमान-प्रधानविमानविशेषोपलक्षितः सौधर्मः, एवं शेषेष्वपि भावनीयमिति। लोकपुरुषग्रीवाविभागे भवानि ग्रैवेयकाणि। नैषामुत्तराणि विद्यन्त इत्यनुत्तराणि। मनाग्भाराक्रान्तपुरुषवद् नता अन्तेषु ईषत्प्राग्भारेत्यलं प्रसङ्गेन, प्रकृतं प्रस्तुमः। उक्ता क्षेत्रानुपूर्वी।

**[हे० १७२-१७९]** ऊर्ध्वलोकक्षेत्रानुपूर्व्यां **सोहम्मे** त्यादि । सकलविमान-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

प्रधानसौधर्मावतंसकाभिधानविमानविशेषोपलक्षितत्वात् सौधर्मः, एवं सकलविमान-प्रधानेशानावतंसकविमानविशेषोपलक्षित ईशानः, एवं तत्तद्विमानावतंसक-प्राधान्येन तत्तन्नाम वाच्यं यावत् सकलविमानप्रधानाच्युतावतंसकाभिधानविमान-विशेषोपलक्षितोऽच्युतः, लोकपुरुषस्य ग्रीवाविभागे भवानि विमानानि ग्रैवेयकानि, नैषामन्यान्युत्तराणि विमानानि सन्तीत्यनुत्तरविमानानि, ईषद्भाराक्रान्तपुरुषवन्नता अन्तेष्वितीषत्प्राग्भारेति । अत्र प्रज्ञापकप्रत्यासत्तेरादौ सौधर्मस्योपन्यासः, ततो व्यवहितादिरूपत्वात् क्रमेणेशानादीनामिति पूर्वानुपूर्वीत्वम्, शेषभावना तु पूर्वोक्तानुसारतः कर्तव्येति क्षेत्रानुपूर्वी समाप्ता।

**[सू० १८०] से किं तं कालाणुपुव्वी ? कालाणुपुव्वी दुविहा पण्णत्ता। तंजहा— ओवणिहिया य १, अणोवणिहिया य २।**

**[सू० १८१] तत्थ णं जा सा ओवणिहिया सा ठप्पा।**

**[सू० १८२] तत्थ णं जा सा अणोवणिहिया सा दुविहा पण्णता। तं जहा— णेगम-ववहाराणं १, संगहस्स य २।**

**[सू० [१] १८३] से किं तं णेगम-ववहाराणं अणोवणिहिया कालाणुपुव्वी ? णेगम-ववहाराणं अणोवणिहिया कालाणुपुव्वी पंचविहा पण्णत्ता । तंजहा— अट्ठपयपरूवणया १, भंगसमुक्कित्तणया २, भंगोवदंसणया ३, समोतारे ४, अणुगमे ५।**

**[सू० १८४] से किं तं णेगम-ववहाराणं अट्ठपदपरूवणया ? णेगम-ववहाराणं अट्ठपदपरूवणया— तिसमयट्ठिईए आणुपुव्वी [२] जाव दससमयट्ठिईए आणुपुव्वी, संखेज्जसमयट्ठिईए आणुपुव्वी, असंखेज्ज-समयट्ठितीए आणुपुव्वी, एगसमयट्ठितीए अणाणुपुव्वी, दुसमयट्ठिईए अवत्तव्वए, तिसमयट्ठितीयाओ [३] आणुपुव्वीओ जाव संखेज्जसमय-**

Jain Education International For Private & Personal Use Only www.jainelibrary.org

ट्ठितीयाओ आणुपुव्वीओ, असंखेज्जसमयट्ठितीयाओ आणुपुव्वीओ, एगसमयट्ठितीयाओ अणाणुपुव्वीओ, दुसमयट्ठिईयाइं अवत्तव्वयाइं। से तं णेगम-ववहाराणं अट्ठपयरूपवणया।

[सू० १८५] एयाए णं णेगम-ववहाराणं अट्ठपयरूपवणयाए[४] जाव भंगसमुक्कित्तणया [५]कज्जति।

[सू० १८६] से किं तं णेगम-ववहाराणं भंगसमुक्कित्तणया? णेगम-ववहाराणं भंगसमुक्कित्तणया — अत्थि आणुपुव्वी, अत्थि अणाणुपुव्वी, अत्थि अवत्तव्वए, एवं दव्वाणुपुव्विगमेणं कालाणुपुव्वीए वि ते चेव छव्वीसं भंगा[६] भाणियव्वा जाव सेतं णेगम-ववहाराणं भंगसमुक्कित्तणया।

[सू० १८७] एयाए णं णेगम-ववहाराणं[७] जाव किं पओयणं? एयाए णं णेगम०[८] जाव भंगोवदंसणया कज्जति।

[सू० १८८] से किं तं णेगम-ववहाराणं भंगोवदंसणया? णेगम-ववहाराणं भंगोवदंसणया — तिसमयट्ठितीए आणुपुव्वी, एगसमयट्ठितीए अणाणुपुव्वी, दुसमयट्ठितीए अवत्तव्वए[९], तिसमयट्ठितीयाओ आणुपुव्वीओ, एगसमयट्ठितीयाओ अणाणुपुव्वीओ, दुसमयट्ठितीयाइं अवत्तव्वयाइं। एवं दव्वणुगमेणं ते चेव छव्वीसं भंगा भाणियव्वा, जाव सेतं णेगम-ववहाराणं भंगोवदंसणया।

[सू० १८९] से किं तं समोयारे? समोयारे — णेगम-ववहाराणं आणुपुव्विदव्वाइं कहिं समोयरंति[१०]? जाव तिण्णि वि सट्ठाणे सट्ठाणे समोयरंति त्ति भाणियव्वं। सेतं समोयारे।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

[सू० १९०] से किं तं अणुगमे ? अणुगमे णवविहे पण्णत्ते। तंजहा-
[११]संतपयपरूवणया १ जाव अप्पाबहुं चेव ९ ॥१५॥

[सू० १९१] णेगम-ववहाराणं आणुपुव्विदव्वाइं किं अत्थि णत्थि ? [१२]नियमा तिण्णि वि अत्थि।

[सू० १९२] णेगम-ववहाराणं आणुपुव्विदव्वाइं किं संखेज्जाइं, असंखेज्जाइं, अणंताइं[१३] ? तिण्णि वि नो संखेज्जाइं, असंखेज्जाइं, नो अणंताइं।

[सू० १९३] णेगम-ववहाराणं आणुपुव्विदव्वाइं लोगस्स किं संखेज्जइभागे होज्जा[१४] ? ० पुच्छा, एगदव्वं पडुच्च लोगस्स संखेज्जतिभागे वा होज्जा जाव[१५] असंखेज्जेसु वा भागेसु होज्जा, देसूणे वा लोए होज्जा, नाणादव्वाइं पडुच्च नियमा सव्वलोए होज्जा। [१६]→ एवं अणाणुपुव्वि[१७]-अवत्तव्वयदव्वाणि भाणियव्वाणि जहा णेगम-ववहाराणं खेत्ताणुपुव्वीए।

[सू० १९४] एवं [१८]फुसणा कालाणुपुव्वीए वि तहा चेव भाणितव्वा।←

[चू० १८०-१९४] स्पर्शनाऽप्येवमेव। इदाणिं कालाणुपुव्वीसुत्तं – तत्थ जस्स एगपदेसादियस्स दव्वस्स दव्वत्तेण तिसमयादी ठिती पदेसावगाहकालत्तणेण वा ठिती तं कालतो अणुपुव्वी भण्णति। एवं अणाणुपुव्वि-अव्वत्तव्वगा वि। एत्थ सव्वं कालाभिलावेण जहा खेत्ताणुपुव्वीए तधा सुत्तसिद्धं भाणितव्वं जाव **पदेसूणे वा लोए होज्ज** त्ति। कधं ?, उच्यते – दव्वतो एगो खंधो सुहुमपरिणामो पदेसूणे लोगेऽवगाढो सो चेव कालतो तिसमयट्ठितियो लब्भति, तिसंखा य आणुपुव्वी, जं पुण समत्तलोगागासपदेसावगाढं दव्वं तं णियमा चउत्थसमए एगसमयट्ठितियं लब्भति, तम्हा तिसमयादिट्ठितियं कालाणुपुव्वि, णियमा य एतं पदेसूणे चेव लोगे लब्भति, तिसमयादिकालाणुपुव्विदव्वं जहण्णतो एगप्पदेसे अवगाहति,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तत्थेव प्पदेसे एगसमयट्ठितिं कालतो अणणुपुव्विदव्वं अवगाधेति, तत्थेव पदेसे दुसमयट्ठितिं कालतो अवत्तव्वं अवगाहति, जम्हा एवं तम्हा अचित्तमहाखंधस्स चउत्थ-पंचमसमएसु कालतो आणुपुव्विदव्वं, तस्स य सव्वलोगोगाढस्स वि एगपदेसूणता कज्जति। किमिति ?, उच्यते – जे कालतो अणणुपुव्वि-अवत्तव्वा ते तस्स एगपदेसावगाढा, तस्स य तम्मि पदेसे अपाधण्णं तव्विवक्खातो, अतो तप्पदेसूणो लोगो कतो, इत्थ दिट्ठंतो जहा खेत्ताणुपुव्वीए, देशोन इत्यर्थः।

*एगम्मि खप्पदेसे, कालणुपुव्वादि तिण्णि वी दव्वा।*
*ओगाहंते जम्हा, पदेसऊणो त्ति तो लोगो ॥१॥* [ ]

***अन्ने*** *पुण आयरिया* भणंति –

*कालपदेसो समयो, समयचउत्थम्मि हवति जं वेलं।*
*तेणूण वत्तणत्ता, जं लोगो कालमयखंधो ॥१॥* [ ]

विवक्षितत्वात्। अणाणुपुव्वि-अव्वत्तव्वगा कालतो जे ते **लोगस्स असंखेज्जतिभागे होज्ज,** सेसपुच्छा पडिसेहेतव्वा।

अहवा *सुत्तस्स* ***पाढंतर****ट्ठितस्स* भावणत्थं भण्णति – अचित्तमहाखंधो दंडावत्थारूवदव्वत्तणं मोत्तुं क्वाडावत्थभवणं, तं अण्णं चेव दव्वं भवति, अण्णागारुब्भवत्तणतो बहुतरपरमाणुसंघातत्तणतो य, दिट्ठंतो दुपदेसिकस्स तिपदेसभवणं व, एवं मंथकरण-लोगापूरणसमयेसु वि महास्कंधस्य अन्यान्यद्रव्यभवनम्, अतो कालाणाणुपुव्विदव्वं सव्वपुच्छासु संभवतीत्यर्थः। **अवत्तव्वगदव्वं महाखंधवज्जेसु अन्नदव्वेसु आदिल्लचतु-पुच्छासंभवेण** भाणितव्वं, पुव्वसमं चेत्यर्थः।

[हा० १८०-१९४] साम्प्रतं कालानुपूर्व्युच्यते – तत्रेदं सूत्रम् – **से किं तं कालाणुपुव्वी,** तत्र द्रव्यपर्यायत्वात् कालस्य त्र्यादिसमयस्थित्याद्युपलक्षितद्रव्याण्येव **कालानुपूर्वी द्विविधा प्रज्ञप्ते**त्यादि। अत्र यथा द्रव्यानुपूर्व्यां तथैवाक्षरगमनिका कार्या, विशेषं तु वक्ष्यामः। **तिसमयट्ठितीए आणुपुव्वि** त्ति त्रिसमयस्थित्यणुकादि द्रव्यं पर्याय-पर्यायिणोः कथंचिदभेदेऽपि कालानुपूर्व्यधिकारात् तत्प्राधान्यात् कालानुपूर्वीति, एवं

Jain Education International    For Private & Personal Use Only    www.jainelibrary.org

यावदसंख्येयसमयस्थिति। एव**मेकसमयस्थित्यनानुपूर्वी, द्विसमयस्थित्यवक्तव्यकम्,** शेषं प्रकटार्थं यावत् **णो संखेज्जाइं, असंखेज्जाइं, णो अणंताइं,** अस्य भावना - इह कालप्राधान्यात् त्रिसमयस्थितीनां भावानामनन्तानामप्येकत्वात् तदनु समयवृद्ध्याऽसंख्येयसमयस्थितीनां परतः खल्वसम्भवात्, समयवृद्ध्याऽध्यासितानां चानन्तानामपि द्रव्याणां कालानुपूर्वीमधिकृत्यैकत्वादसंख्येयानि। अथवा त्र्यादिप्रदेशावगाहसम्बन्धित्र्यादिसमयस्थित्यपेक्षयेति उपाधिभूतखस्याप्यसंख्येयप्रदेशात्मकत्वादिति, एवं **तिण्णि** त्ति। आह - एकसमयस्थितीनामनन्तानामप्येकत्वात् तेषां चानन्तानामपि कालापेक्षया प्रत्येकमेकत्वाद् द्रव्यभेदग्रहणे चानन्त्यप्रसङ्गः, कथमनानुपूर्व्यवक्तव्यकयोरसंख्येयत्वम्? इति, अत्रोच्यते – आधारभेदसम्बन्धस्थित्यपेक्षया, सामान्यतश्चाधारलोकस्यासंख्येयप्रदेशात्मकत्वादित्यनया दिशाऽतिगहनमिदं सूक्ष्मबुद्ध्याऽऽलोचनीयमिति। **एगं दव्वं पडुच्च लोगस्स**[1] **असंखेज्जतिभागे होज्जा ४ जाव देसूणे वा लोगे होज्जा। केई** भणंति - **पदेसूणे** त्ति, कथम्? उच्यते – दव्वओ एगो खंधो सुहुमपरिणामो पदेसूणे लोए अवगाढो, सो चेव कयाइ तिसमयट्ठितीओ लब्भइ*, तिसंखा य आणुपुव्वी। जं पुण समत्तलोगागासपदेसावगाढं दव्वं तं नियमा चउत्थसमए एगसमयट्ठितीयं लब्भइ, तम्हा तिसमयट्ठितीयं कालाणुपुव्वी णियमा एगपदेसूणे चेव लोए लब्भति, अहवा तिसमयादिकालाणुपुव्विदव्वं जहण्णओ एगपदेसे अवगाहति, तत्थेव पदेसे एगसमयट्ठितीयं कालओ अणाणुपुव्विदव्वं दुसमयट्ठितियं च अवत्तव्वगं अवगाहति, जम्हा एवं तम्हा अचित्तमहाखंधो चउत्थसमए कालओ आणुपुव्विदव्वं, तस्स य सव्वलोगावगाढस्स वि एगपदेसूणता कज्जइ, किमिति? उच्यते – जे कालओ अणाणुपुव्विअवत्तव्वा ते तस्स एगपदेसावगाढा, तस्स य तम्मि पदेसे अप्पाधण्णत्तविवक्खातो, अतो तप्पदेसूणो लोको कतो। एत्थ दिट्ठंतो जहा खेत्ताणुपुव्वीए देसोन इत्यर्थः,

*एगम्मि खप्पदेसे कालणुपुव्वादि तिण्णि वी दव्वा।*
*ओगाहंते जम्हा पदेसऊणो त्ति तो लोगो ॥१॥* [ ]

***अण्णे*** पुण आयरिया भणंति –

---

* °इ त्तिसं° ह० ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

*कालपदेसो समओ समयचउत्थम्मि [हवति] जंवेलं।*
*तेणूण वत्तणत्ता जं लोगो कालमयखंधो ॥२॥ [ ]*

अयमत्र भावार्थः — इह कालानुपूर्व्यधिकारात् कालस्य च वर्त्तनादिरूपत्वात् पर्याय-पर्यायिणोरभेदात् स खल्वचित्तमहास्कन्धश्चतुःसमयात्मकः काल एव, अतः *कालप्रदेशः* कालविभागः *समय* इति, ततश्च समये चतुर्थे भवति वर्त्तते *यद्वेलमिति* यस्यां वेलायामसौ स्कन्धः, स हि तदा विवक्षयैकत्वाद् न गृह्यते, अतः *तेणूण* त्ति विवक्षितचतुः-समयात्मकस्कन्धस्तेनोनः परिगृह्यते। कथमेतदेवम्? *वत्तण[त्त]* त्ति वर्त्तनारूपत्वात् कालस्य *जं लोको कालमयखंधो* त्ति विवक्षयैव यस्माल्लोकः कालमयस्कन्धो वर्त्तते अतस्तस्य प्रदेशाख्यसमयागणने प्रदेशेनोनो लोक इति। एवमन्यथाऽपि स्वबुद्ध्या भावनीयमिति।

**णाणादव्वाइं पडुच्च णियमा सव्वलोए** त्ति त्र्यादिप्रदेशावगाहत्र्यादिसमय-स्थितीनां सकललोके भावात्।

अनानुपूर्वीद्रव्यचिन्तायाम् **एगदव्वं पडुच्च लोय[स्स] असंखेज्जतिभागे होज्जा,** सेसपुच्छा पडिसेहितव्वा। भावार्थस्त्वेकप्रदेशावगाहैकसमयस्थितेर्विवक्षितत्वादित्यादिना प्रकारेणाऽऽगमानुसारतो वाच्यः।

**आदेशान्तरेण** वाऽस्य भावना - अचित्तमहास्कन्धो दण्डावत्थाब्भवदव्वत्तणं मोत्तुं कवाडावत्थाभवणं, तं अन्नं चेव दव्वं भवति, अण्णागारभावत्तणओ बहुतरपरमाणुसङ्घातत्तणओ य, दिट्ठंतो दुपदेसियस्स तिपदेसियभवणं व, एवं मंथापूरण-लोगापूरणसमएसुं महास्कन्धस्या-न्यान्यद्रव्यभवनम्, अतो काला[णा]णुपुव्विदव्वं सव्वपुच्छासु संभवतीत्यर्थः। **णाणादव्वाइं पडुच्च नियमा सव्वलोए होज्ज** त्ति भावितार्थं द्रव्यप्रमाणद्वार एवेति।

अवक्तव्यक-द्रव्यचिन्तायाम् **एगं दव्वं पडुच्च लोगस्स असंखेज्जतिभागे होज्जा** द्विप्रदेशावगाह-द्विसमयस्थितेर्विवक्षित-त्वादधिकस्य च द्विसमयस्थितेरभावात्। **आदेशान्तरेण वा महखंधवज्जमण्णदव्वेसु आदिल्लचउपुच्छासु होज्जा।** अस्य हृदयम् — देशोनलोकावगाह्यपि द्विसमयस्थितिर्भवति।

**[हे० १८०-१९४]** उक्ता क्षेत्रानुपूर्वी, साम्प्रतं प्रागुद्दिष्टामेव क्रमप्राप्तां कालानुपूर्वीं

Jain Education International For Private & Personal Use Only www.jainelibrary.org

व्याचिख्यासुराह — **से किं तं कालानुपुव्वी**त्यादि। अत्राक्षरगमनिका यथा द्रव्यानुपूर्व्यां तथा कर्तव्या यावत् **तिसमयट्ठिईए आणुपुव्वी**त्यादि, त्रयः समयाः स्थितिर्यस्य परमाणु-द्व्यणुक-त्र्यणुकाद्यनन्ताणुकस्कन्धपर्यन्तस्य द्रव्यविशेषस्य स त्रिसमयस्थितिर्द्रव्यविशेष आनुपूर्वीति। आह-ननु यदि द्रव्यविशेष एवात्राप्यानुपूर्वी कथं तर्हि तस्य कालानुपूर्वीत्वम्, ? नैतदेवम्, अभिप्रायापरिज्ञानात्, यतः समयत्रयलक्षणकालपर्यायविशिष्टमेव द्रव्यं गृहीतम्, ततश्च पर्याय-पर्यायिणोः कथञ्चिद्भेदात् कालपर्यायस्य चेह प्राधान्येन विवक्षितत्वाद् द्रव्यस्यापि विशिष्टस्य कालानुपूर्वीत्वं न दुष्यति, मुख्यं समयत्रयस्यैवात्रानुपूर्वीत्वम्, किन्तु तद्विशिष्टद्रव्यस्यापि तदभेदोपचारात्तदुच्यत इति भावः। एवं चतुःसमयस्थित्यादिष्वपि वाच्यं यावद्दश समयाः स्थितिर्यस्य परमाण्वादिद्रव्यसङ्घातस्य स तथा, सङ्ख्येयाः समयाः स्थितिर्यस्य परमाण्वादेः स तथा, असङ्ख्येया समयाः[1] स्थितिर्यस्य परमाण्वादेः स तथा, अनन्तास्तु समया द्रव्यस्य स्थितिरेव न भवति स्वाभाव्याद् इत्युक्तमेवेति, शेषा बहुवचननिर्देशादिभावना पूर्ववदेव, एकसमयस्थितिकं परमाण्वाद्यनन्ताणुकस्कन्धपर्यन्तं द्रव्यमनानुपूर्वी, द्विसमयस्थितिकं तु तदेवावक्तव्यकमिति, शेषं पूर्वोक्तानुसारेण सर्वं भावनीयं यावद् द्रव्यप्रमाणद्वारे **नो संखेज्जाइं, असंखेज्जाइं, नो अणंताइं** ति, अस्य भावना - इह त्र्यादिसमयस्थितिकानि परमाण्वादिद्रव्याणि लोके यद्यपि प्रत्येकमनन्तानि प्राप्यन्ते तथाऽपि समयत्रयलक्षणायाः स्थितेरेकस्वरूपत्वात् कालस्य चेह प्राधान्येन द्रव्यबहुत्वस्य गुणीभूतत्वात् त्रिसमयस्थितिकैरनन्तैरप्येकमेवानुपूर्वीद्रव्यम्, एवं चतुःसमयलक्षणायाः स्थितेरेकत्वादनन्तैरपि चतुःसमयस्थितिकद्रव्यैरेकमेवानुपूर्वीद्रव्यम्, एवं समयवृद्ध्या तावन्नेयं यावदसङ्ख्येय-समयलक्षणायाः स्थितेरेकत्वादनन्तैरप्यसङ्ख्येयसमयस्थितिकैर्द्रव्यैरेकमेवेहाऽऽ-नुपूर्वीद्रव्यमिति, एवमसङ्ख्येयान्येवात्रानुपूर्वीद्रव्याणि भवन्ति। एवमनानुपूर्व्यवक्तव्यक-द्रव्याण्यपि प्रत्येकमसङ्ख्येयानि वाच्यानि। अत्राह - नन्वेकसमयस्थितिकद्रव्यस्यानानु-पूर्वीत्वं द्विसमयस्थितिकस्य त्ववक्तव्यकत्वमुक्तम्, तत्र यद्यप्येकद्विसमयस्थितीनि परमाण्वादि-द्रव्याणि लोके प्रत्येकमनन्तानि लभ्यन्ते तथाऽप्यनन्तरोक्त[2]त्वदुक्तयुक्त्यैव समयलक्षणाया द्विसमयलक्षणायाश्च स्थितेरेकैकरूपत्वाद् द्रव्यबाहुल्यस्य च गुणीभूतत्वादेकमेवानानु-पूर्वीद्रव्यमेकमेव चावक्तव्यकद्रव्यं वक्तुं युज्यते, न तु प्रत्येकमसङ्ख्येयत्वम्, अथ द्रव्यभेदेन

Jain Education International For Private & Personal Use Only www.jainelibrary.org

भेदोऽङ्गीक्रियते तर्हि प्रत्येकमानन्त्यप्रसक्तिः, एकसमयस्थितीनां द्विसमयस्थितीनां च द्रव्याणां प्रत्येकमनन्तानां लोके सद्भावादिति, सत्यमेतत्, किन्त्वेकसमयस्थितिकमपि यदवगाहभेदेन वर्तते तदिह भिन्नं विवक्ष्यते, एवं द्विसमयस्थितिकमप्यवगाहभेदेन भिन्नं चिन्त्यते, लोके चासङ्ख्येया अवगाहभेदाः सन्ति, प्रत्यवगाहं चैकद्विसमयस्थितिकानेकद्रव्यसम्भवादनानुपूर्व्यवक्तव्यकद्रव्याणामाधारक्षेत्रभेदात् प्रत्येकमसङ्ख्येयत्वं न विहन्यते इति, अनया दिशाऽतिगहनमिदं सूक्ष्मधिया पर्यालोचनीयमिति।

क्षेत्रद्वारे **एगदव्वं[३] पडुच्च लोगस्स संखेज्जइभागे होज्जा, जाव देसूणे वा[४] लोगे होज्ज** त्ति, इह त्र्यादिसमयस्थितिकद्रव्यस्य तत्तदवगाहसम्भवतः सङ्ख्येयादिभागवर्तित्वं भावनीयम्, यदा तु त्र्यादिसमयस्थितिकः सूक्ष्मपरिणामः स्कन्धो देशोनलोकेऽवगाहते तदैकस्यानुपूर्वीद्रव्यस्य देशोनलोकवर्तित्वं भावनीयम्। **अन्ये** तु **पएसूणे वा लोगे होज्ज** त्ति पाठं मन्यन्ते, तत्राप्ययमेवार्थः, प्रदेशस्यापि विवक्षया देशत्वादिति। सम्पूर्णेऽपि लोके कस्मादिदं न प्राप्यत इति चेत्, उच्यते - सर्वलोकव्यापी अचित्तमहास्कन्ध एव प्राप्यते, स च तद्व्यापितया एकमेव समयमवतिष्ठते, तत ऊर्द्धमुपसंहारस्योक्तत्वात्, न चैकसमयस्थितिकमानुपूर्वीद्रव्यं भवितुमर्हति, त्र्यादिसमयस्थितिकत्वेन तस्योक्तत्वात्, तस्मात् त्र्यादिसमयस्थितिकमन्यद् द्रव्यं नियमादेकेनापि प्रदेशेनोन एव लोकेऽवगाहत इति प्रतिपत्तव्यम्।

अत्राह - नन्वचित्तमहास्कन्धोऽप्येकसमयस्थितिको न भवति, दण्डाद्यवस्थासमयगणने तस्याप्यष्टसमयस्थितिकत्वात्, एवं च सति तस्याप्यानुपूर्वीत्वात् सम्पूर्णलोकव्यापित्वं युज्यतेऽत्र वक्तुमिति, नैतदेवम्, अवस्थाभेदेन वस्तुभेदस्येह विवक्षितत्वात्, भिन्नाश्च परस्परं दण्ड-कपाटाद्यवस्थाः, तद्भेदेन[५] वस्तुनोऽपि भेदाद् अन्यदेव दण्ड-कपाटाद्यवस्थाद्रव्येभ्यः सकललोकव्याप्यचित्तमहास्कन्धद्रव्यम्, तच्चैकसमयस्थितिकमिति[६] न तस्यानुपूर्वीत्वम्, एतच्चानन्तरमेव पुनर्वक्ष्यत इत्यलं प्रसङ्गेन। अथवा यथा क्षेत्रानुपूर्व्यां तथाऽत्रापि सर्वलोकव्यापिनोऽप्यचित्तमहास्कन्धस्य विवक्षामात्रमाश्रित्य एकस्मिन्नभःप्रदेशेऽप्राधान्याद्देशोनलोकवर्तित्वं वाच्यम्, एकसमयस्थितिकस्यानानुपूर्वीद्रव्यस्य द्विसमयस्थितिका[७]वक्तव्यकस्य च तत्र प्रदेशे प्राधान्याश्रयणादिति भावः। एवमन्यदपि आगमाविरोधतो वक्तव्यमिति।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**णाणादव्वाइं पडुच्च नियमा सव्वलोए होज्ज** त्ति, त्र्यादिसमयस्थितिकद्रव्याणां सर्वलोकेऽपि भावादिति भावनीयम्।

अनानुपूर्वीद्रव्यचिन्तायां **यथा क्षेत्रानुपूर्व्यां** तथा अत्राप्येकद्रव्यं लोकस्यासङ्ख्येयभाग एव वर्तते, कथमिदम्? उच्यते - यत् कालत एकसमयस्थितिकं तत् क्षेत्रतोऽप्येकप्रदेशावगाढमेवेहानानुपूर्वीत्वेन विवक्ष्यते, तच्च लोकासङ्ख्येयभाग एव भवति।

**आएसंतरेण वा सव्वपुच्छासु होज्ज** त्ति, अस्य भावना - इहाचित्तमहास्कन्धस्य दण्डाद्यवस्थाः परस्परं भिन्नाः, आकारादिभेदात्, द्वि-त्रि-चतुःप्रदेशिकादिस्कन्धवत्, ततश्च ता एकैकसमयवृत्तित्वात् पृथगनानुपूर्वीद्रव्याणि, तेषु च मध्ये किमपि कियत्यपि क्षेत्रे वर्तत इत्यनया विवक्षया किलैकमनानुपूर्वीद्रव्यं **मतान्तरेण** सङ्ख्येयभागादिकासु पञ्चस्वपि पृच्छासु लभ्यते, एतच्च सूत्रेषु प्रायो न दृश्यते, **टीका - चूर्ण्यो**स्त्वेवं व्याख्यातमुपलभ्यत इति।

नानाद्रव्याणि तु सर्वस्मिन्नपि लोके भवन्ति, एकसमयस्थितिकद्रव्याणां सर्वत्र भावादिति।

अवक्तव्यकद्रव्यचिन्तायां क्षेत्रानुपूर्व्यामिवैकद्रव्यं लोकस्यासङ्ख्येयभाग एव वर्तते, कथमिति? उच्यते - यत् कालतो द्विसमयस्थितिकं तत् क्षेत्रतोऽपि द्विप्रदेशावगाढमेवेहावक्तव्यकत्वेन गृह्यते, तच्च लोकासङ्ख्येयभाग एव स्यात्, अथवा द्विसमयस्थितिकं द्रव्यं स्वभावादेव लोकस्यासङ्ख्येयभाग एवावगाहते, न परतः । **आदेशान्तरेण वा महखंधवज्जमन्नदव्वेसु आइल्लचउपुच्छासु होज्ज** त्ति, अस्य हृदयम्- मतान्तरेण किल द्विसमयस्थितिकमपि द्रव्यं किञ्चिल्लोकस्य सङ्ख्येयभागेऽवगाहते किञ्चित्त्वसङ्ख्येये, अन्यत्तु सङ्ख्येयेषु तद्भागेष्ववगाहते, अपरं त्वसङ्ख्येयेष्विति, महास्कन्धं वर्जयित्वा शेषद्रव्याण्याश्रित्य यथोक्तस्वरूपास्वाद्यासु चतसृषु पृच्छास्वेकमवक्तव्यकद्रव्यं लभ्यते, महास्कन्धस्य त्वष्टसमयस्थितित्वेनोक्तत्वान्न द्विसमयस्थितिकत्वसम्भव इति तद्वर्जनम्, अत एव सर्वलोकव्याप्तिलक्षणायाः पञ्चमपृच्छाया अत्रासम्भवः, महास्कन्धस्यैव सर्वलोकव्यापकत्वात्, तस्य चावक्तव्यकत्वायोगादिति। एतदपि सूत्रं **वाचनान्तरे** क्वचिदेव दृश्यते। नानाद्रव्याणि

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तु सर्वलोके भवन्ति द्विसमयस्थितीनां सर्वत्र भावादिति। गतं क्षेत्रद्वारम्, स्पर्शनाद्वारमप्येवमेव भावनीयम्।

[सू० १९५] [१] णेगम-ववहाराणं आणुपुव्विदव्वाइं कालतो केवचिरं होंति ? एगं दव्वं पडुच्च जहण्णेणं तिण्णि समया, उक्कोसेणं असंखेज्जं कालं, नाणादव्वाइं पडुच्च सव्वद्धा।

[२] णेगम-ववहाराणं अणाणुपुव्विदव्वाइं कालओ केवचिरं[१] होंति ? एगदव्वं पडुच्च अजहण्णमणुक्कोसेणं एक्कं समयं, नाणादव्वाइं पडुच्च सव्वद्धा।

[३] णेगम-ववहाराणं अवत्तव्वयदव्वाइं कालतो केवचिरं होंति ? एगं दव्वं पडुच्च अजहण्णमणुक्कोसेणं दो समया, नाणादव्वाइं पडुच्च सव्वद्धा।

[सू० १९६] [१] णेगम-ववहाराणं आणुपुव्वि[२]दव्वाणमंतरं कालतो केवचिरं होति ? एगदव्वं पडुच्च जहण्णेणं एगं समयं, उक्कोसेणं दो समया, नाणादव्वाइं पडुच्च नत्थि अंतरं।

[२] णेगम-ववहाराणं अणाणुपुव्वि[३]दव्वाणं अंतरं कालतो केवचिरं होति ? एगदव्वं पडुच्च जहण्णेणं दो समया, [४]उक्कोसेणं असंखेज्जं कालं, णाणादव्वाइं पडुच्च णत्थि अंतरं।

[३] णेगम-ववहाराणं अवत्तव्वगदव्वाणं पुच्छा, एगदव्वं पडुच्च जहण्णेणं एगं समयं, उक्कोसेणं असंखेज्जं कालं, णाणादव्वाइं पडुच्च णत्थि [५]अंतरं।

[सू० १९७] णेगम-ववहाराणं आणुपुव्विदव्वाइं सेसदव्वाणं कइभागे होज्जा ? पुच्छा, जहेव खेत्ताणुपुव्वीए।

[सू० १९८] भावो वि तहेव। अप्पाबहुं पि तहेव नेयव्वं जाव सेतं अणुगमे। से तं णेगम-ववहाराणं अणोवणिहिया कालाणुपुव्वी।

[सू० १९९] से किं तं संगहस्स अणोवणिहिया कालाणुपुव्वी ? संगहस्स

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**अणोवणिहिया कालाणुपुव्वी पंचविहा पण्णत्ता। तंजहा- अट्ठपयपरूवणया १, भंगसमुक्कित्तणया २, भंगोवदंसणया ३, समोतारे ४, अणुगमे ५।**

[सू० २००] **से किं तं संगहस्स अट्ठपयपरूवणया[6] ? संगहस्स अट्ठपयपरूवणया - एयाइं पंच वि दाराइं जहा खेत्ताणुपुव्वीए संगहस्स तहा कालाणुपुव्वीए वि भाणियव्वाणि, णवरं ठितीअभिलावो जाव सेतं संगहस्स अणोवणिहिया कालाणुपुव्वी। सेतं अणोवणिहिया कालाणुपुव्वी।**

[चू० १९५-२००] कालसूत्रं कंठं। अन्तरसूत्रं — परद्रव्यस्थितिकालो जघन्योत्कृष्टमन्तरं वक्तव्यम् । **भाग-भाव-अप्पाबहुगं** च उवयुज्ज **जधा खेत्ताणुपुव्वीए तहा** असेसं वत्तव्वं।

[हा० १९५-२००] शेषं सुगमं यावदन्तरचिन्तायाम्— **एगदव्वं पडुच्च जहण्णेणं एक्कं समयं उक्कोसेणं दो समया अन्तरं**, तत्थेगदव्वं पडुच्च जहण्णेणं एक्कं समयं, एक्कट्ठाणे तिन्नि वा चत्तारि वा असंखेज्जा वा समया ठातिऊण ततो अण्णहिं गंतूणं तत्थ एगं समयं ठाइऊण पुणो अण्णहिं गंतुं तिण्णि वा चत्तारि वा असंखेज्जा वा समया ठाति, एवं आणुपुव्विदव्वस्सेगस्स **जहण्णेणं एक्कं समयं** अंतरं होति। **उक्कोसेणं दो समया,** एक्कहिं ठाणे तिण्णि वा चत्तारि वा असंखेज्जा वा समया ठाइऊण ततो अण्णहिं ठाणे दो समया ठातिऊण अण्णहिं तिण्णि वा चत्तारि वा असंखेज्जा [वा] समया ठाति, एवं **उक्कोसेणं दो समया** अंतरं होइ। जइ पुण मज्झिमे ठाणे तिण्णि समया ठायतो तो मज्झिमट्ठाणे ठितं पि आणुपुव्विदव्वं चेव त्ति अंतरं चेव ण होइ, तेण दो चेव समया अंतरं। आह— जहा अन्नहिं ठाणे दो समया ठितं एवमन्नहिं पि किमेक्कं न चिट्ठति ? पुणो वि अन्नहिं दो अण्णहिं एक्कं ति एवं अणेण आयारेण कम्हा असंखेज्जा समया अंतरं न भवति ? उच्यते— एत्थ कालाणुपुव्वी पगता, तीए य कालस्स पाधण्णं, जदा य अण्णोण्णपदेसट्ठाणेण अंतरं कज्जइ तदा खेत्तदारेण करणाओ खेत्तस्स पाहण्णं कतं भवति ण पुण कालस्स, अतो जेण केणइ पगारेणं तिसमयादि इच्छति तेणेव कालपाहण्णत्तणओ आणुपुव्वी लब्भइ त्ति काउं दो चेव

Jain Education International For Private & Personal Use Only www.jainelibrary.org

समया अंतरं ति स्थितम् । **णाणादव्वाइं पडुच्च णत्थि अंतरं**, जेण असुण्णो लोगो । अणाणुपुव्विअंतरपुच्छा, एकद्रव्यं प्रकृत्योच्यते — **जहण्णेणं दो समया**, पढमे ट्ठाणे एगसमयं ठाऊण मज्झिमे ट्ठाणे दो समया ठाऊण अन्तिमे एगं समयं ठाति, एवं जहण्णेणं अंतरं दो समया, जति पुण मज्झिमे वि एक्कं समयं ठायन्ततो अंतरं चेव न होतं, मज्झिमिल्लठाणे वि अणाणुपुव्वी चेव त्ति, तम्हा दो चेव जहण्णेणं समया । **उक्कोसेणं असंखेज्जकालं**, पढमे ट्ठाणे एक्कं समयं चिट्ठिऊण मज्झिमे ट्ठाणे असंखेज्जे समए चिट्ठिऊण अन्तिमे ट्ठाणे एक्कं समयं ठाति, एवमसंखेज्जं कालं उक्कोसेणं अंतरं होति । **णाणादव्वाइं पडुच्च णत्थि अंतरं** । अवत्तव्वगअंतरं एगं दव्वमधिकृत्योच्यते — **जहण्णेणं एक्कं समयं**, पढमे ट्ठाणे दो समया ठाइऊण मज्झिमे एक्कं ठाइऊण अंतिमे दो समया ठाइ, एवं जहण्णेणं एक्कं समयं अंतरं होइ । **उक्कोसेणं असंखेज्जं कालं** मज्झिमट्ठाणे अवट्ठाणं ति तं चेव अंतरं । **णाणादव्वाइं पडुच्च णत्थि अंतरं** । भागद्वारं तथा भावद्वारम् अल्पबहुत्वद्वारं च क्षेत्रानुपूर्व्यनुसारतो व्याक्षेपान्तरमपास्य स्तिमितोपयुक्तेनान्तरात्मना कालप्राधान्यमधिकृत्य निखिलमेव भावनीयम्, इह पुनर्भावितार्थत्वाद् ग्रन्थविस्तरभयाच्च नोक्तमिति ।

[हे० १९५-२००] कालद्वारे **एगदव्वं पडुच्च जहण्णेणं तिण्णि समय** त्ति, [१] जघन्यतोऽपि त्रिसमयस्थितिकस्यैवानुपूर्वीत्वेनोक्तत्वादिति भावः । **उक्कोसेणं असंखेज्जं कालं** ति [२] असङ्ख्येयकालात् परत एकेन परिणामेन द्रव्यावस्थानस्यैवाभावादिति हृदयम् । नानाद्रव्याणि तु सर्वकालं भवन्ति, [३] प्रतिप्रदेशं लोकस्य [४] सर्वदा तदशून्यत्वादिति । अनानुपूर्व्यवक्तव्यकचिन्तायाम् **अजहन्नमणुक्कोसेणं** ति जघन्योत्कृष्टचिन्तामुत्सृज्येत्यर्थः, न हि एकसमयस्थितिकस्यैवानानुपूर्वीत्वे द्विसमयस्थितिकस्यैव चावक्तव्यकत्वेऽभ्युपगम्यमाने जघन्योत्कृष्टचिन्ता सम्भवतीति भावः, नानाद्रव्याणि तूभयत्रापि सर्वकालं भवन्ति, प्रतिप्रदेशं तैरपि सर्वदा लोकस्याशून्यत्वादिति ।

अन्तरद्वारे [५] **एगदव्वं पडुच्च जहण्णेणं एक्कं समयं** ति, अत्र भावना - इह त्र्यादिसमयस्थितिकं विवक्षितं किञ्चिदेकमानुपूर्वीद्रव्यं तं परिणामं परित्यज्य यदा परिणामान्तरेण समयमेकं स्थित्वा पुनस्तेनैव परिणामेन त्र्यादिसमयस्थितिकं जायते तदा

Jain Education International For Private & Personal Use Only www.jainelibrary.org

जघन्यतया समयोऽन्तरे लभ्यते। **उक्कोसेणं दो समय** त्ति, तदेव यदा परिणामान्तरेण द्वौ समयौ स्थित्वा पुनस्तमेव त्र्यादिसमयस्थितियुक्तं प्राक्तनं परिणाममासादयति तदा द्वौ समयावुत्कृष्टतोऽन्तरे भवतः, यदि पुनः परिणामान्तरेण क्षेत्रादिभेदतः समयद्वयात् परतोऽपि तिष्ठेत्तदा तत्राप्यानुपूर्वीत्वमनुभवेत्, ततोऽन्तरमेव न स्यादिति भावः। नानाद्रव्याणां तु नास्त्यन्तरम्, सर्वदा लोकस्य तदशून्यत्वादिति।

अनानुपूर्वीचिन्तायाम् **एगदव्वं पडुच्च जहण्णेणं दो समय** त्ति, एकसमयस्थितिकं द्रव्यं यदा परिणामान्तरेण समयद्वयमनुभूय पुनस्तमेवैकसमयस्थितिकं परिणाममासादयति तदा समयद्वयं जघन्योऽन्तरकालः, यदि तु परिणामान्तरेणाप्येकमेव समयं तिष्ठेत् तदा अन्तरमेव न स्यात् तत्राप्यनानुपूर्वीत्वात्, अथ समयद्वयात् परतस्तिष्ठेत्तदा जघन्यत्वं न स्यादिति भावः। **उक्कोसेणं असंखेज्जं कालं** ति, तदेव यदा परिणामान्तरेणासङ्ख्येयकालमनुभूय पुनरेकसमयस्थितिकं परिणाममनुभवति तदोत्कृष्टतोऽसङ्ख्येयोऽन्तरकालः प्राप्यते। आह - ननु च अन्यान्यद्रव्य-क्षेत्रसम्बन्धे तस्यानन्तोऽपि कालोऽन्तरे लभ्यते किमित्यसङ्ख्येय एवोक्तः? सत्यम्, किन्तु कालानुपूर्वीप्रक्रमात् कालस्यैवेह प्राधान्यं कर्तव्यम्, यदि त्वन्यान्यद्रव्य-क्षेत्रसम्बन्धतोऽ-न्तरकालबाहुल्यं क्रियते तदा तद्द्वारेणैवान्तरकालस्य बहुत्वकरणात्तयोर्द्वयोरेव प्राधान्य-माश्रितं स्यान्न कालस्य, तस्मादेकस्मिन्नेव परिणामान्तरे यावान् कश्चिदुत्कृष्टः कालो लभ्यते स एवान्तरे चिन्त्यते, स चासङ्ख्येय एव, ततः परमेकेन परिणामेन वस्तुनोऽवस्थानस्यैव निषिद्धत्वादित्येवं भगवतः सूत्रस्य विवक्षावैचित्र्यात् सर्वं पूर्वमुत्तरत्र चागमाविरोधेन भावनीय-मिति। नानाद्रव्याणां तु नास्त्यन्तरम्, प्रतिप्रदेशं लोके सर्वदा तल्लाभादिति।

अवक्तव्यकद्रव्यचिन्तायां **जहण्णेणं एगं समयं** ति, द्विसमयस्थितिकं किञ्चिदवक्तव्यकद्रव्यं परिणामान्तरेण समयमेकं स्थित्वा यदा पूर्वानुभूतमेव द्विसमयस्थितिकपरिणाममासादयति तदा समयो जघन्यान्तरकालः। **उक्कोसेणं असंखेज्जं कालं** ति, तदेव यदा परिणामान्तरेणासङ्ख्येयं कालं स्थित्वा पुनस्तमेव पूर्वानुभूतं परिणाममासादयति तदाऽसङ्ख्यात उत्कृष्टान्तरकालो भवति, आक्षेप-परिहारावत्राप्यनानुपूर्वीवद् द्रष्टव्याविति। नानाद्रव्यान्तरं तु नास्ति, सर्वदा लोके तद्भावादिति।

उक्तमन्तरद्वारम्, भागद्वारे तु यथा द्रव्य-क्षेत्रानुपूर्व्योस्तथैवानुपूर्वीद्रव्याणि

Jain Education International For Private & Personal Use Only www.jainelibrary.org

शेषद्रव्येभ्योऽसङ्ख्येयैर्भागैरधिकानि व्याख्येयानि, शेषद्रव्याणि त्वानुपूर्वीद्रव्याणामसङ्ख्येयभाग एव वर्तन्त इति। भावना त्वित्थं कर्तव्या - इहानानुपूर्व्यामेकसमयस्थितिलक्षणमेकमेव स्थानं लभ्यते, अवक्तव्यकेष्वपि द्विसमयस्थितिलक्षणमेकमेव तल्लभ्यते, आनुपूर्व्यां तु त्रिसमय-चतुःसमय-पञ्चसमयस्थित्यादीन्येकोत्तरवृद्ध्याऽसङ्ख्येयसमयस्थित्यन्तान्यसङ्ख्येयानि स्थानानि लभ्यन्त इत्यानुपूर्वीद्रव्याणामसङ्ख्येयगुणत्वम् । इतरयोस्तु तदसङ्ख्येयभागवर्तित्वमिति।

भावद्वारे सादिपारिणामिकभाववर्तित्वं त्रयाणामपि पूर्ववद्भावनीयम्।

अल्पबहुत्वद्वारे सर्वस्तोकान्यवक्तव्यकद्रव्याणि, द्विसमयस्थितिकद्रव्याणां स्वभावत एव स्तोकत्वात्, अनानुपूर्वीद्रव्याणि तु तेभ्यो विशेषाधिकानि, एकसमयस्थितिकद्रव्याणां निसर्गत एव पूर्वेभ्यो विशेषाधिकत्वात्, आनुपूर्वीद्रव्याणां तु पूर्वेभ्योऽसङ्ख्यातगुणत्वं भागद्वारे भावितमेव, शेषं तु क्षेत्रानुपूर्व्याद्युक्तानुसारतः सर्वं वाच्यमिति । अत एव ***केषुचिद्वाचनान्तरेषु*** भागादिद्वारत्रयं क्षेत्रानुपूर्व्यतिदेशेनैव निर्दिष्टं दृश्यते, न तु विशेषतो लिखितमिति। **सेत्त**मित्यादि निगमनम्।

उक्ता नैगम-व्यवहारनयमतेनानौपनिधिकी कालानुपूर्वी, अथ संग्रहनयमतेन तामेव व्याचिख्यासुराह - **से किं त**मित्यादि। यथा क्षेत्रानुपूर्व्यामियं संग्रहमतेन प्राग् निर्दिष्टा तथाऽत्रापि वाच्या, नवरं **तिसमय[६]ठिईया आणुपुव्वी जाव असंखेज्जसमय[७]ठिईया आणुपुव्वी**त्याद्यभिलापः कार्यः, शेषं तु तथैवेति । उक्ता संग्रहमतेनाप्यनौपनिधिकी कालानुपूर्वी, तथा च सति अवसितस्तद्विचारः।

**[सू० [१]२०१] [१] से किं तं ओवणिहिया कालाणुपुव्वी ? ओवणिहिया कालाणुपुव्वी तिविहा पण्णत्ता । तंजहा - पुव्वाणुपुव्वी १, पच्छाणुपुव्वी २, अणाणुपुव्वी ३।**

**[२] से किं तं पुव्वाणुपुव्वी ? पुव्वाणुपुव्वी [२]एगसमयठितीए, दुसमयठितीए, तिसमयठितीए जाव दससमयठितीए जाव संखेज्जसमयठितीए, असंखेज्जसमयठितीए। सेतं पुव्वाणुपुव्वी।**

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[३] से किं तं पच्छाणुपुव्वी ? पच्छाणुपुव्वी असंखेज्जसमयठितीए जाव एक्कसमयठितीए। सेतं पचछाणुपुव्वी।**

**[४] से किं तं अणाणुपुव्वी ? अणाणुपुव्वी— एयाए चेव एगादियाए एगुत्तरियाए असंखेज्जगच्छगयाए सेढीए अण्णमण्णब्भासो दुरूवूणो । सेतं अणाणुपुव्वी।**

**[सू० २०२] [१] अहवा ओवणिहिया कालाणुपुव्वी तिविहा पण्णत्ता। तंजहा— पुव्वाणुपुव्वी १, पच्छाणुपुव्वी २, अणाणुपुव्वी ३।**

**[२] से किं तं पुव्वाणुपुव्वी ? पुव्वाणुपुव्वी— समए, आवलिया, आणापाणू, थोवे, लवे, मुहुत्ते, दिवसे, अहोरत्ते, पक्खे, मासे, उदू, अयणे, संवच्छरे, जुगे, वाससते, वाससहस्से, वाससतसहस्से, पुव्वंगे, पुव्वे, तुडियंगे, तुडिए[३], अडडंगे, अडडे, अववंगे, अववे, हूहुयंगे, हूहुए, उप्पलंगे, उप्पले, पउमंगे, पउमे, णलिणंगे, णलिणे, अत्थनिउरंगे, अत्थनिउरे, अउयंगे, अउए, नउयंगे, नउए, पउयंगे, पउए, चूलियंगे, चूलिए, सीसपहेलियंगे, सीसपहेलिया; पलिओवमे, सागरोवमे[४], ओसप्पिणी, उस्सप्पिणी, पोग्गलपरियट्टे, तीतद्धा, अणागतद्धा, सव्वद्धा। से तं पुव्वाणुपुव्वी।**

**[३] से किं तं पच्छाणुपुव्वी ? पच्छाणुपुव्वी— सव्वद्धा, अणागतद्धा जाव समए। सेतं पच्छाणुपुव्वी।**

**[४] से किं तं अणाणुपुव्वी ? अणाणुपुव्वी— एयाए चेव एगादियाए एगुत्तरियाए अणंतगच्छगयाए सेढीए अण्णमण्णब्भासो दुरूवूणो । से तं अणाणुपुव्वी। से तं ओवणिहिया कालाणुपुव्वी। सेतं कालाणुपुव्वी।**

**[चू० २०१-२०२]** इदाणिं ओवणिधिका कालाणुपुव्वी— समयादिद्विती सुत्तं कंठं। अहवा संव्यवहारस्थितकालभेदैः समया-ऽऽवलिकादिभिः **ओवणिधी तिविधा पुव्वाणुपुव्विमादि** भण्णति। तत्र सूर्यक्रिया[१]निर्वृत्तः कालः, तस्य सर्व[२]प्रमाणाद्यः परमसूक्ष्मः अभेद्यः निरवयव उत्पलशतपत्रवेधाद्युदाहरणोपलक्ष्यः **समयः** । तेसिं असंखेज्जाणं

Jain Education International For Private & Personal Use Only www.jainelibrary.org

समुदयसमितीए **आवलिया**। संखेज्जातो आवलियाओ **आणु** त्ति ऊसासो। संखेज्जाओ आवलियाओ णिस्सासो। दोण्ह वि कालो एगो **पाणू**। सत्तपाणुकालो एगो **थोवो**। सत्तथोवकालो एगो **लवो**। सत्तसत्तरिं लवा एगो **मुहुत्तो**। **अहोरत्ता**दिया कंठा जाव **वाससतसहस्सा**।

*इच्छितमाणेण गुणं, पण सुण्णं चतुरसीतिगुणितं च।*
*काऊणं ततिवारे, पुव्वंगादीण मुण संखं ॥१॥*

***पुव्वंगे** परिमाणं पण सुण्णा चउरसीती य* १। [ ]

तं एगं पुव्वंगं चुलसीतीए सयसहस्सेहिं गुणितं एगं **पुव्वं** भवति, तस्सिमं परिमाणं – दस सुण्णा, छप्पण्णं च सहस्सा कोडीणं सत्तरि लक्खा य २।

तं एगं पुव्वं चुलसीतीए सतसहस्सेहिं गुणितं से एगे **तुडियंगे** भवति, तस्सिमं परिमाणं – पण्णरस सुण्णा, ततो चतुरो सुण्णं सत्त दो णव पंच य ठ्वेज्जा ३।

एवं चुलसीतिसतसहस्सगुणा सव्वट्ठाणा कातव्वा, ततो **तुडिया**दयो भवंति, तेसिमं जहासंखं परिमाणं – **तुडिए** वीसं सुण्णा, ततो छ ति एक्को सत्त अट्ठ सत्त णव चतुरो य ठवेज्जा, ट्का = ४।

**अडडंगे** पणुवीसं सुण्णा, ततो चतु दो चतु णव , एक्को एक्को दो अट्ठ एक्को चतुरो य ठवेज्जा, ना = ५।

**अडडे** तीसं सुण्णा, ततो छ एक्को छ एक्को ति सुण्णं अट्ठ णव दो एक्को पण तिगं ठवेज्जा, फ्रा = ६।

**अववंगे** पणतीसं सुण्णा, ततो चतु चतु सत्त पण पण छ चतु ति सुण्णं णव सुण्णं पण णव दो य ठवेज्जा, ए(ग्रा) = ७।

**अववे** चत्तालीसं सुण्णा, ततो छ णव चतु दो अट्ठ सुण्णं एक्को एको णव अट्ठ पण सत्त अट्ठ सत्त चतु दो य ठवेज्जा, हिग्रा (ह्वा) = ८।

**हूहुयंगे** पणतालीसं सुण्णा, ततो चतु छ छ णव दो णव सुण्णं ति पण अट्ठ चउ सत्त पण एक्को दो अट्ठ सुण्णं दो य ठवेज्जा, ग्रा (ॐ) = ९।

**हूहुए** पण्णासं सुण्णा, ततो छ सत्त सत्त एक्को णव सुण्णं अट्ठ णव पण छ सत्त अट्ठ

Jain Education International For Private & Personal Use Only www.jainelibrary.org

दो दो एक्को सुण्णं णव चतु सत्त एक्कं च ठवेज्जा, ६ । = १०।

**उप्पलंगे** पणपण्णं सुण्णा, ततो चतु अट्ठ एक्को णव सुण्णं सत्त णव ति दो चतु ति छ एक्को दो ति सुण्णं सत्त एक्को णव छ चतु एक्कं च ठवेज्जा, ६ (६१) = ११।

**उप्पले** सट्ठिं सुण्णा, ततो छ पण चतु एक्को सत्त पण पण ति एक्को छ सत्त दो सत्त एक्को सुण्णं सत्त सुण्णं ति सुण्णं एक्को चतु ति दो एक्कं च ठवेज्जा, ६ (६२) = १२।

**पउमंगे** पणसट्ठिं सुण्णा, ततो चतु सुण्णं ति दु सुण्णं सुण्णं अट्ठ अट्ठ ति पण णव एक्को एक्को पण चतु णव अट्ठ सत्त पण छ चतु छ छ ति सुण्णं एक्कं च ठवेज्जा, ६ (६३)=१३।

**पउमे** सत्तरिं सुन्ना, ततो छ ति पण ति णव एक्को दो णव पण दो एक्को चतु सुण्णं सुण्णं णव ति एक्को ति छ दो एक्को ति अट्ठ सत्त सुण्णं सत्त अट्ठ य ठवेज्जा, ६ ट्का = १४।

**णलिणंगे** पंचसत्तरिं सुण्णा, ततो चतु दो सुण्णं सत्त पण दो चतु चतु सत्त सत्त पण छ चतु ति छ सत्त छ ति सुण्णं एक्को छ दो अट्ठ सत्त पण चतु एक्को ति सत्त य ठवेज्जा, ६ ना = १५।

**णलिणे** असीतं सुण्णा, ततो छ एक्को सुण्णं सुण्णं णव पण सत्त एक्को पण सुण्णं पण दो एक्को एक्को ति एक्को अट्ठ अट्ठ सुण्णं सत्त दो णव ति सत्त पण चतु दो चतु चतु एक्को छ च्च ठवेज्जा, ६ फ्रा = १६।

**[हे० २१७-२२६] से किं तं तिनामे**त्यादि। यत एवेदं त्रिनाम तत एव **त्रिविधं** त्रिप्रकारम्, **द्रव्यनामादि**भेदात्। तत्र द्रवति गच्छति ताँस्तान् पर्यायान् प्राप्नोतीति द्रव्यम्, तस्य नाम। **धर्मास्तिकाय** इत्यादि, धर्मास्तिकायादयश्च प्राग् व्याख्याता एव। गुण्यन्ते संख्यायन्ते इति गुणास्तेषां नाम **गुणनाम, वण्णनामे** इत्यादि, तत्र वर्ण्यते अलङ्क्रियते वस्त्वनेनेति वर्णः कृष्णादिः पञ्चधा प्रतीत एव, कपिशादयस्त्वेतत्संयोगेनैवोत्पद्यन्ते न पुनः सर्वथा एतद्विलक्षणा इति नेहोदाहृताः। गन्ध्यते आघ्रायत इति गन्धस्तस्य नाम गन्धनाम, स च द्विविधः - सुरभिर्दुरभिश्च, तत्र सौमुख्यकृत् सुरभिः, वैमुख्यकृद् दुरभिः। अत्राप्युभयसंयोगजः पृथग् नोक्तः, एतत्संसर्गजत्वादेव भेदाविवक्षणात्। रस्यते आस्वाद्यत इति रसस्तस्य नाम रसनाम, स च तिक्त-कटु-कषाया-ऽम्ल-मधुरभेदात् पञ्चविधः। तत्र श्लेष्मादिदोषहन्ता निम्बाद्याश्रितस्तिक्तो रसः, तथा च भिषक्शास्त्रम् -

*श्लेष्माणमरुचिं पित्तं तृषं कुष्ठं विषं ज्वरम्।*[१]
*हन्यात् तिक्तो रसो बुद्धेः कर्ता मात्रोपसेवितः ॥१॥* [ ]

गलामयादिप्रशमनो मरिच-नागराद्याश्रितः कटुः। उक्तं च -

*कटुर्गलामयं शोफं हन्ति युक्त्योपसेवितः।*
*दीपनः पाचको रुच्यो बृंहणोऽतिकफापहः ॥२॥* [ ]

रक्तदोषाद्यपहर्ता बिभीतका-ऽऽमलक-कपित्थाद्याश्रितः कषायः। आह च-

*रक्तदोषं कफं पित्तं कषायो हन्ति सेवितः।*
*रूक्षः शीतो गुरुग्रा(र्ग्रा)ही रोपणश्च स्वरूपतः ॥३॥* [ ]

अग्निदीपनादिकृदम्लीकाद्याश्रितोऽम्लः, पठ्यते च -

Jain Education International For Private & Personal Use Only www.jainelibrary.org

*अम्लोऽग्निदीप्तिकृत् स्निग्धः शोफ-पित्त-कफावहः ।*
*क्लेदनः पाचनो रुच्यो मूढवातानुलोमकः ॥४॥ [ ]*

पित्तादिप्रशमकः खण्ड-शर्कराद्याश्रितो मधुरः, तथा चोक्तम् -

*पित्तं [2]वातं विषं हन्ति धातुवृद्धिकरो गुरुः ।*
*जीवनः केशकृद्बाल-वृद्ध-क्षीणौजसां हितः ॥५॥ [ ] इत्यादि ।*

स्थानान्तरे स्तम्भिताहारबन्धविध्वंसादिकर्ता सिन्धुलवणाद्याश्रितो लवणोऽपि रसः पठ्यते, स चेह नोदाहृतः, मधुरादिसंसर्गजत्वात् तदभेदेन विवक्षणात्, सम्भाव्यते च तत्र माधुर्यादिसंसर्गः, सर्वरसानां लवणप्रक्षेप एव स्वादुत्वप्रतिपत्तेरित्यलं विस्तरेण।

स्पृश्यत इति स्पर्शः । कर्कशादिरष्टविधः, तत्र स्तब्धताकारणं दृषदादिगतः कर्कशः । सन्नतिकारणं तिनिशलतादिगतो मृदुः । अधःपतनहेतुरयोगोलकादिगतो गुरुः । प्रायस्तिर्यगूर्ध्वाधोगमनहेतुरर्कतूलादिनिश्रितो लघुः । देहस्तम्भादिहेतुः प्रालेयाद्याश्रितः शीतः । आहारपाकादिकारणं वह्न्याद्यनुगत उष्णः । पुद्गलद्रव्याणां मिथः संयुज्यमानानां बन्धनिबन्धनं तैलादिस्थितः स्निग्धः । तेषामेवाबन्धनिबन्धनं भस्माद्याधारो रूक्षः । एतत्संसर्गजास्तु नोक्ताः, एष्वेवान्तर्भावादिति। संस्थानस्वरूपं तु प्रतीतमेव।

[3]परि समन्तादवन्ति अपगच्छन्ति न तु द्रव्यवत् सर्वदैवावतिष्ठन्त इति पर्यवाः, अथवा [4]परि समन्ताद् अवनानि गमनानि द्रव्यस्यावस्थान्तरप्राप्तिरूपाणि पर्यवाः एकगुणकालत्वादयः, तेषां नाम पर्यवनाम, यत्र तु **पर्यायनामे**ति पाठः, तत्र [5]परि समन्तादयन्ते अपगच्छन्ति न पुनर्द्रव्यवत् सर्वदैव तिष्ठन्तीति पर्यायाः, अथवा [6]परि सामस्त्येन एति अभिगच्छति व्याप्नोति वस्तु तानिति पर्यायाः एकगुणकालत्वादय एव, तेषां नाम पर्यायनामेति। तत्रेह गुणशब्दोंऽशपर्यायः, ततश्च सर्वस्यापि त्रैलोक्यगतकालत्वस्यासत्कल्पनया पिण्डितस्य य एकः सर्वजघन्यो गुणः अंशस्तेन कालकः परमाण्वादिरेकगुणकालकः, सर्व[7]जघन्यकृष्ण इत्यर्थः। द्वाभ्यां गुणाभ्यां तदंशाभ्यां कालकः परमाण्वादिरेव द्विगुणकालकः, एवं तावन्नेयं यावदनन्तैर्गुणैः तदंशैः कालकोऽनन्तगुणकालकः स एवेति। एवमुक्तानुसारेणैकगुणनीलकादीनामेकगुणसुरभिगन्धादीनां च सर्वत्र भावना कार्येति। आह - गुण-पर्याययोः कः प्रतिविशेषः ? उच्यते, सदैव सहवर्तित्वाद्वर्ण-गन्ध-रसादयः सामान्येन गुणा उच्यन्ते, न

Jain Education International For Private & Personal Use Only www.jainelibrary.org

हि मूर्ते वस्तुनि वर्णादिमात्रं कदाचिदपि व्यवच्छिद्यते, एकगुणकालत्वादयस्तु द्विगुणकालत्वाद्यवस्थातो निवर्तन्त एवेति, अतः क्रमवृत्तित्वात् पर्यायाः। उक्तं च - *सहवर्तिनो गुणाः, यथा जीवस्य चैतन्या-ऽमूर्तत्वादयः, क्रमवर्तिनः पर्यायाः, यथा तस्यैव नारकत्व-तिर्यक्त्वादयः* [ ] इति । ननु यद्येवं तर्हि वर्णादिसामान्यस्य भवतु गुणत्वम्, तद्विशेषाणां तु कृष्णादीनां तद् न स्यात्, अनियतत्वात् तेषाम्, सत्यम्, वर्णादिसामान्यभेदानामपि कृष्ण-नीलादीनां प्रायः प्रभूतकालं सहवर्तित्वात् गुणत्वं विवक्षितमित्यलं विस्तरेण। आह - भवत्वेवम्, किन्तु पुद्गलास्तिकायद्रव्यस्यैव संबन्धिनो गुण-पर्यायाः किमिति गुण-पर्यायनामत्वेनोदाहृताः ? न धर्मास्तिकायादीनाम्, न च वक्तव्यम् - तेषां ते न सन्तीति, धर्मा-ऽधर्मा-ऽऽकाश-जीव-कालद्रव्येष्वपि यथाक्रमं गतिस्थित्यवगाहोपयोगवर्त्तनादिगुणानां प्रत्येकमनन्तानामगुरुलघुपर्यायाणां च प्रसिद्धत्वात्, सत्यम्, किन्त्विन्द्रियप्रत्यक्षगम्यत्वात् सुखप्रतिपाद्यतया पुद्गलद्रव्यस्यैव गुण-पर्याया उदाहृताः, न शेषाणामित्यलं विस्तरेण। तस्माद् यत् किमपि नाम तेन सर्वेणापि द्रव्यनाम्ना गुणनाम्ना पर्यायनाम्ना वा भवितव्यम्, नातः परं किमपि नामास्ति, ततः सर्वस्यैवानेन संग्रहात् त्रिनामैतदुच्यत इति।

**तं पुण** गाहा। व्याख्या - **तत् पुनर्नाम** द्रव्यादीनां सम्बन्धि सामान्येन सर्वमपि स्त्रीपुंनपुंसकलिङ्गेषु वर्तमानत्वात् **त्रिविधं** त्रिप्रकारम्। तत्र स्त्रीलिङ्गे नदी महीत्यादि, पुल्लिँङ्गे घटः पट इत्यादि, नपुंसके दधि मध्वित्यादि। **एषां** च स्त्रीलिङ्गवृत्त्यादीनां **त्रयाणामपि** नाम्नां प्राकृतशैल्या उच्चार्यमाणाना**मन्ते** यान्याकारादीन्यक्षराणि भवन्ति तत्प्ररूपणाद्वारेण लक्षणं निर्दिदिक्षुरुत्तरार्द्धमाह - **एएसि**मित्यादि गतार्थमेवेति गाथार्थः।

**तत्थ पुरिस०** गाहा। **तत्र** तस्मिन् त्रिविधे नाम्नि **पुरुषस्य** पुल्लिँङ्गवृत्तेर्नाम्नः **अन्ता** अन्तवर्त्तीन्यक्षराणि चत्वारि भवन्ति, तद्यथा - **आकार ईकार ऊकार ओ**कारश्चेत्यर्थः, एतानि विहाय नापरं प्राकृतपुल्लिँङ्गवृत्तेर्नाम्नोऽन्तेऽक्षरं संभवतीत्यर्थः । स्त्रीलिङ्गवृत्तेर्नाम्नोऽप्यन्ते ओकारवर्जान्येतान्येवाऽऽकारेकारोकारलक्षणानि त्रीण्यक्षराणि भवन्ति, नापरमिति। अत्र चानन्तरगाथायाम् **इत्थी-पुरिस**मिति निर्दिश्यापि यदिहादौ पुल्लिँङ्गनाम्नो लक्षणकथनं तत् पुरुषप्राधान्यख्यापनार्थमिति गाथार्थः।

**अं ति य** गाहा। नपुंसकवृत्तिनाम्नस्त्वन्ते अंकारः इंकार उंकारश्चेत्येतान्येव त्रीण्यक्षराणि

Jain Education International For Private & Personal Use Only www.jainelibrary.org

भवन्ति, नापरम् । **एतेषां च त्रयाणामपि निदर्शनम्** उदाहरणं प्रत्येकं **वक्ष्यामी**ति गाथार्थः । तदेवाह - **आगारंतो** इत्यादि गाथात्रयं व्यक्तम् । नवरं संस्कृते यद्यपि विष्णुरित्युकारान्तमेव भवति तथापि प्राकृतलक्षणस्यैवेह वक्तुमिष्टत्वादूकारान्तता न विरुध्यते। एवमोकारान्तो द्रुम इत्यादिष्वपि वाच्यम्। **जम्बूः** स्त्रीलिङ्गवृत्तिर्वनस्पतिविशेषः। **पीलुं** ति क्षीरम्। शेषं सुगमम्। **सेत्तं तिनामे** त्ति निगमनम्।

**[सू० २२७] से किं तं चतुणामे ? चतुणामे चउव्विहे पण्णत्ते। तंजहा- आगमेणं १, लोवेणं २, पयईए ३, विगारेणं ४।**

**[सू० २२८] से किं तं आगमेणं ? आगमेणं पद्मानि पयांसि [1]कुण्डानि। सेतं आगमेणं।**

**[सू० २२९] से किं तं लोवेणं ? लोवेणं ते अत्र तेऽत्र, पटो अत्र [2]पटोऽत्र, घटो अत्र घटोऽत्र, रथो अत्र रथोऽत्र। सेतं लोवेणं।**

**[सू० २३०] से किं तं पगतीए ? अग्नी एतौ, पटू इमौ, शाले एते, माले इमे। सेतं पगतीए।**

**[सू० २३१] से किं तं विकारेणं ? विकारेणं दण्डस्य अग्रं दण्डाग्रम्, सा आगता साऽऽगता, [3]→ दधि इदं दधीदम्, नदी ईहते नदीहते, मधु उदकं मधूदकम्, बहु ऊहते बहूहते। ← सेतं विकारेणं। सेतं चउणामे।**

[चू० २२७-२३१] चतुणामसुत्तं - **पद्मानि पयांसि**, अत्र *आगम उदनुबन्धः स्वरादन्त्यात् परः* [*कातन्त्र० २/१/६*], आगच्छतीत्यागमः, आगम उकारानुबन्धः स्वरादन्त्यात् परो भवति, ततः सिद्धं **पद्मानीत्यादि, सेतं आगमेण**। लोपेनापि **तेऽत्र** इत्यादि, अनयोः पदयोः संहितायाम् *एदोत्परः पदान्ते लोपमकारः* [*कातन्त्र० १/२/१७*], पदान्ते यौ एकारौकारौ तयोः परः अकारो लोपमापद्यते, ततः सिद्धं **तेऽत्र पटोऽत्र, से त्तं लोवेणं। से किं तं**

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**पयतीए** ? यथा **अग्नी एतौ** इत्यादि, एतेषु पदेषु *द्विवचनमनौ* [*कातन्त्र० १/३/२* ], द्विवचनमौकारान्तं यन्न भवति तल्लक्षणान्तरेण स्वरे परतः प्रकृत्या सिद्धं **अग्नी एतौ** इत्यादि । विकारेणापि **दण्डस्य अग्र**मित्यादि, अत्र *समानः सवर्णे दीर्घीभवति परश्च लोपमापद्यते* [*कातन्त्र० १/२/१*] सिद्धं **दण्डाग्र**मित्यादि, **सेत्तं विकारेण**।

**[हा० २२७-२३१] से किं तं चउनामे** इत्यादि। तत्राऽऽ**गमेन पद्मानि पयांसि,** अत्र *आगमः उदनुबन्धः स्वरादन्त्यात् परः* [*कातन्त्र० २/१/६* ], आगच्छतीत्यागमः, आगम उकारानुबन्धः स्वरादन्त्यात् परो भवति, सिद्धं **पद्मानी**त्यादि। **सेतं आगमेणं**। लोपेनापि **ते अत्र** इत्यादि, अनयोः पदयोः संहितायाम् *एदोत्परः पदान्ते लोपमकारः* [*कातन्त्र० १/२/१७* ], पदान्ते यौ एकारौकारौ ताभ्यां परः अकारो लोपमापद्यते, ततः सिद्धं **तेऽत्र पटोऽत्र** । **सेत्तं लोवेणं । से किं तं पयतीए ? यथाऽग्नी एतौ** इत्यादि, एतेषु पदेषु *द्विवचनमनौ* [*कातन्त्र०१/३/२*], द्विवचनमौकारान्तं येन्न भवति तल्लक्षणान्तरेण स्वरे परतः प्रकृत्या भवति, सिद्धम् **अग्नी एतौ** इत्यादि। विकारेणापि **दण्डस्य अग्रम्** इत्यादि, अत्र *समानः सवर्णे दीर्घीभवति परश्च लोपमापद्यते* [*कातन्त्र० १/२/१* ], सिद्धं **दण्डाग्रम्** इत्यादि। **सेत्तं विगारेणं** ति। एवं चतुर्णाम।

**[हे० २२७-२३१] से किं तं चउनामे** इत्यादि। आगच्छती**त्यागमो** न्वागमादिस्तेन निष्पन्नं नाम यथा **पद्मानी**त्यादि, *धुट्स्वराद् घुटिनुः* [*कातन्त्र० २/२/११*] इत्यनेनात्र न्वागमस्य विधानात्, उपलक्षणमात्रं चेदम्, संस्कार उपस्कर इत्यादेरपि सुडाद्यागमनिष्पन्नत्वादिति। **लोपो** वर्णापगमरूपस्तेन निष्पन्नं नाम, यथा **तेऽत्रे**त्यादि, *एदोत्परः पदान्ते* [*कातन्त्र० १/२/१७*] इत्यादिना अकारस्येह लुप्तत्वात्, नामत्वं चात्र तेन तेन रूपेण नमनान्नामेति व्युत्पत्तेरस्त्येवेति, इत्थमन्यत्रापि वाच्यम् । उपलक्षणं चेदम्, मनस ईषा मनीषा बुद्धिः, भ्रमतीति भ्रूरित्यादेरपि सकार-मकारादिवर्णलोपेन निष्पन्नत्वादिति । **प्रकृतिः** स्वभावो वर्णलोपाद्यभावस्तया निष्पन्नं नाम, यथा **अग्नी एता**वित्यादि, *द्विवचनमनौ* [*कातन्त्र० १/३/२*] इत्यनेनात्र प्रकृतिभावस्य विधानात्, निदर्शनमात्रं चेदम्, सरसिजं कण्ठेकाल इत्यादीनामपि प्रकृतिनिष्पन्नत्वादिति। वर्णस्यान्यथाभावापादनं विकारः, तेन निष्पन्नं दण्डस्याग्रं

Jain Education International For Private & Personal Use Only www.jainelibrary.org

दण्डाग्रमित्यादि, *समान: सवर्णे दीर्घीभवति* [*कातन्त्र० १।२।१*] इत्यादिना दीर्घत्वलक्षणस्य वर्णविकारस्येह कृतत्वात्, उदाहरणमात्रं चैतत्, तस्कर: षोडशेत्यादेरपि वर्णविकारसिद्धत्वादिति। तदिह यदस्ति तेन सर्वेणापि नाम्ना आगमनिष्पन्नेन वा लोपनिष्पन्नेन[1] वा प्रकृतिनिर्वृत्तेन वा विकारनिष्पन्नेन वा भवितव्यम्, डित्थादिनाम्नामपि सनिरुक्तत्वात् *नाम च धातुजमाह*[ ] इत्यादिवचनात्। ततश्चतुर्भिरप्यैतै: सर्वस्य सङ्ग्रहाच्चतुर्नामेदमुच्यते। **सेत्तं चउनामे** त्ति निगमनम्।

**[सू० २३२] से किं तं पंचनामे ? पंचनामे पंचविहे पण्णत्ते। तं जहा– नामिकं १ नैपातिकं २ आख्यातिकम् ३ औपसर्गिकं ४ मिश्रं ५ च। अश्व इति नामिकम्, खल्विति नैपातिकम्, धावतीत्याख्यातिकम्, परि इत्यौपसर्गिकम्, संयत इति मिश्रम्। सेतं पंचनामे।**

**[चू० २३२]** पंचनामसुत्तं कंठं।

**[हा० २३२]** पंचनाम्नि **नामिक**मित्यादि सूत्रम्, तत्राऽश्व **इति नामिकम्**, द्रव्याभिधायकत्वात्। **खल्विति नैपातिकम्**, खलुशब्दस्य निपातत्वात्। **धावतीत्याख्यातिकम्**, क्रियाप्रधानत्वात्। **परीत्यौपसर्गिकम्**, परि: सर्वतोभावे इत्युपसर्गपाठे पठितत्वात्। **संयत इति मिश्रम्**, सम् एकीभावे इत्यस्योपसर्गत्वात् *यती प्रयत्ने* [*का०धा० ३१४, पा०धा० ३०*] इति च प्रकृतेरुभयात्मकत्वाद् मिश्रमिति। **तदेतत् पञ्चनाम**।

**[हे० २३२] से किं तं पंचनामे** इत्यादि। इहाऽश्व **इति नामिकम्**, वस्तुवाचकत्वात्। **खल्विति नैपातिकम्**, निपातेषु पठितत्वात्। **धावतीत्याख्यातिकम्**, क्रियाप्रधानत्वात्। **परीत्यौपसर्गिकम्**, उपसर्गेषु पठितत्वात्। **संयत इति मिश्रम्**, उपसर्ग-नामसमुदायनिष्पन्नत्वादिति। एतैरपि सर्वस्य क्रोडीकरणात् पञ्चनामत्वं भावनीयम्। **सेत्तं पंचनामे** त्ति निगमनम्।

**[सू० २३३] से किं तं छनामे[1] ? छनामे छव्विहे पण्णत्ते। तंजहा—**

Jain Education International For Private & Personal Use Only www.jainelibrary.org

उदइए १, उवसमिए २, खइए ३, खओवसमिए ४, पारिणामिए ५, सन्निवातिए ६।

[सू० २३४] से किं तं उदइए[२] ? उदइए दुविहे पण्णत्ते। तंजहा — उदए य १, उदयनिप्फण्णे य २।

[सू० २३५] से किं तं उदए ? उदए अट्ठण्हं कम्मपगडीणं उदए णं। से तं उदए।

[सू० २३६] से किं तं उदयनिप्फणे ? उदयनिप्फणे दुविहे पण्णत्ते। तं जहा-जीवोदयनिप्फन्ने य १, अजीवोदयनिप्फन्ने य २।

[सू० २३७][३] से किं तं जीवोदयनिप्फन्ने ? जीवोदयनिप्फन्ने अणेगविहे पण्णत्ते। तंजहा-णेरइए[४] तिरिक्खजोणिए मणुस्से देवे, पुढविकाइए जाव[५] वणस्सइकाइए तसकाइए[६], कोहकसायी जाव लोहकसायी, इत्थीवेदए पुरिसवेदए णपुंसगवेदए, कण्हलेसे एवं नील० काउ० तेउ० पम्ह० सुक्कलेसे, मिच्छादिट्ठी अविरए अण्णाणी आहारए छउमत्थे सजोगी संसारत्थे असिद्धे। सेतं जीवोदयनिप्फन्ने।

[सू० २३८] से किं तं अजीवोदयनिप्फन्ने ? अजीवोदयनिप्फन्ने [७]चोद्दसविहे पण्णत्ते। तंजहा-ओरालियं वा सरीरं १, ओरालियसरीर[८]पयोग-परिणामियं वा [९]दव्वं २, वेउव्वियं वा सरीरं ३, वेउव्वियसरीरपयोगपरिणामियं वा दव्वं ४, एवं आहारगं सरीरं ६, तेयगं सरीरं ८, कम्मगं सरीरं च भाणियव्वं १०, पयोगपरिणामिए वण्णे ११, गंधे १२, रसे १३, फासे १४। सेतं अजीवोदयनिप्फण्णे। सेतं उदयनिप्फण्णे। सेतं [१०]उदए।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

[सू० २३९] से किं तं उवसमिए[११] ? उवसमिए दुविहे पण्णत्ते। तंजहा- उवसमे य १, उवसमनिप्फण्णे य २।

[सू० २४०] से किं तं उवसमे ? उवसमे मोहणिज्जस्स कम्मस्स उवसमे णं। सेतं उवसमे।

[सू० २४१] से किं तं उवसमनिप्फण्णे ? उवसमनिप्फण्णे अणेगविहे पण्णत्ते। तंजहा-उवसंतकोहे[१२] जाव उवसंतलोभे उवसंतपेज्जे उवसंतदोसे उवसंतदंसणमोहणिज्जे उवसंतचरित्तमोहणिज्जे उवसंतमोहणिज्जे उवसमिया [१३]सम्मत्तलद्धी उवसमिया चरित्तलद्धी उवसंतकसायछउमत्थवीतरागे। सेतं उवसमनिप्फण्णे। सेतं उवसमिए[१४]।

[सू० २४२] से किं तं खइए ? खइए दुविहे पण्णत्ते। तंजहा-खए य १ खयनिप्फण्णे य २।

[सू० २४३] से किं तं खए ? खए अट्ठण्हं कम्मपगडीणं खए णं। सेतं खए।

[सू० २४४] से किं तं खयनिप्फण्णे ? खयनिप्फण्णे अणेगविहे पण्णत्ते। तंजहा-उप्पण्णणाण-दंसणधरे अरहा जिणे केवली खीण-आभिणिबोहियणाणावरणे[१५] खीणसुयणाणावरणे खीणओहिणाणावरणे खीणमणपज्जवणाणावरणे खीणकेवलणाणावरणे अणावरणे णिरावरणे खीणावरणे णाणावरणिज्जकम्मविप्पमुक्के, केवलदंसी सव्वदंसी खीणनिद्दे खीणनिद्दानिद्दे खीणपयले खीणपयलापयले खीणथीणगिद्धे[१६] खीणचक्खुदंसणावरणे[१७] खीणअचक्खुदंसणावरणे खीणओहिदंसणावरणे खीणकेवलदंसणावरणे अणावरणे निरावरणे खीणावरणे दरिसणा-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वरणिज्जकम्मविप्पमुक्के खीणसायवेयणिज्जे[१८] खीणअसायवेयणिज्जे[१९] अवेयणे निव्वेयणे खीणवेयणे सुभासुभ[२०]वेयणिज्जकम्मविप्पमुक्के[२१], खीणकोहे जाव खीणलोभे खीणपेज्जे खीणदोसे खीणदंसणमोहणिज्जे खीणचरित्तमोहणिज्जे अमोहे निम्मोहे खीणमोहे मोहणिज्जकम्मविप्पमुक्के[२२], खीणणेरइयाउए[२३] खीणतिरिक्खजोणियाउए खीणमणुस्साउए खीणदेवाउए अणाउए निराउए खीणाउए आउयकम्मविप्पमुक्के, गति-जाति-सरीरंगोवंग-बंधण-संघात[२४]-संघतण-अणेगबोंदिवंदसंघायविप्पमुक्के खीणसुभनामे खीणासुभणामे अणामे निण्णामे खीणनामे सुभाऽसुभणामकम्मविप्पमुक्के, खीण उच्चागोए खीणणीयागोए अगोए निगोए खीणगोए[२५] सुभाऽसुभगोत्त[२६]कम्मविप्पमुक्के, खीणदाणंतराए[२७] खीणलाभंतराए खीणभोगंतराए खीणुवभोगंतराए खीणविरियंतराए अणंतराए णिरंतराए खीणंतराए अंतराइयकम्म[२८]-विप्पमुक्के, सिद्धे बुद्धे मुत्ते परिणिव्वुए[२९] अंतगडे सव्वदुक्खप्पहीणे। से तं खयनिप्फण्णे। से तं खइए[३०]।

[सू० २४५] से किं तं खओवसमिए[३१]? खओवसमिए दुविहे पन्नत्ते। तंजहा-खओवसमे य १, खओवसमनिप्फन्ने य २।

[सू० २४६] से किं तं खओवसमे? खओवसमे चउण्हं घाइकम्माणं[३२] खओवसमे णं। तं जहा-नाणावणिज्जस्स १, दंसणावरणिज्जस्स[३३] २, मोहणिज्जस्स ३, अंतराइयस्स[३४] ४। से तं खओवसमे।

[सू० २४७] से किं तं खओवसमनिप्फन्ने? खओवसमनिप्फन्ने अणेगविहे पण्णत्ते। तंजहा-खओवसमिया आभिणिबोहियणाणलद्धी[३५] → जाव खओवसमिया मणपज्जवणाणलद्धी, खओवसमिया[३६] मतिअण्णाण-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

लद्धी खओवसमिया सुयअण्णाणलद्धी खओवसमिया विभंगणाणलद्धी, खओवसमिया चक्खुदंसणलद्धी एवमचक्खुदंसणलद्धी ओहिदंसणलद्धी, एवं सम्मद्दंसणलद्धी मिच्छादंसणलद्धी सम्मामिच्छादंसणलद्धी, खओवसमिया समाइयचरित्तलद्धी एवं छेदोवट्ठावणलद्धी परिहारविसुद्धियलद्धी सुहुमसंपराइयलद्धी, एवं चरित्ताचरित्तलद्धी, खओवसमिया दाणलद्धी एवं लाभ० भोग० उवभोग० खयोवसमिया वीरियलद्धी, एवं पंडियवीरियलद्धी बालवीरियलद्धी बालपंडियवीरियलद्धी, खओवसमिया सोइंदियलद्धी जाव खओवसमिया फासिंदियलद्धी, खओवसमिए [३७] आयारधरे एवं सूयगडधरे ठाणधरे समवायधरे विवाहपण्णत्तिधरे एवं नायाधम्मकहा० उवासगदसा० अंतगडदसा० अणुत्तरोववाइयदसा० पण्हावागरण० खओवसमिए विवागसुयधरे खओवसमिए दिट्ठिवायधरे, खओवसमिए णवपुव्वी जाव चोद्दसपुव्वी, खओवसमिए गणी खओवसमिए वायए। सेतं खओवसमनिप्फण्णे। सेतं खओवसमिए [३८]।←

[सू० २४८] से किं तं पारिणामिए [३९]? पारिणामिए दुविहे पण्णत्ते। तंजहा- सादिपारिणामिए य १, अणादिपारिणामिए य २।

[सू० २४९] से किं तं सादिपारिणामिए? सादिपारिणामिए [४०] →अणेगविहे पण्णत्ते। तंजहा-←

जुण्णसुरा जुण्णगुलो जुण्णघयं जुण्णतंदुला चेव।
अब्भा य अब्भरुक्खा संझा गंधव्वणगरा य ॥२४॥

उक्कावाया, दिसादा [४१] घा, गज्जियं, वि [४२] ज्जू, णिग्घाया, जूवया [४३], ज [४४] क्खालित्ता, धूमिया, महिया, [४५] रयुग्घाओ, चंदोवरागा, सूरोवरागा, चंदपरिवेसा, सूरपरिवेसा, [४६] पडिचंदया, पडिसूरया, इंदधणू, उदगमच्छा ,कविहसिया,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

[४७]अमोहा, वासा, वासधरा, गामा, णगरा, घरा, पव्वता, पायाला, भवणा, निरया, [४८]रयणप्पभा, सक्करप्पभा, वालुयप्पभा, पंकप्पभा, धूमप्पभा, तमा, तमतमा, सोहम्मे, ईसाणे, जाव आणए, पाणए, आरणे, अच्चुए, गेवेज्जे, अणुत्तरोववाइया, ईसीपब्भारा, परमाणुपोग्गले, दुपदेसिए जाव अणंतपदेसिए। सेतं सादिपारिणामिए।

[सू० २५०] से किं तं अणादिपारिणामिए[४९] ? अणादिपारिणामिए धम्मत्थिकाए अधम्मत्थिकाए आगासत्थिकाए जीवत्थिकाए पोग्गलत्थिकाए अद्धासमए लोए अलोए भवसिद्धिया[५०] अभवसिद्धिया[५१]। सेतं अणादिपारिणामिए। सेतं पारिणामिए[५२]।

[सू० २५१] से किं तं सण्णिवाइए[५३]? सण्णिवाइए एतेसिं चेव उदइय-उवसमिय[५४]-खइय-खओवसमिय-पारिणामियाणं भावाणं दुयसंजोएणं तियसंजोएणं चउक्कसंजोएणं पंचगसंजोएणं जे[५५] निप्पज्जंति सव्वे से सन्निवाइए नामे। तत्थ णं दस दुगसंजोगा, दस तिगसंजोगा, पंच चउक्कसंजोगा, एक्के पंचगसंजोगे।

[सू० २५२] तत्थ णं जे ते दस दुगसंजोगा ते णं इमे- अत्थि णामे उदइए उवसमनिप्पण्णे[५६] १, अत्थि णामे उदइए[५७] खयनिप्पण्णे २, अत्थि णामे उदइए खओवसमनिप्पण्णे ३ ,अत्थि णामे उदइए पारिणामियनिप्पण्णे[५८] ४, [५९]→ अत्थि णामे उवसमिए खयनिप्पण्णे ५, अत्थि णामे उवसमिए खओवसमनिप्पन्ने ६, अत्थि णामे उवसमिए पारिणामियनिप्पन्ने ७, अत्थि णामे खइए खओवसमनिप्पन्ने ८, अत्थि णामे खइए पारिणामियनिप्पन्ने ९, अत्थि णामे खयोवसमिए पारिणामियनिप्पन्ने १०।←

Jain Education International For Private & Personal Use Only www.jainelibrary.org

[सू० २५३] [६०]कतरे से नामे उदइए उवसमनिप्पन्ने ? [६१]उदए त्ति मणूसे उवसंता कसाया, एस णं से णामे उदइए उवसमनिप्पन्ने १। कतरे से नामे उदइए खयनिप्पन्ने ? उदए त्ति मणूसे खतियं सम्मत्तं, एस णं से नामे उदइए खयनिप्पन्ने २। कतरे से णामे उदइए खयोवसमनिप्पन्ने ? उदए त्ति मणूसे खयोवसमियाइं इंदियाइं, एस णं से णामे उदइए खयोवसमनिप्पन्ने ३। कतरे से णामे उदइए पारिणामियनिप्पन्ने ? उदए त्ति मणूसे पारिणामिए जीवे, एस णं से णामे उदइए पारिणामियनिष्पन्ने ४। कयरे से णामे उवसमिए खयनिप्पन्ने ? उवसंता कसाया खइयं सम्मत्तं, एस णं से णामे उवसमिए खयनि[६२]प्पन्ने ५। कयरे से णामे उवसमिए खओवसमनिप्पण्णे ? उवसंता कसाया खओवसमियाइं इंदियाइं, एस णं से णामे उवसमिए खओवसमनिप्पन्ने ६। कयरे से णामे उवसमिए पारिणामियनिप्पन्ने ? उवसंता कसाया पारिणामिए जीवे, एस णं से णामे उवसमिए पारिणामियनिप्पन्ने ९। कतरे से णामे खइए खओवसमियनिप्पन्ने ? खइयं सम्मत्तं खयोवसमियाइं इंदियाइं, एस णं से णामे खइए खयोवसमनिप्पन्ने ८। कतरे से णामे खइए पारिणामियनिप्पन्ने ? खइयं सम्मत्तं पारिणामिए जीवे, एस णं से णामे खइए पारिणामियनिप्पन्ने ९। कतरे से णामे खयोवसमिए पारिणामियनिप्पन्ने ? खयोवसमियाइं इंदियाइं पारिणामिए जीवे, एस णं से णामे खयोवसमिए पारिणामियनिप्पन्ने १०।

[सू० २५४] तत्थ णं जे ते दस [६३]तिगसंजोगा ते णं इमे–अत्थि णामे उदइए उवसमिए खयनि[६४]प्पन्ने १, अत्थि णामे [६५]उदइए उवसमिए खओवसमनिप्पन्ने २, अत्थि णामे उदइए उवसमिए पारिणामियनिप्पन्ने ३, अत्थि णामे उदइए खइए खओवसमनिप्पन्ने ४, अत्थि णामे उदयिए खइए

Jain Education International For Private & Personal Use Only www.jainelibrary.org

पारिणामियनिप्पन्ने ५, अत्थि णामे उदइए खयोवसमिए पारिणामियनिप्पन्ने ६, अत्थि णामे उवसमिए खइए खओवसमनिप्पन्ने ७, अत्थि णामे उवसमिए खइए पारिणामियनिप्पन्ने ८, अत्थि णामे उवसमिए खओवसमिए पारिणामियनिप्पन्ने ९, अत्थि णामे खइए खओवसमिए पारिणामियनिप्पन्ने १०।

[सू० २५५] कतरे से णामे उदइए उवसमिए खयनिप्पन्ने ? उदए त्ति मणूसे उवसंता कसाया खइयं सम्मत्तं, एस णं से णामे उदइए उवसमिए खयनिप्पन्ने १।[६६] → कतरे से णामे उदइए उवसमिए खयोवसमियनिप्पन्ने ? उदए त्ति मणूसे उवसंता कसाया खयोवसमियाइं इंदियाइं, एस णं से णामे उदइए उवसमिए खओवसमनिप्पन्ने[६७] २। कयरे से णामे उदइए उवसमिए पारिणामियनिप्पन्ने ? उदए त्ति मणूसे उवसंता कसाया पारिणामिए जीवे, एस णं से णामे उदइए उवसमिए पारिणामियनिप्पन्ने ३। कयरे से णामे उदइए खइए खओवसमनिप्पन्ने ? उदए त्ति मणूसे खइयं सम्मत्तं खओवसमियाइं इंदियाइं, एस णं से णामे उदइए खइए खओवसमनिप्पन्ने ४। कतरे से णामे उदइए खइए पारिणामियनिप्पन्ने ? उदये त्ति मणूसे खइयं सम्मत्तं पारिणामिए जीवे, एस णं से नामे उदइए खइए पारिणामियनिप्पन्ने ५। कतरे से णामे उदइए खओवसमिए पारिणामियनिप्पन्ने ? उदये त्ति मणूसे खयोवसमियाइं इंदियाइं पारिणामिए जीवे, एस णं से णामे उदइए खओवसमिए पारिणामियनिप्पन्ने ६। कतरे से णामे उवसमिए खइए खओवसमनिप्पन्ने ? उवसंता कसाया खइयं सम्मत्तं खओवसमियाइं इंदियाइं, एस णं से णामे उवसमिए खइए खओवसमनिप्पन्ने ७। कतरे से णामे उवसमिए खइए पारिणामियनिप्पन्ने ? उवसंता कसाया खइयं सम्मत्तं पारिणामिए जीवे, एस णं से णामे उवसमिए

Jain Education International For Private & Personal Use Only www.jainelibrary.org

खइए पारिणामियनिप्पन्ने ८। कतरे से णामे उवसमिए खओवसमिए पारिणामियनिप्पन्ने ? उवसंता कसाया खओवसमियाइं इंदियाइं पारिणामिए जीवे, एस णं से णामे उवसमिए खओवसमिए पारिणामियनिप्पन्ने ९। कतरे से णामे खइए खओवसमिए पारिणामियनिप्पन्ने ? खइयं सम्मत्तं खओवसमियाइं इंदियाइं पारिणामिए जीवे, एस णं से णामे खइए खयोवसमिए पारिणामियनिप्पन्ने १०।←

[सू० २५६] तत्थ णं जे ते पंच चउक्क[६८]संयोगा ते णं इमे-अत्थि णामे? उदइए उवसमिए खइए खओवसमनिप्पन्ने १, अत्थि णामे उदइए उवसमिए खइए पारिणामियनिप्पन्ने २, अत्थि णामे उदइए[६९] उवसमिए खयोवसमिए पारिणामियनिप्पन्ने ३, अत्थि णामे उदइए खइए खओवसमिए पारिणामियनिप्पन्ने ४, अत्थि णामे उवसमिए[७०] खइए खओवसमिए पारिणामियनिप्पन्ने ५।

[सू० २५७] कतरे से णामे उदइए[७१] उवसमिए खइए खओवसमनिप्पन्ने उदए त्ति मणूसे उवसंता कसाया खइयं सम्मत्तं खओवसमियाइं इंदियाइं, एस? णं से णामे उदइए[७२] उवसमिए खइए खओवसमनिप्पन्ने १।[७३] → कतरे से नामे उदइए उवसमिए खइए पारिणामियनिप्पन्ने ? उदए त्ति मणूसे उवसंता कसाया खइयं सम्मत्तं पारिणामिए जीवे, एस णं से णामे उदइए उवसमिए खइए पारिणामियनिप्पन्ने २। कतरे से णामे उदइए उवसमिए खओवसमिए पारिणामियनिप्पन्ने ? उदए त्ति मणूसे उवसंता कसाया खओवसमियाइं इंदियाइं पारिणामिए जीवे, एस णं से णामे उदइए उवसमिए खओवसमिए पारिणामियनिप्पन्ने ३। कतरे से नामे उदइए खइए खओवसमिए पारिणामियनिप्पन्ने ? उदए त्ति मणूसे खइयं सम्मत्तं खओवसमियाइं इंदियाइं

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**पारिणामिए जीवे, एस णं से नामे उदइए खइए खओवसमिए पारिणामियनिप्पन्ने ४। कतरे से नामे उवसमिए खइए खओवसमिए पारिणामियनिप्पन्ने ? उवसंता कसाया खइयं सम्मत्तं खओवसमियाइं इंदियाइं पारिणामिए जीवे, एस णं से नामे उवसमिए खइए खओवसमिए पारिणामियनिप्पन्ने ५।←**

**[सू० २५८] तत्थ णं जे से एक्के [७४]पंचकसंजोगे से णं इमे-अत्थि नामे [७५]उदइए उवसमिए खइए खओवसमिए पारिणामियनिप्पन्ने १।**

**[सू० २५९] कतरे से [७६]नामे उदइए उवसमिए खइए खओवसमिए पारिणामियनिप्पन्ने ? उदए त्ति मणूसे उवसंता कसाया खइयं सम्मत्तं खओवसमियाइं इंदियाइं पारिणामिए जीवे, एस णं से [७७]णामे उदइए उवसमिए खइए खओवसमिए पारिणामियनिप्पन्ने। सेतं [७८]सन्निवाइए। सेतं छण्णामे।**

[चू० २३३-२५९] छव्विहनामे सुत्तं - तत्थ **उदये** त्ति उदये भवः औदयिकः, अट्ठविहकम्मपोग्गला संतावत्थातो उदीरणावलियमतिक्रान्ता अप्पप्पणो विवागेण उदयावलियाए वट्टमाणा उदिन्ना इति उदयभावो भन्नति। **उदयणिप्फन्नो** णाम उदिण्णेण जेण अण्णो णिप्फादितो सो उदयणिप्फण्णो। सो दुविहो - **जीव**दव्वे **अजीव**दव्वे वा। तत्थ जीवे कम्मोदएण जो जीवस्स भावो णिव्वत्तितो जहा **णेरइते** इत्यादि। अजीवेसु जहा ओरालियदव्ववग्गणाहिंतो ओरालियसरीरपायोगे दव्वे घेत्तूणं तेहिं ओरालियसरीरे णिव्वत्तेमाणे णिव्वत्तिए वा तं उदय**णिप्फण्णो** भावो, जओ ओरालियसरीरं ओरालियसरीरणामकम्मोदयातो भवतीत्यर्थः; शरीरपयोगपरिणामितं वा दव्वं, एस अजीवोदयणिप्फण्णो भावो। एवं वेउव्विय-आहारग-तेय-कम्मगा वि दुभेदा भाणितव्वा। को पुण सरीरप्पयोगपरिणामो ?, उच्यते - वण्ण-गंध-रस-फास-भावणिव्वत्तिकरणं, तहा आणापाणु-भास-मणादिया य घेत्तव्वा। उवसम एवोवसमिको, उदयअभावो वा **उवसमो**। एस दुविहो सुत्ते। तत्थ **उवसमे** उवसमसेढिपडिवन्नस्स मोहणिज्जमणंताणुबंधिमादिकम्मं उवसमणकाले उवसमेन्तस्स,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

उवसम एवोवसमितो भावो भवति। **उवसमणिप्फण्णो** पुण स एवोत्तरकालं उवसमिअकम्मंसो **उवसंतकोधे** इत्यादि भण्णति। सेसं कंठं।

कम्माणं खय एव खाइओ, कम्माण अभावकरणं ति यावत्, तदवत्थाए जो भावो उप्पज्जति सो **खाइओ**। एसेव सुत्ते दुविहो। तत्थ **खयिओ** कम्माणं खवणकाल एव खाइओ। **खयणिप्फण्णो** पुण उत्तरकालं। **उप्पण्णणाण-दंसणे** इत्यादि। **उप्पण्णणाणदंसणे** त्ति निर्मार्जनेन आदर्शप्रभावत्। **अ** इति प्रतिषेधे, **रहः** रहस्यम्, तद् यस्य नास्ति स भवति **अरहा**। कम्मारिजियत्तणतो **जिणो**। णाणसंपुण्णत्तणतो **केवली**, णेगम-ववहाराभिप्पायतो णाणावरणंसखीणत्तणतो तदाख्या इति। **अणावरणादि** चउरो एगट्ठिया। किंचि विसेसत्थजुत्ता वा इमेण विधिणा - केवलस्स सव्वगतत्तणतो आवरणाभावः, अतः **अणावरणे** गगनवत्, अहवा **अणावरणे** पडुप्पण्णकालणयावेक्खत्तणतो, विसुद्धांबरेऽर्कबिम्बवत्। आवरणातो णिग्गतो, आवरणं वा णिग्गयं जस्स स **णिरावरणो**, ससिस्स बिंबं व राहूतो। **खीणावरणे** त्ति

*खीणं ख[1]वित विणट्ठं, विद्धत्थं सव्वहा अभावो य।*
*आवरणं जस्सेवं, तमु व्व रविणो जहा उदये॥१॥* [ ]

सं[2]गहाभिप्पायातो **णाणावरण**मेगमविसिट्ठं, तातो विसिट्ठेण प्पगारेण विमुक्को **विप्पमुक्को**, कणगं व किट्टातो। इमातो च्चेव अत्थणुसारातो सेसा वि दंसणादिया उवयुज्ज वत्तव्वा। संपुन्नत्तणतो दंसणस्स **केवलदंसी**। **सव्वं** सामण्णं **सव्वधा** सव्वायप्पदेसेहिं [3]**सव्वं** अणागतद्धादि पेक्खंतो **सव्वदंसी**। सेसं कंठं। णामकम्मे **अणेगबोंदि** इत्यादि, **अणेग** त्ति बहू **बोंदीतो**, ता य जहण्णसंजोगे ओरालिय-तेय-कम्मगसरीरा, तेसु [4]ओरालियबोंदीए **वंदं** वृंदं, तं च अंगाणं उवंगाणं अंगोवंगाण य, तेय-कम्मगेसु वि तव्विभागगतेसु अंगुवंगा वत्तव्वा, एक्केक्के अंगोवंगे अणंता पर[5]माणूसंघाय **संघाया**, एवमणंतसंभवे वि संववहारतो **स(संघा?)त**ग्गहणं कतं, तातो बोंदिवंदसंघातातो विसिट्ठेण पगारेण मुक्को **विप्पमुक्को**, अपुनर्ग्रहणेनेत्यर्थः। सामायिकादिचरणक्रियासिद्धत्वात् **सिद्धः**, सिद्धत्वप्रापणाद्वा **सिद्धः**, सुभा-ऽसुभसर्वक्रियापरिनिष्ठानसिद्धत्वात् **सिद्धः**। जीवादितत्त्वं बुध्यत इति बोधात्मकत्वाद् **बुद्धः**। बाह्या-ऽऽभ्यन्तरेण ग्रन्थेन बन्धनेन मुक्तत्वाद् **मुक्तः**। सारीरमानसदुःखेनाभितापित-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

मात्मानं परिनिर्वापितवानिति समन्तात् णिव्ववितदुक्खे **परिनिव्वुडे**। ऊर्ध्वक्षेत्रलोकान्ते आत्मस्वरूपावस्थापनाद् **अन्तकडे,** सर्वसंसारिभावानां अन्तकारित्वादिति **अंतकडे,** उत्तरोत्तरं वा सर्वसुखानाम् अन्तं प्रकर्षं प्राप्त इति **अंतकडे,** सुख-दुःखान्तकारित्वाद् वा **अंतकडे**। सर्वे दुःखप्रकाराः प्रहीणा यस्य स भवति **सव्वदुक्खप्पहीणे**।

चतुण्हं घातिकम्माणं खयोवसमकरणकाल एव उभयसभावत्तणतो **खयोवसमिते** भावे। **खयोवसमणिप्फण्णे** पुण उत्तरकालं। **आभिणिबोहियनाणलद्धी**त्यादि सेसं कंठं। परि संमता णामो **परिणामो,** जं जं जीव-पोग्गलादियं दव्वं जं जं अवत्थं पावति तं तं अपरिचत्तसरूवमेव तधा तधा परिणमति सा किरिया **पारिणामिओ** भावो भण्णति। **सो य सादी अणादी** दुविहो। तत्थ सादी - **जुण्णसुरे**त्यादि। इह परिणतिरूपः पारिणामिकः, अहवा नवा जीर्णेति सुराभावः सर्वास्वस्थासु परिणमत इत्यर्थः। निनादोपलक्षितो घात इव **निर्घातः**। **जूवा** अमोहा। **जक्खालित्ता** अग्निपिशाचकाः। रूक्षा प्रविरला धूमाभा **धूमिका**। स्निग्धा घना भूमौ पतिता चोपलक्ष्यते **महिया**। रजस्वला दिसो **रयुग्घातो**। [**चंद-सूरिओवरागा** राहुग्गहणाणि,] अड्ढाइयदीवसमुद्देसु चंद-सूराण जुगवोवरागभावित्तणतो बहुवयणं। **कविहसितं** अम्बरतले ससद्दं लक्खिज्जति जलितं। **वासा**दियाण सादिपरिणामभावो पुग्गलाण चया-ऽवचयत्तणतो। सेसं कंठं।

इयाणिं सन्निवादितो **भावो,** भावोऽन्यभावेन सह निपात्यत इति सन्निपातिकः, अविरोधेन वा द्विकादिनैकत्र सन्निपातचिन्ता **सन्निपातिकः**। द्विकसंयोगे **उदयोपशमौ** प्रथमसन्निपातिको निष्पन्नः, एवं द्वि-त्रि-चतुः-पंचकयोगाः, सर्वे षड्विंशतिर्भङ्गा उक्ताः।

इयाणिं दुगादिसंजोगभंगपरिमाणप्रदर्शकं सूत्रम् - **तत्थ णं दसदुगसंजोगा** इत्यादि कंठं। इदाणिं अपरिण्णायदुगादिसंजोगभंगभावुक्कित्तणज्ञापनार्थं सूत्रमाह - **तत्थ णं जे ते दस दुगसंजोगा ते णं इमे - अत्थि णामे उदइये उवसमणिप्फण्णे** इत्यादि सव्वं सुत्तसिद्धं। अतो परं सन्निपातियभंगोवदंसणा सवित्थरा कज्जति, तत्थ सीसो पुच्छति - **कतरे से णामे उदइए उवसमणिप्फण्णे**?। आचार्य आह- **उदये त्ति मणूसे** इत्यादि सव्वं सुत्तसिद्धं कंठं। एवं सन्निवाइयभावभंगपरूवणे कते चोदक आह- जति दुगसंयोगे जीवस्स कम्हि वि अवत्थाविसेसे भावदुगमेव भवे तो जुत्तं दुगभंगो वत्तुं, जतो य दुगभावाभावो, संसारिणो य

Jain Education International For Private & Personal Use Only www.jainelibrary.org

जीवस्स णियमा भावतिगमत्थि उदय-खयोवसम-पारिणामिया, तम्हा दुगभंगो ण वत्तव्वो। आचार्याऽऽह-ण तुमं सिद्धंताभिप्पायं जाणसि, विचित्तो सुत्तत्थो भगवता सुत्तेसु दंसितो, इह य भंगो त्ति विकप्पो, विविधकप्पणातो विकप्पो, सो य किंचि अत्थविसेसेण निरवेक्खाऽणिरवेक्खो जधेव विकप्पं पयच्छति तधेव कज्जते, ण दोसो। गतं छव्विधणामं।

[हा० २३३-२५९] **से किं तं छणामे** ? २ **छव्विहे पण्णत्ते** इत्यादि, अत्र षड् भावा औदयिकादयः प्ररूप्यन्ते, तथा च सूत्रम् - **से किं तं ओदयिए ? २ दुविहे पण्णत्ते, तंजहा- उदए य उदयनिप्फण्णे य**, अत्रोदयः **अष्टानां कर्मप्रकृतीनां** ज्ञानावरणीयादिलक्षणाना**मुदयः**, सत्तावस्थापरित्यागेनोदीरणावलिकामतिक्रम्योदयावलिकायामात्मीयरूपेण विपाक इत्यर्थः । **ण**मिति वाक्यालङ्कारे । अत्र चैवं व्युत्पत्तिः, उदय एव औदयिकः । उदयनिष्पन्नस्तु द्वेधा **जीवोदयनिप्फण्णे य अजीवोदयनिप्फण्णे य**। तत्र जीवे उदयनिप्फन्नो जीवोदयनिष्पन्नः, जीवे कर्मविपाकनिर्वृत्त इत्यर्थः, तथा च कर्मोदयसहकारिकारणकार्या एव नारकत्वादय इति प्रतीतम् । ***अन्ये*** तु जीवोदयाभ्यां निष्पन्नो जीवोदयनिष्पन्न इति व्याचक्षते, इदमप्यदुष्टमेव, परमार्थतः तस्य तत्समुदायकार्यत्वात्। एवमजीवोदयनिष्पन्नोऽपि वाच्यः। तथा च औदारिकशरीरप्रायोग्यपुद्गलग्रहणं शरीरपरिणतिश्च न तथा कर्मोदयमन्तरेणेति, अत उक्त**मौदारिकं वा शरीर**मित्यादि। **औदारिकशरीरप्रयोगपरिणामितं वा द्रव्यम्**, तच्च वर्ण-गन्धादि प्राणा-ऽपानादि च, न चेदमौदारिकशरीरव्यापारमन्तरेण तथा परिणमतीति। एवं वैक्रियादिष्वपि योजनीयम् । इह च वस्तुतः द्वयोरपि द्व्यात्मकत्वे एकत्र जीवप्राधान्यमन्यत्राजीवप्राधान्यमाश्रीयत इति, ततश्चोपपन्नमेव जीवोदयनिष्पन्नः अजीवोदयनिष्पन्नश्चेत्यलं विस्तरेण। **सेत्तं ओदयिए**।

**से किं तं ओवसमिए** ? **[ओवसमिए दुविहे पण्णत्ते,] तंजहा— उवसमे य उवसमनिप्फण्णे य**, तत्रोपशमो मोहनीयस्य कर्मणः अनन्तानुबन्ध्यादिभेदभिन्नस्य उपशमः, उपशमश्रेणीप्रतिपन्नस्य मोहनीयभेदा[न]नन्तानुबन्ध्यादीन् उपशमयतः, यत उदयाभाव इत्यर्थः, **ण**मिति पूर्ववत्, उपशम एवौपशमिकः। उपशमनिष्पन्नस्तु **उपशान्तक्रोध** इत्यादि, उदयाभावफलरूप आत्मपरिणाम इति भावना। **सेतं ओवसमिए**।

**से किं तं खइए ? खइए दुविहे पण्णत्ते, तंजहा— खए य खयनिप्फन्ने य,**

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तत्र क्षयः अष्टानां कर्मप्रकृतीनां ज्ञानावरणीयादिभेदानां क्षयः, कर्माभाव एवेत्यर्थः, **ण**मिति पूर्ववत्, क्षय एव क्षायिकः। क्षयनिष्पन्नस्तु फलरूपो विचित्र आत्मपरिणामः। तथा चाह – **उप्पण्णणाणदंसणे**त्यादि, उत्पन्ने श्यामतापगमेनादर्शमण्डलप्रभावत् सकलतदावरणापगमादभिव्यक्ते ज्ञान-दर्शने यस्य स तथाविधः। **अरहा** अविद्यमानरहस्य इत्यर्थः। रागादिजेतृत्वा**ज्जिनः**। केवलमस्यास्तीति **केवली**, सम्पूर्णज्ञानवानित्यर्थः। अत एवाह- **क्षीणाभिनिबोधिकज्ञानावरणीय** इत्यादि विशेषविषयमेव, यावत् **अनावरणः** अविद्यमानावरणः सामान्येनैवाऽऽवरणरहितत्वात्, विशुद्धाम्बरे चन्द्रबिम्बवत्। तथा निर्गतावरणो **निरावरणः** आगन्तुकेतरावरणस्याप्यभावात्, राहुरहितचन्द्रबिम्बवत्। तथा क्षीणमेकान्तेनापुनर्भावितयाऽऽवरणं यस्यासौ **क्षीणावरणः**, अपाकृतमलावरणजात्यमणिवत्। तथा ज्ञानावरणीयेन कर्मणा विविधम् अनेकैः प्रकारैः प्रकर्षेण मुक्तो **ज्ञानावरणीयकर्मविप्रमुक्त** इति निगमनम्, एकार्थिकानि वैतानि, नयमतभेदेनान्यथा वा भेदो वाच्य इति। **केवलदर्शी** सम्पूर्णदर्शी। **क्षीणनिद्र** इत्यादि सुगमं यावत् **सेत्तं खयनिप्फन्ने**। नवरं निद्रादिस्वरूपमिदम् –

*सुहपडिबोहो निद्दा दुहपडिबोहो य निद्दनिद्दा य।*
*पयला होति ठियस्सा पयलापयला य चंकमओ॥१॥* [*निशीथभा० १३३*]
*अतिसंकिलिट्ठकम्माणुवेदणे होइ थीणगिद्धीओ।*
*महनिद्दा दिणचिंतियवावारपसाहणी पायं॥२॥* [ ]

सातावेदनीयं प्रीतिकारि। असायावेदनीयम् अप्रीतिकारि। *क्रुध कोपे* [*पा० धा०* *११८९*], क्रोधनं क्रोधः कोपो रोषो दोषो द्वेषोऽनुपशम इत्यर्थः। मानः स्तम्भः गर्व उत्सेकः अहङ्कारो दर्पः स्मयो मत्सर ईर्ष्येत्यर्थः। माया प्रणिधिः उपधिर्निकृतिः वञ्चना दम्भः कूटमभिसन्धानं शाठ्यमनार्जवमित्यर्थः। लोभः रागः गार्ध्यमिच्छा मूर्च्छाऽभिलाषोऽभिष्वङ्गः काङ्क्षा स्नेह इत्यर्थः। माया लोभश्च प्रेम, क्रोधो मानश्च द्वेषः। तत्र यदर्हदवर्णवादहेतुलिङ्गं अर्हदादिश्रद्धानविघातकं दर्शनपरीषहकारणं तन्मिथ्यादर्शनम्। यन्मिथ्यास्वभावप्रचितपरिणामविशेषाद् विशुद्ध्यमानकं सप्रतिघाति सम्यक्त्वकारणं सम्यग्दर्शनम्। यन्मिथ्यात्वस्वभावचितं विशुद्धा-ऽविशुद्धं श्रद्धा-ऽश्रद्धाकारि तत् सम्यग्मिथ्यादर्शनम्। त्रिविधं दर्शनमोहनीयमुक्तं कर्म। चारित्रमोहनीयं द्विविधम् – कषायवेदनीयं नोकषायवेदनीयं च।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

द्वादश कषायाः [अप्रत्याख्यान्याद्याः क्रोधाद्याः], नव नोकषायाः हास्यादयः। नारक-तैर्यग्योन-मनुष्य-देवानां भव-शरीरस्थितिकारणमायुष्कम् । तांस्तानात्मभावान् सन्नामयतीति नाम कर्मपुद्गलद्रव्यम् । प्रतिस्वगत्यभिधानकारणं नारकादिगतिनाम । जातिनिर्वृत्त्यभिधानकारणं जातिनाम पञ्चविधमेकेन्द्रियजातिनामादि। शरीरोत्पत्तिकारणं शरीरनाम पञ्चविधौदारिकशरीरनामादिकार्येण साधितम्। यदेषामेवाङ्गोपाङ्गनिर्वृत्तिकारणं तदङ्गोपाङ्गनाम, तच्चाऽन्यत् शरीरनाम्नः, कथम्? अङ्गोपाङ्गाभावेऽपि शरीरोपलब्धेः, तच्च प्राक्शरीरत्रये नान्यत्र। **बोंदि**: तनुः शरीरमिति पर्यायाः, अनेकता च जघन्यतोऽप्यौदारिक-तैजस-कार्मणबोंदिभेदात्, वृन्दं तु तद्गताङ्गोपाङ्गसङ्घातभेदात्, सङ्घातः पुनरेकैकाङ्गादेरनन्तपरमाणुनिर्वृत्तत्वादिति । तथा सामायिकादिचरणक्रियासिद्धत्वात् **सिद्धः**। तथा जीवादितत्त्वबोधाद् **बुद्धः**। तथा बाह्या-ऽऽभ्यन्तरग्रन्थभेदनेन मुक्तत्वा**न्मुक्तः**। तथा प्राप्तव्यप्रकर्षप्राप्तेः परि सर्वप्रकारैर्निर्वृतः **परिनिर्वृतः**। संसारान्तकारित्वा**दन्तकृत्**। एकान्तेनैव शारीर-मानसदुःखप्रहाणात् सर्वदुःखप्रहीण इति। उक्तः क्षायिकः।

**से किं तं खओवसमिए? खओवसमिए दुविहे पण्णत्ते, तंजहा – खओवसमे य खओवसमनिप्फण्णे य**, तत्र क्षयोपशमः चतुर्णां घातिकर्मणां केवलज्ञानप्रतिबन्धकानां ज्ञानावरण-दर्शनावरण-मोहनीया-ऽन्तरायाणां क्षयोपशमः, **ण**मिति पूर्ववत्, इह चोदीर्णस्य क्षयः अनुदीर्णस्य च विपाकमधिकृत्योपशम इति गृह्यते। आह - औपशमिकोऽप्येवम्भूत एव, न, तत्रोपशमितस्य प्रदेशानुभवतोऽप्यवेदनाद् अस्मिंश्च वेदनादिति । अयं च क्षयोपशमः क्रियारूप एव। क्षयोपशमनिर्वृत्तस्त्वाभिनिबोधिकज्ञानादिलब्धेः परिणाम आत्मन एवेति, तथा चाह- **खओवसमिया आभिणिबोहियणाणलद्धी** इत्यादि सूत्रसिद्धमेव। नवरं **बालवीर्यं** मिथ्यादृष्टेरसंयतस्य, **पण्डितवीर्यं** सम्यग्दृष्टेः संयतस्य, **बालपण्डितवीर्यं** तु संयतासंयतस्य श्रावकस्य। **सेत्तं खओवसमिए**।

**से किं तं पारिणामिए** ? परिणमनं परिणामः, अपरित्यक्तपूर्वावस्थस्यैव तद्भावगमनमित्यर्थः, उक्तं च -

*परिणामो ह्यर्थान्तरगमनं न च सर्वथा ह्यवस्थानम्।*
*न च सर्वथा विनाशः परिणामस्तद्विदामिष्टः ॥१॥* [ ]

Jain Education International For Private & Personal Use Only www.jainelibrary.org

स एव पारिणामिक एव इत्युच्यते । सो य सादिअणादिभेदेण दुविहो । तत्र सादिः **जुण्णघय**मित्यादि जीर्णघृतादौ तद्भावस्य सादित्वात् सादिपारिणामिकता स्वभेदेष्वन्वयानुवृत्त्या सुखप्रतिपत्त्यर्थं जीर्णग्रहणम्, अन्यथा नवेष्वप्यविरोधः, तत्रापि कारणस्यैव तथा परिणतेः, अन्यथोत्पत्त्यभावादिति कृतमत्र प्रसङ्गेन। **अब्भकेण (अब्भाणि ?)** सामान्येन । **अब्भवृक्षकाः** तान्येव वृक्षाकाराणि । **सन्ध्या** पुद्गलपरिणाम एव । **गन्धर्वनगरा**दीनि प्रतीतान्येव। **यूपकाः** सन्ध्याच्छेदावरणरूपाः, उक्तं च -

*[२]संझाछेदावरणो तु जूवओ सुक्के [दिण] तिण्णि । [आवश्यकनि० गा० १३३५]*

**यक्षादीप्तका**नि अग्निपिशाचाः। **धूमिका** रूक्षा प्रविरला धूमाभा। **महिका** स्निग्धा घना च। **रजउद्घातः** रजस्वला दिशः। **चन्द्र-सूर्योपरागाः** राहुग्रहणानि। **चन्द्रपरिवेशादयः** प्रकटार्थाः । **कपिहसितानि** सहसादेव नभसि ज्वलद्भीमशब्दरूपाणि । **अमोघादयः** सूत्रसिद्धाः। नवरं वर्षधरादिषु सदा तद्भावेऽपि पुद्गलानामसंख्येयकालादूर्ध्वं तत्स्था[न]-स्थित्यभावात् सादिपरिणामतेति। अनादिप(पा)रिणामिकस्तु धर्मास्तिकायादिः, तद्भावस्य तेषामनादित्वादिति। शेषं सुगमं यावत् **सेत्तं पारिणामिए**।

**से किं तं सन्निवाइए** इत्यादि, सन्निपातः मेलकः, तेन निर्वृत्तः सान्निपातिकः। तथा चाह - **एतेसिं चे**त्यादि, अयं च भङ्गकरचनाप्रमाणतः सम्भवा-ऽसम्भवमनपेक्ष्य षड्विंशतिभङ्गकरूपः । इह च द्व्यादिसंयोगभङ्गकपरिणाम[३]प्रदर्शनं सूत्रम्-**तत्थ णं दस दुगसंयोगा** इत्यादि प्रकटार्थम् । तथाऽपरिज्ञातद्व्यादिसंयोगभङ्गकभावोत्कीर्त्तन-ज्ञापनार्थमिदं **तत्थ णं जे ते दस दुगसंजोगा ते णं इमे** इत्याद्युत्तानार्थमेव । अतः परं सान्निपातिकभङ्गोपदर्शनां सविस्तरामजानानः पृच्छति विनेयः-**कतरे से णामे उदइए** इत्यादि । आचार्य आह-**उदइए त्ति मणूसे** इत्यादि सूत्रसिद्धमेव । इह च यद्यप्यौदयिकौपशमिकमात्रनिर्वृत्तः असम्भवी, संसारिणां जघन्यतोऽप्यौदयिक-क्षायोपशमिक-पारिणामिकभावत्रयोपेतत्वात्, तथापि भङ्गकरचनामात्रदर्शनार्थत्वाददुष्टः, एवमन्योऽप्यसम्भवी वेदितव्य इति। अविरुद्धास्तु पञ्चदश एव सान्निपातिकभेदाः [४]तेऽनधिकृता अपि प्रदेशान्तरे उपयोगिन इति सान्निपातिकसाम्यान्निदर्श्यन्ते –

Jain Education International For Private & Personal Use Only www.jainelibrary.org

*ओदइय-खओवसमिय-पारिणामेक्केक्को गतिचउक्के वि।*
*खयजोगेण वि चउरो तदभावे तुवसमेणं पि ॥१॥*
*उवसमसेढी एक्को केवलिणो वि य तहेव सिद्धस्स।*
*अविरुद्धसन्निवादितभेदा एमेते पन्नरस ॥२॥* [ ]

औदयिक-क्षायोपशमिक-पारिणामिकनिष्पन्नः सान्निपातिक एकैको गतिचतुष्केऽपि, तद्यथा-उदए त्ति णेरइए खओवसमियाइं इंदियाइं [पारिणामिए जीवे। जया खइयं सम्मत्तं तदा ओदइय-खओवसम-खइय-पारिणामिकनिष्पन्नः सान्निपातिक एकैको गतिचतुष्केषु । तद्यथा-उदए त्ति णेरइए, खओवसमियाइं इंदियाइं,] खइयं सम्मत्तं, पारिणामिए जीवे। एवं तिर्यगादिष्वपि वाच्यम्, सन्ति चैतेष्वपि क्षायिकसम्यग्दृष्टयः, अधिकृतभङ्गसंख्याऽन्यथानुपपत्तेरिति भावनीयम्, *तदभावे* क्षायिकाभावे, चशब्दात् शेषत्रयभावे चौपशमिकेनापि चत्वार एव, उपशममात्रस्य गतिचतुष्टयेऽपि भावात्,

*ऊसरदेसं दड्ढेल्लयं च विज्झाति वणदवो पप्प।*
*इय मिच्छस्स अणुदए उवसमसम्मं लहइ जीवो ॥१॥*
*[विशेषावश्यकभा० २७३४ कल्पभा० १२२]*

अविशिष्योक्तत्वात्, तथा –

*उवसामगसेढिगतस्स होइ उवसामियं तु सम्मत्तं।*
*जो वा अकततिपुंजी अखवियमिच्छो लहइ सम्मं ॥१॥*
*[विशेषावश्यक भा० ५२९, २७३५, कल्पभा० ११८]*

इत्यत्र श्रेणिव्यतिरेकेण(णा?)विशिष्यैवोक्तत्वात्। अभिलापः पूर्ववत्। नवरं सम्यक्त्वस्थाने उवसन्ता कसाय त्ति वक्तव्यम्, एते चाष्टौ भङ्गकाः प्राक्तनाश्चत्वार इति द्वादश। उपशमश्रेण्याम् एको भङ्गस्तस्य मनुष्येष्वेव भावात्, अभिलापः पूर्ववत्, नवरं मनुष्यविषय एव। केवलिनश्चैक एव-उदए त्ति मणुस्से, खइयं सम्मत्तं, पारिणामिए जीवे। तथैव सिद्धस्य एक एव-खइयं सम्मत्तं, पारिणामिए जीवे। एवमेते त्रयो भङ्गाः प्रागुक्तद्वादशभङ्गसहिताः अविरुद्धसान्निपातिकभेदाः पञ्चदश भवन्ति। कृतं प्रसङ्गेन। **सेत्तं सन्निवातिए नाम**, योजना सर्वत्र कार्या। **सेतं छणामे**। गतं षण्णाम।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[हे० २३३-२५९] से किं तं छनामे** इत्यादि । अत्रौदयिकादयः षड् भावाः प्ररूप्यन्ते, तथा च सूत्रम् - **उदइए** इत्यादि। अत्राह - ननु नाम्नि प्रक्रान्ते तदभिधेयानामर्थानां भावलक्षणानां प्ररूपणमयुक्तमिति, नैतदेवम्, नाम-नामवतोरभेदोपचारात् तत्प्ररूपणस्याप्यदुष्टत्वात्, एवमन्यत्रापि यथासम्भवं वाच्यम् । तत्र ज्ञानावरणादीनामष्टानां प्रकृतीनामात्मीयात्मीयस्वरूपेण विपाकतोऽनुभवनमुदयः, स एवौदयिकः, अथवा यथोक्तेनैवोदयेन निष्पन्न **औदयिकः**, भाव इति सामर्थ्याद् गम्यते । उपशमनमुपशमः कर्मणोऽनुदयाक्षीणावस्था भस्मपटलावच्छन्नाग्निवत्, स एव **औपशमिकः**, तेन वा निर्वृत्त औपशमिकः । क्षयः कर्मणोऽपगमः, स एव तेन वा निर्वृत्तः **क्षायिकः** । कर्मणो यथोक्तौ क्षयोपशमावेव ताभ्यां वा निर्वृत्तः **क्षायोपशमिकः** दरविध्यातभस्मच्छन्नवह्निवत् । परिणमनं तेन तेन रूपेण वस्तूनां भवनं परिणामः, स एव तेन वा निर्वृत्तः **पारिणामिकः** । अनन्तरोक्तानां द्व्यादिभावानां मेलकः सन्निपातः, स एव तेन वा निर्वृत्तः सान्निपातिकः ।

तत्रामीषां प्रत्येकं स्वरूपनिरूपणार्थमाह - **से किं तं ओदइए** इत्यादि । औदयिको भावो द्विविधः - अष्टानां कर्मप्रकृतीना**मुदयस्तन्निष्पन्नश्च** । अयं चार्थः प्रकारद्वयेन व्युत्पत्तिकरणादादावेव दर्शितः । उदयनिष्पन्नः पुनरपि द्विविधः - जीवे उदयनिष्पन्नो **जीवोदयनिष्पन्नः**, अजीवे उदयनिष्पन्नो**ऽजीवोदयनिष्पन्नः** ।

तत्र जीवोदयनिष्पन्नस्योदाहरणानि - **णेरइए** इत्यादि। इदमुक्तं भवति - कर्मणामुदयेनैव सर्वेऽप्येते पर्याया जीवे निष्पन्नाः, तद्यथा - नारकस्तिर्यङ् मनुष्य इत्यादि । अत्राह - ननु यद्येवमपरेऽपि निद्रापञ्चक-वेदनीय-हास्यादयो बहवः कर्मोदयजन्या जीवे पर्यायाः सन्ति, किमिति नारकत्वादयः कियन्तोऽप्युपन्यस्ताः ? सत्यम्, उपलक्षणत्वादमीषामन्येऽपि सम्भविनो द्रष्टव्याः । अपरस्त्वाह - ननु कर्मोदयजनितानां नारकत्वादीनां भवत्विहोपन्यासो लेश्यास्तु कस्यचित् कर्मण उदये भवन्तीत्येतन्न प्रसिद्धं तत् किमितीह तदुपन्यासः ? सत्यम्, किन्तु योगपरिणामो लेश्याः, योगस्तु त्रिविधोऽपि कर्मोदयजन्य एव, ततो लेश्यानामपि तदुदयजन्यत्वं न विहन्यते । **अन्ये** तु मन्यन्ते कर्माष्टकोदयात् संसारस्थत्वा-ऽसिद्धत्ववल्लेश्यावत्त्वमपि भावनीयमित्यलं विस्तरेण। तदर्थिना तु **गन्धहस्तिवृत्ति**रनुसर्तव्येति। **सेत्तं जीवोदयनिप्फन्ने** त्ति निगमनम् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अथाजीवोदयनिष्पन्नं निरूपयितुमाह - **से किं त**मित्यादि। **ओरालियं वा सरीरं** ति विशिष्टाकारपरिणतं तिर्यङ्-मनुष्यदेहरूपमौदारिकं शरीरम्, **ओरालिअसरीरप्पओगे**त्यादि, **औदारिकशरीरप्रयोग[१]परिणमितं [२]वा द्रव्यम्,** औदारिकशरीरस्य प्रयोगो व्यापारस्तेन परिणमितं[३] स्वप्रायोग्यत्वाद् गृहीतं तत्तथा, तच्च वर्ण-गन्ध-रस-स्पर्शा-ऽऽनापानादिरूपं स्वत एवोपरिष्टाद् दर्शयिष्यति। **वा**शब्दौ परस्परसमुच्चये। एतद् द्वितयमप्यजीवे पुद्गलद्रव्य-लक्षणे औदारिकशरीरनामकर्मोदयेन निष्पन्नत्वादजीवोदयनिष्पन्न औदयिको भाव उच्यते। एवं वैक्रियशरीरादिष्वपि भावना कार्या। नवरं वैक्रियशरीरनामकर्माद्युदयजन्यत्वं यथास्वं वाच्यमिति। औदारिकादिशरीरप्रयोगेण यत् परिणम्यते द्रव्यं तत् स्वत एव दर्शयितुमाह - **पओगपरिणामिए वण्णे** इत्यादि, पञ्चानामपि शरीराणां प्रयोगेण व्यापारेण परिणमितं गृहीतं वर्णादिकं शरीरे वर्णादिसम्पादकं द्रव्यमिदं द्रष्टव्यम्। उपलक्षणत्वाच्च वर्णादीनामपरमपि यच्छरीरे संभवत्यानापानादि तत् स्वत एव दृश्यमिति। अत्राह - ननु यथा नारकत्वादयः पर्याया जीवे भवन्तीति जीवोदयनिष्पन्ने औदयिके पठ्यन्ते, एवं शरीराण्यपि जीव एव भवन्ति, अतस्तान्यपि तत्रैव पठनीयानि स्युः, किमित्यजीवोदयनिष्पन्नेऽधीयन्ते ? अस्त्येतत्, किन्त्वौदारिकादिशरीरनामकर्मोदयस्य मुख्यतया शरीरपुद्गलेष्वेव विपाकदर्शनात् तन्निष्पन्न औदयिको भावः शरीरलक्षणेऽजीव एव प्राधान्याद् दर्शित इत्यदोषः। **सेत्त**मित्यादि निगमनत्रयम्।

उक्तो द्विविधोऽप्यौदयिकः, अथौपशमिकं निर्दिदिक्षुराह - **से किं तं उवसमिए** इत्यादि। अयमपि द्विविधः - **उपशमस्तन्निष्पन्नश्च**। तत्र **उवसमे णं** ति, **ण**मिति वाक्यालङ्कारे, उपशमः पूर्वोक्तस्वरूपो **मोहनीय**स्यैव कर्मणोऽष्टाविंशतिभेदभिन्नस्योपशमश्रेण्यां द्रष्टव्यः, न शेषकर्मणाम्, *मोहस्सेवोवसमो* [ ] इति वचनात्, उपशम एवौपशमिकः। उपशमनिष्पन्ने तु **उवसंतकोहे** इत्यादि, इहोपशान्तक्रोधादयो व्यपदेशाः क्वापि **वाचना[४]विशेषे** कियन्तोऽपि दृश्यन्ते, तत्र मोहनीयस्योपशमेन दर्शनमोहनीयं चारित्रमोहनीयं चोपशान्तं भवति, तदुपशान्ततायां च ये व्यपदेशाः संभवन्ति ते सर्वेऽप्यत्रादुष्टा न शेषा इति भावनीयम्। **सेत्त**मित्यादि निगमनद्वयम्।

निर्दिष्टो द्विविधोऽप्यौपशमिकः, अथ क्षायिकमाह - **से किं त**मित्यादि। एषोऽपि

Jain Education International For Private & Personal Use Only www.jainelibrary.org

द्विधा - **क्षयस्तन्निष्पन्नश्च**, तत्र **खए णं** ति, **ण**मिति पूर्ववत्, क्षयोऽष्टानां ज्ञानावरणादिकर्मप्रकृतीनां सोत्तरभेदानां सर्वथाऽपगमलक्षणः, [५]स एव स्वार्थिके[६]कण्प्रत्यये क्षायिकः । क्षयनिष्पन्नस्तु तत्फलरूपः । तत्र च सर्वेष्वपि कर्मसु सर्वथा क्षीणेषु ये पर्यायाः संभवन्ति तान् क्रमेण दिदर्शयिषुर्ज्ञानावरणक्षये तावद् ये भवन्ति तानाह - **उप्पण्णणाण-दंसणे**त्यादि । **उत्पन्ने** श्यामतापगमेनादर्शमण्डलप्रभावत् सकलतदावरणापगमादभिव्यक्ते **ज्ञान-दर्शने** धरति यः स तथा । **अरहा** अविद्यमानरहस्यः, नास्य गोप्यं किञ्चिदस्तीति भावः । आवरणशत्रुजेतृत्वा**ज्जिनः** । केवलं सम्पूर्णं ज्ञानमस्यास्तीति **केवली** । **क्षीणमाभिनिबोधिकज्ञानावरणं** यस्य स तथा । एवं नेयं यावत् **क्षीणकेवलज्ञाना-वरणः** । अविद्यमानमावरणं यस्य स विशुद्धाम्बरे श्वेतरोचिरिवा**ऽनावरणः** । तथा निर्गत आगन्तुकादप्यावरणाद् राहुरहितरोहिणीशवदेव **निरावरणः** । तथा क्षीणमेकान्तेनापुनर्भावितया आवरणमस्येत्यपाकृतमलावरणजात्यमणिवत् **क्षीणावरणः** । निगमयन्नाह - ज्ञानावरणीयेन कर्मणा विविधम् अनेकैः प्रकारैः प्रकर्षेण मुक्तो **ज्ञानावरणीयकर्मविप्रमुक्तः** । एकार्थिकानि वा एतान्यनावरणादिपदानि, अन्यथा वा नयमतभेदेन सुधिया भेदो वाच्यः । तदेवमेतानि ज्ञानावरणीयक्षयापेक्षाणि नामान्युक्तानि, अथ दर्शनावरणीयक्षयापेक्षाणि तान्येवाह - **केवलदंसी**त्यादि, केवलेन क्षीणावरणेन दर्शनेन पश्यतीति **केवलदर्शी** । क्षीणदर्शनावरणत्वादेव सर्वं पश्यतीति **सर्वदर्शी**त्येवं निद्रापञ्चक-दर्शनावरणचतुष्कक्षयसम्भवीन्यपराण्यपि नामान्यत्र पूर्वोक्तानुसारेण व्युत्पादनीयानि । नवरं निद्रापञ्चकस्वरूपमिदम् —

*सुहपडिबोहो निद्दा दुहपडिबोहो य निद्दनिद्दा य ।*
*पयला होइ ठियस्सा पयलापयला य चंकमओ ॥१॥* [निशीथभा० १३३]
*अइसंकिलिट्ठकम्माणुवेयणे होइ थीणगिद्धी उ ।*
*महनिद्दा दिणचिंतियवावारपसाहणी पायं ॥२॥* [ ]

अपरं च - अनावरणादिशब्दाः पूर्वं ज्ञानावरणाभावापेक्षाः प्रवृत्ताः, अत्र तु दर्शनावरणापगमापेक्षा इति विशेषः । वेदनीयं द्विधा - प्रीत्युत्पादकं सातमप्रीत्युत्पादकं त्वसातम्, तत्क्षयापेक्षास्तु **क्षीणसातवेदनीयादयः** शब्दाः सुखोन्नेयाः । नवर**मवेदनो** वेदनारहितः, स च व्यवहारतोऽल्पवेदनोऽप्युच्यते, ततः प्राह - **निर्वेदनः** अपगतसर्ववेदनः

Jain Education International For Private & Personal Use Only www.jainelibrary.org

। स च पुनः कालान्तरभाविवेदनोऽपि स्यादित्याह- **क्षीणवेदनः** अपुनर्भाविवेदनः। निगमयन्नाह- **सुभासुभवेअणिज्जकम्मविप्पमुक्के** त्ति। मोहनीयं द्विधा- दर्शनमोहनीयं च चारित्रमोहनीयं च। तत्र दर्शनमोहनीयं त्रिधा- सम्यक्त्व-मिश्र-मिथ्यात्वभेदात्, चारित्रमोहनीयं तु द्विधा- क्रोधादिकषाय-हास्यादिनोकषायभेदात् । तत एतत्क्षयसम्भवीनि सूत्रलिखितानि **क्षीणक्रोधा**दीनि नामानि सुबोधान्येव। नवरं माया-लोभौ प्रेम, क्रोध-मानौ तु द्वेषः। तथा **अमोहः** अपगतमोहनीयकर्मा। स च व्यावहारिकैरल्पमोहोदयोऽपि निर्दिश्यते, अत आह - निर्गतो मोहा**न्निर्मोहः** । स च पुनः कालान्तरभाविमोहोदयोऽपि स्यादुपशान्तमोहवत्, तद्व्यवच्छेदार्थमाह- **क्षीणमोहः**, अपुनर्भाविमोहोदय इत्यर्थः । निगमयति- **मोहनीयकर्मविप्रमुक्त** इति। नारकाद्यायुष्कभेदेनायुश्चतुर्द्धा, तत्क्षयसमुद्भवानि च नामानि सुगमानि । नवरमविद्यमानायुष्को**ऽनायुष्कः** । तद्भविकायुःक्षयमात्रेऽपि स्यादत उक्तं **निरायुष्कः** । स च शैलेशीं गतः किञ्चिदवतिष्ठमानायुःशेषोऽप्युपचारतः स्यादत उक्तं **क्षीणायुरि**ति। **आयुःकर्मविप्रमुक्त** इति निगमनम्।

नामकर्म सामान्येन शुभाशुभभेदतो द्विविधम्, विशेषतस्तु गति-जाति-शरीराङ्गोपाङ्गादिभेदाद् द्विचत्वारिंशदादिभेदं स्थानान्तरादवसेयम् । तत्रेह तत्क्षयभावीनि कियन्तिचिन्नामानि अभिधत्ते- **गइ-जाइ-सरीरे**त्यादि, इह प्रक्रमान्नामशब्दो यथासम्भवं द्रष्टव्यः । ततश्च नारकादिगतिचतुष्टयहेतुभूतं गतिनाम । एकेन्द्रियादिजातिपञ्चककारणं जातिनाम । औदारिकादिशरीरपञ्चकनिबन्धनं शरीरनाम । औदारिक-वैक्रिया-ऽऽहारकशरीरत्रयाङ्गोपाङ्गनिर्वृत्तिकारणमङ्गोपाङ्गनाम । काष्ठादीनां लाक्षादिद्रव्यमिव शरीरपञ्चकपुद्गलानां परस्परं बन्धहेतुर्बन्धननाम । तेषामेव पुद्गलानां परस्परं बन्धनार्थमन्योन्यसांनिध्यलक्षणसङ्घातकारणं काष्ठसन्निकर्षकृत् तथाविधकर्मकर इव सङ्घातनाम । कपाटादीनां लोहपट्टादिरिवौदारिकशरीरास्थ्नां परस्परबन्धविशेषनिबन्धनं संहनननाम। एतच्च बन्धनादिपदत्रयं *क्वचिद्वाचनान्तरे* न दृश्यत एव। **बोन्दि**स्तनुः शरीरमिति पर्यायाः, अनेकाश्च ता नानाभवेषु बह्वीनां तासां भावात् तस्मिन्नेव वा भवे जघन्यतोऽप्यौदारिक-तैजस-कार्मणलक्षणानां तिसृणां भावात् बोन्द्यश्चानेकबोन्द्यः, तासां **वृन्दं** पटलम्, तदेव पुद्गलसङ्घातरूपत्वात् सङ्घातो**ऽनेकबोन्दिवृन्दसङ्घातः**। गत्यादीनां च द्वन्द्वे **गति-जाति-**

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**शरीराङ्गोपाङ्ग-बन्धन-संघात-संहनननानेकबोन्दिवृन्दसङ्घाता**स्तैर्विप्रमुक्तो यः स तथा। प्राक्तनेन **शरीर**शब्देन शरीराणां निबन्धनं नामकर्म गृहीतम्, बोन्दिवृन्दग्रहणेन तु तत्कार्यभूतशरीराणामेव ग्रहणमिति विशेषः। **क्षीणम्** अपगतं तीर्थकर-शुभ-सुभग-सुस्वरा-ऽऽदेय-यशःकीर्त्यादिकं शुभं नाम यस्य स तथा। **क्षीणम्** अपगतं नरकगत्यशुभ-दुर्भग-दुःस्वरा-ऽनादेया-ऽयशःकीर्त्यादिकमशुभं नाम यस्य स तथा। **अनाम-निर्नाम-क्षीणनामा**दिशब्दास्तु पूर्वोक्तानुसारेण भावनीयाः। **शुभाशुभनामविप्रमुक्त** इति निगमनम्। गोत्रं द्विधा- उच्चैर्गोत्रं नीचैर्गोत्रं च। ततस्तत्क्षयसम्भवीनि **क्षीणगोत्रा**दि-नामान्युक्तानुसारतः सुखावसेयान्येव। दानान्तरायादिभेदादन्तरायं पञ्चधा, तत्क्षयनिष्पन्नानि च **क्षीणदानान्तराया**दिनामान्यविषमाण्येव। तदेवमेकैकप्रकृतिक्षयनिष्पन्ननामानि प्रत्येकं निर्दिश्य साम्प्रतं पुनः समुदितप्रकृत्यष्टकक्षयनिष्पन्नानि सामान्यतो यानि नामानि भवन्ति तान्याह- **सिद्धे** इत्यादि, सिद्धसमस्तप्रयोजनत्वात् **सिद्धः**। बोधात्मकत्वादेव **बुद्धः**। बाह्या-ऽऽभ्यन्तर-ग्रन्थबन्धनमुक्तत्वात् **मुक्तः**। **परि** समन्तात् सर्वप्रकारैः **निर्वृतः** सकलसमीहितार्थ-लाभप्रकर्षप्राप्तत्वात् शीतीभूतः **परिनिर्वृतः**। समस्तसंसारान्तकृत्त्वाद**न्तकृ**दिति। एकान्तेनैव शारीर-मानसदुःखप्रहाणात् **सर्वदुःखप्रहीण** इति। **सेत्त** मित्यादि निगमनद्वयम्।

उक्तो द्विविधोऽपि क्षायिकः, अथ क्षायोपशमिकमाह - **से किं त**मित्यादि। असावपि द्विस्वरूपः - **क्षयोपशमस्तन्निष्पन्नश्च**। तत्र विवक्षितज्ञानादिगुणविघातकस्य कर्मण उदय-प्राप्तस्य क्षयः सर्वथाऽपगमः, अनुदीर्णस्य तु तस्यैवोपशमो विपाकत उदयाभाव इत्यर्थः, ततश्च क्षयोपलक्षित उपशमः **क्षयोपशमः**। ननु चौपशमिकेऽपि यदुदयप्राप्तं तत् सर्वथा क्षीणं शेषं तु न क्षीणं नाप्युदयप्राप्तमतस्तस्योपशम उच्यत इत्यनयोः कः प्रतिविशेषः ? उच्यते, क्षयोपशमावस्थे कर्मणि विपाकत एवोदयो नास्ति प्रदेशतस्त्वस्त्येव, उपशान्तावस्थायां तु प्रदेशतोऽपि नास्त्युदय इत्येतावता विशेषः। तत्र **चतुर्णां घातिकर्मणां** केवलज्ञानप्रतिबन्धकानां ज्ञानावरण-दर्शनावरण-मोहनीया-ऽन्तरायाणां यः **क्षयोपशम**रूपः क्षायोपशमिको भावः। **ण**मिति पूर्ववत्, **तद्यथे**त्यादिना स्वत एव घातिकर्माणि विवृणोति। शेषकर्मणां तु क्षयोपशमो नास्त्येव, निषिद्धत्वात्। **सेत्त**मित्यादि निगमनम्।

तेन च क्षयोपशमेनोक्तस्वरूपेण निष्पन्नः क्षायोपशमिको भावोऽनेकधा भवति,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तमाह- **खाओवसमिता आभिणिबोहियणाणलद्धी**त्यादि, आभिनिबोधिकज्ञानं मतिज्ञानं तस्य लब्धिः योग्यता स्वावरणकर्मक्षयोपशमसाध्यत्वात् क्षायोपशमिकी, एवं तावद् वक्तव्यं यावन्मनःपर्यायज्ञानलब्धिः, केवलज्ञानलब्धिस्तु स्वावरणकर्मणः क्षय एवोत्पद्यत इति नेहोक्ता। कुत्सितं ज्ञानमज्ञानम्, मतिरेव अज्ञानं **मत्यज्ञानम्**, कुत्सितत्वं चेह मिथ्यादर्शनोदयदूषितत्वात् द्रष्टव्यम्, दृष्टा च कुत्सार्थे नञो वृत्तिः, यथा कुत्सितं शीलमशीलमिति, **मत्यज्ञानस्य लब्धिः** योग्यता, साऽपि स्वावरणक्षयोपशमेनैव निष्पद्यते। एवं **श्रुताज्ञानलब्धि**रपि वाच्या। **भङ्गः** प्रकारो भेद इत्यर्थः, स चेह प्रक्रमादवधेरेव गृह्यते, विरूपः कुत्सितो भङ्गो **विभङ्गः**, स एवार्थपरिज्ञानात्मकत्वात् ज्ञानं **विभङ्गज्ञानम्**, मिथ्यादृष्टिदेवादेरवधिर्विभङ्गज्ञानमुच्यते इत्यर्थः। इह च विशब्देनैव कुत्सितार्थप्रतीतेर्न नञो निर्देशः, तस्य **लब्धिः** योग्यता, साऽपि स्वावरणक्षयोपशमेनैव प्रादुरस्ति। एवं मिथ्यात्वादिकर्मणः क्षयोपशमसाध्याः शेषा अपि सम्यग्दर्शनादिलब्धयो यथासम्भवं भावनीयाः। नवरं **बाला** अविरताः, **पण्डिताः** साधवः, **बालपण्डिता**स्तु देशविरताः, तेषां यथास्वं **वीर्यलब्धि**र्वीर्यान्तरायकर्मक्षयोपशमाद्भावनीया, इन्द्रियाणि चेह लब्ध्युपयोगरूपाणि भावेन्द्रियाणि गृह्यन्ते, तेषां च **लब्धिः** योग्यता मतिश्रुतज्ञानचक्षुरचक्षुर्दर्शनावरण-क्षयोपशमजत्वात् क्षायोपशमिकीति भावनीयम्। **आचार**धरत्वादिपर्यायाणां च श्रुतज्ञानप्रभवत्वात्, तस्य च तदावरणकर्मक्षयोपशमसाध्यत्वा**दाचार**धरादिशब्दा इह पठ्यन्ते इति प्रतिपत्तव्यमिति। **सेत्त**मित्यादि निगमनद्वयम्।

अथ पारिणामिकं भावमाश्रित्याह - **से किं त**मित्यादि। सर्वथा अपरित्यक्तपूर्वावस्थस्य यद्रूपान्तरेण भवनं परिणमनं स परिणामः। तदुक्तम् —

*परिणामो ह्यर्थान्तरगमनं न च सर्वथा व्यवस्थानम्।*
*न च सर्वथा विनाशः परिणामस्तद्विदामिष्टः ॥१॥ [ ] इति।*

स एव तेन वा निर्वृत्तः **पारिणामिकः**। सोऽपि **द्विविधः सादिरनादिश्च**। तत्र सादिपारिणामिको **जुण्णसुरे**त्यादि जीर्णसुरादीनाम्, जीर्णत्वपरिणामस्य सादित्वात् सादिपारिणामिकता। इह चोभयावस्थयोरप्यनुगतस्य सुराद्रव्यस्य नव्यतानिवृत्तौ जीर्णतारूपेण भवनं परिणाम इत्येवं सुखप्रतिपत्त्यर्थं जीर्णानां सुरादीनां ग्रहणम्, अन्यथा नवेष्वपि तेषु सादिपारिणामिकता

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अस्त्येव, कारणद्रव्यस्यैव नूतनसुरादिरूपेण परिणतेः, अन्यथा कार्यानुत्पत्तिप्रसङ्गात्, अत्र बहु वक्तव्यं तत्तु नोच्यते, स्थानान्तरवक्तव्यत्वादस्यार्थस्येति। **अभ्राणि** सामान्येन प्रतीतान्येव। **अभ्रवृक्षास्तु** तान्येव वृक्षाकारपरिणतानि। **सन्ध्या** काल-नीलाद्यभ्रपरिणतिरूपा प्रतीतैव। **गन्धर्वनगराण्य**पि सुरसद्म-प्रासादोपशोभितनगराकारतया तथाविधनभःपरिणत-पुद्गलराशिरूपाणि प्रतीतान्येव। **उल्कापाता** अपि व्योमसम्मूर्च्छितज्वलनपतनरूपाः प्रसिद्धा एव। **दिग्दाहा**स्तु अन्यतरस्यां दिशि छिन्नमूलज्वलनज्वालाकरालिताम्बरप्रतिभासरूपाः प्रतिपत्तव्याः। **गर्जितविद्युन्निर्घाताः** प्रतीताः। **यूपका**स्तु *संझाच्छेयावरणो य जूयओ सुक्के दिण तिन्नी*[*आवश्यकनि० १३३५*]ति गाथादलप्रतिपादितस्वरूपा **आवश्यका**दवसेयाः। **यक्षादीप्तकानि** नभोदृश्यमानाग्निपिशाचाः। **धूमिका** रूक्षा प्रविरला धूमाभा प्रतिपत्तव्या। **महिका** तु स्निग्धा घना, स्निग्धत्वादेव भूमौ पतिता सार्द्रतृणादिदर्शनद्वारेण लक्ष्यते। **रजउद्घातो** रजस्वला दिशः। **चन्द्र-सूर्योपरागा** राहुग्रहणानि, बहुवचनं चात्रार्द्धतृतीयद्वीपसमुद्रवर्तिचन्द्रार्काणां युगपदुपरागभावाद् मन्तव्यमिति **चूर्णिकारः**। **चन्द्र-सूर्यपरिवेषाः** चन्द्रादित्ययोः परितो वलयाकारपुद्गलपरिणतिरूपाः सुप्रतीता एव। **प्रतिचन्द्रः** उत्पातादिसूचको द्वितीयश्चन्द्रः। एवं **प्रतिसूर्यो**ऽपि। **इन्द्रधनुः** प्रसिद्धमेव। **उदकमत्स्या**स्तु इन्द्रधनुःखण्डान्येव। **कपिहसितानि** अकस्मान्नभसि ज्वलद्भीमशब्दरूपाणि। **अमोघाः** सूर्यबिम्बादधः कदाचिदुपलभ्यमानशकटोर्द्धिसंस्थितश्यामादिरेखाः। **वर्षाणि** भरतादीनि। **वर्षधरा**स्तु हिमवदादयः। **पातालाः** पातालकलशाः। शेषास्तु **ग्रामा**दयः प्रसिद्धा एव। अत्राह- ननु वर्षधरादयः शाश्वतत्वात् न कदाचित् तद्भावं मुञ्चन्ति, तत् कथं सादिपारिणामिकभाववर्तित्वं तेषाम्, ? नैतदेवम्, तदाकारमात्रतयैव हि तेऽवतिष्ठमानाः शाश्वता उच्यन्ते, पुद्गलास्त्वसङ्ख्येयकालादूर्ध्वं न तेषु त एवावतिष्ठन्ते, किन्त्वपरापरे तद्भावेन परिणमन्ति तावत्कालादूर्ध्वं पुद्गलानामेकपरिणामेनावस्थितेः प्रागेव निषिद्धत्वादिति सादिपारिणामिकता न विरुध्यते। अनादिपारिणामिके तु धर्मास्तिकायादयः, तेषां तद्रूपतया अनादिकालात् परिणतेः। **वाचनान्तराण्य**पि सर्वाण्युक्तानुसारतो भावनीयानि। **सेत**मित्यादि निगमनद्वयम्।

उक्तः पारिणामिकः, अथ सान्निपातिकं निर्दिशति - **से किं त**मित्यादि। सन्निपातः

Jain Education International For Private & Personal Use Only www.jainelibrary.org

एषामेवौदयिकादिभावानां द्व्यादिमेलापकः, स एव तेन वा निर्वृत्तः **सान्निपातिकः**। तथा चाह - **एएसिं चेवे** त्यादि। एषामौदयिकादीनां पञ्चानां भावानां द्विक-त्रिक-चतुष्क-पञ्चकसंयोगैर्ये षड्विंशतिर्भङ्गाः भवन्ति, ते सर्वेऽपि सान्निपातिको भाव इत्युच्यते। एतेषु मध्ये जीवेषु नारकादिषु षडेव भङ्गाः सम्भवन्ति, शेषास्तु विंशतिर्भङ्गका रचनामात्रेणैव भवन्ति, न पुनः क्वचित् सम्भवन्ति, अतः प्ररूपणामात्रतयैव ते अवगन्तव्याः, एतत् सर्वं पुरस्ताद् व्यक्तीकरिष्यते, कियन्तः पुनस्ते द्व्यादिसंयोगाः प्रत्येकं भवन्ति ? इत्याह - **तत्थ णं दस दुगसंजोगा** इत्यादि, पञ्चानामौदयिकादिपदानां दश द्विकसंयोगाः, दशैव च त्रिकसंयोगाः पञ्च चतुःसंयोगाः, एकस्तु पञ्चकसंयोगः संपद्यत इति सर्वेऽपि षड्विंशतिः।

तत्र के पुनस्ते दश द्विकसंयोगा इति जिज्ञासायां प्राह - **तत्थ णं जे ते दस दुगसंयोगा ते णं इमे** इत्यादि।

नामाधिकारादित्थमाह - **अस्ति** तावत् सन्निपातिकभावान्तर्वर्ति **नाम**, विभक्तिलोपादौदयिकौपशमिकलक्षणभावद्वयनिष्पन्नमित्येको भङ्गः, एवमन्येनाप्युपरितन-भावत्रयेण सह संयोगादौदयिकेन चत्वारो द्विकयोगा लब्धाः, ततस्तत्परित्यागे औपशमिक-स्योपरितनभावत्रयेण सह चारणायां लब्धास्त्रयः, तत्परिहारे क्षायिकस्योपरितनभाव-द्वयमीलनायां लब्धौ द्वौ, ततस्तं विमुच्य क्षायोपशमिकस्य पारिणामिकमीलने लब्ध एक इति सर्वेऽपि दश।

एवं सामान्यतो द्विकसंयोगभङ्गकेषु दर्शितेषु विशेषतस्तत्स्वरूपमजानन् विनेयः पृच्छति - **कतरे से णामे उदइए** ? इत्यादि। अत्रोत्तरम् - **उदए त्ति मणूसे** इत्यादि, औदयिके भावे मनुष्यत्वं मनुष्यगतिरिति तात्पर्यम्, उपलक्षणमात्रं चेदम्, तिर्यगादिगतिजातिशरीरनामादिकर्मणामप्यत्र सम्भवात्। उपशान्तास्तु कषाया औपशमिके भाव इति गम्यते, अत्राप्युदाहरणमात्रमेतत्, दर्शनमोहनीय-नोकषायमोहनीययो-रप्यौपशमिकत्वसम्भवात्। एतन्निगमयति - **एस णं से णामे**[1] **उदइए उवसमनिप्फण्णे** त्ति, **ण**मिति वाक्यालङ्कारे, एतत्तन्नाम यदुद्दिष्टं प्रागौदयिकौपशमिकभावद्वयनिष्पन्नमिति प्रथमद्विकयोगभङ्गकव्याख्यानम्। अयं च द्विकयोगविवक्षामात्रत एव संपद्यते, न पुनरीदृशो भङ्गः क्वचिज्जीवे संभवति। तथाहि — यस्यौदयिकी मनुष्यगतिरौपशमिकाः कषाया भवन्ति

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तस्य क्षायोपशमिकानीन्द्रियाणि पारिणामिकं जीवत्वं कस्यचित् क्षायिकं सम्यक्त्वमित्येतदपि संभवति, तत् कथमस्य केवलस्य सम्भवः ? एवमेतद्व्याख्यानुसारेण शेषा अपि व्याख्येयाः, केवलं क्षायिक-पारिणामिकभावद्वयनिष्पन्नं नवमभङ्गं विहायापरेऽसम्भविनो द्रष्टव्याः। नवमस्तु सिद्धस्य संभवति, तथाहि - क्षायिके सम्यक्त्व-ज्ञाने पारिणामिकं तु जीवत्वमित्येतदेव भावद्वयं तस्यास्ति नापरः । तस्मादयमेकः सिद्धस्य संभवति, शेषास्तु नव द्विकयोगाः प्ररूपणामात्रमिति स्थितम्। अन्येषां हि संसारिजीवानामौदयिकी गतिः क्षायोपशमिकानीन्द्रियाणि पारिणामिकं तु जीवत्वमित्येतद् भावत्रयं जघन्यतोऽपि लभ्यत इति कथं तेषु द्विकयोग-सम्भवः ? इति भावः।

त्रिकयोगान्निर्दिदिक्षुराह - **तत्थ णं जे ते दस तिगसंजोगा ते णं इमे** इत्यादि। एतेऽप्यौदयिकौपमिशमिक-क्षायिक-क्षायोपशमिक-पारिणामिकभावपञ्चकं भूम्यादावालिख्य तत आद्यभावद्वयस्योपरितनभावत्रयेण सह चारणायां लब्धास्त्रयः इत्यादिक्रमेण दशापि भावनीयाः। एतानेव स्वरूपतो विवरीषुराह - **कयरे से णामे उदइए उवसमिए** इत्यादि । व्याख्यापि पूर्वानुसारतोऽत्रापि कर्तव्या । नवरमत्रौदयिक-क्षायिक-पारिणामिकभावत्रयनिष्पन्नः पञ्चमो भङ्गः केवलिनः संभवति। तथाहि - औदयिकी मनुष्यगतिः, क्षायिकाणि ज्ञान-दर्शन-चारित्राणि, पारिणामिकं तु जीवत्वमित्येते त्रयो भावास्तस्य भवन्ति। औपशमिकस्त्विह नास्ति, मोहनीयाश्रयत्वेन तस्योक्तत्वात्, मोहनीयस्य च केवलिन्यसम्भवात्, तथा क्षायोपशमिकोऽपि अत्रापास्य एव, क्षायोपशमिकानामिन्द्रियादिपदार्थानामस्यासम्भवात्, *अतीन्द्रियाः केवलिनः* [ ] इत्यादिवचनात्, तस्मात् पारिशेष्याद्यथोक्तभावत्रयनिष्पन्नः पञ्चमो भङ्गः केवलिनः सम्भवति। षष्ठस्त्वौदयिक-क्षायोपशमिक-पारिणामिकभावनिष्पन्नो नारकादिगतिचतुष्टयेऽपि संभवति । तथाहि - औदयिकी अन्यतरा गतिः, क्षायोपशमिकानीन्द्रियाणि, पारिणामिकं जीवत्वमित्येवमेतद् भावत्रयं सर्वास्वपि गतिषु जीवानां प्राप्यत इति । शेषास्त्वष्टौ त्रिकयोगाः प्ररूपणामात्रम्, क्वाप्यसम्भवादिति भावनीयम्।

चतुष्कसंयोगान्निर्दिशन्नाह - **तत्थ णं जे ते पंच चउक्कसंजोगा** इत्यादि । भङ्गकरचना अकृच्छ्रावसेयैव। इदानीं तानेव पञ्च भङ्गान् व्याचिख्यासुराह - **कयरे से नामे**

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**उदइए** इत्यादि, भावना पूर्वाभिहितानुगुण्येन कर्तव्या । नवरमत्रौदयिकौपशमिक-क्षायोपशमिकपारिणामिकभावनिष्पन्नस्तृतीयभङ्गो गतिचतुष्टयेऽपि संभवति । तथाहि - औदयिकी अन्यतरा गतिः, नारकतिर्यग्देवगतिषु प्रथमसम्यक्त्वलाभकाले एव मनुष्यगतौ तु तत्रोपशमश्रेण्यां चौपशमिकं सम्यक्त्वम्, क्षायोपशमिकानीन्द्रियाणि, पारिणामिकं जीवत्वमित्येवमयं भङ्गकः सर्वासु गतिषु लभ्यते। यत्त्विह सूत्रे प्रोक्तम् **उदए त्ति मणूसे उवसंता कसाय** त्ति तत्[१०] मनुष्यगत्यपेक्षयैव द्रष्टव्यम्, मनुष्यत्वोदयस्योपशमश्रेण्यां कषायोपशमस्य च तस्यामेव भावाद् अस्य चोपलक्षणमात्रत्वादिति। एवमौदयिक-क्षायिक-क्षायोपशमिक-पारिणामिकभावनिष्पन्नश्चतुर्थभङ्गोऽपि चतसृष्वपि गतिषु संभवति । भावना त्वनन्तरोक्ततृतीयभङ्गकवदेव कर्तव्या, नवरमौपशमिकसम्यक्त्वस्थाने क्षायिकसम्यक्त्वं वाच्यम्, अस्ति च क्षायिकसम्यक्त्वं सर्वास्वपि गतिषु, नारकतिर्यग्देवगतिषु पूर्वप्रतिपन्नस्यैव मनुष्यगतौ तु पूर्वप्रतिपन्नस्य प्रतिपद्यमानकस्य च तस्यान्यत्र प्रतिपादितत्वादिति। तस्मादत्राप्येतौ द्वौ भङ्गकौ सम्भविनौ, शेषास्तु त्रयः संवृतिमात्रम्, तद्रूपेण वस्तुन्यसम्भवादिति।

साम्प्रतं पञ्चकसंयोगमेकं प्ररूपयन्नाह - **तत्थ णं जे से एक्के पंचकसंजोगे** इत्यादि। अयं च सविवरणः सुगम एव, केवलं क्षायिकः सम्यग्दृष्टिः सन् यः उपशमश्रेणीं प्रतिपद्यते तस्यायं भङ्गकः संभवति, नान्यस्य, समुदितभावपञ्चकस्यास्य तत्रैव भावादिति परमार्थः। तदेवमेको द्विकसंयोगभङ्गको द्वौ द्वौ त्रिकयोग-चतुष्कयोगभङ्गकावेकस्त्वयं पञ्चकसंयोग-भङ्गक इत्येते षड् भङ्गका अत्र सम्भविनः प्रतिपादिताः, शेषास्तु विंशतिः संयोगोत्थानमात्रतयैव प्ररूपिता इति स्थितम्। एतेषु च षट्सु भङ्गकेषु मध्ये एकस्त्रिकसंयोगो द्वौ चतुष्कसंयोगावित्येते त्रयोऽपि प्रत्येकं चतसृष्वपि गतिषु संभवन्तीति निर्णीतम्, अतो गतिचतुष्टयभेदात् ते किल द्वादश विवक्ष्यन्ते, ये तु शेषा द्विकयोग-त्रिकयोग-पञ्चकयोगलक्षणास्त्रयो भङ्गाः सिद्ध-केवल्युपशान्तमोहानां यथाक्रमं निर्णीताः, ते यथोक्तैकैकस्थानसम्भवित्वात् त्रय एवेत्यनया विवक्षयाऽयं सान्निपातिको भावः स्थानान्तरे पञ्चदशविध उक्तो द्रष्टव्यः । यदाह - *अविरुद्धसन्निवाइयभेया*[११] *एमेते पण्णरस*[ ] त्ति । **से त्तं सण्णिवाइए** त्ति निगमनम् । उक्तः सान्निपातिको भावः, तद्भणने चोक्ताः षडपि भावाः, ते च तद्वाचकैर्नामभिर्विना प्ररूपयितुं न शक्यन्त इति तद्वाचकान्यौदयिकादीनि नामान्यप्युक्तानि । एतैश्च षड्भिरपि

धर्मास्तिकायादेः समस्तस्यापि वस्तुनः सङ्ग्रहात् षट्प्रकारं सत् सर्वस्यापि वस्तुनो नाम षड्नामेत्यनया दिशा सर्वमिदं भावनीयम्। **सेत्तं छनामे** त्ति निगमनम्।

**[सू० २६०] [१] से किं तं सत्तनामे ? सत्तनामे सत्त सरा पण्णत्ता। तंजहा —**

**सज्जे १ ,रिसभे २, गंधारे ३, मज्झिमे ४, पंचमे सरे ५।**
**धे[१]वए ६, चेव णेसाए ७, सरा सत्त वियाहिया ॥२५॥**

**[२] एएसि णं सत्तण्हं सराणं सत्त सरट्ठाणा पण्णत्ता। तंजहा -**

**सज्जं च अग्गजीहाए १, उरेण रिसहं सरं २।**
**कंठु[२]ग्गतेण गंधारं ३, मज्झजीहाए मज्झिमं ४ ॥२६॥**
**नासाए पंच[३]मं बूया ५, दंतोट्ठे[४]ण य धेवतं ६।**
**भ[५]मुहक्खेवेण णेसायं ७, सरट्ठाणा वियाहिया ॥२७॥**

**[३] सत्त सरा जीवणिस्सिया पण्णत्ता। तंजहा -**

**सज्जं र[६]वइ मयूरो १, कुक्कुडो रिसभं सरं २।**
**हंसो र[७]वइ गंधारं ३, मज्झिमं तु[८] गवेलगा ४ ॥२८॥**
**अह कुसुमसंभवे काले कोइला पंचमं सरं ५।**
**छट्ठं च सारसा कुंचा ६, णेसायं सत्तमं गओ ७ ॥२९॥**

**[४] सत्त सरा अजीवणिस्सिया पण्णत्ता। तंजहा -**

**सज्जं रवइ मुयंगो १, गोमुही रिसहं सरं २।**
**संखो र[९]वइ गंधारं ३, मज्झिमं पुण झल्लरी ४ ॥३०॥**
**[१०]चउचलणपतिट्ठाणा गोहिया पंचमं सरं ५।**
**आडंबरो धे[११]वइयं ६, महाभेरी य सत्तमं ७ ॥३१॥**

**[५] एएसि णं सत्तण्हं सराणं सत्त सरलक्खणा पण्णत्ता। तंजहा -**

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सज्जेण [१२]लहइ [१३]वित्तिं कयं च न विणस्सई ।
गावो पुत्ता य मित्ता य नारीणं होति वल्लहो १ ॥३२॥
रिसहेणं [१४]तु एसज्जं सेणावच्चं धणाणि य ।
वत्थ गंधमलंकारं इत्थीओ सयणाणि य २ ॥३३॥
गंधारे गीत[१५]जुत्तिण्णा वज्जवित्ती कलाहिया ।
हवंति [१६]कइणो पण्णा जे अण्णे सत्थपारगा ३ ॥३४॥
मज्झिमसरमंता उ हवंति सुहजीविणो ।
[१७]खायती पियती देती [१८]मज्झिमस्सरमस्सिओ ४ ॥३५॥
पंचमस्सरमंता उ हवंती पुहवीपती ।
सूरा [१९]संगहकत्तारो अणे[२०]गणरणायगा ५ ॥३६॥
[२१]धेवयसरमंता उ [२२]हवंति कलहप्पिया ।
साउणिया वग्गुरिया सोयरिया मच्छबंधा य ६ ॥३७॥
चंडाला मुट्ठिया मेता, जे यऽण्णे पावकारिणो ।
गोघातगा य चोरा य नेसातं सरमस्सिता ७ ॥३८॥

[६] एतेसि णं सत्तण्हं सराणं तयो गामा पण्णत्ता । तंजहा-सज्जग्गामे १, मज्झिमग्गामे २, गंधारग्गामे ३ ।

[७] सज्जग्गामस्स णं सत्त मुच्छणाओ पण्णत्ताओ । तं जहा -

[२३]मंगी [२४]कोरव्वीया हरी [२५]य रयणी य सारकंता य ।
छट्ठी य सारसी दाम सुद्धसज्जा य सत्तमा ॥३९॥

[८] मज्झिमग्गामस्स णं सत्त मुच्छणाओ पण्णत्ताओ । तंजहा -

[२६]उत्तरमंदा रयणी उत्तरा [२७]उत्तरायसा(ता) ।
अस्सोकंता य सोवीरा अभीरू भवति सत्तमा ॥४०॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

[९] गंधारग्गामस्स णं सत्त मुच्छणाओ पण्णत्ताओ। तंजहा -

[२८]नंदी य खुड्डिमा पूरिमा य चउत्थी य सुद्धगंधारा।
उत्तरगंधारा[२९] वि य पंचमिया हवइ मुच्छा उ ॥४१॥
[३०]सुद्धुत्तरमायामा सा छट्ठा[३१] नियमसो उ णायव्वा।
अहउत्तरायता[३२] कोडिमा य सा सत्तमी[३३] मुच्छा ॥४२॥

[१०] [३४]सत्त स्सरा कतो संभवंति ? गीयस्स[३५] का हवति जोणी ?।
कतिसमया ऊसासा ? कति वा गीयस्स[३६] आगारा ? ॥४३॥
सत्त सरा नाभीओ[३७] संभवंति, गीतं च रुन्नजोणीयं[३८]।
पायसमा उस्सासा, तिण्णि य गीयस्स[३९] आगारा ॥४४॥
आदिमउ[४०] आरभंता, समुव्वहंता य मज्झगारम्मि।
अवसाणे[४१] य झवेंता, तिन्नि[४२] वि गीयस्स आगारा ॥४५॥
छ द्दोसे अट्ठ गुणे तिण्णि य वित्ताणि दोण्णि[४३] भणितीओ।
जो णाही[४४] सो गाहिति सुसिक्खितो रंगमज्झम्मि ॥४६॥
भीयं दुयमुप्पिच्छं[४५] उत्तालं च कमसो मुणेयव्वं।
काकस्सरमणुनासं[४६] छ द्दोसा होंति गीयस्स[४७] ॥४७॥
पुण्णं रत्तं च अलंकियं च वत्तं तहेवमविघुट्ठं[४८]।
महुरं समं[४९] सुललियं अट्ठ गुणा होंति गीयस्स[५०] ॥४८॥
उर-कंठ-सिरविसुद्धं[५१] च गिज्जते मउय-रिभियपदबद्धं[५२]।
समतालपडुक्खेवं[५३] सत्तस्सरसीभरं गीयं[५४] ॥४९॥
[५५]अक्खरसमं पयसमं तालसमं लयसमं गहसमं च।
निस्ससिउस्ससियसमं संचारसमं सरा सत्त ॥५०॥
निद्दोसं सारवंतं[५६] च हेउजुत्तमलंकियं।
उवणीयं सोवयारं च मियं महुरमेव य ॥५१॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**समं अद्धसमं चेव सव्वत्थ विसमं च जं।**
**तिण्णि वित्तप्पयाराइं चउत्थं नोवलब्भइ ॥५२॥**
**सक्कया पायया चेव[५७] भणिईओ होंति[५८] दुण्णि उ।**
**सरमंडलम्मि गिज्जंते पसत्था इसिभासिया ॥५३॥**
**[११] केसी गायती महुरं ? केसी गायति खरं च रुक्खं च ?।**
**केसी गायति चउरं ? केसी य विलंबियं ? दुतं केसी ?।**
**विस्सरं पुण केरिसी ? ॥५४॥ पंचपदी।**
**[५९]सामा गायति महुरं, काली गायति खरं च रुक्खं च।**
**गोरी गायति चउरं, काणा य विलंबियं, दुतं अंधा।**
**विस्सरं पुण पिंगला[६०] ॥५५॥ पंचपदी।**
**सत्त स्सरा[६१] तयो गामा मुच्छणा एक्कवीसतिं।**
**ताणा एगूणपण्णासं सम्मत्तं सरमंडलं ॥५६॥ सेत्तं सत्तनामे।**

[चू० २६०] इदाणिं सत्तणामं, तत्थ सरा - **स[१]ज्जे०** सिलोगो।

*कज्जं करणायत्तं, जीहा य सरस्स ता असंखेज्जा।*
*सरसंख असंखेज्जा, करणस्स असंखयत्तातो ॥१॥*
*सत्त य सुत्तणिबद्धा, कह ण विरोहो ? गुरू ततो आह।*
*सत्तऽणुवादी सव्वे, बादरगहणं व गेतं वा ॥२॥*
*णाभिसमुत्थो तु सरो, अविकारी पप्प जं पदेसं तु।*
*आभोगियरेणं वा, उवकारकरं सरट्ठाणं ॥३॥*

**सज्जं च०** सिलोगो। **णासाते०** सिलोगो।

जिय-ऽजीवणिस्सिय त्ती, णिस्सासिय अहव णिसिरिया तेहिं।
जीवेसु सण्णिवत्ती, पयोगकरणं अजीवेसु ॥१॥

तत्थ जीवणिस्सिता **सज्जं रवति०** दो सिलोगा। अजीवे वि दो सिलोगा। **गोमुही**

Jain Education International For Private & Personal Use Only www.jainelibrary.org

काहला, तीए गोसिंगं अन्नं वा मुहे कज्जति तेण गोमुही। गोहाचम्मोणद्धा **गोहिया,** सा य दद्दरिका। **आडम्बरो** त्ति पडहो।

*सरफलमव्वभिचारिं, पाओ दिट्ठं णिमित्तमंगेसु।*
*सरणिव्वत्तिफलातो, लक्खे सरलक्खणं तेणं॥१॥*

***सज्जेण लभति वित्तिं०*** *सत्त सिलोगा।*

*सज्जादि तिधा गामो, स समूहो मुच्छणाण विन्नेयो।*
*ता सत्त एक्कमेक्के, तो सत्तसराण इगवीसा॥१॥*
*अण्णोण्णसरविसेसा, उप्पायन्तस्स मुच्छणा भणिता।*
*कत्ता व मुच्छितो इव, कुणते मुच्छं व सोय त्ति॥२॥* [ ]

**मंगि**मादियाणं इगवीसाए मुच्छणाण सरविसेसो ***पुव्वगते सरपाहुडे*** भणितो, [2]तव्विणिग्गतेसु त ***भरह-विसाखिला***दिसु [3]विण्णेयो इति।

**सत्त सरा कतो०** एस पुच्छासिलोगो। **सत्त सरा णाभीतो०** उत्तरसिलोगो।

गेयस्स इमे तिण्णि आगारा - **आदिमउ०** गाधा।

किञ्चान्यत् - **छ द्दोसे०** गाधा। इमे छ द्दोसा वज्जणिज्जा। **भीत दुय०** गाहा। **भीतं** उत्त्रस्तमनसं। **द्रुतं** त्वरितम्। **उप्पित्थं** श्वासयुतं त्वरितं वा। पाढन्तरेण **ह्रस्वस्वरं** वा [4]भाणितव्वं। उत् प्राबल्ये, अतितालं अस्थानतालं वा **उत्तालं**। श्लक्ष्णस्वरेण **काकस्वरम्**। सानुनासिक**मनुनासम्,** नासास्वरकारीत्यर्थः।

अट्ठगुण[5]संपयुत्तं गेयं भवति, ते य इमे - **पुन्नं रत्तं च०** गाहा। स्वरकलाभिः **पूर्णम्**। गेयरागेणानुरक्तस्य **रक्तम्**। अण्णोण्णसरविसेसफुड-सुभकरणत्तणतो **अलङ्कृतम्**। अक्खर-सरफुडकरणत्तणतो **व्यक्तम्**। विस्वरं विक्रोशतीव विघुट्ठं, न विघुट्ठं **अविघुट्ठं**। मधुरस्वरेण **मधुरम्,** कोकिलारुतवत्। ताल-वंससरादिसमणुगतं **समं**। **ललितं** ललतीव स्वरघोलना-प्रकारेण सोइंदियसद्दफुसणासुहुप्पायणत्तणतो वा सूमालं। एभिरष्टाभिर्गुणैर्युक्तं गेयं भवति, अन्यथा [6]विडम्बना।

किञ्चान्यत् - **उरकंठ०** गाहा। जति उरे सरो विशालो तो **उरविशुद्धं**। कंठे जति सरो वट्टितो अफुडितो य तो **कंठविशुद्धं**। सिरं पत्तो जति णाणुणासिको तो **सिरविसुद्धो**। अहवा

Jain Education International For Private & Personal Use Only www.jainelibrary.org

उर-कंठ-सिरेसु श्लेष्मणा अव्याकुलेसु विसुद्धेसु **गीयते**। किंविशिष्टम् ?, उच्यते - **मदुयं** मृदुना स्वरेण मार्दवयुक्तेन, न निष्ठुरेणेत्यर्थः, स च स्वरः अक्षरेषु घोलना[७]स्वरविशेषेषु च सञ्चरन् रङ्गतीव **रिभितः**, गेय**निबद्धपदम्**, एवं गीयते । तालासरेण समसरं **समतालं**, मुरव-कंसिकादिआतोज्जाणाऽऽहताण जो धणिपदुक्खेवो पडिक्खेवो वा तेण व समं नृत्यतो वा **पदुक्खेवसमं**। एरिसं पसत्थं गिज्जति। **सत्तसरसीभरं** च गिज्जति।

के य ते सत्त सरा सीभरसमा ?, उच्यते, इमे - **अक्खरसमं०** गाहा। दीहक्खरे दीहं सरं करेति, ह्रस्से ह्रस्सं, प्लुते प्लुतं। दन्तादिअङ्गुलिकोशकः[८], तेनाऽऽहततन्त्रिस्वरप्रकारो लयः, तं लयमणुस्सरतो गेयं **लयसमं**। पढम ता वंस-तंतिमादिएहिं जो सरो गहितो तस्समं गिज्जमाणं **गहसमं** । तेहिं चेव वंस-तंतिमादिएहिं जं अंगुलिसंचारसमं गिज्जति तं **संचारसमं**। सेसं कंठं।

जो गेयसुत्तणिबंधो सो इमेरिसो - **णिद्दोसं०** सिलोगो । हिंसाऽलियादि-बत्तीससुत्तदोसवज्जियं **णिद्दोसं**। अत्थेण जुत्तं **सारवंतं**। अत्थगमककारणजुत्तं **हेतुजुत्तं**। कव्वालंकारेहिं जुत्तं **अलंकितं**। उवसंघारोवणएहिं जुय**मुवणीतं**। जं अणिट्ठुराभिधाणेण अविरुद्धा-ऽलज्जणिज्जेण य बद्धं तं **सोवयारं** सोत्प्रासं वा सप्पहासं वा। पद-पादा-ऽक्षरै**र्मितं**, नापरिमितमित्यर्थः। **महुरं** ति त्रिधा शब्द-अर्थ-अभिधानमधुरं च।

**तिण्णि य वित्ताइं** ति जं सुत्तं तस्य व्याख्या - **समं अद्धसमं०** सिलोगो कंठो।

**दोण्णि य भणितीयो** त्ति अस्य व्याख्या - **सक्कता०**[९] सिलोगो। **भणिति** त्ति भासा। सेसं कंठं।

इत्थी पुरिसो वा केरिसो केरिसं गायति त्ति पुच्छा - **केसी०** गाधा। उत्तरम् - **गोरी०** गाहा।

इमो सरमंडलसङ्क्षेपार्थः - **सत्त सरा ततो गामा०** गाधा। तंती तता **ताणो** भन्नति। सज्जादिसरेसु एक्केक्के सत्त ताण त्ति **अउणपन्नासं**। एते वीणाए सत्ततंतीए संभवंति। सज्जो सरो सत्तहा तंतीताणसरेण गिज्जति ते सज्जे सत्त [१०]ताणा। एवं सेसेसु वि। ते चेव एगतंतीए [११]तितंतीए कंठेण वा कि[१२](गि)ज्जमाणा **अउणपन्नासं ताणा** भवंति। गतं सत्तणामं।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

[हा० २६०] **से किं तं सत्तनामे** इत्यादि। **सप्तनाम्नि सप्त स्वराः प्रज्ञप्ताः। तंजहा— सज्जे** इत्यादि। **षड्जो रिषभो गन्धारो मध्यमः पञ्चमस्वरः रेवतश्चैव निषादः स्वराः सप्त व्याख्याताः।**

*अत्र संख्यामसहन् कश्चिदाह -*

*कज्जं करणायत्तं जीहा य सरस्स ता असंखेज्जा।*
*सरसंख असंखेज्जा करणस्साऽसंखयत्तातो ॥१॥*
*सत्त य सुत्तणिबद्धा कह ण विरोहो गुरू तओ आह।*
*सत्तणुवाती सव्वे बादरगहणं व गेतं वा ॥२॥ [ ]*

[१]आश्रित्य सप्तोक्ताः। **एतेसिं ण**मित्यादि, तत्र-

*णाभिसमुत्थो उ सरो अविकारी पप्प जं पदेसं तु।*
*आभोगितरेणं वा उवकारकरं सरट्ठाणं ॥१॥ [ ]*

**सज्जं च** सिलोगो। **णासाय** सिलोगो।

*जियऽजीयणिस्सिय त्ती णिस्सासिय अहव निसरिया तेहिं।*
*जीवेसु सन्निवित्ती पओगकरणं अजीवेसु ॥१॥ [ ]*

तत्थ जीवणिस्सिता-**सज्जं रवति** दो सिलोगा। [अजीवे वि दो सिलोगा]। **गोमुही** काहला, तीए गोसिंगं अण्णं वा मुहे कज्जति तेण गोमुही। गोधाचम्मोणद्धा **गोहिता,** सा य दद्दरिया। **आडंबरो** त्ति पडहो।

*सरफलमव्वहिचारी पाओ दिट्ठं णिमित्तमंगेसु।*
*सरणिव्वित्तिफलाओ लक्खे सरलक्खणं तेण ॥१॥ [ ]*

**सज्जेण लभति वित्तिं०** सत्त सिलोगा।

*सज्जादि तिधा गामो स समूहो मुच्छणाण विण्णेओ।*
*ता सत्त एक्कमेक्को तो सत्त सराण इगवीसा ॥१॥*
*अण्णोण्णसरविसेसा उप्पायंतस्स मुच्छणा भणिया।*
*कत्ता व मुच्छिओ इव, कुणते मुच्छं व सोय त्ति ॥२॥ [ ]*

[२]**मंगि**मादियाणं एगवीसाए मुच्छणाण सरविसेसो **पुव्वगते सरपाहुडे** भणिओ,

तव्विणिग्गतेसु य **भरह-विसाहला**दिसु विण्णेओ इति।

**सत्त सरा कओ०** एस पुच्छासिलोगो। **सत्त सरा णाभीओ०** उत्तरसिलोगो।

गेयस्स इमे तिण्णि आगारा- **आदिमउ** गाहा।

किञ्चान्यत्- **छद्दोसे** गाहा। इमे छद्दोसा वज्जणिज्जा- **भीतं दु** ०गाहा। **भीतम्** उत्त्रस्तमनसम्। **द्रुतं** त्वरितम्। **उप्पित्थं** श्वासयुतं त्वरितं च। **पाढन्तरेण ह्रस्वस्वरं** वा भाणितव्वं। उत् प्राबल्ये, अतितालम् अस्थानतालं वा **उत्तालम्**। श्लक्ष्णस्वरेण **काकस्वरम्**। सानुनासिक**मनुनासम्,** नासास्वरकारीत्यर्थः।

अट्ठगुणसंपउत्तं गेयं भवति, ते य इमे-**पुण्णं रत्तं च** गाहा। स्वरकलाभिः **पूर्णम्**। गेयरागेणानुरक्तस्य **रक्तम्**। अण्णोण्णसरविसेसफुड-सुभकरणत्तणयो **अलङ्कृतम्**। अक्खर-सरफुडकरणत्तओ **व्यक्तम्**। विस्वरं विक्रोशतीव विघुट्ठं, ण विघुट्ठ**मविघुट्ठं**। **मधुरं** कोकिलारुतवत्। ताल-वंशसरादिसमणुगतं **समं**। **ललितं** ललतीव स्वरघोलनाप्रकारेण सोइंदियसद्दफुसणासुहुप्पादत्तणओ वा सुकुमालम्। एभिरष्टभिर्गुणैर्युक्तं गीतं भवति, अन्यथा विडम्बना।

किञ्चान्यत्, **उरकंठ** गाहा। जइ उरे सरो विसालो तो उरविसुद्धं। कंठे जइ सरो वट्टितो अफुडितो य तो **कंठ**विसुद्धं। सिरं पत्तो जइ णाणुणासितो तो **सिर**विसुद्धं। अधवा उर-कंठ-सिरेसु श्लेष्मणा अव्याकुलेषु विशुद्धेषु गीयते, किंविशिष्टम्? उच्यते-**मउयं** मृदुना स्वरेण मार्दवयुक्तेन, न निष्ठुरेणेत्यर्थः, स च स्वरः अक्षरेषु घोलनास्वरविशेषेषु च सञ्चरन् रङ्गतीव **रिभितः** गेय**निबद्धपदम्,** एवं गीयते। तालसरेण समसरं **समतालम्**। मुरव-कंसिकादिआतोज्जाणाऽऽहताणं जो धणिपदुक्खेवो [पडिक्खेवो] वा तेण य समं नृत्यतो वा **पदुक्खेवसमं**। एरिसं पसत्थं गिज्जति। **सत्तसरसीभरं** च गिज्जइ।

के य ते सत्तसरसीभरसमा? उच्यते, इमे — **अक्खरसमं** गाहा। दीहक्खरे दीहं सरं करोति, ह्रस्से ह्रस्सम्, प्लुते प्लुतम्, सानुनासिके सानुनासिकम्। जं गेयपदं णामिकादि अण्णतरपदबंधेण बद्धं तं जत्थ सरे अणुवादी तत्थेव तं गिज्जमाणं **पदसमं** भवति। हत्थतलपरोप्पराहतसरणुवत्ती **तालसमम्**। लयः शृङ्ग-दारु-दन्तमयो वा अङ्गुलिकोशकः, तेनाऽऽहतः तन्त्रिस्वरप्रकारो लयः, तं लयमणुस्सरतो गेयं **लयसमं**। पढमं ताव वंस-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तंतिमादिएहिं जो सरो गहितो तस्समं गिज्जमाणं **गहसमं**। तेहिं चेव वंस-तंतिमादिएहिं अंगुलिसंचारसमं गिज्जइ तं **संचारसमं**। सेसं कंठं।

जो गेयसुत्तनिबंधो सो इमेरिसो-**णिद्दोसं** सिलोगो। हिंसाऽलियादिबत्तीससुत्तदोसवज्जितं णिद्दोसं। अत्थेण जुत्तं **सारवंतं**। अत्थगमकारणजुत्तं कव्वालंकारेहिं जुत्तं **अलंकियं**। उवसंहारोवणएहिं जुत्तं **उवनीतं**। जं अणिट्ठुराभिहाणेण अविरुद्धा-ऽलज्जणिज्जेण बद्धं तं **सोवयारं** सोत्प्रासं वा सप्पहासं [वा]। पद-पादा-ऽक्षरै**र्मितं** नापरिमितमित्यर्थः। **मधुरं** ति त्रिधा शब्द-अर्थ-अभिधानमधुरं च।

**तिण्णि य वित्ताइं** ति जं वुत्तं तस्स व्याख्या- **समं अद्धसमं** सिलोगो कंठो।

**दुण्णी य भणीतीयो** त्ति, अस्य व्याख्या-**सक्कया** सिलोगो, **भणिति** त्ति भासा। सेसं कंठं।

इत्थी पुरिसो वा केरिसो केरिसं गायइ त्ति पुच्छा-**केसी** गाहा। [उत्तरम् **गोरी** गाहा]।

इमो सरमंडलसंक्षेपार्थः **सत्त सरा ततो०** गाहा। तंती तता[3] **ताणो** भण्णइ। सज्जादिसरेसु एक्केक्के सत्त ताणत्ति अउणपण्णासं। एते वीणाए सत्ततंतीए संभवंति। सज्जो सरो सत्तहा तंतीताणसरेण गिज्जइ, ते सज्जे सत्त ट्ठाणा। एवं सेसेसु वि। ते चेव एगतंतीए कंठेण वा गिज्जमाणा अउणपण्णासं ताणा भवन्ति। गतं सत्तनामं।

[हे० २६०] उक्तं षड्नाम, अथ सप्तनाम निरूपयितुमाह - **से किं तं सत्तनामे** इत्यादि। *स्वृ शब्दोपतापयोः [का० धा० १/२७१]* इति, स्वरणानि **स्वराः** ध्वनिविशेषाः, ते च **सप्त, तद्यथा - सज्जे**[1] इत्यादि श्लोकः। व्याख्या - षड्भ्यो जातः **षड्जः**। उक्तं च -

*नाशां कण्ठमुरस्तालु जिह्वां दन्तांश्च संश्रितः।*
*षड्भिः संजायते यस्मात् तस्मात् षड्ज इति स्मृतः ॥१॥* [ ]

तथा **ऋषभो** वृषभः, तद्वद् यो वर्तते स ऋषभः। आह च -

*वायुः समुत्थितो नाभेः कण्ठशीर्षसमाहतः।*
*नर्दन् वृषभवद् यस्मात् तस्माद् वृषभ उच्यते ॥२॥* [ ]

तथा गन्धो विद्यते यस्य स गन्धारः, स एव **गान्धारः**, गन्धवाहविशेष इत्यर्थः, अभाणि च-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

*वायुः समुत्थितो नाभेः कण्ठ-शीर्षसमाहतः।*
*नानागन्धावहः पुण्यो गान्धारस्तेन हेतुना ॥३॥ [ ]*

तथा मध्ये कायस्य भवो **मध्यमः** यदवाचि –

*वायुः समुत्थितो नाभेरुरोहृदि समाहतः।*
*नाभिं प्राप्तो महानादो मध्यमत्वं समश्नुते ॥४॥ [ ]*

तथा पञ्चानां षड्जादिस्वराणां निर्देशक्रममाश्रित्य पूरणः पञ्चमः, अथवा पञ्चसु नाभ्यादि-स्थानेषु मातीति **पञ्चमः स्वरः**। यदभ्यधायि –

*वायुः समुत्थितो नाभेरुरोहृत्कण्ठशिरोहतः।*
*पञ्चस्थानोत्थितस्यास्य पञ्चमत्वं विधीयते ॥५॥ [ ]*

तथाऽतिसन्धयते अनुसंधयति शेषस्बरानिति निरुक्तिवशाद्धैवतः। यदुक्तम् –

*अतिसंधयते यस्मादेतान् पूर्वोदितस्वरान्।*
*तस्मादस्य स्वरस्यापि धैवतत्वं विधीयते ॥६॥ [ ]*

पाठान्तरेण **रैवत**श्चैवेति।

तथा निषीदन्ति स्वरा यस्मिन् स **निषादः**, यतोऽभिहितम् -

*निषीदन्ति स्वरा यस्मिन्निषादस्तेन हेतुना।*
*सर्वांश्चाभिभवत्येव, यदादित्योऽस्य दैवतम् ॥७॥ [ ]इति।*

तदेवं **स्वराः** जीवाजीवनिश्रितध्वनिविशेषाः **सत्त वियाहिय** त्ति विविधप्रकारैराख्याता-स्तीर्थकर-गणधरैरिति श्लोकार्थः।

आह - ननु कारणभेदेन कार्यस्य भेदात् स्वराणां च जिह्वादिकारणजन्यत्वात् तद्वतां च द्वीन्द्रियादित्रसजीवानामसङ्ख्येयत्वाज्जीवनिश्रिता अपि तावत् स्वरा असङ्ख्याताः प्राप्नुवन्ति, किमुताजीवनिश्रिता इति कथं सप्तसङ्ख्यानियमो न विरुध्यत इति ? अत्रोच्यते, असङ्ख्यातानामपि स्वरविशेषाणामेतेष्वेव सप्तसु सामान्यस्वरेष्वन्तर्भावाद् बादराणां वा केषाञ्चिदेवोपलभ्यमानविशिष्टव्यक्तीनां ग्रहणाद् गीतोपकारिणां विशिष्टस्वराणां वक्तुमिष्टत्वाददोष इति।

स्वरान्नामतो निरूप्य कारणतस्तानेवाभिधित्सुराह - **एएसि णमित्यादि**। तत्र

Jain Education International For Private & Personal Use Only www.jainelibrary.org

नाभेरुत्थितोऽविकारी स्वर आभोगतोऽनाभोगतो वा यदत्र जिह्वादिस्थानं प्राप्य विशेषमासादयति तत् स्वरस्योपकारकमतः स्वरस्थानमुच्यते। तत्र **सज्ज**मित्यादिश्लोकद्वयं सुगमम्। नवरं **च**कारोऽवधारणे, षड्जमेव प्रथमस्वरलक्षणं ब्रूयात्। कयेत्याह - अग्रभूता जिह्वा **अग्रजिह्वा,** जिह्वाग्रमित्यर्थः, तया। इह यद्यपि षड्जभणने स्थानान्तराण्यपि कण्ठादीनि व्याप्रियन्ते अग्रजिह्वा च स्वरान्तरेषु व्याप्रियते तथापि सा तत्र बहुव्यापारवतीति कृत्वा तया तमेव ब्रूयादित्युक्तम्। इदमत्र हृदयम् - षड्जस्वरोऽग्रजिह्वां प्राप्य विशिष्टां व्यक्तिमासादयत्यतस्तदपेक्षया सा स्वरस्थानमुच्यते, एवमन्यत्रापि भावना कार्या। **उरो** वक्षस्तेन **ऋषभं स्वरम्,** ब्रूयादिति सर्वत्र संबध्यते। **कंठुग्गएणं** ति कण्ठादुद्गमनमुद्गतिः स्वरनिष्पत्तिहेतुभूता क्रिया, तेन **कण्ठोद्गतेन गान्धारम्**। जिह्वाया मध्यो भागो **मध्यजिह्वा** तया **मध्यमम्**। तथा दन्ताश्चौष्ठौ च **दन्तोष्ठम्,** तेन **धैवतम्, रैवतं** वेति, **भ्रूक्षेपा**वष्टम्भेन **निषाद**मिति।

इत ऊर्ध्वं सर्वं निगदसिद्धमेव। नवरं **जीवनिस्सिय** त्ति जीवाश्रिताः जीवेभ्यो वा निसृता निर्गताः। **सज्जं रवती**त्यादिश्लोकः, **रवति** नदति। **गवेलग** त्ति गावश्च एलकाश्च ऊरणका गवेलकाः, अथवा गवेलका ऊरणका एव। **अह कुसुमे**त्यादि, **अथे**ति विशेषणार्थः, विशेषणार्थता चैवम्- यथा गवेलका अविशेषेण मध्यमस्वरं नदन्ति न तथा पञ्चमं कोकिलः, अपि तु **कुसुमसंभवे काले** त्ति वनस्पतिषु बाहुल्येन कुसुमानां मल्लिका-पाटलादीनां सम्भवो यस्मिन् काले स तथा, तस्मिन्, मधुमास इत्यर्थः।

**अजीवनिस्सिय** त्ति तथैव, नवरमजीवेष्वपि मृदङ्गादिषु जीवव्यापारोत्थापिता एवामी मन्तव्याः, अपरं च षड्जादीनां मृदङ्गादिषु यद्यपि नाशाकण्ठाद्युत्पन्नत्वलक्षणो व्युत्पत्त्यर्थो न घटते तथापि सादृश्यात् तद्भावोऽवगन्तव्यः। **सज्ज**मित्यादि श्लोकद्वयम्, **गोमुखी** काहला यस्या मुखे गोशृङ्गादि वस्तु दीयत इति। चतुर्भिश्चरणैः **प्रतिष्ठानम्** अवस्थानं भुवि यस्याः सा गोधाचर्मावनद्धा **गोधिका** वाद्यविशेषो दर्दरिकेत्यपरनाम्ना प्रसिद्धा। **आडम्बरः** पटहः। **सप्तम**मिति निषादमित्यर्थः।

**एएसि ण**मित्यादि। एतेषां सप्तानां स्वराणां प्रत्येकं लक्षणस्य विभिन्नत्वात् **सप्त स्वरलक्षणानि** यथास्वं फलप्राप्त्यव्यभिचारीणि स्वरतत्त्वानि भवन्ति। तान्येव फलत

Jain Education International For Private & Personal Use Only www.jainelibrary.org

आह– **सज्जेणे**त्यादिश्लोकाः । **षड्जेन लभते वृत्तिम्**, अयमर्थः - षड्जस्येदं लक्षणं स्वरूपमस्ति येन तस्मिन् सति वृत्तिं जीवनं लभते प्राणी । एतच्च मनुष्यापेक्षया लक्ष्यते, वृत्तिलाभादीनां घटनात् । **कृतं च न विनश्यति**, तस्येति शेषः, निष्फलारम्भो न भवतीत्यर्थः । **गावः पुत्राश्च मित्राणि च** भवन्तीति शेषः । **गान्धारे गीतयुक्तिज्ञा वर्यवृत्तयः** प्रधानजीविकाः **कलाभिरधिकाः कवयः** काव्यकर्तारः **प्राज्ञाः** सद्बोधाः **ये** चोक्तेभ्यो गीतयुक्तिज्ञादिभ्योऽ**न्ये शास्त्रपारगाः** चतुर्वेदादिशास्त्रपारगामिनस्ते भवन्तीति । शकुनेन श्येनलक्षणेन चरन्ति पापर्द्धिं कुर्वन्ति शकुनान् वा घ्नन्तीति **शाकुनिकाः** । वागुरा मृगबन्धनम्, तया चरन्तीति **वागुरिकाः** । शूकरेण सन्निहितेन शूकरवधार्थं चरन्ति शूकरान् वा घ्नन्तीति **शौकरिकाः** । **मौष्टिका** मल्ला इति । पाठान्तराण्यप्युक्तानुसारेण व्याख्येयानि ।

**एएसिं णं सत्तण्हं सराणं तओ गामा** इत्यादि । एतच्चिरन्तनमुनिगाथाभ्यां व्याख्यायते, यथा –

*सज्जाइ तिहा गामो, स समूहो मुच्छणाण विन्नेओ ।*
*ता सत्त एक्कमेक्के, तो सत्तसराण इगवीसा ॥१॥*
*अन्नन्नसरविसेसे, उप्पायंतस्स मुच्छणा भणिया ।*
*कत्ता व मुच्छिओ इव, कुणई मुच्छं व सो व त्ति ॥२॥* [ ]

कर्ता वा मूर्च्छित इव ताः करोतीति मूर्च्छना उच्यन्ते । **मुच्छं व सो व** त्ति मूर्च्छन्निव वा स कर्ता ताः करोतीति मूर्च्छना उच्यन्त इत्यर्थः । मङ्गीप्रभृतीनां चैकविंशतिमूर्च्छनानां स्वरविशेषाः **पूर्वगतस्वरप्राभृते** भणिताः, इदानीं तु तद्विनिर्गतेभ्यो **भरत-विशाखिला**दिशास्त्रेभ्यो विज्ञेया इति ।

**सत्त सरा कओ** गाहा । इह चत्वारः प्रश्नाः, तत्र **कुतः** इति कस्मात् स्थानात् स्वरा उत्पद्यन्ते १ । **का योनि**रिति का जातिः २ । तथा कति समया येषु ते **कतिसमया उच्छ्वासाः**, किंपरिमाणकाला इत्यर्थः ३ । तथा **आकाराः** आकृतयः, स्वरूपाणि इत्यर्थः ४ । उत्तरमाह– **सत्त सरा नाभीओ** इत्यादिगाथा स्पष्टा । नवरं रुदितं योनिः समानरूपतया जातिर्यस्य तद् **रुदितयोनिकम्** । **पादसमा उच्छ्वासाः** यावद्भिः समयैर्वृत्तस्य पादः समाप्यते तावत्समया उच्छ्वासा गीते भवन्तीत्यर्थः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

आकारानाह - **आइ** गाहा। त्रयो गीतस्याकाराः स्वरूपविशेषलक्षणा भवन्ति इति पर्यन्ते सम्बन्धः, किं कुर्वाणा इत्याह - **आरभन्त** त्ति आरम्भमाणा गीतमिति गम्यते, कथंभूतमित्याह - **आइमउ** त्ति आदौ प्रथमतो मृदु कोमलं आदिमृदु, तथा **समुद्वहन्तश्च** कुर्वन्तश्च महत्तां गीतध्वनेरिति गम्यते, **मध्यकारे** मध्यमभागे तथा **अवसाने च क्षपयन्तो** गीतध्वनिं मन्द्रीकुर्वन्त इत्यर्थः, आदौ मृदु मध्ये तारं पर्यन्ते मन्द्रं गीतं कर्तव्यम्, अत एते मृदुतादय**स्त्रयो गीतस्याकारा** भवन्तीति तात्पर्यम्।

किन्तु षड् दोषा वर्जनीयाः, तानाह - **भीतं** गाहा। भीतमुत्त्रस्तमानसं यद् गीयते इत्येको दोषः १, **द्रुतं** त्वरितम् २, **उप्पिच्छं** श्वासयुक्तं त्वरितं च, पाठान्तरेण **रहस्सं** ति ह्रस्वस्वरम्, लघुशब्दमित्यर्थः ३, **उत्तालम्** उत् प्राबल्यार्थे, अतितालमस्थानतालं चेत्यर्थः, तालस्तु कंसिकादिशब्दविशेषः ४, **काकस्वरं** श्लक्ष्णा-ऽश्रव्यस्वरम् ५, **अनुनासं** नासिकाकृतस्वरम् ६। **एते षड् दोषा गीतस्य भवन्ति**।

अष्टौ गुणानाह - **पुण्णं** गाहा। स्वरकलाभिः सर्वाभिरपि युक्तं कुर्वतः **पूर्णम्** १, गेयरागेण रक्तस्य भावितस्य **रक्तम्** २, अन्यान्यस्फुटशुभस्वरविशेषाणां करणा**दलङ्कृतम्** ३, अक्षरस्वरस्फुटकरणाद् **व्यक्तम्** ४, विक्रोशनमिव यद् विस्वरं न भवति त**दविघुष्टम्** ५, मधुमत्तकोकिलारुतवन्मधुरस्वरं **मधुरम्** ६, ताल-वंशस्वरादिसमनुगतं **समम्** ७, स्वरघोलनाप्रकारेण सुष्ठु अतिशयेन ललतीव यत् सुकुमालं तत् **सुललितम्** ८। एते **अष्टौ गुणा गीतस्य भवन्ति**। एतद्विरहितं तु विडम्बनामात्रमेव तदिति।

किं चोपलक्षणत्वादन्येऽपि गीतगुणा भवन्ति, तानाह - **उर** गाहा। **चकारो** गेयगुणान्तरसमुच्चयार्थः, **उरःकण्ठशिरोविशुद्धं च**। अयमर्थः - यद्युरसि स्वरो विशालस्तर्ह्युरोविशुद्धम्, कण्ठे यदि स्वरो वर्त्तितो[४]ऽस्फुटितश्च तदा कण्ठविशुद्धम्, शिरसि प्राप्तो यदि नानुनासिकस्ततः शरोविशुद्धम्, अथवा उरःकण्ठशिरस्सु श्लेष्मणाऽव्याकुलेषु विशुद्धेषु प्रशस्तेषु यद् गीयते तदुरःकण्ठशिरोविशुद्धम्, **गीयते** गेयमिति संबध्यते। किंविशिष्टमित्याह - **मृदुकं** मृदुना अनिष्ठुरेण स्वरेण यद् गीयते तन्मृदुकम्, यत्राक्षरेषु घोलनया संचरन् स्वरो रङ्गतीव तद् घोलनाबहुलं **रिभितम्**, गेयपदैर्बद्धं विशिष्टविरचनया रचितं **पदबद्धम्**, ततश्च पदत्रयस्य कर्मधारयः। **समतालपडुक्खेवं** ति ता[५]लाशब्देन हस्ततालासमुत्थ उपचाराच्छब्दो

Jain Education International For Private & Personal Use Only www.jainelibrary.org

विवक्षितः, मुरज-कांसिकादिगीतोपकारकातोद्यानां ध्वनिः प्रत्युत्क्षेपः, नर्तकीपदप्रक्षेपलक्षणो वा प्रत्युत्क्षेपः, समौ गीतस्वरेण तालाप्रत्युत्क्षेपौ यत्र तत् **समतालप्रत्युत्क्षेपम्**।

**सत्तसरसीभरं** ति, सप्त स्वराः सीभरन्ति अक्षरादिभिः समा यत्र तत् सप्तस्वरसीभरं गीतमिति, ते चामी सप्त स्वराः - **अक्खरसमं** गाहा। यत्र दीर्घे अक्षरे दीर्घो गीतस्वरः क्रियते ह्रस्वे ह्रस्वः प्लुते प्लुतः सानुनासिके तु सानुनासिकः तदक्षरसमम् १। यद् गीतपदं नामिकादिकं यत्र स्वरे अनुपाति भवति तत् तत्रैव[६] यत्र गीयते तत् **पदसमम्** २। यत् परस्प[७]राहतहस्ततालस्वरानुसारिणा स्वरेण गीयते **तत्तालसमम्** ३। शृङ्ग-दार्वाद्यन्यतरवस्तुमयेनाङ्गुलीकोशकेन समाहततन्त्रीस्वरप्रकारो लयः, तमनुसरता स्वरेण यद् गीयते **तल्लयसमम्** ४। प्रथमतो वंशतन्त्र्यादिभिर्यः स्वरो गृहीतस्तत्समेन स्वरेण गीयमानं **ग्रहसमम्** ५। निःश्वसितोच्छ्वसितमानमनतिक्रामतो यद् गेयं तद् **निःश्वसितोच्छ्वसितसमम्** ६। वंश-तन्त्र्यादिष्वेवाङ्गुलीसञ्चारसमं यद् गीयते तत् **सञ्चारसमम्** ७। एवमेते स्वराः सप्त भवन्ति। इदमुक्तं भवति - एकोऽपि गीतस्वरोऽक्षर-पदादिभिः सप्तभिः स्थानैः सह समत्वं प्रतिपद्यमानः सप्तधात्वमनुभवतीत्येते सप्त स्वरा अक्षरादिभिः समा दर्शिता भवन्तीति।

गीते च यः सूत्रबन्धः सोऽष्टगुण एव कर्तव्य इत्याह - **निद्दोस**मित्यादि। तत्र *अलियमुवघायजणय [आवश्यकनि० ८८१-८८४, कल्पभा० २७८-२८१]*मित्यादि-द्वात्रिंशत्सूत्रदोषरहितं **निर्दोषम्** १। विशिष्टार्थयुक्तं **सारवत्** २। गीतनिबद्धार्थगमकहेतुयुक्ततया दृष्टं **हेतुयुक्तम्** ३। उपमाद्यलङ्कारयुक्त**मलङ्कृतम्** ४। उपसंहारोपनययुक्त**मुपनीतम्** ५। अनिष्ठुराविरुद्धालज्जनीयार्थवाचकं सानुप्रासं वा **सोपचारम्** ६। अतिवचनविस्तररहितं संक्षिप्ताक्षरं **मितम्** ७। **मधुरं** श्रव्यशब्दार्थम् ८। गेयं भवतीति शेषः।

**तिण्णि य वित्ताइं** ति यदुक्तं तत्राह - **सम**मित्यादि। यत्र वृत्ते चतुर्ष्वपि पादेषु सङ्ख्यया समान्यक्षराणि भवन्ति तत् **समम्**। यत्र प्रथमतृतीययोर्द्वितीयचतुर्थयोश्च पादयोरक्षरसङ्ख्यासमत्वं तद**र्द्धसमम्**। यत्तु **सर्वत्र** सर्वपादेष्वक्षरसङ्ख्यावैषम्योपेतं **तद् विषमम्**। **जं** ति यस्माद् वृत्तं भवतीति शेषः, तस्मात् **त्रय** एव **वृत्तप्रकारा** भवन्ति, **चतुर्थ**स्तु प्रकारो **नोपलभ्यते**ऽसत्त्वादित्यर्थः। एवमन्यथाऽप्यविरोधतो व्याख्येयमिदमिति।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**दुण्णि य भणिइओ** त्ति यदुक्तं तत्राह - **सक्क**[९]एत्यादि। **भणिति**र्भाषा। **स्वरमण्डले** षड्जादिस्वरसमूहे। शेषं कण्ठ्यम्।

गीतविचारप्रस्तावादिदमपि पृच्छति - **केसी गायती**[१०]त्यादिप्रश्नगाथा सुगमा। नवरं **केसि** त्ति कीदृशी इत्यर्थः। **खरं** ति खरस्थानम्। **रूक्षं** प्रतीतम्। **चतुरं** दक्षम्। **विलम्बितं** परिमन्थरम्। **द्रुतं** शीघ्रमिति। **विस्सरं पुण केरिसि** त्ति गाथाऽधिकमिदम्। अत्र क्रमेणोत्तरमाह - **सामा गायइ महुर** मित्यादि। अत्रापि **विस्सरं पुण पिंगल** त्ति गाथाऽधिकमेव। व्याख्या सुकरैव। नवरं **पिङ्गला** कपिला इत्यर्थः।

समस्तस्वरमण्डलसंक्षेपाभिधानेनोपसंहरन्नाह - **सत्तसरे**त्यादि। तता तन्त्री तानो भण्यते। तत्र षड्जादयः स्वराः प्रत्येकं सप्तभिस्तानैर्गीयन्त इत्येवमेकोनपञ्चाशत्तानाः सप्ततन्त्रिकायां वीणायां भवन्तीति। एवं तदनुसारेणैकतन्त्रिकायां त्रितन्त्रिकायां कण्ठेनापि वा गीयमाना एकोनपञ्चाशदेव ताना भवन्तीति। तदेवमेतैः षड्जादिभिः सप्तभिर्नामभिः सर्वस्यापि स्वरमण्डलस्याभिधानात् सप्तनामेदमुच्यते। **सेतं सत्तनामे** त्ति निगमनम्।

**[सू० २६१] से किं तं अट्ठनामे ? अट्ठविहा वयणविभत्ती पण्णत्ता। तं जहा-**

**निद्देसे पढमा होति १ बितिया उवदेसणे २।**
**तइया करणम्मि कया ३ चउत्थी संपयावणे[१] ४॥५७॥**

**पंचमी य अपायाणे[२] ५ छट्ठी सस्सामिवायणे[३] ६।**
**सत्तमी सण्णिधाणत्थे[४] ७ अट्ठमाऽऽमंतणी भवे ८॥५८॥**

**तत्थ पढमा विभत्ती निद्देसे सो इमो अहं व त्ति १।**
**बितिया पुण उवदेसे भण कुणसु[५] इमं व तं व त्ति २॥५९॥**

**ततिया करणम्मि कया भणियं व कयं व तेण व मए वा ३।**
**हंदि णमो साहाए हवति चउत्थी पयाणम्मि ४॥६०॥**

Jain Education International For Private & Personal Use Only www.jainelibrary.org

[६]अवणय गिण्ह [७]य एत्तो इतो त्ति वा पंचमी अपायाणे ५ ।
छट्ठी तस्स इमस्स व गयस्स वा सामिसंबंधे ६ ।।६१।।
हवति पुण सत्तमी तं इमम्मि आधार काल भावे य ७ ।
आमंतणी भवे [८]अट्ठमी उ जह हे जुवाण ! त्ति ८ ।।६२।

**सेतं अट्ठणामे ।**

[चू० २६१] इदाणिं अट्ठविहणामं । तत्थऽट्ठविहा **वयणविभत्ती - णिद्देसे पढमा०** इत्यादि दो सिलोगा । एतेसिं उदाहरणमात्रं गाधासिद्धं । वित्थरो सिं ***सद्दपाहुडातो*** णातव्वो तव्विणिग्गतेसु य ***वागरणा***दिसु । गतं अट्ठविहं णामं ।

[हा० २६१] **से किं तं अट्ठणामे । अष्टविधा** अष्टप्रकारा, उच्यन्ते इति वचनानि, तेषां विभक्ति**र्वचनविभक्तिः**, विभजनं विभक्तिः सि-औ-जसित्यादित्रित्रिवचन-समुदायात्मिका **प्रज्ञप्ता** प्ररूपिता अर्थतस्तीर्थकरैः सूत्रतो गणधरैरिति । **तंजहा — निद्देसे पढमे**त्यादि सिलोगदुगं णिगदसिद्धं । उदाहरणप्रदर्शनार्थमाह — **तत्थ पढमे** त्यादि । **तत्र प्रथमा विभक्तिर्निर्देशे, स अयं अहं वेति** निर्देशमात्रत्वात् । **द्वितीया पुनरुपदेशे,** उपदिश्यत इत्युपदेशः - **भण कुरु वा, एतं वा तं वेति** कर्मार्थत्वात् । **तृतीया करणे कृता,** कथम् ?, **भणितं वा कृतं वा तेन वा मया** वेति करणार्थः । हन्दीत्युपदर्शने, **णमो साहाए** त्ति उपलक्षणम्, *नमः-स्वस्ति-स्वाहा-स्वधा-ऽलं-वषड्योगे* च [*पा० २।३।१६*], नमो देवेभ्यः, स्वस्ति प्रजाभ्यः, स्वाहा अग्नये, **भवति चतुर्थी सम्प्रदाने** [१]। तत्रैके व्याचक्षते इदमेव नमस्कारादि सम्प्रदानम्, **अन्ये** पुनः उपाध्यायाय गां प्रयच्छतीत्यादीनि । **अवणय** इत्यादि । **अपनय गृहाण अतः** अस्मात् **इत इति वा पञ्चमी अपादाने,** *ध्रुवमपायेऽपादानम्* [*पा० १।४।२४*] इति कृत्वा । **षष्ठी तस्यास्य वा गतस्य वा,** भृत्य इति गम्यते, **स्वामिसम्बन्धे । भवति पुनः सप्तमी तद्** वस्तु **अस्मि**न्निति **आधारे काले भावे** यथा- कुण्डे [२]बदराणि, वसन्ते रमते, चारित्रे अवतिष्ठत इति । **आमन्त्रणी भवेत् अष्टमी तु** विभक्तिः **यथा हे जुवाण** त्ति ***वृद्धवैयाकरण***दर्शनमिदम्, **ऐदंयुगीनानां** त्वियं प्रथमैव । **तदेतदष्टनाम** ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

[हे० २६१] अथाष्टनाम प्रतिपादयन्नाह - **से किं तं अट्ठनामे**[१] इत्यादि। उच्यन्त इति वचनानि वस्तुवाचीनि, विभज्यते प्रकटीक्रियते अर्थोऽनयेति विभक्तिः, वचनानां विभक्तिर्**वचनविभक्तिः**, नाख्यातविभक्तिः, अपि तु नामविभक्तिः प्रथमादिकेति भावः। **सा चाष्टविधा** तीर्थकर-गणधरैः **प्रज्ञप्ता**। का पुनरियमित्याशङ्क्य यस्मिन्नर्थे या विधीयते तत्सहितामष्टविधामपि विभक्तिं दर्शयितुमाह - **तद्यथे**त्यादि। **निद्देसे** इत्यादि श्लोकद्वयं निगदसिद्धम्। नवरं लिङ्गार्थमात्रप्रतिपादनं निर्देशः, तत्र सि औ जसिति प्रथमा विभक्तिर्भवति। अन्यतरक्रियायां प्रवर्तनेच्छोत्पादन**मुपदेशः**, तस्मिन् अम् औ शस् इति द्वितीया विभक्तिर्भवति। उपलक्षणमात्रं चेदम्, कटं करोतीत्यादिषूपदेशमन्तरेणापि द्वितीयाविधानात्, एवमन्यत्रापि यथासम्भवं वाच्यम्। विवक्षितक्रियासाधकतमं **करणम्**, तस्मिँ**स्तृतीया कृता** विहिता। सम्प्रदीयते यस्मै तद् गवादिदानविषयभूतं **सम्प्रदानम्**, तस्मिँ**श्चतुर्थी** विहिता। अपादीयते वियुज्यते यस्मात् तद्वियुज्यमानावधिभूत**मपादानम्**, तत्र **पञ्चमी** विहिता। **स्वम्** आत्मीयं सचित्तादि, **स्वामी** राजादिः[२], तयोर्**वचने** तत्सम्बन्ध-प्रतिपादने **षष्ठी** विहितेत्यर्थः। संनिधीयते आधीयते यस्मिँस्तत् **सन्निधानम्** आधारस्तदेवा**र्थः**, तस्मिन् **सप्तमी** विहिता। **अष्टमी** सम्बुद्धिः **आमन्त्रणी भवेत्**, आमन्त्रणेऽर्थे विधीयत इत्यर्थः।

एनमेवार्थं सोदाहरणमाह - **तत्थ पढमे**त्यादिगाथाश्चतस्रो गतार्था एव। नवरं **प्रथमा विभक्तिर्निर्देशे**, क्व यथेत्याह - **सो** त्ति सः, तथा **इमो** त्ति अयम्, **अहं** ति अहम्, **वा**शब्द उदाहरणान्तरतासूचकः[२]। **उपदेशे द्वितीया**, क्व यथेत्याह - **भण कुरु** वा, किं तदित्याह - **इदं** प्रत्यक्षं **तद्वा** परोक्षमिति। **तृतीया करणे**, क्व यथेत्याह - **भणितं वा कृतं वा**, केनेत्याह - **तेन वा मया वे**ति, अत्र यद्यपि कर्तरि तृतीया प्रतीयते तथापि विवक्षाधीनत्वात् कारकप्रवृत्तेस्तेन मया वा कृत्वा भणितं कृतं वा देवदत्तेनेति गम्यत इति, एवं करणविवक्षाऽपि न दुष्यतीति लक्षयामः, तत्त्वं तु बहुश्रुता विदन्तीति। **हंदि नमो साहाए** इत्यादि, **हन्दी**त्युपदर्शने, 'नमो देवेभ्यः, स्वाहा अग्नये' इत्यादिषु सम्प्रदाने **चतुर्थी भवती**त्येके। ***अन्ये*** तूपाध्यायाय गां ददातीत्यादिष्वेव सम्प्रदाने चतुर्थीमिच्छन्ति। **अपनय गृहाण एतस्मादितो** वेत्येवम**पादाने पञ्चमी**। **तस्यास्य गतस्य वा**, कस्य ? भृत्यादेरिति

Jain Education International For Private & Personal Use Only www.jainelibrary.org

गम्यते इत्येवं स्वस्वामिसम्बन्धे **षष्ठी**। तद्वस्तु बदरादिकम् **अस्मिन्** कुण्डादौ तिष्ठतीति गम्यते, इत्येव**माधारे सप्तमी भवति**। तथा **काल-भावे य** त्ति कालभावयोश्चेयं द्रष्टव्या, तत्र काले यथा मधौ रमते, भावे तु चारित्रेऽवतिष्ठते। **आमन्त्रणे भवेदष्टमी, यथा हे युवन्निति, वृद्धवैयाकरण**दर्शनेन चेयमष्टमी गण्यते, **ऐदंयुगीनानां** त्वसौ प्रथमैवेति मन्तव्यमिति। इह च नामविचारप्रस्तावात् प्रथमादिविभक्त्यन्तं नामैव गृह्यते, [४]तच्चाष्टविभक्तिभेदादष्टविधं भवति, न च प्रथमादिविभक्त्यन्तनामाष्टकमन्तरेणापरं नामास्ति, अतोऽनेन नामाष्टकेन सर्वस्य वस्तुनोऽभिधानद्वारेण सङ्ग्रहादष्टनामेदमुच्यते इति भावार्थः [ग्रन्थाग्रं० ३०००]। **सेतं अट्ठनामे** त्ति निगमनम्।

**[सू० २६२] [१] से किं तं नवनामे ? नवनामे णव कव्वरसा पण्णत्ता। तंजहा -**

**वीरो १ सिंगारो २ अब्भुओ य ३ रोद्दो य ४ होइ बोधव्वो।**
**वे[१]लणओ ५ [२]बीभच्छो ६ हासो ७ कलुणो ८ पसंतो य ९ ॥६३॥**

**[२] तत्थ परिच्चायम्मि य १ तव-चरणे २ सत्तुजणविणासे य ३।**
**अणणुस[३]य-धिति-परक्क[४]मचिण्हो वीरो रसो होइ ॥६४॥**

**वीरो रसो जहा-**

**सो णाम महावीरो जो रज्जं प[५]यहिऊण पव्वइओ।**
**काम-क्कोहमहासत्तुपक्खनिग्घायणं कुणइ ॥६५॥**

**[३] सिंगारो नाम रसो रतिसंजोगाभिलाससंजण[६]णो।**
**मंडण-विलास-बिब्बोय-हास[७]-लीला-रमणलिंगो ॥६६॥**

**सिंगारो रसो जहा-**

**[८]महुरं विलासललियं हिययुम्मादणकरं जुवाणाणं।**
**सामा सद्दुद्दामं [९]दाएती [१०]मेहलादामं ॥६७॥**

Jain Education International For Private & Personal Use Only www.jainelibrary.org

[४] विम्हयकरो अपु[११]व्वो व भूयपुव्वो व जो रसो होइ।
सो हास-विसायुप्पत्तिलक्खणो अब्भुतो नाम॥६८॥

अब्भुओ रसो जहा-

अब्भुयतरमि[१२]ह एत्तो अन्नं किं अत्थि जीवलोगम्मि।
जं जिणवयणेणऽत्था तिकालजुत्ता वि णज्जंति ? ॥६९॥

[५] भयजणणरूव-सद्दंधकार-चिंता-कहासमुप्पन्नो।
सम्मोह-संभम-विसाय-मरणलिंगो रसो रोद्दो॥७०॥

रोद्दो रसो जहा-

भिउडीविडंबियमु[१३]हा ! संदट्ठोट्ठ ! इय रुहिरमोकि[१४]ण्ण !।
हणसि पसुं असु[१५]रणिभा ! भीमरसि[१६]य ! अतिरोद्द ! रोद्दोऽसि ॥७१॥

[६] विणयोवयार-गुज्झ-गुरुदारमेरावतिक्कमुप्प[१७]ण्णो।
वेलणओ नाम रसो लज्जा-सं[१८]काकरणलिंगो॥७२॥

वेलणओ रसो जहा-

किं लोइय[१९]करणीओ [२०]लज्जणियतरं ति लज्जि[२१]या होमो।
[२२]वारिज्जम्मि गुरुजणो [२३]परिवंदइ जं वहूपोत्तिं॥७३॥

[७] [२४]असुइ-कुणव-दुद्दंसणसंजोगब्भासगंधनिप्फण्णो।
निव्वेयऽविहिंसालक्खणो रसो होइ बीभत्सो॥७४॥

बीभत्सो रसो जहा-

असुइमलभरियनिज्झर सभावदुग्गंधि सव्वकालं पि।
[२५]धण्णा उ सरीरकलिं बहुमलकलुसं विमुंचंति॥७५॥

[८] रूव-वय-वेस-भासाविवरीयविलंबणासमुप्पन्नो।
हासो मणप्पहासो [२६]पकासलिंगो रसो होति॥७६॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

हासो रसो जहा-

पासुत्तमसीमंडियपडिबुद्धं देयरं पलोयंती।
ही ! [२७]जह थणभरकंपणपणमियमज्झा हसति सामा ॥७७॥

[९] पिय[२८]विप्पयोग-बंध-वह-वाहि-विणिवाय-संभमुप्पन्नो।
[२९]सोचिय-विलवि[३०]य-पव्वाय-रुन्नलिंगो रसो [३१]कलुणो ॥७८॥

कलुणो रसो जहा-

पज्झातकिलामिययं बाहागय[३२]पप्पुयच्छियं बहुसो।
तस्स वियोगे पु[३३]त्तय ! दुब्बलयं ते मुहं जायं ॥७९॥

[१०] निद्दोसमणस[३४]माहाणसंभवो जो पसंतभावेणं।
अविकारलक्खणो सो रसो पसंतो त्ति णायव्वो ॥८०॥

पसंतो रसो जहा-

सब्भा[३५]वनिव्विकारं उवसंत-पसंत-सोमदिट्ठीयं।
[३६]ही ! जह मुणिणो सोहति [३७]मुहकमलं पीवरसिरीयं ॥८१॥

एए णव कव्वरसा बत्तीसादोसविहिसमुप्पण्णा।
गाहाहिं मणेयव्वा, हवंति सुद्धा व मीसा वा ॥८२॥

से तं नवनामे।

[चू० २६२] इदाणिं णवविधं णामं। तत्थ णव कव्वरसा -

*मिदु-मधुर-रिभिय-[१]सुभयरभणितीणिद्दोसभूसणाणुगता।*
*सुह-दुहकम्मरसा इव, णव कव्वरसा भवंतेते ॥१॥ [ ]*

**वीरो सिंगारो०** इत्यादि। इमं वीररसलक्खणं - **तत्थ परिच्चाग०** गाधा। परेण कोपकारेण उदीरिते **अनुशयं** ण करोति। सेसं कंठं। वीरे रसे उदाहरणं - **सो णाम०** गाहा कंठा।

इमं सिंगाररसलक्खणं - **सिंगारो०** गाधा कंठा। सिंगारे रसे उदाहरणं - **मधुर०** गाहा।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अब्भुते रसे लक्खणं - **विम्हय०** गाहा। अब्भुते रसे उदाहरणं - **अब्भुततर०** गाहा।

रोद्दे रसे लक्खणं - **भयजणण०** गाहा। **भयुप्पायकं** रूवं दृष्ट्वा, भीमं वा महान्तं **शब्दं** श्रुत्वा, **अत्यन्धकारे** वा, ग्रामादिदाघ**चिन्ता** वा मारणाध्यवसाय**चिन्ता** वा, परतः **कथां** वा रौद्रां श्रुत्वा सम्मोहादि उप्पज्जति। अहवा देहस्य रौद्र आकार उत्पद्यते। रौद्रे रसे उदाहरणं - **भिकुडी०** गाहा। रुषितेन दशनेषु **संदष्ट** इति ग्रस्तः **ओष्ठः**, **इत** इति एवं गतो रौद्राकारः। सेसं कंठं।

वेलणे रसे लक्खणं- **विणयोवयार०** गाहा। वेलणे रसे उदाहरणं - **किं लोइय०** गाहा। सहीण पुरतो वधू भणति । **किं** क्षेपे, **लौकिककरणी** क्रिया चेष्टा, एतातो अण्णं लज्जणतरं णत्थि, पासट्ठिता वि **अम्हे लज्जिमो**। जइ **मे** कोइ **वारेज्ज गुरुजणं,** मा इमं मे वासघर**पोत्तिं** जणपुरतो **परियंदह,** लज्जामि त्ति। का एस वधुपोत्ती ? भणति - पढमवासघरे भत्तुणा जोणिभेदे कते त[2]च्चं(च्छो)णियेण पोत्तिं [3]खरंटियं सूरुदये सयणो से परितुट्ठो पडलकतं तं पोत्तिं घरंघरेण जणपुरतो परियंदइ, दंसेति य - णज्जते रुधिरदंसणातो अक्खुतजोणि त्ति।

**बीभच्छो** विकृतः, तस्स लक्खणं - **असुइ०** गाहा। कुणिमस्वारूप्यात् **असुचि** सरीरं **दुष्प्रेक्षं** च, विकृतप्रदेशत्वात् तत्र निर्वेदं गच्छति। कथं ?, उच्यते- **तत्संयोगाद् अभ्यासाद् वा गन्ध**माघ्राय **अविहिंसकश्च**। तत्र उदाहरणम् - **असुइ०** गाधा कंठा।

हासरसलक्खणं - **रूववय०** गाधा। **रूवादिविवरीत**करणत्तणतो **मनः प्रहर्ष**कारी **हासो** रसो उप्पज्जइ, प्रत्यक्षलिङ्ग इत्यर्थः। तत्थ उदाहरणं - **पासुत्त०** गाहा। **ही** इत्येतद् हास्यादौ कन्दर्पवचनम्। सेसं कंठं।

इदाणिं करुणरसलक्खणं - **पियविप्पयो०** गाधा। **सोगो** मानसो 'हा नाथ! पुत्र!' इति वियोगे विलापः। **वज्झाणो** त्ति म्लाणः निस्तेजः। कलुणे उदाहरणं - **वज्झाणकिलामि०** गाहा। **किलामि[य]यं** विच्छायं मांसोपचितं [4]जाणूवरि णंदिविणद्ध**बाहट्ठितासु** ललाटेन गतं च (?) प्रकर्षेण **प्लुता अच्छी** अश्रुपूर्णा। बहुवारा **बहुशः**, **तस्येति** प्रियजनस्य **वियोगे** इत्यर्थः।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

इदाणिं पसंतरसलक्खणं - **णिद्दोस०** गाहा । हिंसा-ऽनृतादिदोषरहितस्य क्रोधादिप्रशान्तस्य इन्द्रियविषयविनिवृत्तस्य स्वस्थमनसः हास्यादिविकारवर्जितलक्षणः **प्रशान्तो** रसो भवति । प्रशान्तरसे उदाहरणम् - **सब्भाव०** गाहा । **सब्भाव** इति निर्विकारताधर्मार्थम्, न लोकपङ्क्तिनिमित्तम्[५], **निव्वियारयो** भ्रूक्षेपादिवर्जितः। इंदियाइदोसेसु **उवसंतो**, कोधादिसु **पसंतो**, पसन्नमणचित्तो जो सो **सोम्मदिट्ठी** । **ही** इत्ययं मुनेः प्रशान्तभावातिशयप्रदर्शने। **पीवरा** महती **श्रीः** शोभा, महाश्रीक इत्यर्थः।

**एते णव०** गाहा। **एते णव कव्वरसा** बत्तीसं जे सुत्तदोसा ते **बत्तीससुत्तदोसा** एव **विधी** बत्तीसादोसवइकरेण वा एते **उप्पन्ना**। कधं? उच्यते - जधा वीरो रसो संगामादिसु हिंसाए भवति तहा तव-संजमकरणादिसु वि संभवति त्ति। एवं सुभा-ऽसुभवइकरेण उप्पज्जंति **वा**(तधा?) उदाहरणगाहासु य जहाभिहितसरूवा जाणितव्वा। **सुद्ध** त्ति कश्चिद् गाथासूत्रबन्धः अन्यतमरसेनैव सुद्धेन प्रतिबद्धः, कश्चिद् मिश्रः द्विकादिसंयोगेन। गतं णवणामं।

**[हा० २६२] से किं तं नवनामे** इत्यादि। **नवनाम्नि नव काव्यरसाः प्रज्ञप्ताः,** रसा इव रसा इति। उक्तं च -

*मिदु-मधुर-रिभित-सुभतरभणीतिणिद्दोसभी(भू?)सणाणुगता[१]।*
*सुह-दुहकम्मरसा इव कव्वस्स रसा हवंतेते ॥१॥* [ ]

**वीरो सिंगारो** इत्यादि । **वीरः शृङ्गारः अद्भुतश्च रौद्रश्च भवति बोद्धव्यः व्रीडनको बीभत्सो हास्यः करुणः प्रशान्तश्च**। एते च लक्षणत उदाहरणतश्चोच्यन्ते, तत्र वीररसलक्षणमभिधित्सुराह - **तत्थ** गाहा। व्याख्या - **तत्र परित्यागे च तपश्चरणे** तपोऽनुष्ठाने **शत्रुजनविनाशे च** रिपुजनव्यापत्तौ च यथासंख्यम**ननुशय-धृति-पराक्रमचिह्नो वीरो रसो भवति,** परित्यागे **अननुशयः**, न 'इदं मया कृतम्' इति गर्वं करोति, किं वा 'कृतम्' इति विषादम्। तपश्चरणे **धृतिः**, न त्वार्त्तध्यानम्। शत्रुजनविनाशे च **पराक्रमो** न वैक्लव्यम्। एतल्लिंगो वीरो रसो भवति । उदाहरणमाह— **वीरो रसो यथा- सो नाम** गाहा निगदसिद्धा।

शृङ्गाररसलक्षणप्रतिपादनायाह — **सिंगारो** गाहा। **शृङ्गारो नाम रसः**, किंविशिष्टः?

Jain Education International For Private & Personal Use Only www.jainelibrary.org

इत्याह-**रतिसंयोगाभिलाषसञ्जननः** तत्कारणत्वात्। **मण्डन[-विलास]- विव्वोक-हास्य-लीला-रमणलिंगः**, तत्र **मण्डनं** कटकादिभिः, **विलासः** कामगर्भो रम्यो नयनादिविभ्रमः, **विव्वोयं** ति देशीपदम् अङ्गजविकारार्थे, **हास्य-लीले** प्रतीते, **रमणं** क्रीडनम्, एतच्चिह्न इति गाथार्थः। उदाहरणमाह— **शृङ्गारो रसो यथा- मधुर** गाहा निगदसिद्धा। अद्भुतलक्षणमाह- **विम्हयकरो** गाहा। **विस्मयकरः** अपूर्वो वा तत्प्रथमतयोत्पद्यमानो भूतपूर्वो वा पुनरुत्पन्नो यो रसो भवति स **हर्ष-विषादोत्पत्तिलक्षणः** तद्बीजत्वाद् **अद्भुतो नामेति** गाथार्थः। उदाहरणमाह— **अद्भुतो रसो यथा -अब्भुततर** गाहा निगदसिद्धा।

रौद्ररसलक्षणमाह— **भयजणण** गाहा। **भयजननरूप-शब्दा-ऽन्धकार-चिन्ता-कथासमुत्पन्नः** इत्यत्र भयजननत्वं रूपादीनां प्रत्येकमभिसम्बध्यते, भयजननरूपदर्शनात् समुत्पन्नः,[२] एवं भयजननशब्दश्रवणाद् भयजननान्धकारयोगात् भयजननचिन्तासमुद्भूतेः भयजननकथाश्रवणात् **समुत्पन्नः** सञ्जातः। किंविशिष्टः ? इत्यत्राह— **सम्मोह-सम्भ्रम-विषाद-मरणलिंगो रौद्रः**, तत्र **सम्मोहः** अत्यन्तमूढता, **सम्भ्रमः** किंकर्त्तव्यतानिबन्धन आत्मपरिणामः, **विषाद-मरणे** प्रतीते इति गाथार्थः। उदाहरणमाह- **रौद्रो रसो यथा- भिउडी०** गाहा। **भृकुटिः** ललाटे वलिभङ्गः, तया **विडम्बितं** न्यत्कृतं मुखं यस्य तथाविधः, तस्याऽऽमन्त्रणं हे **भृकुटिविडम्बितमुख** ! **संदष्टौष्ठ** ग्रस्तौष्ठ ! इत्यर्थः, **इतः** इति इतश्चेतश्च **रुधिरोत्कीर्णः** विक्षिप्तरुधिर इति भावः, **हंसि पशुं** व्यापादयसि अजम्, **असुरनिभ** असुराकार, **भीमरसित** भयानकशब्द, **अतिरौद्र रौद्रोऽसि** इति गाथार्थः।

व्रीडनकलक्षणमाह- **विणओ** गाहा। **विनयोपचार-गुह्य-गुरुदारव्यतिक्रमोत्पन्न** इति, विनयोपचारादिषु व्यतिक्रमशब्दः प्रत्येकमभिसम्बध्यते, भवति **रसो व्रीडनकः लज्जाशङ्काकरणलिङ्ग** इति गाथार्थः। उदाहरणमाह-**व्रीडनको रसो यथा-किं लोइय०** गाहा। क्वचिद् देशाचारः— अभिनववध्वाः प्रथमयोन्युद्भेदे रक्तचर्चितं तन्निवसनमक्षतयोनिसंज्ञापनार्थं पटलकविन्यस्त(स्तं ?)सम्पादितपूजोपचारं सकललोकप्रत्यक्षमेव तद्गुरुजनो वन्दते इति। एवं चात्मावस्थां सखीपुरतो वधूर्भणति— **किं लौकिकक्रियायाः लज्जनकतरमिह** ? **लज्जिता भवामि**, किमिति ? **वारेज्जा** विवाहो,

तत्र **गुरुजनो परिवन्दते यद् वधूपोत्तिं** वधूनिवसनमिति गाथार्थः।

बीभत्सरसलक्षणमाह— **असुइ०** गाहा । **अशुचिकुणपदुर्दर्शन[3]-संयोगाभ्यासगन्धनिष्पन्नः**, कारणाशुचित्वादशुचि शरीरं तदेव प्रतिक्षणमासन्नकुणपभावात् कुणपं तदेव च विकृतप्रदेशत्वाद् दुर्दर्शनं तेन संयोगाभ्यासात् तद्गन्धोपलब्धेर्वा[4] समुत्पद्यत इति **निर्वेदा-ऽविहिंसालक्षणो रसो भवति बीभत्स** इति गाथार्थः। उदाहरणमाह-**बीभत्सो रसो यथा-असुइ** गाहा सूत्रसिद्धा।

हास्यरसलक्षणाभिधित्सयाऽऽह-**रूववय** गाहा । **रूप-वयो-वेष-भाषा-विपरीतविडम्बनासमुत्पन्नो हास्यो मनःप्रहर्ष**कारी **प्रकाशलिंगः** प्रत्यक्षलिंगो **रसो भवती**ति गाथार्थः। उदाहरणमाह - **हास्यो रसो यथा-पासुत्तमसी०** गाहा। प्रकटार्था।

करुणरसलक्षणमाह— **पियविप्पओग०** गाहा। **प्रियविप्रयोग-बन्ध-वध-व्याधि-निपातसम्भ्रमोत्पन्नः शोचित-विलपित-प्रम्लान-रुदितलिंगो रसः करुणः** । तत्र **शोचितं** मानसो विकारः, शेषं प्रकटार्थमिति गाथार्थः। उदाहरणमाह - **करुणो रसो यथा-पज्झाय** गाहा । **प्रध्यातेन** अतिचिन्तया **क्लान्तं बाष्पागतप्रप्लुताक्षम्** स्यन्दमानाश्रुव्याप्तलोचनमिति भावः। शेषं सूत्रसिद्धमिति गाथार्थः।

प्रशान्तरसलक्षणमाह - **निद्दोस** गाहा, **निर्दोषमनःसमाधानसम्भवः** हिंसादिदोषरहितस्य इन्द्रियविषयविनिवृत्त्या स्वस्थमनसो **यः प्रशान्तभावेन** क्रोधादि-त्यागेन **अविकारलक्षणः** हास्यादिविकारवर्जितः **असौ रसः प्रशान्तो ज्ञातव्य** इति गाथार्थः। उदाहरणमाह - **प्रशान्तो रसो यथा- सब्भाव०** गाहा। **सद्भावनिर्विकारं** परमार्थनिर्विकारम्, न मातृस्थानतः। **उपशान्त-प्रशान्त-सौम्यदृष्टि**, उपशान्ता इन्द्रियदोषत्यागेन, प्रशान्ता क्रोधादित्यागतः, अनेनोभयेन सौम्या दृष्टिर्यस्मिन् तत्तथा । **हीत्यव्ययं मुनेः** प्रशान्तभावातिशयप्रदर्शने, **यथा मुनेः शोभते मुखकमलं पीवरश्रीकं** प्रधानलक्ष्मीकमिति गाथार्थः।

**एते णव** गाहा[5]। **एते नव काव्यरसाः** अनन्तरोदिताः **द्वात्रिंशद्दोषविधिसमुत्पन्नाः** अनृतादिद्वात्रिंशत्सूत्रदोष-तपोविधिसमुद्भवा इत्यर्थः। तथाहि-वीरो रसो सङ्ग्रामादिषु हिंसया भवति, तपः-संयमकरणादावपि भवति, एवं शेषेष्वपि यथासम्भवं भावना कार्या। तथा चाह-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**गाथाभ्यः** उक्तलक्षणाभ्यः **मुणितव्याः** ज्ञातव्याः **भवन्ति शुद्धा वा मिश्रा वा**। शुद्ध इति कश्चिद् गाथासूत्रबन्धः अन्यतमरसेनैव शुद्धेन प्रतिबद्धः, कश्चिद् मिश्रः द्विकादिसंयोगेनेति गाथार्थः। उक्तं **नवनाम**।

**[हे० २६२]** अथ नवनाम निर्दिशन्नाह - **से किं तं नवनामे**[1] इत्यादि। **नवनाम्नि नव काव्यरसाः प्रज्ञप्ताः**। तत्र कवेरभिप्रायः काव्यम्। रस्यन्ते अन्तरात्मनाऽनुभूयन्त इति रसाः, तत्तत्सहकारिकारणसन्निधानोद्भूताश्चेतोविकारविशेषा इत्यर्थः। उक्तं च -

*बाह्यार्थालम्बनो यस्तु विकारो मानसो भवेत्।*
*स भावः कथ्यते सद्भिस्तस्योत्कर्षो रसः स्मृतः ॥१॥* [ ]

काव्येषूपनिबद्धा रसाः **काव्यरसाः** वीर-शृङ्गारादयः। तानेवाह - **वीरो सिंगारो** इत्यादिगाथा सुगमा। नवरं *शूर वीर विक्रान्तौ* [*का० धा० ९/२१५*] इति, वीरयति विक्रामयति त्याग-तपो-वैरिनिग्रहेषु प्रेरयति प्राणिनमित्युत्तमप्रकृतिपुरुषचरितश्रवणादिहेतुसमुद्भूतो दानाद्युत्साहप्रकर्षात्मको वीरः, रस इति सर्वत्र गम्यते १। शृङ्गं सर्वरसेभ्यः परमप्रकर्ष-कोटिलक्षणमियर्ति गच्छतीति कमनीयकामिनीदर्शनादिसम्भवो रतिप्रकर्षात्मकः शृङ्गारः, सर्वरसप्रधान इत्यर्थः, अत एव

*शृङ्गार[2]-हास्य-करुणा रौद्र-वीर-भयानकाः।*
*बीभत्सा-ऽद्भुत-शान्ताश्च नव नाट्ये रसाः स्मृताः ॥१॥* [ ]

इत्यादिष्वयं सर्वरसानामादावेव पठ्यते, अत्र तु त्याग-तपोगुणौ वीररसे वर्तेते, त्याग-तपसी च *त्यागो गुणो गुणशतादधिको मतो मे* [ ] *परं लोकातिगं धाम तपः श्रुतमिति द्वयम्* [ ] इत्यादिवचनात् समस्तगुणप्रधाने इत्यनया विवक्षया वीररसस्यादावुपन्यास इति २। श्रुतं शिल्पं त्याग-तपः-शौर्यकर्मादि वा सकलभुवनातिशायि किमप्यपूर्वं वस्त्वद्भुतमुच्यते, तद्दर्शन-श्रवणादिभ्यो जातो रसोऽप्युपचाराद्विस्मयरूपोऽद्भुतः ३। रोदयति अतिदारुणतया अश्रूणि मोचयतीति रौद्रं रिपुजन-महारण्या-ऽन्धकारादि, तद्दर्शनाद्युद्भवो विकृताध्यवसायरूपो रसोऽपि रौद्रः ४। व्रीडयति लज्जामुत्पादयतीति लज्जनीय-वस्तुदर्शनादिप्रभवो मनोव्यलीकतादिस्वरूपो **व्रीडनकः**, अस्य स्थाने भयजनक -

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सङ्ग्रामादिवस्तुदर्शनादिप्रभवो भयानको रसः पठ्यते अन्यत्र, स चेह रौद्ररसान्तर्भावविवक्षणात् पृथग् नोक्तः ५ । शुक्रशोणितोच्चारप्रश्रवणाद्यनिष्टमुद्वेजनीयं वस्तु बीभत्समुच्यते, तद्दर्शनश्रवणादिप्रभवो जुगुप्साप्रकर्षस्वरूपो रसोऽपि **बीभत्सः** ६ । विकृता-ऽसम्बद्धपरवचन-वेषा-ऽलङ्कारादिहास्यार्हपदार्थप्रभवो मनःप्रहर्षादिचेष्टात्मको रसोऽपि **हास्यः** ७ । कुत्सितं रौत्यनेनेति निरुक्तवशात् **करुणः**, करुणास्पदत्वात् करुणः, प्रियविप्रयोगादिदुःखहेतुसमुत्थः शोकप्रकर्षस्वरूपः करुणो रस इत्यर्थः ८ । प्रशाम्यति क्रोधादिजनितौत्सुक्यरहितो भवत्यनेनेति **प्रशान्तः**, परमगुरुवचःश्रवणादिहेतुसमुल्लसित उपशमप्रकर्षात्मा प्रशान्तो रस इत्यलं विस्तरेण ९ ।

एतानेव लक्षणादिद्वारेण बिभणिषुर्वीररसं तावल्लक्षणतो निरूपयन्नाह - **तत्थ परिचागम्मि य** गाहा । **तत्र** तेषु नवसु रसेसु मध्ये **परित्यागे** दाने **तपश्चरणे** तपोविधाने **शत्रुजनविनाशे च** यथासङ्ख्यम**ननुशय-धृति-पराक्रमचिह्नो वीरो रसो भवति** । इदमुक्तं भवति - दाने दत्ते यदाऽनुशयो गर्वः पश्चात्तापो वा तं न करोति, तपसि च कृते धृतिं करोति नार्त्तध्यानम्, शत्रुविनाशे च पराक्रमते, न तु वैक्लव्यमवलम्बते, तदा एतैर्लिङ्गैर्ज्ञायतेऽयं प्राणी वीररसे वर्तते, इत्येवमन्यत्रापि भावना कार्येति । उदाहरणनिदर्शनार्थमाह - **वीरो रसो यथे**त्युपदर्शनार्थमेतत् । **सो नाम** गाहा पाठसिद्धा । नवरं वीररसवत्पुरुषचेष्टितप्रतिपादना-देवंप्रकारेषु काव्येषु वीररसः प्रतिपत्तव्य इति भावार्थः । अपरं चेहोत्तमपुरुषजेतव्यकाम-क्रोधादिभावशत्रुजयेनैव वीररसोदाहरणं मोक्षाधिकारिणि प्रस्तुतशास्त्रे इतरजनसाध्यसंसारकारण-द्रव्यशत्रुनिग्रहस्याप्रस्तुतत्वादिति मन्तव्यमिति । एवमन्यत्रापि भावार्थोऽवगन्तव्य इति ।

शृङ्गाररसं लक्षणतः प्राह - **सिंगारो** गाहा । **शृङ्गारो नाम रसः** । किंविशिष्ट इत्याह - **रती**त्यादि, रतिशब्देनेह रतिकारणानि सुरतव्यापाराङ्गानि ललनादीनि गृह्यन्ते, तैः सार्धं **संयोगाभिलाषसंजनकः**, तस्य तत्कार्यत्वादेव । तथा **मण्डन-विलास-विब्बोक-हास्य-लीला-रमणानि लिङ्गं** यस्य स तथा, तत्र **मण्डनं** कटकादिभिः, **विलासः** कामगर्भो रम्यो नयनादिविभ्रमः, **विब्बोय** त्ति देशीपदम् अङ्गजविकारार्थे[३], **हास्यं** प्रतीतम्, **लीला** सकामगमन-भाषितादिरमणीयचेष्टा, **रमणं** क्रीडनमिति । उदाहरणमाह - **सिंगारो** इत्यादि । **महुर** गाहा । **श्यामा** स्त्री **मेखलादाम** रसनासूत्रं **दर्शयति** प्रकटयतीत्यर्थः,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

कथंभूतमित्याह - **रणन्मणिकिङ्किणीस्वरमाधुर्यान्मधुरम्**, तथा **विलासैः** सकामैश्चेष्टाविशेषै-**र्ललितं** मनोहारि, तथा **शब्दोद्दामं** किङ्किणीस्वनमुखरम्, किमिति तत् प्रकटयतीत्याह - यतो **हृदयोन्मादनकरं** प्रबलस्मरदीपनं **यूना**मिति। शृङ्गारप्रधानचेष्टाप्रतिपादनादयं शृङ्गारो रस इति।

अद्भुतं स्वरूपतो लक्षणतश्चाह - **विम्हय** गाहा। कस्मिँश्चिदद्भुते वस्तुनि दृष्टे **विस्मयकरो**[४] विस्मयोत्कर्षरूपो **यो रसो भवति सोऽद्भुतो नामे**ति सण्टङ्कः। कथंभूतः ? **अपूर्वः** अननुभूतपूर्वो **भूतपूर्वो वा**ऽनुभूतपूर्वः। किंलक्षण इत्याह - **हर्ष-विषादोत्पत्तिलक्षणः**, शुभे वस्तुन्यद्भुते दृष्टे हर्षजननलक्षणः, अशुभे तु विषादजनन-लक्षण इत्यर्थः। उदाहरणमाह - **अब्भुय** गाहा। **इह** जीवलोके**ऽद्भुततरम् इतो** जिनवचनात् **किमन्यदस्ति** ? नास्तीत्यर्थः। कुत इत्याह - **यद्** यस्मा**ज्जिनवचनेनार्थाः** जीवादयः सूक्ष्म-व्यवहित-तिरोहिता-ऽतीन्द्रिया-ऽमूर्त्तादिस्वरूपाः अतीता-ऽनागत-वर्तमानरूप**त्रिकालयुक्ता अपि ज्ञायन्त** इति।

अथ रौद्रं हेतुतो लक्षणतश्चाह - **भय** गाहा। **रूपं** शत्रु-पिशाचादीनाम्, **शब्दस्तेषामेव**, **अन्धकारं** बहलतमोनिकुरुम्बरूपम्, उपलक्षणत्वादरण्यादयश्च पदार्था इह गृह्यन्ते, तेषां **भयजनका**नां रूपादिपदार्थानां येयं **चिन्ता** तत्स्वरूपपर्यालोचनरूपा, **कथा** तत्स्वरूपभणनलक्षणा, तथोपलक्षणत्वाद् दर्शनादि च गृह्यते, तेभ्यः **समुत्पन्नो** जातो रौद्रो रस इति योगः। किंलक्षण इत्याह - **संमोहः** किंकर्तव्यत्वमूढता, **सम्भ्रमो** व्याकुलत्वम्, **विषादः** किमहमत्र प्रदेशे समायात इत्यादिखेदस्वरूपः, **मरणं** भयोद्भ्रान्त **गजसुकुमाल**हन्तृ**सोमिल**द्विजस्येव प्राणत्यागः, तानि **लिङ्गं** लक्षणं यस्य स तथा। आह - ननु भयजनकरूपादिभ्यः समुत्पन्नः संमोहादिलिङ्गश्च भयानक एव भवति, कथमस्य रौद्रत्वम् ? सत्यम्, किन्तु पिशाचादिरौद्रवस्तुभ्यो जातत्वाद् रौद्रत्वमस्य विवक्षितमित्य-दोषः। तथा शत्रुजनादिदर्शने तच्छिरःकर्त्तनादिप्रवृत्तानां पशु-शूकर-कुरङ्गवधादिप्रवृत्तानां च यो रौद्राध्यवसायात्मको [६]भ्रकुटीभङ्गादिलिङ्गो रौद्रो रसः सोऽप्युपलक्षणत्वादत्रैव द्रष्टव्यः, अन्यथा स निरास्पद एव स्यात्, अत एव रौद्रपरिणामवत्पुरुषचेष्टाप्रतिपादकमेवोदाहरणं दर्शयिष्यति, भीतचेष्टाप्रतिपादकं तु तत् स्वत एवाभ्यूह्यमित्यलं प्रपञ्चेन। उदाहरणमाह -

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**भिउडी** गाहा । त्रिवलीतरङ्गितललाटरूपया भ्रुकुट्या[६] विडम्बितं विकृतीकृतं मुखं यस्य तत्सम्बोधनं हे **[७]भ्रुकुटीविडम्बितमुख ! संदष्टौष्ठ ! इत** इति इतश्च इतश्च **रुहिरमोक्किण्ण** त्ति विक्षिप्तरुधिर ! इत्यर्थः, **हंसि** व्यापादयसि **पशुम्, असुरो** दानवस्त**न्निभ** ! तत्सदृश ! भीमं रसितं शब्दितं यस्य, तत्संबोधनं हे **भीमरसित ! अतिरौद्र** अतिशयरौद्राकृते ! **रौद्रोऽसि** रौद्रपरिणामयुक्तोऽसीति।

अथ व्रीडारसं हेतुतो लक्षणतश्चाह - **विणओ** गाहा । **विनयोपचार-गुह्य-गुरुदारमर्यादानां व्यतिक्रमः** स्थितिलङ्घनं तदुत्पन्नो **व्रीडनको नाम रसो** भवति । तत्र विनयार्हाणां विनयोपचारव्यतिक्रमे [८]शिष्टस्य व्रीडा प्रादुरस्ति - पश्यत, मया कथं पूज्यपूजाव्यतिक्रमः कृतः ? इति । तथा **गुह्यं** रहस्यं तस्य च व्यतिक्रमेऽन्यकथनादिलक्षणे व्रीडारसः आविर्भवति । तथा **गुरवः** पूज्याः पितृव्य-कलाग्राहकोपाध्यायादयस्त**द्दारैश्च** सहाब्रह्मसेवादिलक्षणे **मर्यादाव्यतिक्रमे** कृते लज्जारसः प्रादुर्भवतीति । एवमन्योऽपि द्रष्टव्यः । किंलक्षण इत्याह - **लज्जाशङ्कयोः करणं** विधानं **लिङ्गं** यस्य स तथा, तत्र शिरसोऽधोऽवनमन - गात्रसङ्कोचादिका लज्जा, [९]मां न क्वचित् कश्चित् किञ्चिद्भणिष्यतीति सर्वत्राभिशङ्कितत्वं शङ्केति । अत्रोदाहरणं **किं लोइय** गाहा । इह क्वचिद्देशेऽयं समाचारः, यदुत अभिनववध्वाः [१०]स्वभर्त्रा यत् प्रथमयोन्युद्भेदे कृते शोणितचर्चितं तन्निवसनम्, 'अक्षतयोनिरियं न पुनरग्रेऽप्यासेवितानाचारा' इति संज्ञापनार्थं प्रतिगृहं भ्राम्यते, सकलजनसमक्षं च श्वश्रू-श्वशुरादिस्तदीयगुरुजनः सतीत्वख्यापनार्थं तद्वन्दत इति, एवं व्यवस्थिते सखीपुरतो वधूर्भणति - **किं लोइयकरणीउ त्ति करणिः** क्रिया, ततश्च **लौकिकक्रियाया** लौकिककर्त्तव्यात् सकाशात् किमन्यल्ल**लज्जनीयतरम्** ? न किञ्चिदित्यर्थः,[११] इत्यतो लज्जिताऽहं भवामि । किमिति ? यतो **वारेज्जो** विवाहः, तत्र **गुरुजनो वन्दते वहूपोत्तिं** ति[१२] वधूनिवसनमिति ।

अथ बीभत्सं हेतुतो लक्षणतश्चाह - **असुइ** गाहा । **अशुचि** मूत्र-पुरीषादि वस्तु, **कुणपं** शवः, अपरमपि यद्**दुर्दर्शनं** गलल्लालादिकरालं शरीरादि, तेषां **संयोगाभ्यासाद्** अभीक्ष्णं तद्दर्शनादिरूपात् तद्गन्धाच्च **निष्पन्नो 'बीभत्सो रसो भवती'** ति सम्बन्धः । किंलक्षण इत्याह - **निर्वेदश्च** अकारस्य लुप्तस्य दर्शना**दविहिंसा** च **तल्लक्षणं** यस्य स तथा । तत्र निर्वेदः उद्वेगः, अविहिंसा जन्तुघातादिनिवृत्तिः, इह च शरीरादेरसारतामुपलभ्य हिंसादिपापेभ्यः

Jain Education International For Private & Personal Use Only www.jainelibrary.org

कश्चिन्निवर्तते इत्यविहिंसाऽपि तल्लक्षणत्वेनोक्तेति । **असुई**त्याद्युदाहरणगाथा । इह कश्चिदुपलब्धशरीराद्यसारतास्वरूपः प्राह - कलिः जघन्यः कालविशेषः कलहो वा, तत्र सर्वानिष्टहेतुत्वात् सर्वकलहमूलत्वाद्वा शरीरमेव कलिः **शरीरकलिः**, तं मूर्च्छात्यागेन मुक्तिगमनकाले सर्वथात्यागेन वा **धन्याः** केचिद्वि**मुञ्चन्ती**ति सण्टङ्कः । कथंभूतम् ? **अशुचिमलभृतानि** निर्झराणीव **निर्झराणि** श्रोत्रादिविवराणि यस्य तं तथा, **सर्वकालमपि स्वभावतो दुर्गन्धम्**, तथा **बहुमलकलुष**मिति । एवं वाचनान्तराण्यपि भावनीयानि ।

अथ हास्यरसं हेतु-लक्षणाभ्यामाह - **रूव** गाहा । **रूप-वयो-वेष-भाषाणां** हास्योत्पादनार्थं **वैपरीत्येन** या **विडम्बना** निर्वर्तना त**त्समुत्पन्नो** 'हास्यो रसो भवती'ति संयोगः । तत्र पुरुषादेर्योषिदादिरूपकरणं रूपवैपरीत्यम्, तरुणादेर्वृद्धादिभावापादानं वयोवैपरीत्यम्, राजपुत्रादेर्वणिगादिवेषनिर्वर्तनं वेषवैपरीत्यम्, **गुर्जरा**देस्तु **मध्यदेशा**दि-भाषाभिधानं भाषावैपरीत्यम् । स च कथंभूतः स्यादित्याह - **मणप्पहासो** त्ति, मनःप्रहर्षकारी **प्रकाशो** नेत्र-वक्त्रादिविकाशस्वरूपो **लिङ्गं** यस्य स तथा, अथवा **प्रकाशानि** प्रकटान्युदरप्रकम्पना-ऽट्टहासादीनि लिङ्गानि यस्येति स तथेति । **पासुत्तमसी** त्यादिनिदर्शन-गाथा । इह कयाचिद् वध्वा प्रसुप्तो निजदेवरश्चसूर्या मषीमण्डनेन मण्डितः, प्रबुद्धं च तं सा हसति, तां च हसन्तीमुपलभ्य कश्चित् पार्श्ववर्तिनं कञ्चिदामन्त्र्य प्राह - **ही**ति कन्दर्पातिशयद्योतकं वचः, पश्यत भोः **श्यामा** स्त्री यथा **हसती**ति सम्बन्धः, किं कुर्वती ? **देवरं प्रलोकयन्ती,** कथंभूतम् ? **पासुत्ते**त्यादि छिन्नप्ररूढादिवदत्र कर्मधारयः, पूर्वं **प्रसुप्त**श्च असौ ततो **मषीमण्डित**श्चासौ ततोऽपि **प्रबुद्ध**श्च स तथा तम्, कथंभूता ? **स्तनभरकम्पनेन प्रणतं मध्यं** यस्याः सा तथेति ।

अथ हेतुतो लक्षणतश्च करुणरसस्वरूपमाह - **पियविप्पओय** गाहा । **प्रियविप्रयोग-बन्ध-वध-व्याधि-विनिपात-सम्भ्रमे**भ्यः **समुत्पन्नः** करुणो रस इति योगः । तत्र **विनिपातः** सुतादिमरणम्, **सम्भ्रमः** परचक्रादिभयम्, शेषं प्रतीतम् । किंलक्षण इत्याह - **शोचित-विलपित-प्रम्लान-रुदितानि लिङ्गानि** लक्षणानि यस्य स तथा । तत्र **शोचितं** मानसो विकारः, शेषं विदितमिति । **पज्झाये**त्याद्युदाहरणगाथा । अत्र प्रियविप्रयोगदूमितां बालां प्रति वृद्धा काचिदाह - **तस्य** कस्यचित् प्रियतमस्य **वियोगे** हे **पुत्रिके ! दुर्बलकं ते**

**मुखं जातम्** कथंभूतम्, ? **पज्झायकिलामितयं** ति, प्रध्यातं प्रियजनविषयमतिचिन्तितं तेन क्लान्तम्। **बाहागयपप्पु**[१३]**तच्छयं** ति, बाष्पस्यागतम् आगमनं तेन[१४] प्रप्लुते व्याप्ते अक्षिणी यत्र तत्तथा, **बहुशः** अभीक्ष्णमिति।

अथ हेतुलक्षणद्वारेणैव प्रशान्तरसमुदाहरति - **निद्दोस** गाहा। **निर्दोषं** हिंसादिदोष-रहितं **यन्मनस्तस्य** यत् **समाधानं** विषयाद्यौत्सुक्यनिवृत्तिलक्षणं स्वास्थ्यं तस्मात् **सम्भवो** यस्य स तथा। **प्रशान्तभावेन** क्रोधादिपरित्यागेन **यो** भवतीति गम्यते, **स प्रशान्तो रसो ज्ञातव्य** इति घटना। स चा**विकारलक्षणो** निर्विकारताचिह्न इत्यर्थः। **सब्भावे**त्याद्युदाहरण-गाथा। प्रशान्तवदनं कञ्चित् साधुमवलोक्य कश्चित् समीपस्थितं कञ्चिदाश्रित्य प्राह - **ही**ति प्रशान्तभावातिशयद्योतकः, पश्य भोः ! **यथा मुनेर्मुखकमलं शोभते**, कथंभूतम् ? **सद्भावतो** न मातृस्थानतो **निर्विकारं** विभूषा-भ्रूक्षेपादिविकाररहितम्, **उपशान्ता** रूपालोकनाद्यौत्सुक्यत्यागतः **प्रशान्ता** क्रोधादिदोषपरिहारतोऽत एव **सौम्या दृष्टि**र्यत्र तत्तथा। अस्मादेव च **पीवरश्रीकम्** उपचितोपशमलक्ष्मीकमिति।

साम्प्रतं नवानामपि रसानां संक्षेपतः स्वरूपं कथयन्नुपसंहरन्नाह - **एए नव** गाहा। **एते नव काव्यरसाः** अनन्तरोक्त**गाथाभि**र्यथोक्तप्रकारेणैव **मुणितव्या** ज्ञातव्याः । कथंभूताः ? *अलियमु*[१५]*वघायजणयं निरत्थयमवत्थयं छलं दुहिलं* [*आवश्यकनि०८८१-८८४, कल्पभा० २७८-२८१*] इत्यादयोऽत्रैव वक्ष्यमाणा ये द्वात्रिंशत् सूत्र**दोषास्तेषां विधिः** विरचनं तस्मात् **समुत्पन्नाः**, इदमुक्तं भवति - अलीकतालक्षणो यस्तावत् सूत्रदोष उक्तस्तेन कश्चिद् रसो निष्पद्यते, यथा -

*तेषां कटतटभ्रष्टैर्गजानां मदबिन्दुभिः।*
*प्रावर्तत नदी घोरा हस्त्यश्व-रथवाहिनी ॥१॥* [ ]

इत्येवंप्रकारं सूत्रमलीकतादोषदुष्टम्, रसश्चायमद्भुतः, ततोऽनेनालीकतालक्षणेन सूत्रदोषेणाद्भुतो रसो निष्पन्नः। तथा कश्चिद्रस उपघातलक्षणेन सूत्रदोषेण निर्वर्त्यते, यथा -

*स एव प्राणिति प्राणी प्रीतेन कुपितेन च।*
*वित्तैर्विपक्षरक्तैश्च प्रीणिता येन मार्गणाः ॥१॥* [ ]

इत्यादिप्रकारं सूत्रं परोपघातलक्षणदोषदुष्टम्, वीररसश्चायम्, ततोऽनेनोपघातलक्षणेन सूत्रदोषेण

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वीररसोऽत्र निर्वृत्तः इत्येवमन्यत्रापि यथासम्भवं सूत्रदोषविधानाद्रसनिष्पत्तिर्वक्तव्या। प्रायोवृत्तिं चाश्रित्यैवमुक्तम्, तपो-दानविषयस्य वीररसस्य प्रशान्तादिरसानां च क्वचिदनृतादिसूत्रदोषानन्तरेणापि निष्पत्तेरिति। पुनः किंविशिष्टा अमी भवन्तीत्याह - **हवंति सुद्धा व मीसा** व त्ति सर्वेऽपि शुद्धा वा मिश्रा वा भवन्ति, क्वचित् काव्ये शुद्ध एक एव रसो निबध्यते, क्वचित्तु [१६]द्व्यादिरससंयोग इति भाव इति गाथार्थः । तदेवमेतैर्वीर-शृङ्गारादिभिर्नवभिर्नामभिरत्र वक्तुमि[१७]ष्टस्य रसस्य सर्वस्याप्यभिधानान्नवनामेदमुच्यते। **सेतं नवनामे** ति निगमनम्।

**[सू० २६३] से किं तं दसनामे ? दसनामे दसविहे पण्णत्ते। तं जहा- गोण्णे १, नोगोण्णे २, आयाणप[१]देणं ३, पडिपक्खपदेणं ४, [२]पाहण्णयाए ५, अणादियसिद्धंतेणं ६, नामेणं ७, अवयवेणं ८, [३]संजोगेणं ९, पमाणेणं १०।**

**[सू० २६४] से किं तं गोण्णे ? गोण्णे — [४]खमतीति खमणो, तपतीति तपणो, जलतीति जलणो, पवतीति पवणो। सेतं गोण्णे।**

**[सू० २६५] से किं तं नोगोण्णे ? नोगोण्णे— अकुंतो सकुंतो, अमुग्गो समुग्गो, अमुद्दो समुद्दो, अलालं पलालं, अकुलिया सकुलिया, नो पलं असतीति पलासो, [५]अमातिवाहए मातिवाहए, अबीय[६]वावए बीयवावए, [७]नो इंदं गोवयतीति इंदगोवए। से तं नोगोण्णे।**

**[सू० २६६] से किं तं आयाणपदेणं ? *आयाणपदेणं— [८]आवंती चातुरंगिज्जं असंखयं जण्णइज्जं [९]पुरिसइज्जं एलइज्जं वीरियं धम्मो मग्गो समोसरणं [१०]आहत्त[११]धिज्जं गंथे जमईयं। सेतं आयाणपदेणं।**

* अत्र खं०जे०वा०मध्ये आयाणपदेणं धम्मो मंगलं चूलिया चाउरंगिज्जं असंखयं आवंती आहन्न(त्त)हिज्जं अद्दइज्जं सेत्तं आयाणपदेणं इति पाठो वर्तते । चूर्णिकृता हारिभद्रीविवृतिकृता च अयमेव ईदृश एव वा कश्चित् पाठः स्वीकृतो भाति ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

[सू० २६७] से किं तं पडिपक्खपदेणं ? पडिपक्खपदेणं— णवेसु गामा-[१२]ऽऽगर-णगर-खेड-[१३]कब्बड-मडंब-दोणमुह-पट्टणा-ऽऽसम-संवाह-सन्निवेसेसु निविस्समाणेसु असिवा सिवा, अग्गी सीयलो, विसं [१४]महुरं, कल्लालघरेसु अंबिलं [१५]साउयं, [१६]जे लत्तए से अलत्तए, जे लाउए से अलाउए, जे सुंभए से कुसुंभए, आलवंते विवलीयभासए । सेतं पडिपक्खपदेणं।

[सू० २६८] से किं तं पाहण्णयाए ? पाहण्णयाए— असोगवणे सत्तवण्णवणे चंपकवणे चूयवणे नागवणे पुन्नागवणे उच्छुवणे दक्खवणे [१७]सालवणे। सेतं पाहण्णयाए।

[सू० २६९] से किं तं अणादियसिद्धंतेणं ? अणादियसिद्धंतेणं— [१८]धम्मत्थिकाए, अधम्मत्थिकाए, आगासत्थिकाए, जीवत्थिकाए, पोग्गलत्थिकाए, अद्धासमए। सेतं अणादियसिद्धंतेणं।

[सू० २७०] से किं तं नामेणं ? नामेणं— पिउपियामहस्स नामेणं उन्नामियए। सेतं णामेणं।

[सू० २७१] से किं तं अवयवेणं ? अवयवेणं—
सिंगी [१९]सिंही विसाणी दाढी पक्खी खुरी णही वाली।
दुपय चउप्पय बहुपय [२०]णंगूली केसरी [२१]कंकुही ॥८३॥
परियरबंधेण भडं जाणेज्जा, महिलियं [२२]निवसणेणं।
सित्थेण [२३]दोणपागं, कविं च [२४]एगाइ गाहाए ॥८४॥ सेतं अवयवेणं।

[सू० २७२] से किं तं संजोगेणं ? संजोगे चउव्विहे पण्णत्ते। तंजहा- दव्वसंजोगे १, खेत्तसंजोगे २, कालसंजोगे ३, भावसंजोगे ४।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

[सू० २७३] से किं तं दव्वसंजोगे ? दव्वसंजोगे तिविहे पण्णत्ते। तं जहा- सचित्ते १, अचित्ते २, मीसए[१] ३।

[सू० २७४] से किं तं सचित्ते[२] ? सचित्ते— गोहिं गोमिए, महिसीहिं माहिसिए[३], ऊरणीहिं ऊरणिए, उट्टीहिं उट्टवाले। सेतं सचित्ते[४]।

[सू० २७५] से किं तं अचित्ते[५] ? अचित्ते— छत्तेण छत्ती, दंडेण दंडी, पडेण पडी, घडेण घडी, कडेण कडी। सेतं अचित्ते[६]।

[सू० २७६] से किं तं मीसए[७] ? मीसए— हलेणं हालिए, सकडेणं साकडिए, रहेणं रहिए, नावाए नाविए। सेतं मीसए। सेतं दव्वसंजोगे।

[सू० २७७] से किं तं खेत्तसंजोगे ? खेत्तसंजोगे— भारहे[८] एरवए हेमवए एरण्णवए हरिवस्सए रम्मयवस्सए, पुव्वविदेहए अवरविदेहए, देवकुरुए उत्तरकुरुए, अहवा मागहए मालवए सोरट्ठए मरहट्ठए कोंकणए कोसलए। सेतं खेत्तसंजोगे।

[सू० २७८] से किं तं कालसंजोगे ? कालसंजोगे— सुसमसुसमए[९] सुसमए सुसमदूसमए दूसमसुसमए दूसमए दूसमदूसमए, अहवा पाउसए वासारत्तए[१०] सरदए[११] हेमंतए वसंतए गिम्हए। से तं कालसंजोगे।

[सू० २७९] से किं तं भावसंजोगे ? भावसंजोगे दुविहे पण्णत्ते। तंजहा- पसत्थे[१२] य १, अपसत्थे[१३] य २।

[सू० २८०] से किं तं पसत्थे[१४] ? पसत्थे— नाणेणं नाणी, दंसणेणं दंसणी, चरित्तेणं चरित्ती। सेतं पसत्थे[१५]।

[सू० २८१] से किं तं [१६]अपसत्थे ? अपसत्थे — कोहेणं [१७]कोही, माणेणं माणी, मायाए मायी, लोभेणं लोभी। सेतं [१८]अपसत्थे। सेतं भावसंजोगे। सेतं संजोगेणं।

[सू० २८२] से किं तं पमाणेणं ? पमाणेणं चउव्विहे पण्णत्ते। तंजहा - णामप्पमाणे १, ठवणप्पमाणे २, दव्वप्पमाणे ३, भावप्पमाणे ४।

[सू० २८३] से किं तं नामप्पमाणे ? नामप्पमाणे — जस्स णं जीवस्स वा अजीवस्स वा जीवाण वा अजीवाण वा तदुभयस्स वा तदुभयाण वा पमाणे त्ति णामं कज्जति। सेतं णामप्पमाणे।

[सू० २८४] से किं तं ठवणप्पमाणे ? ठवणप्पमाणे सत्तविहे पण्णत्ते। तंजहा -

णक्खत्त-देवय-कुले पासंड-गणे य जीवियाहेउं।
[१९]आभिप्पाउयणामे ठवणानामं तु सत्तविहं ॥८५॥

[सू० २८५] से किं तं नक्खत्तणामे ? नक्खत्तणामे — [२०]कत्तियाहिं जाए कत्तिए कत्तिदिण्णे कत्तिधम्मे कत्तिसम्मे कत्तिदेवे कत्तिदासे कत्तिसेणे [२१]कत्तिरक्खिए। रोहिणीहिं जाए रोहिणिए रोहिणिदिन्ने रोहिणिधम्मे रोहिणिसम्मे रोहिणिदेवे रोहिणिदासे रोहिणिसेणे रोहिणिरक्खिए। एवं सव्वणक्खत्तेसु णामा भाणियव्वा। एत्थ संगहणिगाहाओ -

कत्तिय १ रोहिणि २ मिगसिर ३ अद्दा ४ य पुणव्वसू ५ य [२२]पुस्से ६ य।
तत्तो य अस्सिलेसा ७ मघाओ ८ दो फग्गुणीओ य ९-१० ॥८६॥
हत्थो ११ चित्ता १२ सादी १३ [य] विसाहा १४ तह य होइ अणुराहा १५।
जेट्ठा १६ [२३]मूलो १७ पुव्वासाढा १८ तह उत्तरा १९ चेव ॥८७॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अभिई २० सवण २१ धणिट्ठा २२ सतिभिसदा २३ दो य होंति भद्दवया २४-२५।
रेवति २६ अस्सिणि २७ भरणी २८ एसा नक्खत्तपरिवाडी ॥८८॥
सेत्तं नक्खत्तनामे।

[सू० २८६] से किं तं देवयणामे ? देवयणामे — अग्गिदेवयाहिं जाते [१]अग्गिए अग्गिदिण्णे अग्गिधम्मे अग्गिसम्मे अग्गिदेवे अग्गिदासे अग्गिसेणे अग्गिरक्खिए। एवं पि सव्वनक्खत्तदेवतनामा भाणियव्वा। एत्थं पि य संगहणिगाहाओ, तंजहा -

अग्गि १ पयावइ २ सोमे ३ रुद्दे ४ अदिती ५ [२]बहस्सई ६ सप्पे ७।
[३]पिति ८ भग ९ अज्जम १० सविया ११ तट्ठा १२ वायू १३ य इंदग्गी १४ ॥८९॥
मित्तो १५ इंदो १६ णिरिती १७ [४]आऊ १८ विस्सो १९ य बंभ २० विण्हू य २१।
वसु २२ वरुण २३ अय २४ विवद्धी २५ [५]पूसे २६ आसे २७ जमे २८ चेव ॥९०॥
से तं देवयणामे।

[सू० २८७] से किं तं कुलनामे ? कुलनामे — [६]उग्गे भोगे राइण्णे खत्तिए इक्खागे [७]णाते कोरव्वे। सेत्तं कुलनामे।

[सू० २८८] से किं तं [९]पासंडनामे ? पासं[८]डनामे समणए पंडरंगए भिक्खू कावालियए तावसए परिव्वायगे। सेतं पासंडनामे।

[सू० २८९] से किं तं गणनामे ? गणनामे — मल्ले [१०]मल्लदिन्ने मल्लधम्मे मल्लसम्मे मल्लदेवे मल्लदासे मल्लसेणे मल्लरक्खिए। सेतं गणनामे।

[सू० २९०] से किं तं [११]जीवि[१२]याहेउं ? जीवियाहेउं — अवकरए [१३]उक्कुरुडए उज्झियए कज्जवए सुप्पए। सेतं [१४]जीवियाहेउं।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

[सू० २९१] से किं तं [१५]आभिप्पाउयनामे ? आभिप्पाउयनामे — अंबए [१६]निंबए [१७]बंबूलए पलासए [१८]सिंणए [१९]पिलुयए करीरए। सेतं [२०]आभिप्पाउयनामे। सेतं ठवणप्पमाणे।

[सू० २९२] से किं तं दव्वप्पमाणे ? दव्वप्पमाणे छव्विहे पण्णत्ते। तंजहा - धम्मत्थिकाए जाव अद्धासमए। सेतं दव्वप्पमाणे।

[सू० २९३] से किं तं भावप्पमाणे ? भावप्पमाणे चउव्विहे पण्णत्ते। तंजहा - सामासिए १, तद्धितए २, [१]धातुए ३, निरुत्तिए ४।

[सू० २९४] से किं तं सामासिए ? सामासिए सत्त समासा भवंति। तंजहा -

[२]दंदे १ य बहुव्वीही २ कम्मधारए ३ [३]दिग्गु ४ य।
तप्पुरिस ५ अव्वईभावे ६ [४]एक्कसेसे ७ य सत्तमे ॥९१॥

[सू० २९५] से किं तं दंदे समासे ? दंदे समासे-दन्ताश्च ओष्ठौ च [५]दन्तोष्ठम्, स्तनौ च उदरं च [६]स्तनोदरम्, वस्त्रं च पात्रं च वस्त्रपात्रम्, [७]अश्वश्च महिषश्च अश्वमहिषम्, अहिश्च नकुलश्च अहिनकुलम्। सेतं दंदे समासे।

[सू० २९६] से किं तं [८]बहुव्रीहिसमासे ? बहुव्रीहिसमासे — [९]फुल्ला जम्मि गिरिम्मि कुडय-[१०]कलंबा सो इमो गिरी फुल्लियकुडय-[११]कलंबो। से तं [१२]बहुव्रीहिसमासे।

[सू० २९७] से किं तं कम्मधारयसमासे ? कम्मधारयसमासे — धवलो वसहो धवलवसहो, किण्हो मिगो किण्हमिगो, [१३]सेतो पटो सेतपटो, रत्तो पटो रत्तपटो। से तं कम्मधारयसमासे।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

[सू० २९८] से किं तं दिगुसमासे ? दिगुसमासे — तिण्णि [१४]कडुगा तिकडुगं, तिण्णि महुराणि तिमहुरं, तिण्णि गुणा तिगुणं, तिण्णि पुरा तिपुरं, [१५]→तिण्णि [१६]सरा तिसरं, तिण्णि [१७]पुक्खरा तिपुक्खरं, ←तिण्णि [१८]बिंदुया तिबिंदुयं, तिण्णि पहा तिपहं, पंच णदीओ पंचणदं, सत्त गया सत्तगयं, [१९]नव तुरगा नवतुरगं, दस गामा दस[२०]गामं, दस [२१]पुरा दसपुरं। सेतं दिगुसमासे।

[सू० २९९] से किं तं तप्पुरिसे समासे ? तप्पुरिसे समासे — तित्थे कागो तित्थ[२२]कागो, वणे हत्थी वणहत्थी, वणे वराहो वणवराहो, वणे महिसो वणमहिसो, वणे मयूरो वण[२३]मयूरो। सेतं तप्पुरिसे समासे।

[सू० ३००] से किं तं [२४]अव्वईभावे समासे ? अव्वईभावे समासे — [२५]अणुगामं अणुणदीयं अणुफरिहं अणुचरियं। सेतं [२६]अव्वईभावे समासे।

[सू० ३०१] से किं तं एगसेसे समासे ? एगसेसे समासे — जहा एगो पुरिसो तहा बहवे पुरिसा जहा बहवे पुरिसा तहा एगो [२७]पुरिसो, जहा एगो करिसावणो तहा बहवे करिसावणा जहा बहवे करिसावणा तहा एगो करिसा[२८]वणो, जहा एगो साली तहा बहवे [२९]सालिणो जहा बहवे [३०]सालिणो तहा एगो साली। सेतं एगसेसे समासे। सेतं सामासिए।

[सू० ३०२] से किं तं [१]तद्धियए ? तद्धियए —
कम्मे १ सिप्प २ सिलोए ३ संजोग ४ [२]समीवओ ५ य [३]संजूहे ६।
इस्सरिया ७ऽवच्चेण ८ य तद्धितणामं तु अट्ठविहं ॥९२॥

[सू० ३०३] से किं तं कम्म[४]णामे ? दोस्सिए सोत्तिए कप्पासिए सुत्तवेतालिए भंडवेतालिए कोलालिए णरदावणिए। सेतं कम्मनामे।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

[सू० ३०४] से किं तं सिप्पनामे ? सिप्पनामे [५]→ वत्थिए ← [तंतिए] तुण्णाए [६]तंतुवाए पटकारे देअहे वरुडे मुंजकारे कट्ठकारे छत्तकारे वज्झकारे पोत्थकारे चित्तकारे दंतकारे लेप्पकारे कोट्टिमकारे। सेतं सिप्पनामे।

[सू० ३०५] से किं तं सिलोयनामे ? सिलोयनामे— समणे माहणे [७]सच्चतिही। सेतं सिलोयनामे।

[सू० ३०६] से किं तं संजोगनामे ? संजोगनामे— रण्णो ससुरए, [८]रण्णो [९]सालए, रण्णो सड्डुए, रण्णो [१०]जामाउए, रन्नो [११]भगिणीवती। सेतं संजोगनामे।

[सू० ३०७] से किं तं समीवनामे ? समीवनामे— गिरिस्स समीवे णगरं गिरिणगरं, विदिसाए समीवे णगरं [१२]वेदिसं, [१३]बेन्नाए समीवे णगरं बेन्नायडं, तगराए समीवे णगरं [१४]तगरायडं। सेतं समीवनामे।

[सू० ३०८] से किं तं [१५]संजूहनामे ? संजूहनामे— तरंगवतिकारे मलयवतिकारे [१६]अत्ताणुसट्ठिकारे [१७][१८]बिंदुकारे[१९]। से तं संजूहनामे।

[सू० ३०९] से किं तं [२०]ईसरियनामे ? ईसरियनामे— राईसरे तलवरे माडंबिए [२१]कोडुंबिए इब्भे सेट्ठी सत्थवाहे [२२]सेणावई। सेतं ईसरियनामे।

[सू० ३१०] से किं तं अवच्चनामे ? अवच्चनामे— [२३]तित्थयरमाया चक्कवट्टिमाया बलदेवमाया वासुदेवमाया [२४]रायमाया गणिमाया वायगमाया। सेतं अवच्चनामे। सेतं तद्धिते।

[सू० ३११] से किं तं [२५]धाउए ? धाउए— भू *सत्तायां परस्मैभाषा*(*ष:*)*,

* °भाषाः खं जे१, २। °भाषा पुण्यवि.म. स्वीकृतः पाठः ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

*एध वृद्धौ, स्पर्द्ध संह(घ?)र्षे, [२६]गाधृ प्रतिष्ठा-लिप्सयोर्ग्रन्थे च, बाधृ लोडने [पा० धा० १-५]* । **सेतं [२७]धाउए।**

**[सू० ३१२] से किं तं निरुत्तिए ? निरुत्तिए— मह्यां शेते [२८]महिषः, भ्रमति च रौति च भ्रमरः, [२९]मुहुर्मुहुर्लसति मुसलं, कपिरिव लम्बते [३०]त्थच्च [३१]करोति कपित्थं, [३२]चिदिति करोति खल्लं च भवति चिक्खल्लं, [३३]ऊर्ध्वकर्णः उलूकः, [३४]खस्य माला मेखला। सेतं निरुत्तिए। सेतं भावप्पमाणे। से तं [३५]पमाणनामे। सेतं दसनामे। सेतं नामे।**

[चू० २६३-३१२] इदाणिं दसणामं - **दसविहे गोण्णे** इत्यादि। गुणाद् जातं **गौणम्, क्षमते** इत्यादि। **णोगोण्णं** अयथार्थम्, **अकुन्तः** इत्यादि। आदिपद**मादाणपदम्, चूलिके**त्यादि। विपरीतः पक्षः **प्रतिपक्षः, असिवा सिवा** इत्यादि। ललतीति लाउं, आदानार्थेन वा युक्तं *ला आदाने [पा० धा० १०५८]* इति **लातुतं अलाउं** भन्नति। सुभवर्णकारी सोभयतीति **सुम्भकः** तथापि **कुसुम्भक**मित्युच्यते। यथावस्थितअवलितभाषकं **विपरीतभाषकं** ब्रूते असत्यवादिनम्, अहवा अत्यर्थं वलन्तं निह्नुवानं तं **विपरीतभाषकं** ब्रूते, असत्यवादिनमित्यर्थः। प्रधानभावः प्राधान्यम्, बहुत्वे वा प्राधान्यम्, **असोगवणे**त्यादि। **पितु-पितामहनाम्नो**त्क्षिप्त **उन्नामित** उच्यते। शरीरैकदेशेन **अवयवनाम**। युक्तिभावः **संयोगः**, स चतुर्विधः **द्रव्यादिकः**। **सचित्ते** गोण्यादि, **अचित्ते** छत्रादि, **मिश्रे** हलादिकः। खेत्त-काल-भावसंजोगा जहा सुत्ते इति। इदाणिं **पमाणणामं**-तं चतुव्विहं **णामादिकं**। **ठवणप्रमाणं कट्ठकम्मादिकं**, अहवा **सत्तविहं णक्खत्तादिकं**। **जीवियाणामं** जस्स जातमेत्तं अवच्चं मरति सा तं जातमेत्तं चेव अवगरादिसु छड्डेति तं चेव णामं कज्जति ततो जीवति। **अभिप्पायणामं** ण किंचि गुणमवेक्खते किन्तु यदेव यत्र जनपदे प्रसिद्धं तदेव तत्र जनपदाभिप्रायनाम, जनपदसंववहार इत्यर्थः। सेसा **णक्खत्ता**दिया कंठा। इदाणिं **भावप्पमाणणामं चतुव्विधं सामासितादिकं**, येषां पदानां सम्यक् परस्पराश्रयभावेनार्थः आश्रीयते स समासः, समासजाते अत्थे **सामासिते**। योऽर्थः येनोपलक्ष्यते स तस्य हेतुकः

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तद्धितमुच्यते, तद्धितातो अत्थे जाते **तद्धितिए**। भू *सत्तायाम्* [*पा०धा० १*] इत्यादि धातुभावेनार्थो जातः **धातुए** भन्नति । अभिधाणक्खरा णिच्छितत्थोवलद्धिप्पगारेण उच्चरिज्जमाणा णिरुत्तं, णिरुत्तातो अत्थे जाते **णेरुत्तिए**। एतं चतुव्विहं पि सभेदं सउदाहरणं जहा सुत्ते तहेव कंठं वत्तव्वं। णामं ति मूलदारं गतं।

[हा० २६३-३१२] अधुना दशनामोच्यते, तथा चाह - **से किं तं दसनामे** ? **[दशनाम] दशविधं प्रज्ञप्तम्, तद्यथा -गौणं नोगौण**मित्यादि। एतेषां प्रश्ननिर्वचनद्वारेण स्वरूपमाह - **से किं तं गोण्णे** ? २, गुणनिप्फण्णं गौणम्, **क्षमतीति क्षमण** इत्यादि। **से किं तं णोगोण्णे** ? २, नोगौणम् अयथार्थम् । **अकुन्तः सकुन्त** इत्यादि । अविद्यमानकुन्ताख्यप्रहरणविशेष एव[1] सकुन्त इत्युच्यते। एवं शेषेष्वपि भावनीयम्। **से किं तं आदाणपदेणं** ? २, आदानपदेन **धर्मो मङ्गल**मित्यादि, इहाऽऽदिपदमादानपदमुच्यते। **से किं तं पडिपक्खपदेणं** ? २, प्रतिपक्षपदेन **नवेषु** प्रत्यग्रेषु **ग्रामा-ऽऽकर-नगर-खेट-कर्बट-मडम्ब-द्रोणमुख-पत्तना-ऽऽश्रम-सम्बाध-सन्निवेशेषु निवेश्यमानेषु** सत्सु अमाङ्गलिकशब्दपरिहारार्थम् **अशिवा शिवे**त्युच्यते, अन्यदा त्वनियमः । **अग्निः शीतलः** । **विषं मधुरकम्** । **कल्लालगृहेषु अम्लं स्वादु** मृष्टम्, न त्वम्लमेव, सुरासंरक्षणायानिष्टशब्दपरिहारः। इदम् असर्वदा। **जो लत्तए** इत्यादि, यो रक्तो लाक्षारसेन स एवारक्तः, प्राकृतशैल्या कन्। **यदपि च लाबु** *ला आदाने* [*पा०धा० १०५८*] इति कृत्वा आदानार्थवत् **से** तद**लाबु**। **यः शुम्भकः** शुभवर्णकारी **से** त्ति असौ **कुसुम्भकः**। **आलपन्** अत्यर्थं लपन् असमञ्जसमिति गम्यते **विपरीतभाषक** इत्युच्यते, विपरीतश्चासौ भाषकश्चेति समासः, अभाषक इत्यर्थः[2] । आह-इदं नोगौणान्न भिद्यते, न, तस्य प्रवृत्तिनिमित्तकुन्ताद्यभावमात्रापेक्षित्वात्, इदं तु प्रतिपक्षधर्माध्यासमपेक्षत इति भिद्यत एव। **से किं तं पाहण्णताए** ? २, चम्पकप्रधानं वनं **चम्पकवनम्**, अशोकप्रधानम् **अशोकवन**मित्यादि, शेषाणि वृक्षाभिधानानि प्रकटार्थानि। आह-इदमपि गौणान्न भिद्यते, न, तत्र तन्निबन्धनभूतायाः क्षपणादिक्रियायाः सकलस्वाधारवस्तुव्यापकत्वादशोकादेश्च वनाव्यापकत्वादुपाधिभेदसिद्धेर्भिद्यत इति।

**से किं तं अणादिसिद्धं [तेणं]** ? २, अनादिसिद्धश्चासावन्तश्चेति समासः, अमनम् अन्तः, तथा वाच्य-वाचकतया परिच्छेद इत्यर्थः, **तत् किमनादिसिद्धान्तेनाऽ-नादिपरिच्छेदेनेत्यर्थः। धर्मास्तिकाय** इत्यादि पूर्ववत्, अनादिसिद्धता चाऽस्य सदैवाभिधेयस्य तदन्यत्वायोगात् अनेनैव चोपाधिना गौणाद् भेदाभिधानेऽप्यदोष इति। **से किं तं नामे[णं]**? २, **पितुः पितामहस्य नाम्ना उन्नामितः** उत्क्षिप्तः यथा-बन्धुदत्त इत्यादि। **से किं तं अवयवेणं ? २, अवयवः** शरीरैकदेशः परिगृह्यते, तेन **शृंगी**त्यादि प्रकटार्थम्। तथा **परिकरबन्धेन भटं जानीयात्, महिलां निवसनेन, सिक्थेन द्रोणपाकम्, कविं चैकया गाथया** इति, एतदप्यधिकृतावयवप्रधानमेवेति भावनीयम्, अनेनैवोपाधिना गौणाद् भिन्नमेतदिति। **से किं तं संजोएणं ? २, संयोगः** सम्बन्धः, स **चतुर्विधः प्रज्ञप्तः तद्यथा-द्रव्यसंयोग** इत्यादि सूत्र[सिद्ध]मेव। नवरं गावः अस्य सन्तीति **गोमान्**। छत्रमस्यास्तीति **छत्री**। हलेन व्यवहरतीति **हालिकः**, भरते जातः भरते वाऽस्य निवास इति *तत्र जातः* [*पा० ४/३/२५*] *सोऽस्य निवासः* [*पा०४/३/८९*] *इति* वा अण् **भारतः**, एवं शेषेष्वपि द्रष्टव्यम्। सुषमसुषमायां जातः *सप्तम्यां जनेर्डः* [*पा० ३/२/९७*] सप्तम्यन्ते उपपदे जनेर्डः प्रत्ययः **सुषमसुषमजः**, एवं शेषमपि। ज्ञानमस्यास्तीति **ज्ञानी**, एवं शेषमपि। संयोगोपाधिनैव चास्य गौणाद् भेद इति।

**से किं तं पमाणे[णं]? २, प्रमाणं चतुर्विधं प्रज्ञप्तम्, तद्यथा-नामप्रमाण**मित्यादि। नाम-स्थापने क्षुण्णार्थे। नवरमिह **जीविकाहेतु**र्यस्या जातमात्रमपत्यं म्रियते सा रहस्यवैचित्र्यात् तद् जातमेवावकरादिषूज्झति तदेव च तस्य नाम क्रियत इति। **आभिप्रायिकं** तु गुणनिरपेक्षं यदेव यत्र जनपदे प्रसिद्धं तदेव तत्र संव्यवहारार्थं क्रियते **अम्बका**दि, अत एव प्रमाणता। उक्तवद् द्रव्यप्रमाणनाम।

**से किं तं भावप्पमाणनामे ? २,** भावप्रमाणं सामासिकादि, तत्र द्वयोर्बहूनां वा युज्यमानार्थानां समास इत्येषां संज्ञा, उभयप्रधानो द्वन्द्वः इति द्वन्द्वः, **दन्तोष्ठम्**, तस्य च कोऽर्थः ? इतरेतरयोगः, अस्तिप्रभृतिभिः क्रियाभिः समानकालौ युक्तौ **स्तनौ च उदरं च स्तनोदरम्**। एवं शेषोदाहरणान्यपि द्रष्टव्यानि।

अन्यपदार्थप्रधानो बहुव्रीहिः, **पुष्पिताः कुटज-कदम्बा यस्मिन् गिरौ सोऽयं**

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**गिरिः पुष्पितकुटज-कदम्बः**, गिरेर्विशेष्यत्वादन्यपदार्थप्रधानतेति। *तत्पुरुषः समानाधिकरणः कर्मधारयः* [*पा० १।२।४२*], **धवल**श्चासौ **वृषभ**श्च *विशेषणं विशेष्येण बहुलम्* [*पा० २।१।५७*] इति तत्पुरुषः, धवलत्वं विशेषणं वृषभेण विशेष्येण सह समस्यते, द्वे पदे एकमर्थं ब्रूत इति समानाधिकरणत्वम्, एवं **श्वेतपटा**दिष्वपि द्रष्टव्यम्, अयं कर्मधारयसंज्ञः।

त्रीणि कटुकानि समाहृतानि *तद्धितार्थोत्तरपदसमाहारे च* [*पा० २।१।५१*] तत्पुरुषः **त्रिकटुक**मित्युत्तरपदार्थप्रधानः *संख्यापूर्वो द्विगुः* [*पा० २।१।५२*] इति द्विगुसंज्ञा, एवं **त्रिमधुरादि**।

तीर्थे काक इव आस्ते *ध्वांक्षेण क्षेपे* [*पा० २।१।४२*] इति तत्पुरुषः समासः, **तीर्थकाक**ः, **वनहस्त्या**दीनामस्मादेव सूत्रनिबन्धनज्ञापकात् सप्तमीसमासः, पात्रेसमितादिप्रक्षेपाद्वा।

[४]**अनुग्रामम्** ग्रामस्य समीपेनाशनिर्गता *अनुर्यत्समया* [*पा० २।१।१५*] अनुः यः समयार्थः समीपार्थः, ग्रामस्य अनु समीपं द्रव्यमशनिर्ब्रवीति यस्य यस्य समीपे तेन सुप उत्तरपदेन ग्रामस्य समीपे ग्रामेणोत्तरपदेन अव्ययीभावः समासः, ग्रामस्तूपलक्षणमात्रम् अशनेः, अतः पूर्वपदार्थप्रधानः। *अव्ययं विभक्ति-समीप* [*पा० २।१।६*] इति सिद्धे विभाषार्थं विभाषाधिकारे पुनर्वचनम्, येषां तु समयाशब्दो मध्यवचनः तेषामप्राप्ते ग्रामस्य मध्येनाशनिर्गता [५]*अनुर्यत्समया* [*पा० २।१।१५*] इति समासः अनुग्रामम्। एव**मणुणइ** आदि।

**यथा एकः पुरुषः तथा बहवः पुरुषाः**, पुरुषः पुरुषः पुरुषः [६]*सरूपाणामेकशेष एकविभक्तौ* [*पा० १।२।६४*] इति समानरूपाणाम् एकविभक्तियुक्तानाम् एकः शेषो भवति, सति समासे एकः शिष्यते, अन्ये लुप्यन्ते, शेषश्च आत्मार्थे लुप्तस्य लुप्तयोः लुप्तानां चाऽर्थे वर्तते, बहुष्वर्थेषु बहुवचनम्, पुरुषः [७][४] पुरुषाः। एवं **कार्षापणाः**। **तदेतत् सामासिकम्**।

**से किं तं तद्धितए?** २, ताद्धितं कर्म-शिल्पादीति, तथा चाह- **कम्मे सिप्प सिलोए** इत्यादि। **कर्म**तद्धित**नाम** दौषिकादि, तत्र दूषाः पण्यमस्य *तदस्य पण्यम्* [*पा० ४।४।५१*] तदिति प्रथमा [८]समर्थने, अस्येति षष्ठ्यर्थे, यथाविहितं प्रत्ययः, ठक्, **दौषिकः**, एवं सूत्रं पण्यमस्य **सौत्रिक** इत्यादि।

तथा **शिल्प**तद्धित**नाम** वस्त्रं *शिल्पमस्य*, तत्र *शिल्पम्* [*पा० ४।४।५५*] अस्मिन्नर्थे

Jain Education International For Private & Personal Use Only www.jainelibrary.org

यथाविहितं प्रत्ययः, ठक्, **वास्त्रिकः**। एवं तंतु(ती ?)वायनं(णं) शिल्पमस्य **तान्त्रिकः**। इह **तुण्णाए** त्ति भणितम्, न चात्र तद्धितप्रत्ययो दृश्यते, कथं तद्धितः ? उच्यते- तद्धितप्रत्ययप्राप्तिमात्रमङ्गीकृत्योक्तम्, प्राप्तिश्च न तद्धितार्थेन विना भवति, अतस्तद्धितार्थः। तद्धितः प्रत्ययस्तर्हि केन बाधितः ? उच्यते-लोकरूढेन वचनेन, यतस्तेनार्थः प्रतीयते, येन चार्थः प्रतीयते स शब्दः, अन्यः अपशब्दः, अथवाऽस्मादेव वचनादेवंजातीयास्तद्धिता इति तद्धितसंज्ञा।

**श्लाघातद्धितनाम श्रवण** इत्यादि, अस्मादेव सूत्रनिबन्धनात् श्लाघार्थस्तद्धितार्थ इति। **संयोग**तद्धितमाह-**राज्ञः श्वशुर** इत्यादावप्यस्मादेव सूत्रनिबन्धनात्[९] तद्धितार्थतेति। चित्रं च **शब्दप्राभृतम्**, अप्रत्यक्षं च न इत्यतो न[१०] भावना विद्यः।

**समीपतद्धितनाम- गिरेः समीपे नगरं गिरिनगरम्**, अत्र *अदूरभवश्च* [*पा० ४/२/७०*] इत्यण् न भवति, गिरिनगरमित्येव प्रसिद्धत्वात्, विदिशायाः अदूरभवं णगरं *अदूरभवश्च* [*पा० ४/२/७०*] इत्यण् **वैदिशम्**, अत्र अण् भवति, एवं प्रसिद्धत्वात्। **संवूहतद्धितनाम तरंगवतिकार** इत्यादि, **संवूहो** ग्रन्थसन्दर्भकरणम्, शेषं पूर्ववद् भावनीयमिति। **ऐश्वर्यतद्धितनाम राजे**त्यादि, अत्रापि राजादिशब्दनिबन्धनमैश्वर्यमवगन्तव्यम्। शेषं सूत्रोपन्यासज्ञापकसिद्धमेव।

**अपत्यतद्धितनाम-** सुप्रसिद्धेनाऽप्रसिद्धं विशेष्यते- मात्रा पुत्रः, पित्रा पुत्रः, यथा आश्वलायनः। पुत्रेण माता, इह पुत्रेण माता, तंजहा – **तित्थगरमाता चक्कवट्टिमाते**त्यादि, तदेतत् ताद्धितम्।

**से किं तं धातूए ?** २, *भू सत्तायां परस्मैभाषः* [पा०धा० १] इत्यादि, तत्र भू इत्ययं धातुः सत्तायामर्थे वर्त्तते, अतो[**भू ?**] इत्ययं प्रमाणभावनाम।

**नैरुक्तिकं** निगदसिद्धम्, भावप्रमाणनामता चास्य भावप्रधानशब्दनयगोचरत्वात्, *गुरवस्तु* व्याचक्षते समासादिनाम्ना गुणाभिधानादिति भावः। अनेनैव चोपाधिना शेषभेदो भावनीय इति। एवं यथागमं मया अपौनरुक्त्यं दर्शितम्, अन्यथाऽपि सूक्ष्मधिया भावनीयमेव, अनन्तगम-पर्यायत्वात् सूत्रस्य। **तदेतत् प्रमाणनाम, [तदेतद्दशनाम], तदेतन्नामे**ति नामेति मूलद्वारमुक्तम्।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

[हे० २६३-३१२] अथ दशनामाभिधानार्थमाह - **से किं तं दसनामे** इत्यादि। गौणादिनाम्नामेव स्वरूपनिर्णयार्थमाह - **से किं तं गुण्णे** इत्यादि। गुणैर्निष्पन्नं गौणम्, यथार्थमित्यर्थः, तच्चानेकप्रकारम्, तत्र **क्षमत इति क्षमण** इत्येतत् क्षमालक्षणेन गुणेन निष्पन्नम्। तथा **तपतीति तपन** इत्येतत्तपनलक्षणेन गुणेन निर्वृत्तम्। एवं **ज्वलतीति ज्वलन** इतीदं ज्वलनगुणेन संभूतमित्येवमन्यदपि भावनीयम् १।

**से किं तं नोगुण्णे** इत्यादि, गुणनिष्पन्नं यन्न भवति तन्नोगौणम्, अयथार्थमित्यर्थः **अकुंते सकुंते** इत्यादि, अविद्यमानकुन्ताख्यप्रहरणविशेष एव **सकुन्त**त्ति पक्षी प्रोच्यत इत्ययथार्थता । एवमविद्यमानमुद्रोऽपि कर्पूराद्याधारविशेषः **समुद्रः** । अङ्गुल्याभरण-विशेषमुद्रारहितोऽपि **समुद्रो** जलराशिः। **अलालं पलालं** ति इह प्रकृष्टा लाला यत्र तत् प्रलालं वस्तु प्राकृते पलालमुच्यते, [1]यत्र तु लालाऽभावस्तत् कथं तृणविशेषरूपं पलालमुच्यत इति प्राकृतशैलीमङ्गीकृत्यात्रायथार्थता मन्तव्या, संस्कृते तु तृणविशेषरूपं पलालं निर्व्युत्पत्तिकमेवोच्यते इति न यथार्था-ऽयथार्थचिन्ता संभवति। **अउलिया सउलिय** त्ति अत्रापि कुलिकाभिः सह वर्तमानैव प्राकृते **सउलिय**त्ति भण्यते, या तु कुलिकारहितैव पक्षिणी सा कथं **सउलिय**त्ति ? इत्येवमिहापि प्राकृतशैलीमेवाङ्गीकृत्यायथार्थता, संस्कृते तु शकुनिकैव साऽभिधीयत इति कुतस्तच्चिन्तासम्भवः ? इत्येवमन्यथाऽप्यविरोधतः सुधिया भावना कार्या । पलं मांसमनश्नन्नपि **पलाश** इत्यादि तु सुगमम् । नवरं **मातृवाहका**दयो विकलेन्द्रियजीवविशेषाः। **सेत्तं नोगुण्णे** त्ति निगमनम् २।

**से किं तं आयाणपएण**मित्यादि। आदीयते तत्प्रथमतया उच्चारयितुमारभ्यते शास्त्राद्यनेनेत्यादानम्, तच्च तत्पदं चादानपदम्, शास्त्रस्याध्ययनोद्देशकादेश्चादिपदमित्यर्थः, तेन हेतुभूतेन किमपि नाम भवति, तच्च **आवंती**त्यादि, तत्र *आवंती***त्याचारस्य** पञ्चमाध्ययनम्, तत्र ह्यादावेव *आवन्ती केयावन्ती [आचाराङ्ग० १।५।१।१४७]*इत्यालापको विद्यत इत्यादानपदेनैतन्नाम। **चाउरंगिज्जं** ति एतदु**त्तराध्ययनेषु** तृतीयमध्ययनम्, तत्र चादौ *चत्तारि परमंगाणि दुल्लहाणीह जंतुणो* [३।१] इत्यादि विद्यते। **असंखयं** ति इदमपि **उत्तराध्ययने**ष्वेव चतुर्थमध्ययनम्, तत्र च आदावेव *असंखयं जीविय मा पमायए* [४।१] इत्येतत् पदमस्ति, ततस्तेनेदं नाम, एवमन्यान्यपि कानिचिदु**त्तराध्ययना**न्तर्वर्तीन्यध्ययनानि कानिचित्तु

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**दशवैकालिक-सूयगडा**द्यध्ययनानि स्वधिया भावनीयानि ३ । निगमयति - **सेत्तं आयाणपएणं** ति ।

**से किं तं पडिवक्खपएण**मित्यादि। विवक्षितवस्तुधर्मस्य विपरीतो धर्मो विपक्षः, तद्वाचकं पदं विपक्षपदम्, तन्निष्पन्नं किञ्चिन्नाम भवति । यथा शृगाली अशिवाऽप्यमाङ्गलिकशब्दपरिहारार्थं शिवा भण्यते। किं सर्वदा ? नेत्याह - **नवेसु** इत्यादि, तत्र ग्रसते बुद्ध्यादीन् गुणानिति **ग्रामः** प्रतीतः । **आकरो** लोहाद्युत्पत्तिस्थानम् । **नगरं** कररहितम्। **खेटं** धूलीमयप्राकारोपेतम्। **कर्बटं** कुनगरम्। **मडम्बं** सर्वतो दूरवर्तिसन्निवेशान्तरम्। **द्रोणमुखं** जलपथ-स्थलपथोपेतम्। **पत्तनं** नानादेशागतपण्यस्थानम्। तच्च द्विधा - जलपत्तनं स्थलपत्तनं च । रत्नभूमिरित्य**न्ये** । **आश्रमः** तापसादिस्थानम् । **सम्बाधः** अतिबहुप्रकारलोक[२]सङ्कीर्णस्थानविशेषः। **सन्निवेशो** घोषादिः, अथवा ग्रामादीनां द्वन्द्वे ते च ते सन्निवेशाश्चेत्येवं योज्यते। ततस्तेषु ग्रामादिषु नूतनेषु निवेश्यमाने**ष्वशिवा**पि सा मङ्गलार्थं **शिवे**त्युच्यते, अन्यदा त्वनियमः, तथा कोऽपि कदाचित् केनापि कारणवशेना**ग्निः शीतो विषं मधुर**मित्याद्याचष्टे। तथा **कल्पपालगृहेषु** किलाम्लशब्दे समुच्चारिते सुरा विनश्यति, अतोऽनिष्टशब्दपरिहारार्थ**मम्लं स्वादू**च्यते। तदेवमेतानि शिवादीनि विशेषविषयाणि दर्शितानि, साम्प्रतं त्वविशेषतो यानि सर्वदा प्रवर्तन्ते तान्याह - [३]**जे लत्तए** इत्यादि, **यो रक्तो** ला[४]क्षारसेन **स** एव रश्रुतेर्लश्रुत्या **अलक्तक** उच्यते। तथा **य**देव लाति आदत्ते धरति प्रक्षिप्तं जलादि वस्तु इति निरुक्ते**र्लाबु** तदेव **अलाबु** तुम्बकमभिधीयते। **य** एव च **सुम्भकः** शुभवर्णकारी **स एव कुसुम्भकः**। **आलवंते** त्ति आलपन् अत्यर्थं लपन्नसमञ्जसमिति गम्यते, स किमित्याह - **विवलीयभासए** त्ति भाषकाद् विपरीतो विपरीतभाषक इति, [५]राजदन्तादिवत् समासः, अभाषक इत्यर्थः, तथाहि - सुबह्वसम्बद्धं प्रलपन्तं कञ्चिद् दृष्ट्वा लोके वक्तारो भवन्ति - अभाषक एवायं द्रष्टव्योऽसारवचनत्वादिति। प्रतिपक्षनामता यथायोगं सर्वत्र भावनीया। ननु च नोगौणादिदं न भिद्यते इति चेत्, नैतदेवम्, तस्य कुन्तादिप्रवृत्तिनिमित्ताभावमात्रेणैवोक्तत्वात्, अस्य तु प्रतिपक्षधर्मवाचकत्वसापेक्षत्वादिति विशेषः ४।

**से किं तं पाहण्णयाए** इत्यादि। प्रधानस्य भावः प्रधानता, तया किमपि नाम भवति, यथा बहुष्वशोकवृक्षेषु [६]स्तोकेषु त्वाम्रादिपादपेष्वशोकप्रधानं वन**मशोकवन**मिति नाम ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सप्तपर्णाः सप्तच्छदास्तत्प्रधानं वनं **सप्तपर्णवन**मित्यादि सुगमम् । नवरमत्राप्याह - ननु गुणनिष्पन्नादिदं न भिद्यते, नैवम्, तत्र क्षमादिगुणेन क्षमणादिशब्दवाच्यस्यार्थस्य सामस्त्येन व्याप्तत्वादत्र त्वशोकादिभिरशोकवनादिशब्दवाच्यानां वनानां सामस्त्येन व्याप्तेरभावादिति भेदः ५।

**से किं तं अणाइसिद्धंतेण**मित्यादि । अमनम् **अन्तो** वाच्यवाचकरूपतया परिच्छेदोऽनादिसिद्धश्चासावन्तश्चानादिसिद्धान्तस्तेन, अनादिकालादारभ्येदं वाचकमिदं तु वाच्यमित्येवं सिद्धः प्रतिष्ठितो योऽसावन्तः परिच्छेदस्तेन किमपि नाम भवतीत्यर्थः, तच्च प्राग्व्याख्यातार्थं धर्मास्तिकायादि, एतेषां च नाम्नामभिधेयं धर्मास्तिकायादिवस्तु न कदाचिदन्यथात्वं प्रतिपद्यते, गौणनाम्नस्तु प्रदीपादेरभिधेयं दीपकलिकादि परित्यजत्यपि स्वस्वरूपमित्येतावता गौणनाम्नः पृथगेतदुक्तमिति ६।

**से किं तं नामेण**मित्यादि। नाम पितृपितामहादेर्वाचकमभिधानम्, तेन हेतुभूतेन पुत्रपौत्रादिनाम भवति, किं पुनस्तदित्याह - **पिउपियामहस्स नामेणं उन्नामियए** त्ति, पिता च पितामहश्च तयोः समाहारस्तस्य, अथवा पितुः पितामहः पितृपितामहस्तस्य वाचकेन बन्धुदत्तादिनाम्ना यः पुत्रादि**रुन्नामित** उत्क्षिप्तः प्रसिद्धिं गत इति यावत् स एव नाम-तद्वतोरभेदोपचारान्नाम्ना हेतुभूतेन नामोच्यते इत्यर्थः, पित्रादेर्यद् बन्धुदत्तादिनामाऽऽसीत् तत्पुत्रादेरपि तदेव विधीयमानं नाम्ना नामोच्यत इति तात्पर्यम् ७।

**से किं तं अवयवेण**मित्यादि। अवयवोऽवयविन एकदेशस्तेन नाम यथा **सिंगी सिंही**त्यादिगाथा, शृङ्गमस्यास्तीति **शृङ्गी**त्यादीन्यवयवप्रधानानि सर्वाण्यपि सुगमानि, नवरं **द्विपदं** स्त्र्यादि, **चतुष्पदं** गवादि, **बहुपदं** कर्णशृगाल्यादि, अत्रापि पादलक्षणावयवप्रधानता भावनीया । **कउहि** त्ति ककुदं स्कन्धासन्नोन्नतदेहावयवलक्षणमस्यास्तीति **ककुदी** वृषभ इति।

**परियर** गाहा। **परिकरबन्धेन** विशिष्टनेपथ्यरचनालक्षणेन **भटं** शूरपुरुषं **जानीयात्** लक्षयेत्। तथा **निवसनेन** विशिष्टरचनारचितपरिधानलक्षणेन **महिलां** स्त्रीम्, जानीयादिति सर्वत्र सम्बध्यते। धान्य**द्रोणस्य पाकः** स्विन्नतारूपस्तं च तन्मध्याद् गृहीत्वा निरीक्षितेनैकेन **सिक्थेन** जानीयात्। **एकया** च **गाथया** लालित्यादिकाव्यधर्मोपेतया श्रुतया **कविं** जानीयात्

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अयमत्राभिप्रायः - यदा स नेपथ्यपुरुषाद्यवयवरूपपरिकरबन्धादिदर्शनद्वारेण भट-महिला-पाक-कविशब्दप्रयोगं करोति तदा भटादीन्यपि नामान्यवयवप्रधानतया प्रवृत्तत्वादवयवनामान्युच्यन्त इति इह तदुपन्यास इति। इदं चावयवप्रधानतया[१०] प्रवृत्तत्वात् सामान्यरूपतया[११] प्रवृत्ताद् गौणनाम्नो भिद्यत इति ८।

**से किं तं संजोएण**मित्यादि। संयोगः सम्बन्धः, स **चतुर्विधः प्रज्ञप्तः**। **तद्यथा - द्रव्यसंयोग** इत्यादि सर्वं सूत्रसिद्धमेव। नवरं सचित्तद्रव्यसंयोगेन गावोऽस्य सन्तीति **गोमानि**त्यादि। अचित्तद्रव्यसंयोगेन छत्रमस्यास्तीति **छत्री**त्यादि। मिश्रद्रव्यसंयोगेन हलेन व्यवहरतीति **हालिक** इत्यादि, अत्र हलादीनामचेतनत्वाद् बलीवर्द्दानां तु सचेतनत्वान्मिश्रद्रव्यता भावनीया। क्षेत्रसंयोगाधिकारे भरते जातो भरते वाऽस्य निवास इति *तत्र जातः* [*पा० ४।३।२५*] *सोऽस्य निवासः* [*पा० ४।३।८९*]इति वाऽण्प्रत्यये **भारतः**। एवं शेषेष्वपि भावना कार्या। कालसंयोगाधिकारे सुषमसुषमायां जात इति *सप्तमीपञ्चम्यन्ते जनेर्डः* [*कातन्त्र० ४।३।९१*] इति डप्रत्यये **सुषमसुषमजः**, एवं **सुषमजा**दिष्वपि भावनीयम्। भावसंयोगाधिकारे भावः पर्यायः, स च द्विधा प्रशस्तो ज्ञानादिरप्रशस्तश्च क्रोधादिः। शेषं सुगमम्। इदमपि संयोगप्रधानतया प्रवृत्तत्वाद् गौणाद्भिद्यत इति ९।

**से किं तं पमाणेण**मित्यादि। अत्रोत्तरं **पमाणे चउव्विहे** इत्यादि। प्रमीयते परिच्छिद्यते वस्तु निश्चीयतेऽनेनेति प्रमाणं नाम-स्थापना-द्रव्य-भावस्वरूपं चतुर्विधम्।

**अथ किं तन्नामप्रमाणम्**? नामैव वस्तुपरिच्छेदहेतुत्वात् प्रमाणं नामप्रमाणम्, तेन हेतुभूतेन किं नाम भवतीति प्रश्नाभिप्रायः, एवमन्यत्रापि भावनीयम्। अत्रोत्तरमुच्यते - **यस्य जीवस्य वा अजीवस्य वा जीवानां वा अजीवानां वा तदुभयस्य वा तदुभयानां वा** यत् **प्रमाणमिति नाम क्रियते** तन्नामप्रमाणम्, न तत् स्थापना-द्रव्य-भावहेतुकम्, अपि तु नाममात्रविरचनमेव तत्र हेतुरिति तात्पर्यम्।

**अथ किं तत् स्थापनाप्रमाणम्**? **स्थापनाप्रमाणं सप्तविध**मित्यादि। **नक्खत्त** गाहा। इदमत्र हृदयम् - नक्षत्र-देवता-कुल-पाषण्ड-गणादीनि वस्तून्याश्रित्य यत् कस्यचिन्नामस्थापनं क्रियते सेह स्थापना गृह्यते, न पुनः *यत्तु तदर्थवियुक्तं तदभिप्रायेण यच्च*

Jain Education International For Private & Personal Use Only www.jainelibrary.org

*तत्करणि*[११][ ]इत्यादिना पूर्वं[१२] परिभाषितस्वरूपा, सैव प्रमाणम्, तेन हेतुभूतेन नाम सप्तविधं भवति।

तत्र नक्षत्राण्याश्रित्य यन्नाम स्थाप्यते तद्दर्शयति - **कृत्तिकासु जातः कार्तिकः**, कृत्तिकाभिर्दत्तः **कृत्तिकादत्तः**, एवं **कृत्तिकाधर्मः कृत्तिकाशर्मः कृत्तिकादेवः कृत्तिकादासः कृत्तिकासेनः कृत्तिकारक्षितः**, एवमन्यान्यपि रोहिण्यादि-[१३]सप्तविंशतिनक्षत्राण्याश्रित्य नामस्थापना द्रष्टव्या। तत्र सर्वनक्षत्रसङ्ग्रहार्थं **कत्तिय-रोहिणी**त्यादि गाथात्रयं सुगमम्, नवरमभीचिनक्षत्रेण सह पठ्यमानेषु नक्षत्रेषु कृत्तिकादिरेव क्रम इत्यश्विन्यादिक्रममुत्सृज्येत्थमेव पठितवानिति।

एषां चाष्टाविंशतिनक्षत्राणामधिष्ठातारः क्रमेणाग्न्यादयोऽष्टाविंशतिरेव देवताविशेषा भवन्त्यतः कृत्तिकादिनक्षत्रे जातस्य कश्चिदिच्छादिवशतस्तदधिष्ठातृदेवता एवाश्रित्य नामस्थापनं विधत्त इत्येतद्दर्शनार्थमाह - **से किं तं देवयाणामे** इत्यादि। **अग्निदेवतासु जातः आग्निकः**, एव**मग्निदत्ता**दीन्यपि । नक्षत्रदेवतानां सङ्ग्रहार्थम् **अग्गी**त्यादि गाथाद्वयम् । तत्र कृत्तिकानक्षत्रस्याधिष्ठाता अग्निः, रोहिण्याः प्रजापतिः, एवं मृगशिरःप्रभृतीनां क्रमेण सोमो रुद्रः अदितिः बृहस्पतिः सर्पः पितृ भगः अर्यमा सविता त्वष्टा वायुः इन्द्राग्निः मित्रः इन्द्रः निर्ऋतिः अम्भः विश्वः ब्रह्मा विष्णुः वसुः वरुणः अजः विवर्द्धिः, अस्य स्थानेऽन्यत्र अहिर्बुध्नः पठ्यते, पूषा अश्विः यमश्चैवेति।

**से किं तं कुलनामे** इत्यादि। यो यस्मिन्नुग्रादिकुले जातस्तस्य तदेवोग्रादिकुलनाम स्थाप्यमानं कुलस्थापनानामोच्यत इति भावार्थः।

**से किं तं पासंडणामे** इत्यादि। इह येन यत् पाषण्डमाश्रितं तस्य तन्नाम स्थाप्यमानं पाषण्डस्थापनानामाभिधीयते, तत्र *निग्गंथ-सक्क-तावस-गेरुय-आजीव पंचहा समणा*[१४] [पिण्डनि० गा० ४४५] इति वचनान्निर्ग्रन्थादिपञ्चपाषण्डान्याश्रित्य **श्रमण** उच्यते, एवं नैयायिकादिपाषण्डमाश्रिताः **पाण्डुराङ्ग**दयो भावनीयाः। नवरं **भिक्षु**र्बुद्धदर्शनाश्रितः।

**से किं तं गणनामे** इत्यादि। इह मल्लादयो गणाः तत्र यो यस्मिन् गणे वर्तते तस्य तन्नाम गणस्थापनानामोच्यते इति **मल्ले मल्लदिण्णे** इत्यादि।

**से किं तं जीवियाहेउ**मित्यादि । इह यस्या जातमात्रमपत्यं म्रियते सा

Jain Education International For Private & Personal Use Only www.jainelibrary.org

लोकस्थितिवैचित्र्याज्जातमात्रमपि किञ्चिदपत्यं जीवननिमित्तमवकरादिष्वस्यति, तस्य चाऽवकरकः **उत्कुरुटक** इत्यादि यन्नाम क्रियते तज्जीविकाहेतोः स्थापनानामाख्यायते। **सुप्पए** त्ति यः सूर्पे कृत्वा त्यज्यते तस्य सूर्पक एव नाम स्थाप्यते। शेषं प्रतीतम्।

**से किं तं आभिप्पाइयनामे** इत्यादि। इह यत् वृक्षादिषु प्रसिद्धम् **अम्बको निम्बक** इत्यादि नाम देशरूढ्या स्वाभिप्रायानुरोधतो गुणनिरपेक्षं पुरुषेषु व्यवस्थाप्यते तदाभिप्रायिकं स्थापनानामेति भावार्थः। तदेतत् स्थापनाप्रमाणनिष्पन्नं सप्तविधं नामेति।

**से किं तं दव्वपमाणे** इत्यादि। अयमत्र भावार्थः- धर्मास्तिकायोऽधर्मास्तिकाय इत्यादीनि षड् द्रव्यविषयाणि नामानि, द्रव्यमेव प्रमाणं तेन निष्पन्नानि द्रव्यप्रमाणनामानि, धर्मास्तिकायादिद्रव्यं विहाय न कदाचिदन्यत्र वर्तन्त इति तद्धेतुकान्युच्यन्त इति तात्पर्यम्। अनादिसिद्धान्तनामत्वेनैवैतानि प्रागुक्तानीति चेत्, उच्यताम्, को दोषः ? अनन्तधर्मात्मके वस्तुनि तत्तद्धर्मापेक्षयाऽनेकव्यपदेशताया अदुष्टत्वात्। एवमन्यत्रापि यथासम्भवं वाच्यमिति।

**से किं तं भावपमाणे** इत्यादि। भावो युक्तार्थत्वादिको गुणः, स एव तद्द्वारेण वस्तुनः परिच्छिद्यमानत्वात् प्रमाणम्, तेन निष्पन्नं तदाश्रयेण निर्वृत्तं नाम सामासिकादि चतुर्विधं भवतीत्यत्र परमार्थः।

तत्र **से किं तं सामासिए** इत्यादि, द्वयोर्बहूनां वा पदानां समसनं संमीलनं समासस्तेन निर्वृत्तं सामासिकम्, समासाश्च द्वन्द्वादयः सप्त। तत्र समुच्चयप्रधानो **द्वन्द्वः**, **दन्ताश्चौष्ठौ च दन्तोष्ठम्, स्तनौ च उदरं च स्तनोदर**मिति, प्राण्यङ्गत्वात्[१५] समाहारः, **वस्त्र-पात्र**मित्यादौ त्वप्राणिजातित्वाद**श्व-महिष**मित्यादौ पुनः शाश्वतिकवैरित्वात्, एवमन्यान्यप्युदाहरणानि भावनीयानि। अन्यपदार्थप्रधानो **बहुव्रीहिः, पुष्पिताः कुटज-कदम्बा यस्मिन् गिरौ सोऽयं गिरिः पुष्पित-कुटजकदम्बः**। *तत्पुरुषः समानाधिकरणः कर्मधारयः* [*पा० १।२।४२*], स च **धवल**श्चासौ **वृषभ**श्च **धवलवृषभ** इत्यादि। *सङ्ख्यापूर्वो द्विगुः* [*पा० २।१।५२*], **त्रीणि कटुकानि** समाहृतानि **त्रिकटुकम्**। एवं **त्रीणि मधुराणि** समाहृतानि **त्रिमधुरम्**, पात्रादिगणे दर्शनादिह पञ्चपूलीत्यादिवत् स्त्रियामीप्रत्ययो न भवति, एवं शेषाण्यप्युदाहरणानि भावनीयानि। द्वितीयादिविभक्त्यन्तपदानां समास**स्तत्पुरुषः**, तत्र **तीर्थे काक** इवास्ते **तीर्थकाकः**, *ध्वाङ्क्षेण क्षेपे* [ *पा० २।१।४२* ]इति सप्तमीतत्पुरुषः, शेषं प्रतीतम्।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अधस्तनाः देवेन्द्रावग्रहादयः उपरितनैः राजावग्रहादिभिर्यथाक्रमं बाधिताः, अत एव न तु नैव लभन्ते प्राधान्यम् उत्तमत्वम् । किमुक्तं भवति ?- राजावग्रहे राजैव प्रभवति न देवेन्द्रः, ततो देवेन्द्रेणानुज्ञातेऽप्यवग्रहे यदि राजा नानुजानीते तदा न कल्पते तदवग्रहे स्थातुम्; अथानुज्ञातो राज्ञा स्वविषयावग्रहः परं न गृहपतिना, ततस्तदवग्रहेऽपि न युज्यतेऽवस्थातुम्; अथानुमतं गृहपतिना स्वभूमिखण्डेऽवस्थानं परं न सागारिकेण स्वावग्रहे, ततोऽपि न कल्पते वस्तुम्; अथानुज्ञातः सागारिकेण स्वावग्रहः परं न साधर्मिकैः, तथापि न कल्पते इति; एवमुपरितनैरधस्तना बाध्यन्ते । तथा पूर्वामनुज्ञामभिनवां च चतुर्ष्ववग्रहेषु भज विकल्पय, केषाञ्चित् साधूनां पूर्वानुज्ञा तदपरेषामभिनवेति भजना कार्येत्यर्थः । अथ केयं पूर्वानुज्ञा ? का वाऽभिनवानुज्ञा ? इति, उच्यते- इह योऽवग्रहः पुरातनसाधुभिरनुज्ञापितः स यत् पाश्चात्यैरेवमेव परिभुज्यते न भूयोऽनुज्ञाप्यते सा पूर्वानुज्ञा, यथा- चिरन्तनसाधुभिर्देवेन्द्रो यदवग्रहमनुज्ञापितः सैव पूर्वानुज्ञा साम्प्रतकालीनसाधूनामप्यनुवर्त्तते न पुनर्भूयोऽप्यनुज्ञाप्यते । अभिनवानुज्ञा नाम यदा किलान्यो देवेन्द्रः समुत्पद्यते तदा तत्कालवर्त्तिभिः साधुभिर्यदसावभिनवोत्पन्नतया-ऽवग्रहमनुज्ञाप्यते सा तेषां साधूनामभिनवानुज्ञा तदन्येषां तु पूर्वानुज्ञैव । राजावग्रहेऽपि यो यदा चक्रवर्ती समुत्पद्यते स तत्कालवर्तिभिः साधुभिर्यदनुज्ञाप्यते सा तेषामभिनवानुज्ञा, तदपरेषां पूर्वानुज्ञा । एवं शेषनृपति-गृहपतीनामपि पूर्वा-ऽभिनवानुज्ञे भावनीये । सागारिकोऽपि प्रथमत उपागतैः साधुभिर्यदुपाश्रयमनुज्ञाप्यते सा तेषामभिनवानुज्ञा। तेषु साधुषु तत्र स्थितेषु यदन्ये साधवः समागत्य तदनुज्ञापितमवग्रहं परिभुञ्जते सा पूर्वानुज्ञा । तदेवं चतुर्ष्ववग्रहेषु पूर्वा-ऽभिनवानुज्ञयोर्भजना भाविता । तथा पश्चिमे साधर्मिकावग्रहेऽभिनवानुज्ञैव भवति न पूर्वानुज्ञा । तथाहि- यो यदाऽवग्रहार्थं साधर्मिकमुपसम्पद्यते स सर्वोऽपि तदानीं तमनुज्ञाप्यैवावतिष्ठते नान्यथेत्यभिनवानुज्ञैवैका ॥६७०॥"

- इति बृहत्कल्पभाष्यस्य मलयगिरिसूरिविरचितायां वृत्तौ ॥

६. °विवक्खिता जे२ ॥ ७. दव्वाणुपुव्वी ताइं परिणमयइ खंध° जे२ ॥ ८. अखंधभावे जे२ विना ॥ ९. अतरणियतोय जे२ विना । अत्र 'अतरतोयस्य, अतरणीयतोये' इत्युभयमपि समुद्रवाचित्वेन समानार्थकमेव ॥

[ चू० १५६ ] १.→← एतच्चिह्नान्तर्गतः पाठो जे२ मध्ये एव वर्तते ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

[ चू० १५९ ] १.दृश्यतां [सू० ११५] ॥

[ चू० १६०-१६३ ] १. **इदाणिं संगहस्स ओवणि॰** जेर ॥ २. **अधे य णं णव** जेर विना॥ ३. **दव्वाणं तो तहोलोगो** जेर विना ॥ ४. **ठितं सुभ** जेर खंर विना, तुलनार्थं दृश्यतां [हा० १६०-१६३], [हे० १६०-१६३] ॥

[ चू० १६४-१६७ ] १. जिनभद्रगणिक्षमाश्रमणविरचितायां संग्रहण्यां २३९ तमगाथायां पूर्वार्द्धमेव अस्या गाथाया उपलभ्यते ॥ २. **प्रभाव्यत इति** जेर विना ॥

[ चू० १६८-१७१ ] १. दृश्यतां [हा० १६८-१७१ टि० ३]

[ चू० १८०-१९४ ] १. **कालसमयखंधो** खं१, २, सं१, ३ । **कालसमखंधो** संर ॥

[ चू० २०१-२०२ ] १. **॰निर्वृत्तिः** ह० ॥ २. **प्रमाणमाद्यः** जेर विना ॥

[ चू० २०३ ] १. **दव्वव्वो** जेर विना ॥

[ चू० २०५ ] १. **॰बहुसु-वि॰** संर विना । **॰बाहुसु-वि॰** जेर ॥ २. व्याख्या - "लिङ्गं व्यभिचार्यपीति प्राकृतलक्षणात् सर्वत्र लिङ्गव्यत्ययः, ततः परिमण्डलम्, प्रक्रमात् संस्थानमेवमुत्तरत्रापि, तच्च बहिर्वृत्ततावस्थितप्रदेशजनितमन्तः शुषिरम्, यथा वलकस्य, चशब्द उत्तरभेदापेक्षया समुच्चये, वृत्तं तदेवान्तः शुषिरविरहितं यथा कुलालचक्रस्य, त्र्यस्रं - त्रिकोणम्, यथा शृङ्गाटकस्य, चतुरस्रं - चतुष्कोणम्, यथा कुम्भिकायाः, आयतं - दीर्घम्, यथा दण्डस्य, चः पूर्वभेदापेक्षया समुच्चये, एव अवधारणे, तत इयन्त एव संस्थानभेदाः ॥" इति **उत्तराध्ययनसूत्रस्य शान्तिसूरिविरचितायां बृहट्टीकायाम्** ॥

[ चू० २०८-२०९ ] १. दृश्यतां [हा० २०८-२०९ टि०१]

[ चू० २३३-२५९ ] १. **खवियं** जेर विना ॥ २. **॰भिप्पातो** जेर विना ॥ ३. **सव्वाभणंतद्धादि** सं१ ॥ ४. **भागं गतेसु** जेर । **भागतगेसु** सं१, ३ ॥ ५. **॰माणू संघात संघाता** जेर । (परमाणू संघाय त्ति संघाया ?) ॥

[ चू० २६० ] १. **सज्ज** ह० ॥ २. **॰विणिग्ग॰** ह० ॥ ३. **॰ण्णेया** ह० ॥ ४. **भणि॰** सं१॥ ५. **॰संयुत्तं** जेर ॥ ६. **विलम्बना** जेर सं१ ॥ ७. **॰नान्तरवि॰** संर, खंर ॥ ८.प्रथमं तावत् । दृश्यतां [हा० २६०] । **पढमत वंस** जेर विना ॥ ९. **सक्कत** ह० ॥ १०. **ताणतो** जेर विना ॥ ११. **तितंतीए** जेर विना नास्ति । किन्तु जेर मध्ये **त्तितंतीए** इति पाठो वर्तते ॥ १२. गीयमाना इत्यर्थः ॥

[ चू० २६२ ] १. प्रतिषु पाठाः - **इव कव्वस्स रसा** जेर सं१, ३ । **इव णव कव्वसरसा** खं १ ॥ २. **तंचणियेण** जेर । **तच्चंणियेण** खं१, २, सं २ जे १ । **तंच्चणियेण** सं १ । **तच्चणियेण** सं३॥ ३. **खरंडियं** जेर विना ॥ ४. **जाणूचिरिणंदिविणद्धपाहेड्डियासु ललाभटेन गतं च** संर । **जाणूवरिणंदिविणद्ध-पाहेड्डियासु ललाभटेन गतं च** जेर विना ॥५. **पत्ति** जेर ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

# तृतीयं परिशिष्टम्

## आचार्यश्रीहरिभद्रसूरिविरचितविवृतेः टिप्पनानि

[ हा० १ ] १. ''श्रेयांसि बहुविघ्नानि भवन्ति महतामपि । अश्रेयसि प्रवृत्तानां क्वापि यान्ति विनायकाः ॥'' इति सम्पूर्णः श्लोकः ॥ २. दृश्यतां पृ० ३ पं० १० ॥ ३. अनुयोगद्वारचूर्णिकृत इत्यर्थः ॥ ४. **किंचि** ह० । यत्र सर्वेष्वपि हस्तलिखितादर्शेषु समान एव अस्मद्दृष्ट्या अशुद्धः पाठ उपलभ्यते तत्र ह० इति सङ्केतो-ऽस्माभिर्विहित इति सर्वत्र ज्ञेयम् ॥

[ हा० २ ] १. तुलना - ''धीरो गुरुः योग्याय विनेयाय अनुजानाति एवं वक्ष्यमाणेन विधिनाऽनुयोगमिति गाथार्थः ॥९५०॥

**तिहिजोगम्मि पसत्थे गहिए काले निवेइए चेव । ओसरणमह णिसिज्जारयणं संघट्टणं चेव ॥९५१॥**
**तत्तो पवेइआए उवविसइ गुरू उ णिअनिसिज्जाए । पुरओ अ ठाइ सीसो सम्ममहाजायउवकरणो ॥९५२॥**

तिथियोगे प्रशस्ते सम्पूर्णशुभादौ गृहीते काले विधिना निवेदिते चैव गुरोः समवसरणम्, अथ निषद्यारचनम्, उचितभूमावक्ष-गुरुनिषद्याकरणमित्यर्थः, सङ्घट्टनं चैव अनिक्षेप इति गाथार्थः ॥५१॥ ततः तदनन्तरं रचकेन साधुना **प्रवेदितायां** कथितायां वसत्यामुपविशति **गुरुः** आचार्य एव, न शेषसाधवः, क्वेत्याह - **निजनिषद्यायां** या तदर्थमेव रचितेति, पुरतश्च शिष्यः तिष्ठति प्रक्रान्तः **सम्यग्** असम्भ्रान्तः **यथाजातोपकरणो** रजोहरणमुखवस्त्रिकादिधर इति गाथार्थः ॥५२॥

**पेहिंति तओ पोत्तिं तीए अ ससीसगं पुणो कायं । बारस वंदण संदिस सज्झायं पट्ठवामोत्ति ॥९५३॥**
**पट्ठवसु अणुण्णाए तत्तो दुअगावि पट्ठवेइत्ति । तत्तो गुरू निसीअइ इअरोऽवि णिवेअइ तयंति ॥९५४॥**
**तत्तोऽवि दोऽवि विहिणा अणुओगं पट्ठविंति उवउत्ता । वंदित्तु तओ सीसो अणुजाणावेइ अणुओगो ॥९५५॥**
**अभिमंतिऊण अक्खे वंदइ देवे तओ गुरू विहिणा । ठिअ एव नमोक्कारं कड्डइ नंदिं च संपुन्नं ॥९५६॥**
**इअरोऽवि ठिओ संतो सुणेइ पोत्तीइ ठइअमुहकमलो । संविग्गो उवउत्तो अच्चंतं सुद्धपरिणामो ॥९५७॥**
**तो कड्डिऊण नंदिं भणइ गुरू अह इमस्स साहुस्स । अणुओगं अणुजाणे खमासमणाण हत्थेणं ॥९५८॥**
**दव्वगुणपज्जवेहि अ एस अणुन्नाउ वंदिउं सीसो । संदिसह किं भणामो ? इच्चाइ जहेव सामइए ॥९५९॥**
**नवरं सम्मं धारय अन्नेसिं तह पवेअह भणाइ । इच्छामणुसट्ठीए सीसेण कयाइ आयरिओ ॥९६०॥ तिपयक्खिणीकए तो उवविसए गुरु कए अ उस्सग्गे । सणिसेज्जत्तिपयक्खिण वंदण सीसस्स वावारो ॥९६१॥ उवविसइ गुरुसमीवे सो साहइ तस्स तिन्नि वाराओ । आयरियपरंपरएण आगए तत्थ मंतपए ॥९६२॥**
**देइ तओ मुट्ठीओ अक्खाणं सुरभिगंधसहिआणं । वड्ढंतिआओ सोऽवि अ उवउत्तो गिण्हई विहिणा ॥९६३॥**
**उट्ठेति निसिज्जाओ आयरिओ तत्थ उवविसइ सीसो । तो वंदई गुरु तं सहिओ सेसेहिं साहूहिं ॥९६४॥**
**भणइ अ कुण वक्खाणं तत्थ ठिओ चेव तो तओ कुणइ । णंदाइ जहासत्ती परिसं नाऊण वा जोग्गं ॥९६५॥**
**आयरियनिसिज्जाए उवविसणं वंदणं च तह गुरुणो । तुल्लगुणखावणट्ठा न तया दुट्ठं दुविण्हंपि ॥९६६॥**
**वंदंति तओ साहू उट्ठइ अ तओ पुणो णिसिज्जाओ । तत्थ निसीअई गुरू उववूहण पढममन्ने उ ॥९६७॥**

Jain Education International          For Private & Personal Use Only          www.jainelibrary.org

प्रत्युपेक्षते तदनन्तरं मुखवस्त्रिकां द्वावपि, तथा च मुखवस्त्रिकया सशिरः पुनः कायं प्रत्युपेक्षते इति, ततः शिष्यः द्वादशावर्त्तवन्दनपुरस्सरमाह - सन्दिशत यूयं स्वाध्यायं **प्रस्थापयामः** प्रकर्षेण वर्त्तयाम इति गाथार्थः ॥५३॥ प्रस्थापय इत्यनुज्ञाते सति गुरुणा ततो द्वावपि गुरुशिष्यौ प्रस्थापयत, इति ततः तदनन्तरं गुरुर्निषीदति स्वनिषद्यायाम्, इतरोऽपि शिष्यः निवेदयति तं स्वाध्यायमिति गाथार्थः ॥५४॥ ततश्च द्वावपि गुरुशिष्यौ विधिना प्रवचनोक्तेन अनुयोगं प्रस्थापयतः उपयुक्तौ सन्तौ, वन्दित्वा ततः तदनन्तरं शिष्यः किमित्याह - अनुज्ञापयत्यनुयोगं गुरुणेति गाथार्थः ॥५५॥ अभिमन्त्र्य चाचार्यमन्त्रेणाक्षान् - चन्दनकान् वन्दते देवान् चैत्यानि ततो गुरुर्विधिना प्रवचनोक्तेन, ततः किमित्याह - स्थित एवोर्ध्वस्थानेन नमस्कारं पञ्चमङ्गलकमाकर्षयति - ३ पठति, नन्दीं च सम्पूर्णग्रन्थपद्धतिमिति गाथार्थः ॥५६॥ इतरोऽपि शिष्यः स्थितः सन्नूर्ध्वस्थानेन शृणोति मुखवस्त्रिकया विधिगृहीतया स्थगितमुखकमलः सन्निति । स एव विशेष्यते - संविग्नो मोक्षार्थी उपयुक्तस्तत्रैकाग्रतया अनेन प्रकारेणात्यन्तं शुद्धपरिणामः शुद्धाशय इति गाथार्थः ॥५७॥ तत आकृष्य पठित्वा नन्दीं भणति गुरुः आचार्यः - अहमस्य साधोरुपस्थितस्यानुयोगम् - उक्तलक्षणमनुजानामि क्षमाश्रमणानां प्राक्तनऋषीणां हस्तेन, न स्वमनीषिकयेति गाथार्थः ॥५८॥ कथमित्याह - द्रव्यगुणपर्यायैः व्याख्याङ्गरूपैरेषोऽनुज्ञात इति । अत्रान्तरे वन्दित्वा शिष्यः सन्दिशत यूयं किं भणामीत्यादि वचनजातं यथैव सामायिके तथैव द्रष्टव्यमिति गाथार्थः ॥५९॥ यदत्र नानात्वं तदभिधातुमाह - नवरमत्र सम्यग् धारय आचारासेवनेनेत्यर्थः, अन्येभ्यस्तथा प्रवेदय सम्यगेवेति भणति, कदेत्याह - इच्छाम्यनुशास्तौ शिष्येण कृतायां सत्यामाचार्य इति गाथार्थः ॥६०॥ त्रिप्रदक्षिणीकृते सति शिष्येण तत उपविशति गुरुः, अत्रान्तरेऽनुज्ञाकायोत्सर्गः, कृते च कायोत्सर्गे तदनु सनिषद्ये गुरौ त्रिप्रदक्षिणं वन्दनं भावसारं शिष्यस्य व्यापारोऽयमिति गाथार्थः ॥६१॥ उपविशति गुरुसमीपे तन्निषद्यायामेव दक्षिणपार्श्वे शिष्यः, सः गुरुः कथयति तस्य त्रीन् वारान्, किमित्याह - आचार्यपारम्पर्येणागतानि पुस्तकादिष्वलिखितानि तत्र मन्त्रपदानि विधिना सर्वार्थसाधकानीति गाथार्थः ॥६२॥ तथा - ददाति त्रीन् मुष्टीनाचार्योऽक्षाणां चन्दनकानां सुरभिगन्धसहितानां वर्द्धमानान् प्रति मुष्टिं सोऽपि च शिष्यः उपयुक्तः सन् गृह्णाति विधिनेति गाथार्थः ॥६३॥ एवं व्याख्याङ्गरूपानक्षान् दत्त्वा उत्तिष्ठति निषद्यायाः आचार्य अत्रान्तरे, तत्रोपविशति शिष्योऽनुयोगी ततो वन्दते गुरुस्तं शिष्यसहितः शेषसाधुभिः सन्निहितैरिति गाथार्थः ॥६४॥ भणति च कुरु व्याख्यानमिति तमभिनवाचार्यम्, तत्र स्थित एव ततोऽसौ करोति तद्व्याख्यानमिति नन्द्यादि यथाशक्त्येति तद्विषयमित्यर्थः, पर्षदं वा ज्ञात्वा योग्यमन्यदपीति गाथार्थः ॥६५॥ आचार्यनिषद्यायामुपविशनमभिनवाचार्यस्य वन्दनं च तथा गुरोः प्रथममेवाचार्यस्य तुल्यगुणख्यापनार्थं लोकानां न तदा दुष्टं द्वयोरपि शिष्याचार्ययोः या(जी)तमेतदिति गाथार्थः ॥६६॥ वन्दंते ततः साधवः व्याख्यानसमनन्तरम्, उत्तिष्ठति च ततः पुनर्निषद्यायाः अभिनवाचार्यः, तत्र निषद्यायां निषीदति च गुरुर्मौलः, उपबृंहणमत्रान्तरे प्रथमम् अन्ये तु - व्याख्यानादाविति गाथार्थः ॥६७॥

धण्णो सि तुमं णायं जिणवयणं जेण सव्वदुक्खहरं । ता सम्ममिअं भवया पउंजियव्वं सया कालं ॥९६८॥
इहरा उ रिणं परमं असम्मजोगो अजोगओ अवरो । ता तह इह जइअव्वं जह एत्तो केवलं होइ ॥९६९॥
परमो अ एस हेऊ केवलनाणस्स अन्नपाणीणं । मोहावणयणओ तह संवेगाइसयभावेण ॥९७०॥

धन्योऽसि त्वं सम्यग् ज्ञातं जिनवचनं येन भवता सर्वदुःखहरं मोक्षहेतुः तत्सम्यगिदं भवता - प्रवचननीत्या प्रयोक्तव्यं सदा सर्वकालमनवरतमिति गाथार्थः ॥६८॥ इतरथा ऋणं परममेतत् सदाऽप्रयोगे

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सुखशीलतया असम्यग्योगश्चायोगतोऽप्यपर: - पापीयान् द्रष्टव्य: तत् तथेह यतितव्यमुपयोगतो यथाऽत: केवलं भवति - परमज्ञानमिति गाथार्थ: ॥६९॥ परमश्चैष: - जिनवचनप्रयोग: हेतु: केवलज्ञानस्य अवन्ध्य इत्यर्थ: कुत इत्याह - अन्यप्राणिनां मोहापनयनात् परार्थकरणात् तथा संवेगातिशयभावेन उभयोरपीति गाथार्थ: ॥७०॥

एवं उववूहेउं अणुओगविसज्जणट्ठ उस्सग्गो । कालस्स पडिक्कमणं पवेअणं संघविहिदाणं ॥९७१॥

एवमुपबृंह्य तमाचार्यमनुयोगविसर्ज्जनार्थमुत्सर्ग: क्रियते कालस्य प्रतिक्रमणं तदन्वेव प्रवेदनं निरुद्धस्य सङ्घविधिदानं यथाशक्ति नियोगत इति गाथार्थ: ॥७१॥

पच्छा य सोऽणुओगी पवयणकज्जम्मि निच्चमुज्जुत्तो । जोगाणं वक्खाणं करिज्ज सिद्धंतविहिणा उ ॥९७२॥'' इति आचार्यश्रीहरिभद्रसूरिविरचिते स्वोपज्ञवृत्तिसहिते पञ्चवस्तुके ॥

२. वि गुरू जे० ॥ ३. वंदणं संदाउं ह० ॥ ४. वंदिय एवं ह० ॥

[ हा० ३- ५ ] १. ''निक्खेवेगट्ठ निरुत्त विही पवित्ती य केण वा कस्स ।

तद्दार भेय लक्खण तदरिह परिसा य सुत्तत्थो ॥१४९॥

[ कल्पभा० १४९ ]

अनुयोगस्य निक्षेप: नामादिन्यासो वक्तव्य: । तदनन्तरं तस्यैकार्थिकानि । तदनु निरुक्तं वक्तव्यम् । तत: को विधिरनुयोगे कर्तव्ये इति विधिर्वक्तव्य: । तथा प्रवृत्ति: प्रसवोऽनुयोगस्य वक्तव्य: । तदनन्तरं केनाऽनुयोग: कर्त्तव्य इति वक्तव्यम् । तत: परं कस्य शास्त्रस्य कर्त्तव्य इति । तदनन्तरं तस्य-अनुयोगस्य द्वाराणि-उपक्रमादीनि वक्तव्यानि, तत्र तेषामेव भेद: । तत: परं सूत्रस्य लक्षणम् । तदनन्तरं तस्य सूत्रस्य अर्हा:-योग्या: । तत: परं परिषत् । तत: सूत्रार्थ: । एष द्वारगाथासङ्क्षेपार्थ:, व्यासार्थस्तु प्रतिद्वारं वक्ष्यते ॥१४९॥ ''इति बृहत्कल्पभाष्यस्य मलयगिरिसूरिविरचितायां वृत्तौ ॥

[ हा० ६ ] १. °तस्य सूत्रो° जे१ पा० ॥

[ हा० ७-९ ] १.प्रज्ञापितं ह० ॥

[ हा० ११] १. चेल्लिक्कमादि ह० ॥

२. ''अक्खे वराडए वा कट्ठे पुत्थे य चित्तकम्मे य । सब्भावमसब्भावं ठवणाकायं वियाणाहि ॥१४३२॥ लिप्पगहत्थी हत्थित्ति एस सब्भाविया भवे ठवणा । होइ असब्भावे पुण हत्थित्ति निरागिई अक्खो ॥१४३३॥

[आवश्यकनि० १४३२-३३]

व्याख्यायते- अक्खे वराडए, अक्षे-चन्दनके, वराटके वा-कपर्दके वा, काष्ठे-कुट्टिमे, पुस्ते वा वस्त्रकृते, चित्रकर्मणि वा प्रतीते, किमित्याह-सतो भाव: सद्भाव: तत्स्थ इत्यर्थ: तमाश्रित्य, तथा असतोभाव: असद्भाव:, अतत्स्थ इत्यर्थ:, तं चाश्रित्य, कि म् ? स्थापनाकायं विजानाहीति गाथार्थ: ॥१४३२॥

सामान्येन सद्भावासद्भावस्थापनोदाहरणमाह- लेप्पगहत्थी यदिह लेप्यकहस्ती हस्तीति स्थापनायां निवेश्यते एस सब्भाविया भवे ठवणत्ति एषा सद्भावस्थापना भवतीति, भवत्यसद्भावे पुनर्हस्तीति निराकृति:-हस्त्याकृतिशून्य एव चतुरङ्गादाविति । तदेवं स्थापनाकायोऽपि भावनीय इति गाथार्थ: ॥१४३३॥'' — आव० हारि०॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

[ हा० १२ ] १. °येदं **प्रस्थानेष्विति समासार्थः** ह० । °येदं **प्रस्थापनेष्विति समासार्थः** वा० ॥

**[ हा० १४ ] १. ''सुपां सुलुक्पूर्वसवर्णाच्छेयाडाड्यायाजालः** ॥३९॥ छन्दसि विषये सुपां स्थाने सु लुक् पूर्वसवर्ण आ आत् शे या डा ड्या याच् आल् इत्येते आदेशा भवन्ति । सु । अनृक्षरा ऋजवः सन्तु पन्थाः । पन्थान इति प्राप्ते ॥ सुपां सुपो भवन्तीति वक्तव्यम् ॥ ५ ॥ धुरि दक्षिणायाः । दक्षिणायामिति प्राप्ते ॥ तिङां तिङो भवन्तीति वक्तव्यम् चषालं ये अश्वयूपाय तक्षति । तक्षन्तीति प्राप्ते । लुक् । आर्द्रे चर्मन् । लोहिते चर्मन् । चर्म्मणीति प्राप्ते । हविर्द्धाने यत्सुन्वन्ति तत्सामिधेनीरन्वाह । यस्मिन्सुन्वन्ति तस्मिन्सामिधेनीरिति प्राप्ते । पूर्वसवर्णः । धीती । मती । सुष्टुती । धीत्या मत्या सुष्टुत्या इति प्राप्ते । आ । उभा यन्तारौ । उभौ यन्तारौ इति प्राप्ते । आत् । न ताद्ब्राह्मणाद् निन्दामि । न तान् ब्राह्मणानिति प्राप्ते । शे । न युष्मे वाजबन्धवः । अस्मे इन्द्राबृहस्पती । यूयं वयमिति प्राप्ते । यूयादेशो वयादेशश्च छान्दसत्वान्न भवति । या । उरुया । धृष्णुया । उरुणा धृष्णुनेति प्राप्ते । डा । नाभा पृथिव्याम् । नाभौ पृथिव्यामिति प्राप्ते । ड्या । अनुष्टुब्याच्यावयतात् । अनुष्टुभेति प्राप्ते । याच् । साधुया । साध्विति सोर्लुकि प्राप्ते । आल् । वसन्ता यजते । वसन्त इति प्राप्ते । इयाडियाजीकाराणामुपसंख्यानम् । । इया उर्विया परिधानम् । दार्विया । उरुणा दारुणेति प्राप्ते । डियाच् । सुक्षेत्रिया । सुगात्रिया । सुक्षेत्रिणा सुगात्रिणेति प्राप्ते । ईकारः । दृतिं न शुष्कं सरसी शयानम् । सरसि शयानमिति प्राप्ते ॥ आङयाजयारामुपसंख्यानम् आङ् । प्रबाहवा । प्रबाहुनेति प्राप्ते । अयाच् । स्वप्नया सच सेवनम् । स्वप्नेनेति प्राप्ते । अयार् । सिन्धुमिव नावया । नावेति प्राप्ते ॥'' इति **पाणिनीयव्याकरणस्य काशिकायां** वृत्तौ ७।१।३९॥

२. अव्यत्याम्रेडितं नाम यदस्थानेन पदघटनम्, यथा- *प्राप्तराज्यस्य रामस्य, राक्षसाः प्रलयं गताः ।* इत्यत्र 'प्राप्तराज्यस्य रामस्य राक्षसाः' इत्यादि, तद्रहितम् ।'' **कल्पभाष्यस्य मलयगिरीयायां वृत्तौ** गा० २८८॥

३. **''द्वन्द्वश्च प्राणि-तूर्य-सेनाङ्गानाम्** । पा० २।४।२॥ एषां द्वन्द्व एकवत् स्यात् । पाणि-पादम् । मार्दङ्गिकपाणविकम् । रथिका-ऽश्वारोहम् । समाहारस्यैकत्वादेकत्वे सिद्धे नियमार्थं प्रकरणम् —प्राण्यङ्गादीनां समाहार एव यथा स्यात् ।'' इति **पाणिनीयव्याकरणसिद्धान्तकौमुद्याम्** ॥

४. ''पाडलऽसोग कुणाले, उज्जेणी लेहलिहण सयमेव । अहिय सवत्ती मत्ताहिएण सयमेव वायणया ॥२९२॥

मुरियाण अप्पडिहया, आणा सयमंजणं निवे णाणं । गामग सुयस्स जम्मं, गंधव्वाऽऽउट्टणा कोइ ॥२९३॥ चंदगुत्तपपुत्तो तु, बिंदुसारस्स नत्तुओ । असोगसिरिणो पुत्तो, अंधो जायइ कागिणिं ॥२९४॥

[कल्पभा० गा० २९२-२९४, विशेषाव०भा० ८६२]

पाडलिपुत्ते नयरे चंदगुत्तपुत्तस्स बिंदुसारस्स पुत्तो असोगो नाम राया । तस्स असोगस्स पुत्तो कुणालो उज्जेणीए । सा से कुमारभुत्तीए दिन्ना । सो खुड्डलओ । अन्नया तस्स रन्नो निवेइयं, जहा- कुमारो सायरेगट्ठवासो जाओ । तओ रन्ना सयमेव लेहो लिहिओ, जहा-अधीयतां कुमारः । कुमारस्स मायसवत्तीए रन्नो पासे ठियाए भणियं-आणेह, पासामि लेहं । रन्ना पणामिओ । ताहे तीए रन्नो अन्नचित्तत्तणओ सलागाप्रान्तेन निष्ठ्यूतेन

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तीमित्वा अकारस्योपरि अनुस्वारः कृतः। अंधीयताम् इति जायं। पडिअप्पिओ रन्नो लेहो। रन्ना वि पमत्तेण न चेव पुणो अणुवाइओ। मुद्दित्ता उज्जेणिं पेसिओ। वाइओ। वाइगा पुच्छिया-किं लिहियं ? ति। पुच्छिया न कहिंति। ताहे कुमारेण सयमेव वाइओ। चिंतियं च णेणं-अम्हं मोरियवंसाणं अप्पडिहया आणा, तो कहं अप्पणो पिउणो आणं अइक्कमेमि ?। तत्तसिलागाए अच्छीणि अंजियाणि। ताहे रन्ना नायं। परितप्पित्ता उज्जेणी अन्नकुमारस्स दिन्ना। तस्स वि कुमारस्स अन्नो गामो दिन्नो। अन्नया तस्स कुणालस्स अंधयस्स पुत्तो जाओ। सो य अंधकुणालो गंधव्वे अईव कुसलो। अन्नया अन्नायचज्जाए गायंतो हिंडइ। तत्थ रन्नो निवेइयं, जहा-एरिसो तारिसो गंधव्विओ अंधलओ। रन्ना भणियं-आणेह। आणीओ। जवणीअंतरिओ गायइ। ताहे अईव राया असोगो अक्खित्तो। ताहे भणइ-किं देमि ?। इत्थ कुणालेण गीयं-चंदगुत्तपपुत्तो य [गाथा २९४] इत्यादि गाथा। ताहे रन्ना पुच्छियं-को एस तुमं ?। तेण कहियं-तुब्भं पुत्तो। जवणियं अवसारेउं कंठे घेत्तुं अंसूपाओ कओ। भणियं च णेण-किं कागिणीए वि नारिहसि जं कागिणिं जायसि ?। अमच्चेहिं भणियं-रायपुत्ताणं रज्जं कागिणी। रन्ना भणियं-किं काहिसि अंधगो रज्जेणं ?। कुणालो भणइ-मम पुत्तो अत्थि। कया जाओ ?। संपइ भूओ। आणीओ। संपइ त्ति से नामं कयं। रज्जं दिन्नं।

अक्षरगमनिका-पाटले पाटलिपुत्रके नगरे अशोको राजा। कुणालस्तस्य पुत्रः। उज्जयिन्यां राज्ञः स्वयमेव तद्योग्यलेखलिखनम्-अधीयतामिति। मात्राधिके सति न वाचकैर्वाच्यते। ततः स्वयमेव वाचना। ततो मौर्याणामप्रतिहता आज्ञा इति विचिन्त्य स्वयं तप्तशिलाकया नेत्रयोरञ्जनम्। ततो नृपे ज्ञानम्। ततः परितप्य स राज्ञा ग्रामगतः कृतः। ततः सुतस्य जन्म। गन्धर्वेण समस्तस्यापि लोकस्य आवर्त्तना आवर्जनम्, निवेदनम्-कोऽप्यन्धोऽतीव गन्धर्वे कुशल इति। ततस्तस्याऽऽनयनम्। परितोषे याच्ञा, गाथा-चन्द्रगुप्तप्रपौत्र इत्यादि। अत्राप्युपनयः स एव ॥२९२॥२९३॥२९४॥

अथवा भावाधिके इदं लौकिकमाख्यानम्- कामियसरस्स तडे वंजुलरुक्खो महइमहालओ। तत्थ किर रुक्खे विलग्गिउं जो सरे पडइ सो जइ तिरिक्खजोणिओ तो मणूसो भवइ, अह मणूसो पडति तो देवो भवइ, अह बिइयं वारं पडइ तो प्रकृतिमेव गच्छइ। तत्थ वानरो सपत्तिओ पाणियं पाउं ओयरइ। अन्नया पाणीयपीयणट्ठाए आगमो। सो संलावं प्रकृतिगमनविरहितं श्रुत्वा सपत्नीकश्चिन्तयति-रुक्खं विलग्गिउं सरे पडामो जा माणुसजुयलं भवामो। पडियाणि। उरालं माणुसजुयलं जायं। सो भणइ-पुणो पडामो जाव देवजुयलं होमो। इत्थी वारेइ-को जाणइ जइ न हुज्जा ?। पुरिसो भणइ-जइ न हुज्जामो किं माणुसत्तणं पि अम्हं नासिहिइ ?। वारिज्जमाणो वि पडिओ वानरो जाओ। पच्छा रायपुरिसेहिं गहिया सा इत्थी रन्नो भज्जा जाया। इयरो वि मायारएहिं गहिओ खेड्डाओ सिक्खाविओ। अन्नया ते मायारगा रन्नो पुरओ पेच्छं दिंति। राया देवीए समं पिच्छइ। ताहे सो वानरो देविं निज्झायंतो अभिलसइ। ताहे ताए अणुकंपाए वानरो भणिओ-

जो जहा वट्टए कालो, तं तहा सेव वानरा ।मा वंजुलपरिब्भट्ठो, वानरा ! पडणं सर ॥२९५॥

[कल्पभा०गा० २९५, विशेषाव०भा०८६३]

यो यथा वर्त्तते कालः तं कालं तथा सेवस्व वानर !। वञ्जुलवृक्षादेकवारं परिभ्रष्टःपतितः सन्

Jain Education International          For Private & Personal Use Only          www.jainelibrary.org

मया तदा भणितः- मा भूयो वञ्जुलवृक्षात् सरसि पतनं कुरु, प्रकृतिं यास्यसि इति एतत् स्मर । एवं भावतोऽधिकेऽर्थस्य विसंवाद इत्यादिका विभाषा तथैव ॥२९५॥

तित्त-कडुओसहाइं मा णं पीलिज्ज ऊणते देइ। पउणइ न तेहि अहिएहिं मरइ बालो तहाहारे ॥२८९॥

[कल्पभा०गा० २८९, विशेषाव०भा० ८६५]

एगाए अविरइयाए पुत्तो गिलाणो । तीए विज्जो पुच्छिओ । तेण ओसहाणि दिन्नाणि । सा चिंतेइ- इमाणि -कडुय-तित्ताणि मा निपीडिज्जा । तओ णाए अद्धाणि अवणीयाणि । सो तेहिं न पगुणीकओ, मओ। तओ एगा ऊणगं पीहगं देइ, तीसे वि मओ । अक्षरगमनिका-तिक्त-कटुकौषधानि माऽमुं बालं पीडयेयुरिति न तानि परिपूर्णानि ददाति, किन्त्वर्द्धानि । न च तैरर्द्धितैर्बालः प्रगुणति, किन्तु म्रियते । तथा आहारे ऊने म्रियते ॥२८९॥ इति **कल्पभाष्यस्य मलयगिरि**सूरिविरचितायां वृत्तौ ॥ ५. **मुदिता** ह० ॥

**[ हा० १५ ]** १.णेगम संगह ववहार उज्जुसुए चेव होइ बोद्धव्वे ।

सद्दे य समभिरूढे एवंभूए य मूलणया ॥७५४॥ [आवश्यकनि०गा० ७५४]

व्याख्या- नयन्तीति नयाः- वस्त्ववबोधगोचरं प्रापयन्त्यनेकधर्मात्मकज्ञेयाध्यवसायान्तरहेतव इत्यर्थः ते च नैगमादयः- नैगमः सङ्ग्रहः व्यवहारः ऋजुसूत्रश्चैव भवति बोद्धव्यः, शब्दश्च समभिरूढः एवम्भूतश्च मूलनया इति गाथासमुदायार्थो निगदसिद्धः ॥'' — **आवश्यकहारि०** पृ० २८२ ॥

**[ हा० १७ ]** १. 'भव्यशरीरद्रव्यावश्यकम्' इति पदमत्र असंगतं भाति, सू० १८-२० व्याख्यायामेतत् संगतं भवेदपि, अत्र तु असंगतमेव । अत्र आवश्यकतापि नास्ति अस्य पदस्य, यदि तु आग्रहो भवेत् तर्हि 'ज्ञशरीरद्रव्यावश्यकम्' इत्येतदेव युज्यते ॥

**[ हा० २१-२२ ]** १. इंदं सिं॰ जे२ पासं० ॥ २. (गुणेषु मुक्तो ?) ॥ ३. **अगीयत्थो** जेमू१। **अगीयत्थसंविग्गो** जेसं१ । **अगीयत्थसंविग्गो भविय** । जे२ पा० ॥

**[ हा० ३०-३९]** १. **ताल्वादि॰** ह० ॥

**[ हा० ४०-४५]** १. **केणावि** जेसं२ पासं२ ॥

**[ हा० ५२-६४]** १. **मुक्ते भवाद्यभाव** ह० ॥

**[ हा० ७३ ]** १.''पासत्थाई वंदमाणस्स नेव कित्ती न निज्जरा होइ । कायकिलेसं एमेव कुणई तह कम्मबंधं च ॥११०८॥ व्याख्या - पार्श्वस्थादीन् उक्तलक्षणान् वन्दमानस्य नमस्कुर्वतो नैव कीर्तिर्न निर्जरा भवति, तत्र कीर्तिः - अहो अयं पुण्यभागित्येवंलक्षणा, सा न भवति, अपि त्वकीर्तिर्भवति, नूनमयमप्येवंस्वरूपो येनैषां वन्दनं करोति । तथा निर्जरणं निर्जरा- कर्मक्षयलक्षणा सा न भवति तीर्थकराज्ञाविराधनाद्वारेण निर्गुणत्वात्तेषामिति । चीयत इति कायः - देहस्तस्य क्लेशः - अवनामादिलक्षणः कायक्लेशस्तं कायक्लेशम् एवमेव मुधैव करोति निर्वर्तयति । तथा क्रियत इति कर्म - ज्ञानावरणीयादिलक्षणं तस्य बन्धो - विशिष्टरचनयाऽऽत्मनि स्थापनं तेन वा आत्मनो बन्धः - स्वस्वरूपतिरस्करणलक्षणः कर्मबन्धस्तं कर्मबन्धं च करोतीति वर्तते। चशब्दादाज्ञाभङ्गादींश्च दोषानवाप्नुते, कथं ? भगवत्प्रतिक्रुष्टवन्दने आज्ञाभङ्गः, तं दृष्ट्वाऽन्येऽपि

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वन्दन्तीत्यनवस्था, तान् वन्दमानान् दृष्ट्वाऽन्येषां मिथ्यात्वं कायक्लेशतो देवताभ्यो वाऽऽत्मविराधना, तद्वन्दनेन तत्कृतासंयमानुमोदनात्संयमविराधनेति गाथार्थः ॥'' - **आवश्यकहारि०** ॥

२. परियाय- परिस- पुरिषे खित्तं कालं च आगमं नच्चा ।

कारणजाए जाए जहारिहं जस्स जं जुग्गं ॥११२८॥ [आवश्यक नि० ११२८] त्ति ३ ।

पर्यायश्च परिषच्च पुरुषश्च पर्यायपरिषत्पुरुषास्तान्, तथा क्षेत्रं कालं च आगमं णच्चत्ति ज्ञात्वा-विज्ञाय कारण- जाते प्रयोजनप्रकारे जाते उत्पन्ने सति यथार्हं यथानुकूलं यस्य पर्यायादिसमन्वितस्य यद् योग्यं समनुरूपं वाङ्नमस्कारादि तत्तस्य क्रियत इति वाक्यशेषः, अयं गाथासमासार्थः ॥११२८॥ **आवश्यकहारि०** ॥

**[ हा० ७४-७५]** १. °**न्वयाधि**° ह० ॥ २. °**गमनं** ह० ॥ ३. °**क्रमते** जे१, पामू० २ ॥ ४. °**क्रमः समी**° ह० ॥

**[ हा० ७६-८४]** १. **अप्यत्रादीनां** ह० ॥

**[ हा० ८५-८६]** १. °**क्रम आह** जे१ ॥

**[ हा० ८७-९१]** १. **वरंति मत्थए** ह० । ''जेड्डिया धूया सिक्खाविआ जहा वरं इंतं मत्थए पण्हियाए आहणिज्जसि'' इति **आवश्यकसूत्रस्य हारिभद्र्यां** वृत्तौ पृ० ५५-B । ''जेड्डिया धूया सिक्खविया-जह तुमं वरेण सह कीलंती अवसरं लहेऊण वरं मत्थए पण्हियाए आहणिज्जासि'' इति **आव०मलयगिरीयायां** वृत्तौ पृ०९२- A । ''जेड्डिता धूता सिक्खाविता जहा चडंतिया मत्थए पण्हीए आहणेज्जासि'' इति **आव०चूर्णौ** पृ० ८१ । ''ताहे तं सिक्खवेइ-भत्तारस्स दुक्कमित्ता चडंतं पण्हीए आहणेज्जासि'' इति **कल्पभाष्यस्य मलयगिरीयायां** वृत्तौ (गा० २६२) पृ० ८० ॥

२. ''गुरुचित्तायत्ताइं वक्खाणंगाइं जेण सव्वाइं । तो जेण सुप्पसन्नं होइ तयं तं तहा कज्जं ॥९३१॥

गतार्थैव, नवरं गुरुचित्तं च तदा सुप्रसन्नं भवति, यदेङ्गिताकाराद्यभिज्ञः शिष्यस्तदुपक्रमानुकूल्येन प्रवर्तते। अतो न गुरुचित्तोपक्रमोऽत्राऽप्रस्तुत इति भावः ॥९३१॥

जो जेण पगारेणं तुस्सइ करण-विणया-ऽणुवत्तीहिं । आराहणाए मग्गो सो च्चिय अव्वाहओ तस्स ॥९३२॥

आगारिंगियकुसलं जइ सेयं वायसं वए पुज्जा । तह वि य सिं न विकूडे विरहम्मि य कारणं पुच्छे ॥९३३॥

निवपुच्छिएण गुरुणा भणिओ गंगा कओमुही वहइ ? । संपाइयवं सीसो जह तह सव्वत्थ कायव्वं ॥९३४॥

[विशेषावश्यक भा०गा० ९३१-९३४] इत्यादि ।

तिस्रोऽपि सुगमाः, नवरं प्रथमगाथायां करणेत्यादि, करणं गुर्वादिष्टस्य संपादनम्, विनयोऽभिमुखगमना-ऽऽसनप्रदान-पर्यु पास्त्यञ्जलिबद्धा-ऽनुव्रजनादिलक्षणः, अनुवृत्तिस्त्विङ्गितादिना गुरुचित्तं विज्ञाय तदानुकूल्येन वृत्तिः, ताभिः । द्वितीयगाथायामाकारेङ्गितकुशलं शिष्यं प्रति यदि श्वेतं वायसं पूज्या गुरवो वदेयुः, तथापि सिं ति तेषां संबन्धि वचो न विकूटयेद् न प्रतिहन्यात् । विरहे च तद्विषयं कारणं पृच्छेदिति। नृपपृष्टेन गुरुणा भणितो गङ्गा केन मुखेन वहति ? । ततो यथा सर्वमपि गुरुभणितं शिष्यः संपादितवान्, तथा सर्वत्र सर्वप्रयोजनेषु कार्यम्, इति तृतीयगाथाऽक्षरार्थः ।

भावार्थस्तु कथानकेनोच्यते-कन्यकुब्जे पुरे केनचिद् राज्ञा सूरिणा सह गोष्ठीप्रबन्धे प्रोक्तम्-

Jain Education International For Private & Personal Use Only www.jainelibrary.org

राजपुत्रा विनीताः । सूरिणा तूक्तम्-साधवः । ततो विवादे सूरिणाऽभ्यधायि-युष्मदीयः सर्वोत्कृष्टविनयगुणो राजपुत्रः परीक्ष्यते, अस्मदीयस्त्वविनीतो भवतां यः प्रतिभाति स एव साधुः परीक्ष्यते । ततोऽभ्युपेतं राज्ञा। समादिष्टश्चातीवविनीततया प्रसिद्धो राजपुत्रः-कुतोमुखी गङ्गा वहति ? इति शोधय । तेनोक्तम्- किमिह शोधनीयम् ?, बालानामपि प्रतीतमेवेदम्-पूर्वाभिमुखी गङ्गा प्रवहति इति । राज्ञा प्रोक्तम्-किमित्यत्रापि वितण्डावादं करोषि ?, गत्वा निरीक्षस्व तावत् । ततो ह्यसूयावान् बहिः संवृतिं कृत्वा महता कष्टेन ततः प्रदेशाद् निर्गतः। सिंहद्वारे च निर्गच्छन् पृष्टः केनापि मित्रेण-भद्र ! क्व गन्तव्यम् ? । तेनासूयया प्रोक्तम्-अरण्ये रोझानां लवणदानार्थम् । ततो मित्रेणोक्तम्-कोऽयं व्यतिकरः ? । राजपुत्रेण सर्वमपि राजादिष्टं निवेदितम् । मित्रेणोक्तम्-यदि राज्ञो ग्रहः संलग्नः, तत् किं तवापि ?, गत्वा निवेदय-निरीक्षिता मया गङ्गा, पूर्वाभिमुखी वहतीति । तथैवानुष्ठितं राजपुत्रेण । प्रच्छन्नहेरिकेण च निवेदितं राज्ञस्तच्चेष्टितम् । ततो विलक्षेण राज्ञा प्रोक्तम्-भव्यम्, साधुरपि परीक्ष्यतां तावत् । ततो यः कश्चिदविनीतो राज्ञा लक्षितस्तद्विषये परीक्षार्थं प्रतिपादितेन गुरुणा भणितः शिष्यः-गत्वा निरीक्षस्व, केन मुखेन गङ्गा वहति ? इति । ततः पूर्वाभिमुखी साऽत्र वहति, इति गुरवोऽपि विदन्त्येव, परं कारणेन केनाप्यत्र भवितव्यम् इति चेतसि निश्चित्य प्रोक्तं तेन-इच्छाम्यादेशम् इति । अभिधाय च निर्गतः । ततो गतश्च गङ्गायाम्, निरीक्षिता चासौ स्वयम्, पृष्ट्वा च परेभ्यः, शुष्कतृणादिवहनेन चान्वय-व्यतिरेकाभ्यां तस्याः पूर्वाभिमुखवाहित्वं निश्चित्य निवेदितमागत्य गुरुभ्यः-इत्थमित्थं च निश्चिता मया पूर्वाभिमुखी वहति गङ्गा, तत्त्वं तु गुरवो विदन्ति । प्रच्छन्नहेरिकेण चास्यापि संबन्धिनी चेष्टा सर्वापि राज्ञे निवेदिता । ततश्चाभ्युपगतं सहर्षेण राज्ञा गुरुवचनमिति ॥९३१-९३४॥'' —**विशेषाव० मलधारि०** ॥

**[ हा० ९३-९५]** १. 'प्राग् वहतेष्ठक् ४।४।१, प्रकृष्टे ठञ् ५।१।१०८।, प्रयोजनम् ५।१।१०९।, ठस्येकः ७।३।५०।' इति **पाणिनीयव्याकरणे** ॥ २. °**च्यते वानौप**° ह० ॥

**[ हा० ९६-९७]** १. दिगम्बरपरंपरासम्मते सूत्रपाठेऽयं पाठः । सम्प्रति प्रसिद्धे श्वेताम्बराम्नाये तु ''नैगम-संग्रह-व्यवहारर्जुसूत्रशब्दा नयाः । आद्यशब्दौ द्वित्रिभेदौ''[ १।३४-३५] इति सूत्रपाठः ।

**[ हा० ९८ ] १. भंगः स्तेना**° जे१ । **भंगस्तेना**° जे२ पा० ॥

**[ हा० ९९ ] १. पूर्वस्य इति पश्चा**° ह० ॥

**[ हा० १०६ ] १. इत्था**° ह० । तुलना - ''मंगलसुयउवउत्तो आगमओ भावमंगलं होइ ।
नोआगमओ भावो सुविसुद्धो खाइयाईओ ॥४९॥

मङ्गलं च तच्छ्रुतं च मङ्गलशदार्थज्ञानमित्यर्थः, तस्मिन्नुपयुक्तो वक्ता इति गम्यते, आगमतो भावमङ्गलं भवति । अत्राह - ननु मङ्गलपदार्थज्ञानोपयोगमात्रेण कथं सर्वोऽपि वक्ता भावमङ्गलमुच्यते, तदुपयोगमात्रस्यैव तद्रूपताया युक्त्यसंगतत्वात् । न ह्यग्निज्ञानोपयुक्तो माणवकोऽग्निरेव भवितुमर्हति, दाह-पाकादिक्रियाकरणप्रसङ्गादिति । अत्रोच्यते-उपयोगः, ज्ञानम्, संवेदनम्, प्रत्यय इति तावदनर्थान्तरम्, **अर्थाभिधानप्रत्ययाश्च लोके सर्वत्र तुल्यनामधेयाः**, बाह्यः पृथुबुध्नोदराऽऽकारोऽर्थोऽपि घट उच्यते, तद्वाचकमभिधानमपि घटोऽभिधीयते, तज्ज्ञानरूपः प्रत्ययोऽपि घटो व्यपदिश्यत इत्यर्थः, तथा हि लोके वक्तारो भवन्ति - किमिदं पुरतो दृश्यते ? घटः, किमसौ वक्ति ? घटम्, किमस्य चेतसि स्फुरति ? घटः । इति

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**विशेषावश्यकभाष्यस्य** मलधारिहेमचन्द्रसूरिविरचितायां वृत्तौ ॥

[ हा० ११२ ] १. **पच्छा** ह० ॥ २. °**भागो**° जेमू० १, °**भागे** जेसं० १ जे२ पा० ॥ ३. **दट्ठव्वा** ह० ॥

[ हा० ११३ ] १. **निर्वचनं निर्वचन**° ह० ॥

[ हा० ११४ ] १. **पंचदेसा** जेमू१, पामू० । **पंचदसा**° जेसं१, जे२, पासं० ॥

[ हा० ११५-११६ ] १. **सेत्तमित्यादि** ह० ॥

[ हा० १२३-१२४] १. **कंठेसु** जेमू१ । दृश्यतां [ चू० १५ टि० १]

[ हा० १३१-१३३] १. °**कारेण द्रव्या**° ह० ॥ २. **तत्र जीव**° ह० ॥ ३. °**भावावधा**° जेसं १, जे२, पा० ॥ ४. **तत्र सर्व**° ह० ॥ ५. °**विशिष्टा**° ह० ॥ ६. °**णामापेक्षा**° ह० ॥ ७. °**स्यादनियमेनाद**° जेमू१ । °**स्यादनियमेनद**° पामू० । °**स्यानियमेनद**° जेसं१ जे२ पासं० ॥

[ हा० १३४] १. **एवमेवोर्द्ध(द्व जेसं १)मनियतया विक्यत** ह० ॥

२. ''पुव्वाणुपुव्विहेट्ठा समयाभेएण कुण जहाजेट्ठं । उवरिमतुल्लं पुरओ, नसेज्ज पुव्वक्कमो सेसे ॥९४३॥ [विशेषाव०भा० ९४३]

इह विवक्षितपदानां क्रमेण स्थापना पूर्वानुपूर्वीत्युच्यते, तस्या हेट्ठ त्ति अधस्ताद् द्वितीयादिभङ्गकान् जिज्ञासुः कुण त्ति स्थापय, एकादिपदानि इति शेषः । कथम्, इत्याह-ज्येष्ठस्यानतिक्रमेण यथाज्येष्ठम्, यो यस्यादौ स तस्य ज्येष्ठो यथा-द्विकस्यैकको ज्येष्ठः, त्रिकस्य त्वयमनुज्येष्ठः, चतुष्कादीनां त्वेषोऽपि ज्येष्ठानुज्येष्ठः, एवं त्रिकस्य द्विको ज्येष्ठः, स एव चतुष्कस्यानुज्येष्ठः, पञ्चकादीनां तु स एव ज्येष्ठानुज्येष्ठ इत्यादि । एवं च सत्युपरितनाङ्कस्याधस्ताज्ज्येष्ठो निक्षिप्यते, तत्रालभ्यमानेऽनुज्येष्ठः, तत्राप्यलभ्यमाने ज्येष्ठानुज्येष्ठः, इति यथाज्येष्ठं निक्षेपं कुरु । किमनियमेन ?, न, इत्याह- समयाभेदेनेति, समयः संकेतः प्रस्तुतभङ्गकरचनव्यवस्था, तस्या अभेदोऽनतिक्रमस्तेन समयाभेदेन निक्षेपं कुरु । समयस्य च भेदस्तदा भवति, यदा तस्मिन्नेव भङ्गके निक्षिप्ताङ्कसदृशोऽपरोऽङ्कः पतति । तत एवंभूतं समयभेदं वर्जयन्नेव ज्येष्ठाद्यङ्कनिक्षेपं विदध्यात्, उक्तं च- 'जहियम्मि उ निक्खित्ते पुणरवि सो चेव होइ कायव्वो । सो होइ समयभेओ वज्जेयव्वो पयत्तेण ॥१॥'[ ]

निक्षिप्तस्य चाङ्कस्य यथासंभवं पुरओ त्ति अग्रत उपरितनाङ्कैस्तुल्यं सदृशं यथा भवति, एवं न्यस्येत्- उपरितनाङ्कसदृशानेवाङ्कान् पुरतः स्थापयेदित्यर्थः । पुव्वक्कमो सेसे त्ति निक्षिप्ताङ्कस्य यथासंभवं पृष्ठतः शेष उद्धरितशेषाङ्कानामधस्तात् तानेवोद्धरितशेषानङ्कान् पूर्वक्रमेण स्थापयेदित्यर्थः । यः संख्यया लघुरेककादिः स प्रथमं स्थाप्यते, यस्तु तया महान् स पश्चात् स्थाप्यत इति पूर्वक्रमः, पूर्वानुपूर्वीलक्षणे प्रथमभङ्गके इत्थमेव दृष्टत्वादिति भावः । इति गाथाक्षरार्थः ॥'' - **विशेषाव० मलधारि०** ॥

[ हा० १३९-१५१] १. °**न्यसिद्धिरभावे** जेसं १ विना । दृश्यतां चूर्णौ पृ०१९५ पं०११

[ हा० १५२] १. दृश्यतां **प्रज्ञापनासूत्रे** सू० ५-५०९॥ २. °**तीत्यादि** ह० ॥

[ हा० १५६] १. दृश्यतां [सू० ११२] २. °**शाभिधेय**° ॥ ३. (°मापत्तेः ?)

**[ हा० १६४-१६७ ]** १. "घम्मा वंसा सेला, अंजण रिट्ठा मघा य माघवई ।
पुढवीणं नामाइं, रयणाइं हुंति गोत्ताइं ॥२३९॥

व्याख्या - इह यन्निरन्वयमभिधानं तन्नामेत्यभिधीयते, यत् पुनः सान्वयं तद् गोत्रं । तत्र सप्तानामपि पृथिवीनां यथासङ्ख्यममूनि नामानि, तद्यथा - प्रथमा पृथिवी घर्मा १, द्वितीया वंशा २, तृतीया शैला ३, चतुर्थ्यञ्जना ४, पञ्चमी रिष्टा ५, षष्ठी मघा ६, सप्तमी माघवती ७ इति । रत्नादीनि पदैकदेशे पदसमुदायोपचाराद् रत्नप्रभादीनि नामानि, गोत्राण्यन्वर्थयुक्तानि, तद्यथा - रत्नानि वज्रादीनि, प्रभाशब्दोऽत्र सर्वत्रापि रूपवाची, रत्नानि प्रभा रूपं स्वभावो यस्याः सा रत्नप्रभा रत्नस्वभावा रत्नमयी रत्नबहुलेत्यर्थः । एवं शर्कराप्रभादीन्यपि नामानि वाच्यानि ॥" इति **श्रीजिनभद्रगणिक्षमाश्रमणविरचितसंग्रहण्या मलयगिरिसूरिविरचितायां वृत्तौ ।**

**[ हा० १६८-१७१ ]** १. **लवणसमुद्दे** ह० ॥ २. **पुक्खरवरदीवे** ह० ॥

३. "उद्धारसागराणं अड्ढाइज्जाण जत्तिआ समया । दुगुणा दुगुणपवित्थरदीवोदहि हुंति एवइया ॥८०॥

व्याख्या- अर्धं तृतीयं येषां तान्यर्धतृतीयानि, द्वे अर्धे चेत्यर्थः, तेषामुद्धारसागरोपमाणां प्राङ्-निर्दिष्टस्वरूपाणां यावन्तः समया एतावत्प्रमाणा द्वीपोदधयः । कथंभूता इत्याह- द्विगुणद्विगुणप्रविस्तराः पूर्वस्मात् पूर्वस्मात् द्विगुणो द्विगुणश्च विस्तरो येषां ते तथा । तथा [हि]- जम्बूद्वीपविस्तारो योजनलक्षम्, इह योजनं प्रमाणाङ्गुलेन वेदितव्यम्, नग-पुढवि-विमाणाइं मिणसु पमाणंगुलेण त्ति वचनप्रामाण्यात् । ततो द्वे लक्षे विष्कम्भो लवणसमुद्रस्य, चत्वारि लक्षाणि धातकीखण्डस्य, अष्टौ कालोदसमुद्रस्य, षोडश पुष्करवरद्वीपस्य, द्वात्रिंशत् पुष्करवरोदसमुद्रस्य । एवं पूर्वस्मात् पूर्वस्मात् द्विगुणद्विगुणविष्कम्भा द्वीपसमुद्रास्तावदवगन्तव्या यावदसङ्ख्येययोजनकोटीकोटीप्रमाणात् स्वयम्भूरमणात् द्वीपात् स्वयम्भूरमणः समुद्रो द्विगुणविष्कम्भ इति ॥८०॥" इति **जिनभद्रगणि**क्षमाश्रमणविरचितायाः **संग्रहण्या मलयगिरि**सूरिविरचितायां वृत्तौ पृ० ३६ A ॥

**[ हा० १८०-१९१]** १. 'लोगस्स **संखेज्जतिभागे**' इति पाठोऽत्र शोभनो भाति ॥

**[ हा० २०१-२०२]** १. **परिसूत्रं** ह० ॥ २. **चुलसीतीए सतसहस्सा गुणिता सव्वट्ठाणे** ह० ॥ ३. **अत्थिणि**° ह० ॥

**[ हा० २०५]** १. समचउरंसे निग्गोहमंडले साइ वामणे खुज्जे ।
हुंडे वि य संठाणा, जीवाणं छ मुणेयव्वा ॥१७५॥

व्याख्या - जीवानां षट् संस्थानानि भवन्ति, तद्यथा-समचतुरस्रम्, न्यग्रोधमण्डलम्, सादि, वामनम्, कुब्जम्, हुण्डमिति । तत्र समाः सामुद्रिकशास्त्रोक्तप्रमाणलक्षणाविसंवादिन्यश्चतस्रोऽस्रयश्चतुर्दिग्विभागोप-लक्षिताः शरीरावयवा यत्र तत् समचतुरस्रं संस्थानम्, समासान्तोऽत्प्रत्ययः । न्यग्रोधवत् परिमण्डलं यस्य तत् न्यग्रोधपरिमण्डलम्, यथा न्यग्रोध उपरि सम्पूर्णप्रमाणोऽधस्तु हीनस्तथा यत् संस्थानं नाभेरुपरि सम्पूर्णप्रमाणमधस्तु न तथा तन्न्यग्रोधपरिमण्डलमित्यर्थः । तथाऽऽदिरिहोत्सेधाख्यो नाभेरधस्तनो देह-भागो गृह्यते, ततः सहादिना नाभेरधस्तनभागेन यथोक्तप्रमाणलक्षणेन वर्तत इति सादि । यद्यपि च सर्वमपि शरीरमादिना सह वर्तते, तथापि सादित्वविशेषणान्यथानुपपत्त्या विशिष्ट एव प्रमाणलक्षणोपपन्न आदिरिह लभ्यते, तत उक्तं यथोक्तप्रमाणलक्षणेनेति। इदमुक्तं भवति- यत् संस्थानं नाभेरधः प्रमाणोपपन्नमुपरि च हीनं तत् सादीति । तथा यत्र शिरोग्रीवं हस्तपादादिकं

Jain Education International For Private & Personal Use Only www.jainelibrary.org

च यथोक्तप्रमाणलक्षणोपेतमुर-उदरादि च मडभं तद्वामनं संस्थानम् । यत्र पुनरुर-उदरादि प्रमाणलक्षणोपेतं हस्तपादादिकं च हीनं तत् कुब्जं संस्थानम् । यत्र तु सर्वेऽप्यवयवाः प्रमाणलक्षणपरिभ्रष्टास्तत् हुण्डं संस्थानम् ॥१७५॥

तुल्लं वित्थडबहुलं, उस्सेहबहुं च मडहकोट्ठं च । हेट्ठिल्लकायमडहं सव्वत्थासंठियं हुंडं ॥१७६॥

व्याख्या - समचतुरस्रं संस्थानं तुल्यं सर्वासु दिक्षु शास्त्रोक्तेन प्रकारेण समप्रमाणम् । न्यग्रोधमण्डलं नाभेरुपरि विस्तृतबहुलं विस्तारबहुलम् । सादिसंस्थानमुत्सेधबहु उत्सेधबहुलं प्रमाणोपपन्नोत्सेधमित्यर्थः । वामनं मडभकोष्ठम्, मडभो न्यूनाधिकप्रमाणः कोष्ठो यत्र तन्मडभकोष्ठं परिपूर्णप्रमाणपाणिपादशिरोग्रीवावयवं न्यूनाधिकप्रमाणकोष्ठं वामनमित्यर्थः । कुब्जमधस्तनकायमडभमधस्तनाः पाणिपादशिरोग्रीवादिरूपा अवयवा मडभा यस्य तत्तथा, यत् प्रमाणहीनहस्तपादशिरोग्रीवाद्यवयवं परिपूर्णप्रमाणकोष्ठं तत् कुब्ज-मित्यर्थः । अन्ये तु वामनकुब्जयोर्व्यत्यासेन लक्षणं प्रतिपेदिरे, अधस्तनकायमडभं वामनं मडभकोष्ठं कुब्जमिति । तथा सर्वत्र सर्वेषु शरीरावयवेष्वसंस्थितम्, न शास्त्रोक्तेन प्रमाणेन संस्थितम्, तत् हुण्डं हुण्डसंस्थानमिति ॥'' इति **श्रीजिनभद्रगणिक्षमाश्रमणविरचितायाः संग्रहण्या मलयगिरिसूरिविरचितायां वृत्तौ ॥**

**[ हा० २०६] १.** ''अन्यतो ङीष्'' पा०४।१।४०॥ २. **°पारं चे°** ह०॥ **३. अन्या क्रियेति** ह०॥

४. आपुच्छणा उ कज्जे पुव्वनिसिद्धेण होइ पडिपुच्छा । पुव्वगहिएण छंदण निमंतणा होअगहिएणं।

[आव.नि.६९७]

आप्रच्छनमापृच्छा, सा च कर्त्तुमभीष्टे कार्ये प्रवर्त्तमानेन गुरोः कार्या-अहमिदं करोमीति । द्वारं ६। तथा पूर्वनिषिद्धेन सता भवतेदं न कार्यमिति, उत्पन्ने च प्रयोजने कर्त्तुकामेन होति पडिपुच्छत्ति प्रतिपृच्छा कर्त्तव्या भवति, पाठान्तरं वा-पुव्वनिउत्तेण होइ पडिपुच्छा, पूर्वनियुक्तेन सता यथा भवतेदं कार्यमिति तत्कर्तुकामेन गुरोः प्रतिपृच्छा कर्त्तव्या भवति- अहं तत्करोमीति, तत्र हि कदाचिदसौ कार्यान्तरमादिशति समाप्तं वा तेन प्रयोजनमिति । द्वारम् ७ । तथा पूर्वगृहीतेनाशनादिना छन्दना शेषसाधुभ्यः कर्त्तव्या-इदं मयाऽशनाद्यानीतं यदि कस्यचिदुपयुज्यते ततोऽसाविच्छाकारेण ग्रहणं करोत्विति । द्वारम् ८ । तथा निमन्त्रणा भवत्यगृहीतेनाशनादिना अहं भवतोऽशनाद्यानयामीति गाथार्थः द्वारम् ९ । इदानीमुपसम्पद्द्वारावयवार्थः प्रतिपाद्यते- सा चोपसम्पद् द्विधा भवति- गृहस्थोपसम्पत् साधूपसम्पच्च । —**आ०हारि०** पृ० २६७ ॥

**[ हा० २०८-२०९] १.** जं वत्थुणोऽभिहाणं पज्जयभेदाणुसारि तं नाम ।

पइभेयं जं नमए पइभेयं जाइ जं भणियं ॥९४४॥ [विशेषाव०भा० ९४४]

**यज्जीवादिवस्तुनोऽभिधानं तद् नामेति संबन्धः । कथंभूतम् ?,** इत्याह-पर्याया ज्ञान-दर्शन-चारित्र-रूप-रस-गन्ध-स्पर्श-नव-पुराणादयस्तेषां भेदा नानाविधस्वभावास्तांस्तद्वाचकत्वेनाऽनुसरतीति पर्यायभेदानुसारि नामेति । किमुक्तं भवति ? इत्याशङ्क्य तात्पर्यमाह- पइभेयमित्यादि, णम प्रह्वत्वे [पा० धा० ९८१] प्रतिपर्यायभेदं यद् नमति याति तत्तद्वाचकत्वेन परिणमति प्रह्वीभवति तद् नामेति यद् भणितं भवति, इत्येतत् तात्पर्यमित्यर्थ इति ॥९४४॥'' - **विशेषाव० मलधारि० ॥**

**[ हा० २१७-२२६] १.** तुलना- तत्त्वार्थसिद्धसेनीया वृत्तिः ५।२३॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

[ हा० २३३-२५९] १. तथान्यत् ह० ॥

२.''दिसिदाह छिन्नमूलो उक्क सरेहा पगासजुत्ता वा। संझाछेयावरणो उ जूवओ सुक्कि दिण तिन्नि।

[आवश्यकनि० गा० १३३५]

अन्यतमदिगन्तरविभागे महानगरप्रदीपमिवोद्द्योत: किन्तूपरि प्रकाशोऽधस्तादन्धकार: ईदृक् छिन्नमूलो दिग्दाह:, उक्कालक्खणं-सदेहवण्णं रेहं करेंती जा पडइ सा उक्का, रेहविरहिया वा उज्जोयं करेंती पडइ सावि उक्का। जूवगो त्ति संझप्पहा चंदप्पहा य जेणं जुगवं भवंति तेण जूवगो, सा य संझप्पहा चंदप्पभावरिया णिप्फिडंती न नज्जइ सुक्कपक्खपडिवगादिसु दिणेसु, संझाछेयए अणज्जमाणे कालवेलं न मुणंति, तओ तिन्नि दिणे पाउसियं कालं न गेण्हंति-तिसु दिणेसु पाउसियसुत्तपोरिसिं न करेंति त्ति गाथार्थ: ॥१३३५॥'' - **आव०हारि०** पृ० ७३५ ॥ ३. (°प्रदर्शनसूत्रम् ?) ॥ ४. **तेन बाधि**° ह० ॥

५. 'गतिचतुष्केऽपि [तथा औदयिक-क्षायोपशमिक-क्षायिक-पारिणामिकनिष्पन्न: सान्निपातिक एकैको गतिचतुष्केऽपि], तद्यथा - उदए त्ति णेरइए, खओवसमियाइं इंदियाइं, खइयं समत्तं, पारिणामिए जीवे, ईदृशोऽपि पाठोऽत्र संभवेत् । ६. अत्रेदं ध्येयम् - पं२ मध्ये यादृशः पाठस्तादृश एव चतुर्विंशतिस्तवस्य प्रारम्भे आवश्यकबृहद्वृत्तौ आ.श्रीहरिभद्रसूरिभिः [पृ०४९५ पं०२६] 'तदभावे उवसमेणं पि इति पाठः उद्धृतः। आचार्यश्री **मलयगिरिसूरिभिस्तु** 'तदभावे उवसमेणं च' इति पाठः पञ्चसंग्रह[गा०४]वृत्तौ उद्धृतः ॥

७. ''ऊसरदेसं दड्ढिल्लयं व विज्झाइ वणदवो पप्प। इय मिच्छस्स अणुदए उवसमसम्मं मुणेयव्वं ॥१॥

[विशेषाव०भा० गा० २७३४ कल्पभा० गा० १२२ ]

यथोषरदेशं पूर्वबनदवदग्धप्रदेशं वा प्राप्य वनदवो विध्यायति, इत्येवमन्तरकरणं प्राप्य मिथ्यात्वस्यानुदये मिथ्यात्वोदयवह्नावुपशान्त औपशमिकं सम्यक्त्वं जीवस्य मुणितव्यमिति ॥२७३४॥'' - **विशेषाव० मलधारि०**॥

८. उवसामगसेढिगयस्स होइ उवसामगं तु सम्मत्तं । जो वा अकयतिपुंजी अखवियमिच्छो लहइ सम्मं ॥२७३५॥ [कल्पभा० गा० ११८, विशेषाव० भा० गा० ५२९, २७३५ ]

उपशमकश्रेणिगतस्य भवति सम्यक्त्वमौपशमिकम्, यो वा अकृतत्रिपुञ्ज: अपूर्वकरणे पुञ्जत्रयाकरणत:, तत्र क्षपकोऽपि दर्शनसप्तकस्यापूर्वकरणमारूढ: पुञ्जत्रयं न करोति। ततस्तद्व्यवच्छेदार्थमाह - अक्षपितमिथ्यात्वो यल्लभते सम्यक्त्वं तदौपशमिकं सम्यक्त्वमिति'' **कल्पभाष्यस्य मलयगिरि**सूरिविरचितायां वृत्तौ ॥ ९. °**वात** ए ह० ॥

[ **हा० २६०**] १.**आश्रिता** ह० ॥२. तुलना-''क्रमात्स्वराणां सप्तानामारोहश्चावरोहणम् ।

मूर्च्छनेत्युच्यते ग्रामद्वये ता: सप्त सप्त च ॥९॥

षड्जे तूत्तरमन्द्रा ऽऽदौ रजनी चोत्तरायता । शुद्धषड्जा मत्सरीकृदश्वक्रान्ता ऽभिरुद्गता ॥१०॥

मध्यमे स्यात्तु सौवीरी हारिणाश्वा तत: परम् । स्यात्कलोपनता शुद्धमध्या मार्गी च पौरवी ॥११॥

हृष्यकेत्यथ तासां तु लक्षणं प्रतिपाद्यते । मध्यस्थानस्थषड्जेन मूर्च्छना ऽऽरभ्यते ऽग्रिमा ॥१२॥

अधस्तनैर्निषादाद्यै: षडन्या मूर्च्छना: क्रमात् । मध्यमध्यममारभ्य सौवीरी मूर्च्छना भवेत् ॥१३॥

षडन्यास्तदधोऽध:स्थस्वरानारभ्य तु क्रमात् । षड्जस्थानस्थितैर्न्याद्यै रजन्याद्या: परे विदु: ॥१४॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

हारिणाश्वादिका गाद्यैर्मध्यमस्थानसंस्थितैः । षड्जादीन्मध्यमादींश्च तदूर्ध्वं सारयेत्क्रमात् ॥१५॥
चतुर्धा ताः पृथक्शुद्धाः काकलीकलितास्तथा । सान्तरास्तद्द्वयोपेताः षट्पञ्चाशदितीरिताः ॥१६॥
श्रुतिद्वयं चेत्षड्जस्य निषादः संश्रयेत्तदा । स काकली मध्यमस्य गांधारस्त्वन्तरः स्वरः ॥१७॥
यस्यां यावतिथौ षड्जमध्यमौ ग्रामयोः क्रमात् । मूर्च्छना तावतिथ्येव सा निःशङ्केन कीर्तिता ॥१८॥
प्रथमादिस्वरारम्भादेकैका सप्तधा भवेत् । तासूच्चार्यान्त्यस्वरांस्तान्पूर्वानुच्चारयेत्क्रमात् ॥१९॥
ते क्रमास्तेषु संख्या स्याद् द्वानवत्या शतत्रयम् । यक्षरक्षोनारदाब्जभवनागाश्विपाशिनः ॥२०॥
षड्जग्रामे मूर्च्छनानामेताः स्युर्देवताः क्रमात् । ब्रह्मेन्द्रवायुगन्धर्वसिद्धद्रुहिणभानवः ॥२१॥
स्युरिमा मध्यमग्राममूर्च्छनादेवताः क्रमात् । तासामन्यानि नामानि नारदो मुनिरब्रवीत् ॥२२॥
मूर्च्छनोत्तरवर्णा ऽऽद्या षड्जग्रामे ऽभिरुद्गता । अश्वक्रान्ता च सौवीरी हृष्यका चोत्तरायता ॥२३॥
रजनीति समाख्याता ऋषीणां सप्त मूर्च्छनाः । आप्यायनी विश्वकृता चन्द्रा हेमा कपर्दिनी ॥२४॥
मैत्री चान्द्रमसी पित्र्या मध्यमे मूर्च्छना इमाः । नन्दा विशाला सुमुखी चित्रा चित्रवती सुखा ॥२५॥
आलापा चेति गांधारग्रामे स्युः सप्त मूर्च्छनाः । ताश्च स्वर्गे प्रयोक्तव्या विशेषात्तेन नोदिताः ॥२६॥''
इति शार्ङ्गदेवेन विरचिते **संगीतरत्नाकरे** प्रथमेऽध्याये चतुर्थे ग्राम-मूर्छना-क्रम-तानप्रकरणे ॥
३. °**तंता** ह० ॥

**[ हा० २६१]** १. (°त्यादीति ?) ॥ २. **हे उन्नति**° ह० ॥

**[ हा० २६२]** १. **हवंतेण** ह० ॥ २. **एव** ह० ॥ ३. **दुर्दर्शनं** ह० ॥ ४. (समुत्पन्न ?) ॥ ५. (°सूत्रदोषास्तेषां विधेः ?) ॥

**[ हा० २६३-३१२]** १. **धर्ममंगल**° ह० ॥ २. °**पेक्षितत्वात्** ह० ॥ ३. **पात्रसमासादिप्रक्षेपाद्वा** ह० । ''**पात्रे समितादयश्च**'' पा०२।१।४८॥ ४. **अनुसुग्रामादम् ग्रामस्य** ह० । **अनुसुग्रामम् ग्रामस्य** जेमू० १ ॥ ५. **अनुर्यत्समया** ।२।१।१५॥ यं पदार्थं समया द्योत्यते तेन लक्षणभूतेनानुः समस्यते सोऽव्ययीभावः अनुवनमशनिर्गतः । वनस्य समीपं गत इत्यर्थः ।'' - पा० **सिद्धान्तकौमुदी** ॥ ६. ''**सरूपाणामेकशेष एकविभक्तौ** १।२।६४॥ एकविभक्तौ यानि सरूपाण्येव दृष्टानि तेषामेक एव शिष्य ते । ... रामौ ।'' - पा० **सिद्धान्तकौमुदी** ॥ ७. पुरुषश्च पुरुषश्च पुरुषश्च पुरुषश्च पुरुषाः इत्यर्थः ॥ ८. **समर्थात्** ह० ॥ ९. **भविनां विद्यः** ह० ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

# चतुर्थं परिशिष्टम्

## मलधारिश्रीहेमचन्द्रसूरिविरचितवृत्तेः टिप्पनानि।

[ अस्मिन् परिशिष्टे सूत्राङ्कानुसारेण मलधारिश्रीहेमचन्द्रसूरिविरचितवृत्तेर्हस्तलिखितादर्शेषु यानि विशिष्टानि पाठान्तराणि दृश्यन्ते तानि उपन्यस्तानि। तथा उद्धृतपाठानां स्पष्टार्थावबोधार्थं तत्तत्पाठव्याख्या तुलनादिकं चोपन्यस्यते ]

[ हे० २ ] १. (इत्याद्युक्ति-प्रत्युक्ती द्वितीयं ?)। तुलना-पृ० १४ पं० २५ ॥

[ हे० ३-५ ] १. दृश्यतां [ हा० ३-५ टि० १ ] ॥

२. ''अणुओगो य नियोगो भास विभासा य वत्तियं चेव। अणुओगस्स उ एए नामा एगट्ठिया पंच ॥१३१॥ [आवश्यकनि० १३१]

सूत्रस्यार्थेन अनुयोजनमनुयोगः, अथवा अभिधेयो व्यापारः सूत्रस्य योगः, अनुकूलोऽनुरूपो वा योगोऽनुयोगः, यथा घटशब्देन घटोऽभिधीयते, तथा नियतो निश्चितो वा योगो नियोगः, यथा घटशब्देन घट एवोच्यते न पटादिरिति, तथा भाषणात् भाषा, व्यक्तीकरणमित्यर्थः, यथा घटनात् घटः, चेष्टावानर्थो घट इति, विविधा भाषा विभाषा, पर्यायशब्दैः तत्स्वरूपकथनम्, यथा घटः कुटः कुम्भ इति, वार्तिकं त्वशेषपर्यायकथनमिति। शेषं सुबोधम्, अयं गाथासमुदायार्थः, अवयवार्थं तु प्रतिद्वारं वक्ष्यति, तत्र प्रवचनादीनामविशेषेणैकार्थिकाभिधानप्रक्रमे सति एकार्थिकानुयोगादेर्भेदेनोपन्यासान्वाख्यानं अर्थगरीयस्त्वख्यापनार्थम्, उक्तं च- सुत्तधरा अत्थधरो इत्यादि ॥१३१॥'' - **आवश्यकहारि०** ॥

३. ''सुत्तत्थो खलु पढमो, बीओ निज्जुत्तिमीसओ भणिओ। तइओ य निरवसेसो एस विही भणिअ अणुओगे ॥२४॥ **[आवश्यकनि० २४]**

सूत्रस्यार्थः सूत्रार्थः एव केवलः प्रतिपाद्यते यस्मिन्ननुयोगे असौ सूत्रार्थ इत्युच्यते, सूत्रार्थमात्र-प्रतिपादनप्रधानो वा सूत्रार्थः, खलुशब्दस्त्वेवकारार्थः, स चावधारणे, एतदुक्तं भवति- गुरुणा सूत्रार्थमात्राभिधानलक्षण एव प्रथमोऽनुयोगः कार्यः, मा भूत् प्राथमिकविनेयानां मतिसंमोहः, द्वितीयः अनुयोगः सूत्रस्पर्शिकनिर्युक्तिमिश्रकः कार्य इत्येवंभूतो भणितो जिनैश्चतुर्दशपूर्वधरैश्च, तृतीयश्च निरवशेषः प्रसक्तानुप्रसक्तमप्युच्यते यस्मिन् स एवंलक्षणो निरवशेषः, कार्य इति, स एष उक्तलक्षणो विधानं विधिः प्रकार इत्यर्थः, भणितः प्रतिपादितः जिनादिभिः, क ? सूत्रस्य निजेन अभिधेयेन सार्धम्, अनुकूलो योगः अनुयोगः, सूत्रव्याख्याख्यानमित्यर्थः, तस्मिन्ननुयोगे-ऽनुयोगविषय इति, अयं गाथार्थः ॥२४॥'' - **आवश्यकहारि०** ॥

४.''देस-कुल-जाइ-रूवी, संघइणी धिईजुओ अणासंसी। अविकंथणो अमाई, थिरपरिवाडी गहियवक्को ॥२४१॥
जियपरिसो जियनिद्दो, मज्झत्थो देस-काल-भावन्नू। आसन्नलद्धपइभो नाणाविहदेसभासन्नू ॥२४२॥
पंचविहे आयारे, जुत्तो सुत्तऽत्थतदुभयविहिन्नू। आहरण-हेउ-उवणय-नयनिउणो गाहणाकुसलो ॥२४३॥
ससमय-परसमयविऊ, गंभीरो दित्तिमं सिवो सोमो। गुणसयकलिओ जुत्तो, पवयणसारं परिकहेउं ॥२४४॥
**[कल्पभा० २४१-२४४]**

युतशब्दः प्रत्येकमभिसम्बध्यते-देशयुतः कुलयुत इत्यादि। तत्र यो मध्यदेशे जातो यो वाऽर्द्धषड्विंशतिषु

Jain Education International   For Private & Personal Use Only   www.jainelibrary.org

जनपदेषु स देशयुतः, स ह्यार्यदेशभणितिं जानाति, ततः सुखेन तस्य समीपे शिष्या अधीयत इति तदुपादानम्। कुलं पैतृकम्, तथा च लोके व्यवहारः- इक्ष्वाकु-कुलजोऽयम्, नागकुलजोऽयमित्यादिः, तेन युतः प्रतिपन्नार्थनिर्वाहको भवति। जातिर्मातृकी, तया युतो विनयादिगुणवान् भवति। रूपयुतो लोकानां गुणविषयबहुमानभाग् जायते, यत्राकृतिस्तत्र गुणा वसन्ति इति प्रवादात्। संहननयुतो व्याख्यायां न श्राम्यति। धृतियुतो नातिगहनेष्वर्थेषु भ्रममुपयाति। अनाशंसी श्रोतृभ्यो वस्त्राद्यनाकाङ्क्षी। अविकत्थनः नातिबहुभाषी। [ अमायी न शाठ्येन शिष्यान् वाहयति।] स्थिरा अतिशयेन निरन्तराभ्यासतः स्थैर्यमापन्ना अनुयोगपरिपाट्यो यस्य स स्थिरपरिपाटिः, तस्य हि सूत्रमर्थो वा न मनागपि गलति। गृहीतवाक्यः उपादेयवचनः, तस्य ह्यल्पमपि वचनं महार्थमिव प्रतिभाति ॥२४१॥ जितपरिषत् न महत्यामपि पर्षदि क्षोभमुपयाति। जितनिद्रः रात्रौ सूत्रमर्थं वा परिभावयन् न निद्रया बाध्यते। मध्यस्थः सर्वेषु शिष्येषु समचित्तः। देशं कालं भावं जानातीति देश-काल-भावज्ञः, स हि देशं कालं भावं च लोकानां ज्ञात्वा सुखेन विहरति, शिष्याणां चाभिप्रायान् ज्ञात्वा तान् सुखेनानुवर्त्तयति। आसन्नलब्धप्रतिभः, परवादिना समाक्षिप्तः शीघ्रमुत्तरदायी। नानाविधानां देशानां भाषा जानातीति नानाविधदेशभाषाज्ञः, स हि नानादेशीयान् शिष्यान् सुखेन शास्त्राणि ग्राहयति ॥२४२॥ पञ्चविध आचारः ज्ञानाचारादिरूपस्तस्मिन् युक्तः उद्युक्तः, स्वयमाचारेष्वस्थितस्यान्यानाचारेषु प्रवर्त्तयितुमशक्यत्वात्। सूत्रा-ऽर्थग्रहणेन चतुर्भङ्गी सूचिता- एकस्य सूत्रं नार्थः, द्वितीयस्यार्थो न सूत्रम्, तृतीयस्य सूत्रमप्यर्थोऽपि, चतुर्थस्य न सूत्रं नाप्यर्थः, तत्र तृतीयभङ्गग्रहणार्थं तदुभयग्रहणम्, सूत्रा-ऽर्थ-तदुभयविधीन् जानातीति सूत्रार्थतदुभयविधिज्ञः। आहरणं दृष्टान्तः, हेतुश्चतुर्विधो यापकादिः यथा **दशवैकालिकनिर्युक्तौ**, यदि वा द्विविधो हेतुः- कारको ज्ञापकश्च, तत्र कारको घटस्य कर्त्ता कुम्भकारः, ज्ञापको यथा-तमसि घटादीनामभिव्यञ्जकः प्रदीपः, उपनयः उपसंहारः, नयाः नैगमादयः, एतेषु निपुण आहरण-हेतूपनय-नयनिपुणः, स हि श्रोतारमपेक्ष्य तत्प्रतिपत्त्यनुरोधतः क्वचिद् दृष्टान्तोपन्यासं क्वचिद् हेतूपन्यासं करोति, उपसंहारनिपुणतया सम्यगधिकृतमर्थमुपसंहरति, नयनिपुणतया नयवक्तव्यतावसरे सम्यक्प्रपञ्चं वैविक्त्येन नयानभिधत्ते। ग्राहणाकुशलः प्रतिपादनशक्त्युपेतः ॥२४३॥ स्वसमयं परसमयं वेत्तीति स्वसमय-परसमयवित्, स च परेणाक्षिप्तः सुखेन स्वपक्षं परपक्षं च निर्वहति। गम्भीरः अतुच्छस्वभावः। दीप्तिमान् परवादिनामनुद्धर्षणीयः। शिवः अकोपनः, यदि वा यत्र तत्र वा विहरन् कल्याणकरः। सोमः शान्तदृष्टिः। गुणाः मूलगुणा उत्तरगुणाश्च तेषां शतानि तैः कलितो गुणशतकलितः। युक्तः समीचीनः प्रवचनस्य द्वादशाङ्गस्य सारम् अर्थं कथयितुम् ॥२४४॥'' इति **कल्पभाष्यस्य मलयगिरिसूरिविरचितायां वृत्तौ**॥

५. ''अलियमुवघायजणयं, अवत्थग निरत्थयं छलं दुहिलं। निस्सारमहियमूणं, पुणरुत्तं वाहयमजुत्तं ॥२७८॥
कमभिन्न वयणभिन्नं, विभत्तिभिन्नं च लिंगभिन्नं च। अणभिहियमपयमेव य, सभावहीणं ववहियं च ॥२७९॥
काल-जइ-च्छविदोसो, समयविरुद्धं च वयणमित्तं च। अत्थावत्तीदोसो, हवइ य असमासदोसो उ ॥२८०॥
उवमा-रूवगदोसो, परप्पवत्ती य संधिदोसो य। एए उ सुत्तदोसा, बत्तीसं हुंति नायव्वा ॥२८१॥
[कल्पभा० २७८-२८१]

अलीकं द्विविधम्- अभूतोद्भावनं भूतनिह्नवश्च। तत्राभूतोद्भावनं यथा-श्यामाकतन्दुलमात्रो जीव इत्यादि। भूतनिह्नवो यथा-नास्ति जीव इत्यादि १। उपघातजनकं यत् परस्योपघाते वर्त्तते, यथा- 'न मांसभक्षणे दोषः' [ मनुस्मृति अ० ५ श्लो० ५६ ] इत्यादि २। अपार्थकं यस्यावयवेष्वर्थो विद्यते न समुदाये,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

असम्बद्धमित्यर्थः, यथा-*शङ्खः कदल्यां कदली च भेर्याम्* ,अथवा -

वंजुलपुप्फुम्मीसा, उंबर-वडकुसुममालिया सुरभी । वरतुरगस्स विरायइ, ओलइया अग्गसिंगेसु ॥

निरर्थकं यस्यावयवेष्वर्थो न विद्यते, यथा-डित्थः डवित्थः वाजनः ४ । छलं यथा- अस्त्यात्मा, यद्यस्ति आत्मा तर्हि यद् यदस्ति स स आत्मा प्राप्नोति, नवकम्बलो देवदत्त इत्यादि वा ५ । द्रोहणशीलं दुहिलं यत् पुण्य-पापापलपनादि, यथा- *'एतावानेव लोकोऽयं, यावानिन्द्रियगोचरः ।'* इत्यादि ६ । निस्सारं यत्र सारः-अर्थो न विद्यते, यथा- अस्थि-चर्मशिलापृष्ठं वृद्धाः ७ । अधिकं यत् पञ्चानामवयवानामन्यतरेण समधिकम् ८ । ऊनम् एषामन्यतमेन हीनम् ९ । पुनरुक्तं त्रिविधम्- अर्थपुनरुक्तं वचनपुनरुक्तं उभयपुनरुक्तं च। तत्रार्थपुनरुक्तं यथा-इन्द्रः शक्रः पुरन्दर इति, वचनपुनरुक्तं यथा-सैन्धवमानय लवणं सैन्धवमानयेत्यादि, उभयपुनरुक्तं यथा-क्षीरं क्षीरम् १० । व्याहतं यत्र पूर्वमपरेण बाध्यते, यथा-

*कर्म चास्ति फलं चास्ति, भोक्ता नास्ति च निश्चयः* । अयुक्तं यद् बुद्ध्या विचिन्त्यमानं न युक्तिं सहते, यथा-

*तेषां कटतटभ्रष्टैर्गजानां मदबिन्दुभिः । प्रावर्त्तत नदी घोरा, हस्त्यश्वरथवाहिनी* ॥१२॥२७८॥

क्रमभिन्नं यथा-धरणीधरेन्द्र-चन्द्र-पद्म-सागरान् गम्भीर-नयन-मुख-बल-स्थैर्यगुणैर्जयति १३ । वचनभिन्नं यत्रैकवचनप्रसङ्गे द्विवचनं बहुवचनं वा क्रियते, द्विवचन-बहुवचनव्यत्यासो वा १४ । विभक्तिभिन्नं यत्र विभक्तेरन्यथा प्रयोगः १५ । लिङ्गभिन्नं यत्र स्त्रीलिङ्गे पुल्लिङ्गं नपुंसकलिङ्गं वा क्रियते, एवं शेषयोरपि द्रष्टव्यम् १६ । अनभिहितं नाम यत् स्वसमयेऽनुयुक्तमात्मन इच्छया भण्यते १७ । अपदं नाम यत्र गाथापदे गीतिकापदं वानवासिकापदं वा क्रियते १८ । स्वभावहीनं यस्य यो यत्रात्मीयः स्वभावस्तेन तत् शून्यमभिधीयते, यथा-स्थिरो वायुरिति १९ । व्यवहितं नाम यत्र किञ्चिद् निर्दिश्याऽन्यद् विस्तरेण वर्णयित्वा पुनस्तत् प्रकृत-मभिधीयते २० ॥२७९॥

कालदोषो यत्रातीता-ऽनागत-वर्त्तमानकालव्यत्यासकरणम् २१ । यतिः नाम विश्रामस्तस्य दोषो यतिदोषः, यत्र श्लोके गाथायां वृत्ते वा स्वलक्षणप्राप्तः पदच्छेदो न क्रियतेऽस्थाने वा क्रियते, यथा-

*जयति जईणं पवरो, गुणनिगरो नाणकिरणउज्जोओ । लोईसरो मुणिवरो, सिरिवच्छधरो महावीरो* ॥२२॥

छविदोषो नाम यत्र परुषा छविः क्रियते २३ । समयविरुद्धं यथा-वैशेषिको ब्रूते प्रधानं कारणम्, जैनो वदति नास्ति जीवः इत्यादि २४ । वचनमात्रं यथा-कश्चित्कीलकं निहत्य ब्रूयात्-इदं लोकमध्यमित्यादि २५ । अर्थापत्तिदोषो यथा-ब्राह्मणो न हन्तव्यः, अर्थादापन्नं शेषजनो हन्तव्य इति २६ । असमासदोषः यत्र समासे प्राप्ते समासरहितानि पदानि भण्यन्ते २७ ॥२८०॥

उपमादोषो यथा-काञ्जिकमिव ब्राह्मणस्य सुरा पेया २८ । रूपकदोषो यथा-पर्वतो रूप्यमान आत्मीयैरङ्गैः शून्यो वर्ण्यते २९ । परप्रवृत्तिदोषः यत्र सुबहुमप्यर्थं वर्णयित्वा निर्देशं न करोति ३० । पददोषः स्याद्यन्ते तिवाद्यन्तं तिवाद्यन्ते वा स्याद्यन्तं करोति ३१ । सन्धिदोषः यत्र भवन्नपि सन्धिर्न क्रियते विसर्गलोपं वा कृत्वा पुनः सन्धिं करोति ३२ । एते द्वात्रिंशत्सूत्रदोषा भवन्ति ज्ञातव्याः ॥२८१॥'' इति बृहत्कल्पस्य मलयगिरिसूरिविरचितायां वृत्तौ ।

''अलियमुवघायजणयं निरत्थयमवत्थयं छलं दुहिलं । निस्सारमधियमूणं पुणरुत्तं वाहयमजुत्तं ॥८८१॥

कमभिण्णवयणभिण्णं विभत्तिभिन्नं च लिंगभिन्नं च । अणभिहियमपयमेव य सभावहीणं ववहियं च ॥८८२॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

कालजतिच्छविदोसा समयविरुद्धं च वयणमित्तं च । अत्थावत्तीदोसो य होइ असमासदोसो य ॥८८३॥
उवमारूवगदोसाऽनिद्देसे पदत्थसंधिदोसो य । एए उ सुत्तदोसा बत्तीसं होंति णायव्वा ॥८८४॥
[आवश्यकनि० ८८१-८८४]

व्याख्या - तत्र **अनृतम्** अभूतोद्भावनं भूतनिह्नवश्च, अभूतोद्भावनं 'प्रधानं कारणम्' इत्यादि, भूतनिह्नवः 'नास्त्यात्मे'त्यादि १, **उपघातजनकं** सत्त्वोपघातजनकम्, यथा 'वेदविहिता हिंसा धर्माय' इत्यादि २, वर्णक्रमनिर्देशवत् **निरर्थक**मारादेसादिवत्, आर् आत् एस् इत्येते आदेशाः, एतेषु वर्णानां क्रमनिदर्शनमात्रं विद्यते, न पुनरभिधेयतया कश्चिदर्थः प्रतीयते, इत्येवंभूतं निरर्थकमभिधीयते, डित्थादिवद्वा ३, पौर्वापर्यायोगादप्रतिसम्बन्धार्थ**मपार्थकम्**, तथा 'दश दाडिमानि षडपूपाः कुण्डमजाजिनं पललपिण्डः त्वर कीटिके। दिशमुदीचीं, स्पर्शनकस्य पिता प्रतिसीन' इत्यादि ४, वचनविघातोऽर्थविकल्पोपपत्त्या **छलं** वाक्छलादि, यथा नवकम्बलो देवदत्त इत्यादि ५, द्रोहस्वभावं **द्रुहिलम्**, यथा 'यस्य बुद्धिर्न लिप्येत, हत्वा सर्वमिदं जगत्। आकाशमिव पङ्केन, नासौ पापेन युज्यते ॥१॥' कलुषं वा **द्रुहिलम्**, येन पुण्यपापयोः समताऽऽपाद्यते, यथा 'एतावानेव लोकोऽयं, यावानिन्द्रियगोचरः' इत्यादि ६, **निःसारं** परिफल्गु वेदवचनवत् ७, वर्णादिभिरभ्यधिकम् - **अधिकम्**, ८, तैरेव हीनम् - **ऊनम्** ९, अथवा हेतूदाहरणाधिकमधिकम्, यथाऽनित्यः शब्दः कृतकत्वप्रयत्नानन्तरीयकत्वाभ्यां घटपटवदित्यादि, एताभ्यामेव हीनम् - **ऊनं** यथा - अनित्यः शब्दो घटवत्, अनित्यः शब्दः कृतकत्वादित्यादि ८-९, शब्दार्थयोः पुनर्वचनं **पुनरुक्तम्** अन्यत्रानुवादात्, अर्थादापन्नस्य स्वशब्देन पुनर्वचनम्। तत्र शब्दपुनरुक्तम् - इन्द्र इन्द्र इति, अर्थपुनरुक्तम् - इन्द्रः शक्र इति, अर्थादापन्नस्य स्वशब्देन पुनर्वचनम्, यथा - पीनो देवदत्तो दिवा न भुङ्क्ते बलवान् पद्विन्द्रियश्च, अर्थादापन्नं रात्रौ भुङ्क्त इति, तत्र यो ब्रूयात् - दिवा न भुङ्क्ते रात्रौ भुङ्क्त इति स पुनरुक्तमाह १०, **व्याहतं** यत्र पूर्वेण परं विहन्यते, यथा - 'कर्म चास्ति फलं चास्ति, कर्ता नास्ति च कर्मणाम्' इत्यादि ११, **अयुक्तम्** अनुपपत्तिक्षमम्, यथा - तेषां कटतटभ्रष्टैर्गजानां मदबिन्दुभिः। प्रावर्तत नदी घोरा हस्त्यश्वरथवाहिनी ॥१॥ इत्यादि, १२ **क्रमभिन्नं** यत्र यथासङ्ख्यमनुदेशो न क्रियते, यथा स्पर्शनरसघ्राणचक्षुःश्रोत्राणामर्थाः स्पर्शरसगन्धवर्णशब्दा इति वक्तव्ये स्पर्शरूपशब्दगन्धरसा इति ब्रूयात् इत्यादि १३, **वचनभिन्नं** वचनव्यत्ययः यथा वृक्षावेतौ पुष्पिताः इत्यादि १४, **विभक्तिभिन्नं** विभक्तिव्यत्ययः, यथैष वृक्ष इति वक्तव्ये एष वृक्षमित्याह १५, **लिङ्गभिन्नं** लिङ्गव्यत्ययः, यथेयं स्त्रीति वक्तव्येऽयं स्त्रीत्याह १६, **अनभिहितम्** अनुपदिष्टं स्वसिद्धान्ते, यथा सप्तमः पदार्थो दशमं द्रव्यं वा वैशेषिकस्य, प्रधानपुरुषाभ्यामभ्यधिकं साङ्ख्यस्य, चतुःसत्यातिरिक्तं शाक्यस्येत्यादि १७, **अपदं** पद्यविधौ पद्ये विधातव्येऽन्यच्छन्दोऽभिधानं, यथाऽऽर्यापदे वैतालीयपदाभिधानम् १८, **स्वभावहीनं** यद्वस्तुनः स्वभावतोऽन्यथावचनम्, यथा शीतोऽग्निर्मूर्तिमदाकाशमित्यादि १९, **व्यवहितम्** अन्तर्हितम्, यत्र प्रकृतमुत्सृज्याप्रकृतं व्यासतोऽभिधाय पुनः प्रकृतमभिधीयते, यथा हेतुकथनमधिकृत्य सुप्तिङन्तपदलक्षणप्रपञ्चमर्थशास्त्रं वाऽभिधाय पुनर्हेतुवचनमित्यादि २०, **कालदोषः** अतीतादिकालव्यत्ययः, यथा रामो वनं प्राविशदिति वक्तव्ये विशतीत्याह २१, **यतिदोषः** - अस्थानविच्छेदः तदकरणं वा २२, छविः अलङ्कारविशेषस्तेन शून्यमिति २३, **समयविरुद्धं** च स्वसिद्धान्तविरुद्धं यथा साङ्ख्यस्यासत् कारणे कार्यम्, सद् वैशेषिकस्येत्यादि २४, **वचनमात्रं** निर्हेतुकं यथेष्टभूदेशे लोकमध्याभिधानवत् २५, **अर्थापत्तिदोषः** यत्रार्थादनिष्टापत्तिः, यथा ब्राह्मणो न हन्तव्य इति

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अर्थादब्राह्मणघातापत्तिः २६, **असमासदोषः** समासव्यत्ययः यत्र वा समासविधौ सत्यसमासवचनम्, यथा राजपुरुषोऽयमित्यत्र तत्पुरुषे समासे कर्त्तव्ये विशेषणसमासकरणं बहुव्रीहिसमासकरणम्, यदिवा असमासकरणं राज्ञः पुरुषोऽयमित्यादि २७, **उपमादोषः** हीनाधिकोपमानाभिधानं यथा मेरुः सर्षपोपमः सर्षपो मेरुसमो बिन्दुः समुद्रोपम इत्यादि २८, **रूपकदोषः** स्वरूपावयवव्यत्ययः, यथा पर्वतरूपावयवानां पर्वतेनानभिधानम्, समुद्रावयवानां चाभिधानमित्यादि २९, **अनिर्देशदोषः** यत्रोद्देश्यपदानामेकवाक्यभावो न क्रियते, यथेह देवदत्तः स्थाल्यामोदनं पचतीति वक्तव्ये पचतिशब्दानभिधानम्, ३०, **पदार्थदोषः** यत्र वस्तुपर्यायवाचिनः पदस्यार्थान्तरपरिकल्पनाऽऽश्रीयते, यथेह द्रव्यपर्यायवाचिनां सत्तादीनां द्रव्यादर्थान्तरपरिकल्पनमुलूकस्य ३१, **सन्धिदोषः** विश्लिष्टसंहितत्वं व्यत्ययो वेति ३२ । एभिर्विमुक्तं द्वात्रिंशद्दोषरहितं लक्षणयुक्तं सूत्रं तदिति वाक्यशेषः, द्वात्रिंशद्दोषरहितं यच्च इति वचनात्तच्छब्दनिर्देशो गम्यते ।'' - **आवश्यकहारि०** ॥

६. ''जाणंतिया अजाणंतिया य तह दुव्वियड्डिया चेव। तिविहा य होइ परिसा तीसे नाणत्तगं वोच्छं ॥३६४॥
अथवा त्रिविधा पर्षत्, तद्यथा- जानती अजानती दुर्विदग्धा च। तस्याः त्रिविधाया अपि नानात्वं वक्ष्ये ॥३६४॥
गुण-दोसविसेसन्नू अणभिग्गहिया य कुस्सुइमतेसु । सा खलु जाणगपरिसा, गुणतत्तिल्ला अगुणवज्जा ॥३६५॥

या गुण-दोषविशेषज्ञा कुश्रुतिमतैः अपरकुतीर्थिकसिद्धान्तमतैरनभिगृहीता, गाथायां सप्तमी तृतीयार्थे, सा खलु गुणतत्तिल्ला गुणयत्नवती अगुणवर्जा जानती पर्षत् ॥३६५॥

खीरमिव रायहंसा, जे घोट्टंति उ गुणे गुणसमिद्धा । दोसे वि य छड्डंता ते वसभा धीरपुरिस त्ति ॥३६६॥

ये गुणसमृद्धाः विनयादिगुणसमन्विताः क्षीरमिव राजहंसा गुणान् घोटयन्ति आस्वादयन्ति, येऽपि केचनानुपयोगप्रभवा दोषास्तानपि च छर्दयन्ति परित्यजन्ति ते वृषभाः **निशीथेन** गीतार्था अधिकृतस्याध्ययनस्य योग्याः ॥३६६॥

जे होंति पगयमुद्धा, मिगछावग-सीह-कुक्कुडगभूया । रयणमिव असंठविया सुहसण्णप्पा गुणसमिद्धा ॥३६७॥
[कल्पभा० ३६४-३६७]

ये प्रकृत्या-स्वभावेन मुग्धा मृग-सिंह-कुक्कुरशावभूता, गाथायां शावशब्दस्यान्यत्रोपनिपातः प्राकृतत्वात्, भूतशब्द औपम्ये, ततोऽयमर्थः- यथा मृगादिशावा अरण्यादानीय यदि रोचते तर्हि भद्रकाः क्रियन्ते अथवा क्रूराः, एवं ये प्रकृत्या मुग्धाः परतीर्थिकैश्चाभावितास्ते यथा भण्यन्ते तथा कुर्वन्ति। तथा रत्नमिव असंस्थापिताः, यथा रत्नमसंस्थापितं यादृशोऽभिप्रायस्तादृशं घटित्वा क्रियते एवमेतेऽपि यथा रोचते तथा क्रियन्ते । तथा चाह-सुखप्रज्ञापनीयाः गुणसमृद्धाः विनयादिगुणनिधयः ॥३६७॥

जा खलु अभाविया कुस्सुतीहिँ न य ससमए गहियसारा। अकिलेसकरा सा खलु, वयरं छक्कोडिसुद्धं वा ॥३६८॥
[कल्पभा० ३६८]

या खलु कुश्रुतिभिः कुसिद्धान्तैः अभाविता न च स्वसमये गृहीतसारा सा खल्वक्लेशकरा अजानती पर्षत्। षट्कोटिशुद्धं वज्रमिव गुणनिधानम्। षट्कोटिशुद्धं नाम यत् स्वभावतः षट्स्वपि दिक्षु शुद्धम् ॥३६८॥ सम्प्रति दुर्विदग्धां पर्षदमाह –

किंचिम्मत्तग्गाही , पल्लवगाही य तुरियगाही य । दुवियड्डगा उ एसा, भणिया परिसा भवे तिविहा ॥३६९॥
[कल्पभा० ३६९ ]

Jain Education International For Private & Personal Use Only www.jainelibrary.org

किञ्चिन्मात्रग्राहिण: पल्लवग्राहिण: त्वरितग्राहिण: । एवमेषा दुर्विदग्धा पर्षत् त्रिविधा त्रिप्रकारा भणिता ॥३६९॥' तत्र किञ्चिनमात्रग्रहिणीमाह –

नाऊण किं चि अन्नस्स जाणियव्वे न देति ओगासं । न य निज्जितो वि लज्जइ इच्छइ य जयं गलरवेण ॥३७०॥

ज्ञात्वा किञ्चिद् अन्यस्य ज्ञातव्ये नावकाशं ददाति, न च निर्जितोऽपि लज्जते, केवलं गलरवेण महागलप्रमाणेनारटन् जयमिच्छति ॥३७०॥ पल्लवग्राहिणीमाह –

न य कत्थइ निम्मातो, ण य पुच्छइ परिभवस्स दोसेण ।वत्थि व वायपुण्णो फुट्टइ गामिल्लगवियड्डो ॥३७१॥

[कल्पभा० ३७१]

ग्रामेयकेषु विदग्धो ग्रामेयकविदग्धो न च कुत्रचिन्निर्मात:, सर्वत्र पल्लवमात्रग्राहित्वात् । न च परं पृच्छति, परिभवो मे भविष्यति इति परिभवस्य दोषेण । केवलं बस्तिरिव वातपूर्ण: पण्डितोऽयम् इति लोकप्रवादगर्वित: स्फुटति स्फुटन्निव तिष्ठति ॥३७१॥ '' इति **बृहत्कल्पस्य मलयगिरिसूरि**विरचितायां वृत्तौ ।

**[ हे० ७-९ ] १. सर्वे भेदा** खसं० ॥

**[ हे० ११ ] १.** °**नेको वा** जेमू १, जेमू २, खसं० ॥

**[ हे० १५ ] १.** ''णत्थि णएहिं विहूणं सुत्तं अत्थो व जिणमए किंचि ।

आसज्ज उ सोयारं णए णयविसारओ बूया ॥७६१॥ [आवश्यकनि० ७६१]

व्याख्या- नास्ति नयैर्विहीनं सूत्रमर्थो वा जिनमते किञ्चिदित्यतस्त्रिनयपरिग्रह:, अशेषनयप्रतिषेधस्त्वाचार्यविनेयानां विशिष्टबुद्ध्यभावमपेक्ष्य इति । आह च- आश्रित्य पुन: श्रोतारं-विमलमतिम्, तुशब्द: पुन:शब्दार्थे, किम् ? नयान्नयविशारदो गुरुर्ब्रूयादिति गाथार्थ: ॥'' **आवश्यकहारि०** पृ० २८५ ॥ २. दृश्यतां [हा० १५ टि० १]

**[ हे० १७ ] १. वा नैषिधीकीगतं वा सिद्ध**° पा १, जेसं २ ॥ २. **भणिजत्ति** पा १ ॥

**[ हे० १८-२० ] १. ज्वलति सति तत्रैते** पा २, खसं० ॥ २. **माल्यानि तेषां** खसं० ॥ ३. **तरुखण्ड**° खं०पा१ ॥ ४. **क्रियत इति** पा१ ॥ ५. दृश्यतां [सू० १३ हे०]

६. ''अप्पाहण्णे वि इहं कत्थइ दिट्ठो उ दव्वसद्दो त्ति । अंगारमद्दगो जह दव्वायरिओ सयाऽभव्वो ॥

[पञ्चाशके ६।१३]

अप्राधान्येऽप्यप्रधानत्वेऽपि, न केवलं योग्यतायामेव । इह प्रवचने । क्वचित् शब्दविषये । दृष्टस्तूपलब्ध एव । द्रव्यशब्दो द्रव्य इति ध्वनि: । इतिशब्दो वाक्यार्थसमाप्तौ । इहैव निदर्शनमाह - अंगारमर्दक: प्रवचनप्रतीत: । यथेति दृष्टान्तार्थ: । द्रव्याचार्य आचार्यत्वयोग्यताया अभावादप्रधानाचार्य: । कियन्तं कालं यावदित्याह - सदा आजन्मापीत्यर्थ: । अथवा स च स पुन: अभव्यो मुक्तेरयोग्यो यत इति ।'' इति **अभयदेवसूरि**विरचितायां **पञ्चाशक**वृत्तौ ॥

**[ हे० २१-२२ ] १. ''तदस्यास्तीति मन्त्वन्त्वीन्''** इति **कातन्त्रव्याकरणे** द्वितीयेऽध्याये षष्ठे पादे ॥ २. **धौतपट:** पा१ ॥

**[ हे० २३ ] १.** °वदिंदनादि° जेसं२ विना ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

[ हे० २४-२७ ] १. इज्जेति खंसं० ॥

[ हे० २८ ] १. स नास्ति खं० जे० ॥ २. स नास्ति खंसं० ॥

[ हे० ३०-३९ ] १. अथ किं तत् श्रुतमिति पा २ विना नास्ति ॥ २. ते पुनरुच्येते पा१॥ ३. °शरीरं खं१० पा१, मां० ॥ ४. °तमित्यादि शेषं खं० पा२ ॥

[ हे० ४०-४५ ] १. चटक° जे० । वट्टक° पा१ ॥ २. फलहं खंमू० जेमू० । फलं हि पा१॥

[ हे० ४६-५१ ] १. जेसं २ विना - °ज्योतिष्कानयन° खं० जेमू१ । °ज्योतिष्कामयन° जे१, पा१, २, मां० ॥ २. °तार्थं° खंसं विना । °ताद्यर्थं° खंसं० ॥ ३. °द्वीन्द्रिय° नास्ति खं० ॥

४. ''ज्ञानवान् मृग्यते कश्चित् तदुक्तप्रतिपत्तये । अज्ञोपदेशकरणे विप्रलम्भन शङ्किभिः ॥३२॥

तस्मादनुष्ठेयगतं ज्ञानमस्य विचार्यताम् । कीटसंख्यापरिज्ञानं तस्य नः क्वोपयुज्यते ॥३३॥

हेयोपादेयतत्त्वस्य साभ्युपायस्य वेदकः । यः प्रमाणमसाविष्टो न तु सर्वस्य वेदकः ॥३४॥

दूरं पश्यतु वा मा वा तत्त्वमिष्टं तु पश्यतु । प्रमाणं दूरदर्शी चेदेत गृध्रानुपास्महे ॥३५॥'' इति **प्रमाणवार्तिके** प्रमाणसिद्धिपरिच्छेदे ।

''अत्राह - न खलु व्यसनितया प्रमाणमन्विष्यते प्रेक्षावद्भिः, अपि तु स्वर्गापवर्गप्रधानपुरुषार्थप्रेप्सुभिः तद्विषयज्ञानवान् कश्चित् [मृग्यते] अन्विष्यते तदुक्तस्योपायस्य प्रतिपत्तयेऽनुष्ठानार्थम्, अज्ञोपदेशकरणे विप्रलम्भनशङ्किभिः विसंवादं सम्भावयद्भिः ॥३२॥

दुःखोपशमोपायोपदेष्टुर्ज्ञानं मृग्यते यतस्तस्मादनुष्ठेयगतं संसारदुःखप्रशमोपायं ज्ञानमस्य प्रमाणपुरुषस्य विचार्यताम् । अनुपयोगि कीटसंख्यापरिज्ञानं तस्योपदेष्टुर्नोऽस्माकं न क्वचित् पुरुषार्थे उपयुज्यते इति न तद्विचार्यमिति प्रतिज्ञा, प्रत्युपकारापेक्षाक्षमं सर्वसत्त्वेषु । तस्माद् यदेवं प्रेक्षावतामनुष्ठेयं तद्विषयमुपदेष्टुं ज्ञानमुपयुक्तम्, नान्यविषयम् ॥३३॥

तस्माद्धेयतत्त्वस्य दुःखसत्यस्य साभ्युपायस्य समुदयसत्यान्वितस्योपादेयतत्त्वस्य निरोधसत्यस्य साभ्युपायस्य मार्गसत्यसहितस्य प्रमाणपरिशुद्धस्य यो वेदकः असौ प्रमाणमिष्टः न तु सर्वस्य यस्य कस्यचिद्धि वेदकः । न खलु सकलज्ञानादार्यसत्यचतुष्टयदेशना, अपि तु तज्ज्ञानवत्त्वात् तदुपदेष्टृतयैव च प्रामाण्यमिष्यते ॥३४॥

तदेवाह- दूरं पश्यतु वा मा वा द्राक्षीत्, तत्त्वमिष्टं तु आर्यसत्यचतुष्टयं पश्यतु तावतैव भगवान् प्रमाणम् । अन्यथाऽतत्त्वदर्श्यपि प्रमाणं दूरदर्शी चेदिष्यते एतागच्छत मुमुक्षवो गृध्रानुपास्महे दूरदर्शिनः, दीर्घश्रुतींश्च वराहानित्युपहसति ॥३५॥'' इति **प्रमाणवार्तिकस्य मनोरथनन्दिविरचितायां वृत्तौ** ॥ ५. °ष्टायेव खंमू० जे० । °ष्टत्वादेव खंसं० ॥ ६. °त्रैलोक्यचहितमहितपूजिता° खं० मध्ये पश्चात् पूरितः ॥

[ हे० ५२-६४ ] १. °दिष्वपि समासः पा१ ॥ २. इतः परं **त्रिप्रदेशिकस्कन्ध** इत्यधिकः पाठः खं० मध्ये पश्चात् परिपूरितः ॥ ३. मिश्रस्कन्ध° जे१, जेमू२, मां०, पा१ ॥

[ हे० ६५-६८ ] १. °क्खंधे से चेवेत्यादि खंसं० । °क्खंधे चेवेत्यादि पा२ ॥ २. इति शेषः पा१,२ ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**[ हे० ७३ ] १. य** खंसं, जे२ विना नास्ति ॥ २.दृश्यतां [हा० ७३ टि०२ ] ॥ ३. **जोगं** जेसं२ विना । **जोगं ति** खंसं ० ॥

**[ हे० ७६-८४ ] १.** दृश्यतां [सू० ९२ ] ॥ २. **मच्छंडी** जे१, जेमू२, पा१,२ ॥

**[ हे० ८५-८६ ] १.** ''खेत्तमरूवं निच्चं न तस्स परिकम्मणा न य विणासो ।

आहेयगयवसेण उ करण-विणासोवयारोऽत्थ ॥९२४॥ [विशेषाव०भा० ९२४]

क्षेत्रममूर्तम्, नित्यं च, इति न तस्य परिकर्म-विनाशौ कर्तुं शक्येते; तदाधेयद्रव्यस्य तु जल-भूम्यादेस्तौ सुप्रतीतावेव, ततस्तद्गतयोस्तयोरत्र क्षेत्रे मञ्चाः क्रोशन्ति इत्यादिन्यायादुपचारः क्रियत इति ॥९२४॥'' इति **विशेषावश्यकभाष्यस्य** मलधारिहेमचन्द्रसूरिविरचितायां वृत्तौ ॥ २. दृश्यतां [हे० १३१ - १३३ टि० ५]

३. °**च्छायानक्षत्र चारादिना** खंसं० पा२ ॥

४. ''छायाए नालियाए च परिकम्मं से जहत्थविण्णाणं । रिक्खाइचारेहिं च तस्स विणासो विवज्जासो ॥९२७॥ [विशेषाव०भा० ९२७]

से तस्य समया-ऽऽवलिका-घटिका-मुहूर्तादिलक्षणस्य कालस्येदमेव परिकर्म । यत्, किम्?, इत्याह-यद् यथार्थविज्ञानं यथावत् परिज्ञानम् । कया ?, इत्याह-शङ्क्वादिप्रतिच्छायारूपया छायया, घटिकारूपया च नाडिकया । विनाशस्तर्हि तस्य कः ?, इत्याह-विपर्यासो वैपरीत्यभवनम्-अनिष्टफलदायकतया परिणमनमित्यर्थः । कैः,इत्याह-ऋक्ष-ग्रहादिचारैः; तथा च वक्तारो भवन्ति-'अमुकेन नक्षत्रेण, अमुकेन ग्रहेण चेत्थमित्थं च गच्छता विनाशितः कालः' इति । उक्तः कालोपक्रमः ॥९२७॥'' इति **विशेषावश्यकभाष्यस्य** मलधारिहेमचन्द्रसूरिविरचितायां वृत्तौ ॥

**[ हे० ८७-९१ ] १. गुरुमइगहणं** जेसं२, पा१, मां० । **गुरुमणगहणं** खंसं० ॥ २. दृश्यतां [हा० ८७-९१ टि०२] ॥ ३. °**क्रमतो** खं, पा१,२ ॥

**[ हे० ९३-९५ ] १.** ''उपमाने वतिः । त-त्वौ भावे यण् च प्रकीर्तितः ।'' इति **कातन्त्रव्याकरणे** द्वितीयेऽध्याये षष्ठे पादे ॥ ''स्त्रियामादा । नद्याद्यन्चिवाह्व्यन्सन्तृसखिनान्तेभ्य ई'' इति **कातन्त्रव्याकरणे** द्वितीयेऽध्याये चतुर्थे पादे । ''स्त्रियामी ॥१॥ इति **कातन्त्रपरिशिष्टे** स्त्रीत्वप्रकरणे ॥ २. ''डुधाञ् धारण-पोषणयोः'' - **पा० धा०** १०९२ ''डुधाञ् डुभृञ् धारण-पोषणयोः'' - **का० धा०** २।८५॥ ३. 'तेन दीव्यति संसृष्टं तरतीकण् चरत्यपि । पण्याच्छिल्पान्नियोगाच्च क्रीतादेरायुधादपि ।'' इति **कातन्त्रव्याकरणे** द्वितीयेऽध्याये षष्ठे पादे ॥

**[ हे० १००-१०१ ] १. प्रश्नेऽत्र** जेसं१, पा१ ॥ २. **द्विकयोगेषु** खंसं विना । **द्विकसंयोगेषु** खंसं० ॥

**[ हे० १०२-१०३ ] १.** ''**संहिता च पदं चैव पदार्थः पदविग्रहः । चालना प्रत्यवस्थानं व्याख्या तन्त्रस्य षड्विधा ॥**'' इति सम्पूर्णः श्लोकः ॥

**[ हे० १०७ ] १. चाध्यक्ष**° खंसं० ॥

Jain Education International          For Private & Personal Use Only          www.jainelibrary.org

[ हे० १०८ ] १. ''कईहिं समएहिं लोगो भासाए निरंतरं तु होइ फुडो ।
लोगस्स य कइभाए कइभाओ होइ भासाए ॥३७८॥
चउहिं समयेहिं लोगो भासाए निरंतरं तु होइ फुडो । लोगस्स य चरिमंते चरिमंतो होइ भासाए ॥३७९॥
कोई मंदपयत्तो निसिरइ सयलाइं सव्वदव्वाइं । अन्नो तिव्वपयत्तो सो मुंचइ भिंदिउं ताइं ॥३८०॥
गंतुमसंखेज्जाओ अवगाहणवग्गणा अभिन्नाइं । भिज्जंति धंसंति य संखिज्जे जोअणे गंतुं ॥३८१॥
भिन्नाइं सुहुमयाए अणंतगुणवड्ढिआइं लोगंतं । पावंति पूरयंति य भासाए निरंतरं लोगं ॥३८२॥
जइणसमुग्घायगईए केई भासंति चउहिं समएहिं । पूरइ सयलो लोगो अण्णे उण तीहिं समएहिं ॥३८३॥
पढमसमए च्चिय जओ मुक्काइं जंति छद्दिसिं ताइं । बितियसमयम्मि ते च्चिय छ द्दंडा होंति छ म्मंथा ॥३८४॥
मंथंतरेहिं तईए समये पुन्नेहिं पूरिओ लोगो । चउहिं समएहिं पूरइ लोगंते भासमाणस्स ॥३८५॥
दिसि विद्वियस्स पढमोऽतिगमे ते चेव सेसया तिन्नि । विदिसि ट्ठियस्स समया पंचातिगमम्मि जं दोण्णि ॥३८६॥
चउसमयमज्झगहणे ति-पंचगहणं तुलाइमज्झस्स । जह गहणे पज्जंतगहणं चित्ता य सुत्तगई ॥३८७॥
कत्थइ देसग्गहणं कत्थइ घेप्पंति निरवसेसाइं । उक्कम-कमजुत्ताइं कारणवसओ निउत्ताइं ॥३८८॥
चउसमयविग्गहे सति महल्लबंधम्मि तिसमओ जह वा । मोत्तुं ति-पंचसमये तह चउसमओ इह निबद्धो ॥३८९॥
होइ असंखेज्जइमे भागे लोगस्स पढम-बिईएसु । भासाअसंखभागो भयणा सेसेसु समयेसु ॥३९०॥
आपूरियम्मि लोगे दोण्ह वि लोगस्स तह य भासाए । चरिमंते चरिमन्तो चरिमे समयम्मि सव्वत्थ ॥३९१॥
न समुग्घायगईए मीसयसवणं, मयं च दंडम्मि । जइ तो वि तीहिं पूरइ समएहिं जओ पराघाओ ॥३९२॥
जइणे न पराघाओ स जीवजोगो य तेण चउसमओ । हेऊ होज्जाहिं तहिं इच्छा कम्मं सहावो वा ॥३९३॥
खंधो वि वीससाए न पराघाओ य तेण चउसमओ । अह होज्ज पराघाओ हविज्ज तो सो वि तिसमइओ ॥३९४॥
एगदिसमाइसमये दंडं काऊण चउहिं पूरेइ । अन्ने भणंति, तं पि य नागम-जुत्तिक्खमं होइ ॥३९५॥''
[विशेषावश्यकभा० गा० ३७८-३९५]

[ हे० १०९ ] १. **भवंति** जे१, २ खंमू० पा१, मां० । 'सप्तप्रदेशा' इत्यत्र बहुव्रीहि समासः, अतो '**भवति**' इति सम्यक् ॥

[ हे० ११२ ] १. ''पदेसट्ठयाए - सव्वत्थोवा अणंतपदेसिया खंधा पएसट्ठयाए १, परमाणुपोग्गला अपदेसट्ठयाए अणंतगुणा २, संखेज्जपदेसिया खंधा पदेसट्ठयाए संखेज्जगुणा ३, असंखेज्जपदेसिया खंधा पएसट्ठयाए असंखेज्जगुणा ४; दव्वट्ठपदेसट्ठयाए - सव्वत्थोवा अणंतपदेसिया खंधा दव्वट्ठयाए १, ते चेव पदेसट्ठयाए अणंतगुणा २, परमाणुपोग्गला दव्वट्ठअपदेसट्ठयाए अणंतगुणा ३, संखेज्जपएसिया खंधा दव्वट्ठयाए संखेज्जगुणा ४, ते चेव पदेसट्ठयाए संखेज्जगुणा ५, असंखेज्जपदेसिया खंधा दव्वट्ठयाए असंखेज्जगुणा ६, ते चेव पएसट्ठयाए असंखेज्जगुणा ७ ॥'' इति प्रज्ञापनासूत्रे तृतीये पदे सू० ३३० ॥

[ हे० ११४ ] १. °**प्रदेशित्वा**° जे१, २ । °**प्रदेशिकत्वा**° मां० ॥

[ हे० ११५-११६ ] १. दृश्यतां [हा० ९६-९७ टि० १ ] ॥ २. दृश्यतां [सू० ११२] ॥

[ हे० १२२ ] १. °त्युपप्रद° खसं० ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

[ हे० १२३-१२४ ] १. °स्यैकस्यैव तेना° जे१ । °स्यैकस्य तेना° जेमू २, मां० ॥

[ हे० १३१-१३३ ] १. °वधार° खंमू० पा१, मां० । °वे धर° खंसं० ॥ २. भावेऽधर° खंसं, जेमू२, पा१,२ ॥ ३. °भावावकाश° खंसं० ॥ ४. तत्रैव पा१ ॥ ५. विशिष्यते मां० विना ॥ ६.समयावलिय मुहुत्ता दिवसमहोरत्त पक्ख मासा य ।संवच्छर युग पलिया सागर ओसप्पि परियट्टा ॥६६३॥

[अनुयोगद्वारे सू० ३६५, आवश्यकनि० ६६३, विशेषाव०भा० २०३६]

"व्याख्या - तत्र परमनिकृष्टः कालः समयोऽभिधीयते, स च प्रवचनप्रतिपादितपट्टशाटिकापाटन-दृष्टान्तादवसेयः, आवलिका असङ्ख्येयसमयसमुदायलक्षणा, द्विघटिको मुहूर्त्तः, दिवसश्चतुष्प्रहरात्मकः यद्वा आकाशखण्डमादित्येन स्वभाभिर्व्याप्तं तद्दिवस इत्युच्यते, शेषं निशेति, अहोरात्रमष्टप्रहरात्मकमहर्निशमित्यर्थः, पक्षः - पञ्चदशाहोरात्रात्मकः, मासः - तद्द्विगुणः, चः समुच्चये, संवत्सरो द्वादशमासात्मकः, युगं पञ्चसंवत्सरम्, असङ्ख्येययुगात्मकं पलितमिति पल्योपमम्, उत्तरपदलोपाद्, इत्थं सागरोपममपि, तत्र पल्योपमदशकोटीकोट्यात्मकं सागरमाख्यायते, उत्सर्पिणी सागरोपमदशकोटीकोट्यात्मिका, एवमवसर्प्पिण्यपि, परावर्त्तोऽनन्तोत्सर्प्पिण्यवसर्पिण्यात्मकः, स च द्रव्यादिभेदभिन्नः प्रवचनादवसेय इति गाथार्थः ॥" — आवश्यकहारि० ॥

"इह निर्विभागः परमसूक्ष्मकालांशः समयो भण्यते । स च प्रवचनप्रतिपादितोत्पलपत्र-शतपट्टसाटिकापाटन- दृष्टान्ताद् विशेषतः समवसेयः । असंख्येयसमयसमुदयसमितिसमागमनिष्पन्ना आवलिका। द्विघटिको मुहूर्तः । दिवसकरप्रभाप्रकाशितनभःखण्डरूपः, चतुष्प्रहरात्मको वा दिवसः । (प्र० .... सूर्यकिरणस्पृष्टव्योमखण्डरूपः, चतुष्प्रहरात्मको वा दिवसः) । सूर्यकिरणास्पृष्टव्योमखण्डरूपा, चतुर्यामात्मिका वा रात्रिः, तदुभयं त्वहोरात्रम् । पञ्चदशाहोरात्राणि पक्षः । पक्षद्वयात्मको मासः । द्वादशमासनिर्वृत्तः संवत्सरः । पञ्चसंवत्सरप्रमाणं युगम् । असंख्येययुगमानं पल्योपमम् । पल्योपमदशकोटीकोटिघटितं सागरोपमम्। दशसागरोपमकोटीकोट्यात्मिकोत्सर्पिणी । एवमवसर्पिण्यपि । अनन्ताभिरुत्सर्पिण्य-ऽवसर्पिणीभिः पुद्गलपरावर्तः। स च द्रव्यादिभेदभिन्नः प्रवचनादवसेयः ॥ इति निर्युक्तिगाथार्थः ॥२०३६॥" इति विशेषाव० मलधारि० ॥

७. "नित्यं सत्त्वमसत्त्वं वाऽहेतोरन्यानपेक्षणात् । अपेक्षातश्च भावानां कादाचित्कत्वसम्भवः ॥३५॥"

इति प्रमाणवार्तिकस्य परार्थानुमानपरिच्छेदे ।

"अहेतुत्वे च धूमस्य नित्यं सत्त्वमाकाशस्येव स्यात् । असत्त्वं शशविषाणादेरिव । अहेतोरन्यापेक्षणाभावात् । अपेक्षातश्च भावानां कादाचित्कत्वसम्भवः । ततो यद्यहेतुर्भावः तदा नित्यं स्यात्, असदेव वा स्याद् हेत्वभावात्, तस्माद् धूमस्य कादाचित्कत्वदर्शनात् हेतुमत्त्वम् । अग्न्यन्वयव्यतिरेकानुविधानदर्शनात् तत्कार्यत्वञ्च । यश्च यस्य कार्यं स तं न व्यभिचरति तदधीनस्वरूपत्वात् ॥३५॥" इति प्रमाणवार्तिकस्य मनोरथनन्दिविरचितायां वृत्तौ ॥ ७. पाश्चादा° जेमू० । पश्चादा° पा१ ॥

[ हे० १३४ ] १. जाताश्चतु° जेसं० पा१ विना ॥ २. दृश्यतां [हा० १३४ टि० २] ॥ ३. °योर्दिष्ट्या° पा१ । °योदिष्टा° पा२ ॥ ४. "गणनं सङ्ख्यानम्, तच्च पूर्वानुपूर्वी-पश्चानुपूर्वी-अनानुपूर्वीभेदतस्त्रिविधम्, तत्र पूर्वानुपूर्व्या गण्यमानमिदमध्ययनं प्रथमम्, पश्चानुपूर्व्या षट्त्रिंशत्तमम्, अनानुपूर्व्या त्वस्यामेवैका-द्येकोत्तरषट्त्रिंशद्गच्छगतायां श्रेण्यामन्योन्याभ्यासतो द्विरूपोनसङ्ख्याभेदं भवति, उक्तं च - "एकाद्या

Jain Education International  For Private & Personal Use Only  www.jainelibrary.org

गच्छपर्यन्ताः, परस्परसमाहताः । राशयस्तद्धि विज्ञेयं, विकल्पगणिते फलम् ॥१॥'' इह चासम्मोहाय षट्पदाङ्गीकारतः प्रस्तारानयनोपाय उच्यते - तत्र चैकादीनि षडन्तानि षट् पदानि स्थाप्यन्ते, तानि चान्योऽन्यं गुण्यन्ते, ततश्च जातानि सप्त शतानि विंशत्युत्तराणि, तेषां चान्त्येन षट्केन भागहारः, तत्र लब्धं विंशत्युत्तरं शतम्, १२०, इयन्तः षष्ठपङ्क्तौ षट्का न्यस्यन्ते, तदधस्तावन्त एव क्रमेण पञ्चकचतुष्ककत्रिकद्विकैकका: स्थाप्याः, इत्थं जातानि षष्ठपङ्क्तौ सप्त शतानि विंशत्युत्तराणि । ततो विंशत्युत्तरशतस्य पञ्चकेन भागहारः, तत्र च लब्धा चतुर्विंशतिः २४, तावत्सङ्ख्याः पञ्चमपङ्क्तौ क्रमेण पञ्चकचतुष्कत्रिकद्विकैकका न्यस्याः, जातं विंशत्युत्तरं शतम्, तस्य चाधस्तादग्रेतनपङ्क्ति तस्थमङ्कमपहाय यथामहत्सङ्ख्यमङ्कविन्यासः, तत्राग्रेतनपङ्क्तिस्थः पञ्चकस्तत्परित्यागतश्च सर्वबृहत्सङ्ख्यः षट्कश्चतुर्विंशतिवारानधः स्थाप्यते, ततस्त्रिकापेक्षया चतुष्को द्विकापेक्षया च त्रिक एककापेक्षया च द्विको बृहत्सङ्ख्यः, तत एककश्च तावत एव वारान् न्यसनीयः, जातं पुनर्विंशत्युत्तरं शतम्, एवमग्रेतनपङ्क्तिस्थचतुष्कत्रिकद्विकैकपरिहारतस्तथैव तावन्नेयं यावत्पञ्चमपङ्क्तावपि पूर्णानि सप्त शतानि विंशत्युत्तराणि । ततश्चतुर्विंशतेश्चतुष्केण भागहारः, तत्र लब्धाः षट् ६, ततश्चतुर्थपङ्क्तौ तावन्त एवाधोऽधश्चतुष्कत्रिकद्विकैकका: स्थाप्याः, यावज्जाता चतुर्विंशतिः, ततश्चाग्रेतनपङ्क्तिस्थाङ्कपरिहारादिप्रागुक्तयुक्तित एव पङ्क्तिः पूरणीया । भूयः षट्कस्य त्रिकेण भागहारः, ततश्च लब्धो द्विकः, ततस्तृतीयपङ्क्तौ द्वौ त्रिकौ पुनर्द्वाविव द्विकौ भूय एककौ च द्वावधः स्थापनीयौ, अधस्ताच्च पुरःस्थिताङ्कत्यागतो बृहत्सङ्ख्याङ्कन्यासतश्च विंशत्युत्तरसप्तशतप्रमाणैव पङ्क्तिः पूरणीया । षड्भागहारलब्धस्य द्विकस्य विभजने लब्ध एकः, ततो द्वितीयपङ्क्तौ द्विक एककश्चैको विरचनीयः, तदधश्च पुरोदितपुरस्थाङ्कपरिहारादिन्यायतस्तावत्सङ्ख्यैव द्वितीयपङ्क्तिः कार्या । प्रथमपङ्क्तिस्तु पुरस्थाङ्कपरिहारतः पूरणीया । उक्तं च - गणितेऽन्त्यविभक्ते तु, लब्धं शेषैर्विभाजयेत् । आदावन्ते च तत्स्थाप्यं, विकल्पगणिते क्रमात् ॥१॥'' इह च परस्परगुणनागतराशिर्गणितमुच्यते, शेषास्तु षट्कापेक्षया पञ्चकादयः, आदाविति च षष्ठपङ्क्तौ, अन्त इति च पञ्चमादिपङ्क्ताविति । उक्ताऽऽनुपूर्वी ॥'' इति **शान्तिसूरिविरचितायाम् उत्तराध्ययनबृहट्टीकायाम्** १।२८॥

[ **हे० १३५-१३८** ] १. **क्रमपरि**° खंसं० विना ॥

[ **हे० १३९-१५१** ] १.**प्रदेशिकद्वये** जे१, २ खंमू० पा१ । **प्रदेशकद्वये** मां०॥

[ **हे० १५२** ] १.**एगं दव्वं** जे१, **खंमू**० ॥ २. °**ज्ञभागे** पा१, जेमू२ ॥ ३. **प्रतीयते** खंमू० जे१, २ पा१ ॥ ४. **ततोऽचित्तमहा**° पा१, जेसं २ ॥ ५. (प्रतिपाद्येत ?) ॥ ६. °**गवर्त्तित्वा**° पा१ ॥

[ **हे० १५४** ] १.**एगं दव्वं** खं०, जे१, २ पा१ ॥ २. **एकद्विप्रदेशाव**° पा१ ॥ ३. **सर्वभावा**° खंमू० जेमू१, २ । **सर्वदैव भावा**° पा१, जेसं२ ॥

[ **हे० १५५** ] १. °**न्योंतर**° पा१ ॥ २. **प्रतिभ्रमणे**° खंसं० ॥

[ **हे० १५६** ] १. °**न्यान्यपि चतु**° पा१ खंसं० ॥ २. **द्विकयोगा**° जे१, २ पा१, २ ॥ ३. **त्रिकयोगानां** पा२ ॥ ४. °**ष्कयोगा**° जे१,२ पा१,२ ॥ ५. °**कयोग**° जेमू१, २ खंमू० पा१, २ ॥ ६.

Jain Education International  For Private & Personal Use Only  www.jainelibrary.org

त्रिकयोगाः जे१, २, खंमू० पा१,२ ॥ ७. त्रिकयोगा खं० विना ॥ ८. ° कयो° खं० विना ॥ ९. °वस्थापितेन पा१ ॥ १०. °कयोग° खंमू० जे१,२, पा१,२ ॥

[ हे० १६०-१६३ ] १. °भागं जे१, खंमू० ॥

[ हे० १६८-१७१ ] १. धातकीखण्डः पा१ ॥ २. वरुणोदः जे१,२, पा२ मांमू० ॥ ३. खीर त्ति खंसं० । क्षीर त्ति पा१ । खीरत्ति पा२ ॥ ४. °माइय पा१ जे१,२, मां० ॥ ५. °माय इ त्ति जे१ । °माइय त्ति जे२ । °माय इति पा१, मां० ॥ ६. ° यान् द्वीपा° खंमू० जेमू० पा१ । °यान् २ द्वीपा° खंसं० । °यानसंख्येयानसंख्येयान् द्वीपा° जेसं० ॥ ७. °स्तेषु द्वीपाः मां० ॥ ८. दृश्यतां [हा० १६८-१७१ टि ३] ९.पिदानां नास्ति जे२, जेमू१, खं०, पा१ ॥ १०. भंगा नास्ति जेमू१,२ ॥ ११. °द्वयोनस्वरूपा जेमू१,२, खं० पा१ ॥

[ हे० १८०-१९४ ] १. स्वाभावादिति जेमू१,२, खंमू० । स्वभावादिति जेसं० खंसं० पा२ ॥ २. °क्तत्वादु° खंसं० जेसं१ ॥ ३. एगं दव्वं जे१,२ ॥ ४. वा नास्ति पा१ जे१,२, खंमू० ॥ ५. ततस्तद्भेदेन खंसं० जेसं१, पा२ ॥ ६. °मिति तस्या° खंमू० । °मिति न स्या° जे१, जेमू२ ॥ ७. °कस्यावक्त° खंसं० ॥ ८. व्याख्यानमु° खं० मां० ॥

[ हे० १९५-२०० ] १. °कस्यानुपू° जे१,२, खंमू० ॥ २. असंख्येयात् कालात् खं० ॥ ३. °प्रदेशं तैरपि सर्वदा लोकस्याशून्यत्वादिति जे१,२, मां० ॥ ४. सदा पा१ ॥ ५. एगं दव्वं खं० ॥ ६-७. °ठिइया खं० ॥

[ हे० २०१-२०२ ] १. °न्नात्र आव° पा१, २ मां० । °नात्राव° जे१,२ ॥ २. "पुव्वस्स उ परिमाणं, सयरिं खलु हुंति कोडिलक्खाओ । छप्पणं च सहस्सा, बोधव्वा वासकोडीणं ॥३१६॥ व्याख्या - पूर्वस्य परिमाणं वर्षकोटीनां सप्ततिः कोटिलक्षाः षट्पञ्चाशत्सहस्राणि ७०५६०००००००००० । तथाहि —पूर्वाङ्गं चतुरशीतिलक्षाणि, पूर्वाङ्गं च पूर्वाङ्गेन गुणितं पूर्वं भवति, ततो यथोक्तं पूर्वस्य परिमाणं न विरुध्यते ॥" इति श्रीजिनभद्रगणिक्षमाश्रमणविरचितायाः संग्रहण्या मलयगिरिसूरिविरचितायां वृत्तौ ॥

[ हे० २०५ ] १. "समासान्तगतानां वा राजादीनामदन्त ता।" इति कातन्त्रव्याकरणे द्वितीयेऽध्याये षष्ठे पादे ॥ २. प्रतिषु पाठाः - °युक्तेन विशि° खं०, जेमू२, पा१, २ । (= युक् तेन विशि° ?) । °युक्तो न विशि° जेमू१ । °युक्तत्वेन विशि° जेसं१, २, मां० ॥ ३. अत्र सर्व° जे१, जेसं२, मां० विना ॥ ४. °स्रस्य च जे१,२, पा१, २, मांमू० ॥ ५. °त्वमिति पूर्वानुपूर्वीत्वं शेष° जेसं१ । °त्वमिति पूर्वानुपूर्वीत्वमिति शेष° खंसं० । °त्वमित्यर्थः शेषः° पा२ ॥

[ हे० २०६ ] १.दृश्यतां [ हे० ९३-९५ टि० १] ॥ २. ° समा° मां०, जे२ विना ॥ ३. समा° जे१ ॥

४. "दुविहोवक्कमकालो सामायारी अहाउयं चेव । सामायारी तिविहा ओहे दसहा पयविभागे ॥६६५॥

[आवश्यकनि० ६६५ ]

द्विविधश्चासावुपक्रमकालश्चेति समासः, तदेव द्वैविध्यमुपदर्शन्नाह- सामायारी अहाउअं चेव, समाचरणं

Jain Education International For Private & Personal Use Only www.jainelibrary.org

समाचारः- शिष्टाचरितः क्रियाकलापस्तस्य भावः *गुणवचनब्राह्मणादिभ्यः कर्मणि* च [पा० ५।१।१२४] ष्यञ् समाचार्य्यम्, पुनः स्त्रीविवक्षायां *षिद्गौरादिभ्यश्च* [ पा० ४।१।४१] इति ङीष्, यस्ये [पा० यस्येति च ६।४।१४८] त्यकारलोपः, यस्य हल [ पा० ६।४।४९ ] इत्यनेन तद्धितयकारलोपः परगमनं सामाचारी, तस्या उपक्रमणम्- उपरिमश्रुतादिहानयनमुपक्रमः, सामाचार्युपक्रमश्चासौ कालश्चेति समासः यथाऽऽयुष्कस्योपक्रमणं दीर्घकालभोग्यस्य लघुतरकालेन क्षपणमुपक्रमः, यथायुष्कोपक्रमश्चासौ कालश्चेति समासः, तत्र हि कालकालवतोरभेदात् कालस्यैव आयुष्काद्युपाधिविशिष्टस्योपक्रमो वेदितव्य इत्यभिप्रायः । तत्र सामाचारी त्रिविधा-ओहे दसहा पदविभागे त्ति, ओघः सामान्यम्, ओघः सामाचारी सामान्यतः सङ्क्षेपाभिधानरूपा, सा चौघनिर्युक्तिरिति । दशविधसामाचारी इच्छाकारादिलक्षणा । पदविभागसामाचारी छेदसूत्राणीति । तत्रौघसमाचारी नवमात्पूर्वात् तृतीयाद् वस्तुन आचाराभिधानात् तत्रापि विंशतितमात् प्राभृतात्, तत्राप्योघप्राभृतप्राभृतात् निर्व्यूढेति, एतदुक्तं भवति- साम्प्रतकालप्रव्रजितानां तावच्छ्रुतपरिज्ञानशक्तिविकलानामायुष्कादिह्रासमपेक्ष्य प्रत्यासन्नीकृतेति । दशविधसामाचारी पुनः षड्विंशतितमादुत्तराध्ययनात् स्वल्पतरकालप्रव्रजितपरिज्ञानार्थं निर्व्यूढेति । पदविभागसामाचार्य्यपि छेदसूत्रलक्षणान्नवमपूर्वादेव निर्व्यूढेति गाथार्थः ॥'' - **आवश्यकहारि०** ॥ ५. **होइ अग°** खंमू० जे१,२, पा१, मां० । **होअग°** खसं० । **होयग°** पा२ ॥ [ दृश्यतां हा० २०६ टि० ४] ॥

**[ हे० २०७ ]** १. **°मिक स्तोक°** पा२, जेमू१,२ । **°मिकस्य स्तोक°** खं० पा१, मां० । जेसं२ मध्ये द्विधाऽपि संशोधितम् -**° मिकः स्तोकं°** जेसं२ ।**° मिकस्य स्तोक°** जेसं२ ॥

**[ हे० २०८-२०९ ]** १. **नमई** जे१ । दृश्यतां [हा० २०८-२०९ टि० १] ॥ २. **°धानानि वस्तूनि°** जेसं२, मां० पा१ ॥

**[ हे० २१०-२१६ ]** १. **द्विनाम तत** जेसं२, पा१ मां० । **द्विनाम त** जेमू२ ॥ २. प्रतिषु पाठाः - **द्विनामैतदुच्यते** खसं० । **द्विनामेतदुच्यते** पा२ । **द्विनामोच्यते** खंमू० जे१, २, पा१, मां० ॥ ३. **°त्तरं तु वि°** खसं० ॥ ४.प्रतिषु पाठाः- **°धीयेतेत्यत्रापि** पा२ । **°धीयतेत्यत्रापि** जेमू१ । **°धीयते इत्यत्रापि** जेसं१ । **°धीयेतान्यत्रापि** खं० । **°धीयेतैवमन्यत्रापि** पा१ मां०, जेसं२ । **धियवन्यत्रापि** जेमू२ ॥

**[ हे० २१७-२२६ ]** १. तुलना - ''तेषां विद्याद्रसं स्वादुं यो वक्त्रमनुलिम्पति ।
आस्वाद्यमानो देहस्य ह्लादनोऽक्षप्रसादनः ॥२॥
प्रियः पिपीलिकादीनामम्लः क्षालयते मुखम् । हर्षणो रोमदन्तानामक्षिभ्रुवनिकोचनः ॥३॥
लवणः स्यन्दयत्यास्यं कपोलगलदाहकृत् । तिक्तो विशदयत्यास्यं रसनं प्रतिहन्ति च ॥४॥
उद्वेजयति जिह्वाग्रं कुर्वंश्चिमिचिमां कटुः । स्रावयत्यक्षिनासास्यं कपोलौ दहतीव च ॥५॥
कषायो जडयेज्जिह्वां कण्ठस्रोतोविबन्धकृत् । रसानामिति रूपाणि कर्माणि मधुरो रसः ॥६॥
आजन्मसात्म्यात्कुरुते धातूनां प्रबलं बलम् । बालवृद्धक्षतक्षीणवर्णकेशेन्द्रियौजसाम् ॥७॥
प्रशस्तो बृंहणः कण्ठ्यः स्तन्यसन्धानकृद् गुरुः । आयुष्यो जीवनः स्निग्धः पित्तानिलविषापहः ॥८॥
कुरुतेऽत्युपयोगेन समेदः श्लेष्मजान् गदान् । स्थौल्याग्निसादसंन्यासमेहगण्डार्बुदादिकान् ॥९॥
अम्लोऽग्निदीप्तिकृत्स्निग्धो हृद्यः पाचनरोचनः । उष्णवीर्यो हिमस्पर्शः प्रीणनः क्लेदनो लघुः ॥१०॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

करोति कफपित्तास्रं मूढवातानुलोमनः । सोऽत्यभ्यस्तस्तनोः कुर्याच्छैथिल्यं तिमिरं भ्रमम् ॥११॥
कण्डूपाण्डुत्ववीसर्पशोफविस्फोटतृड्ज्वरान् । लवणः स्तम्भसङ्घातबन्धविध्मापनोऽग्निकृत् ॥१२॥
स्नेहनः स्वेदनस्तीक्ष्णो रोचनश्छेदभेदकृत् । सोऽत्रातियुक्तोऽस्रपवनं खलतिं पलितं वलिम् ॥१३॥
तृट्कुष्ठविषवीसर्पाञ्जनयेत्क्षपयेद्बलम् । तिक्तः स्वयमरोचिष्णुररुचिं क्रिमितृड्विषम् ॥१४॥
कुष्ठमूर्च्छाज्वरोत्क्लेशदाहपित्तकफाञ् जयेत् । क्लेदमेदोवसामज्जशकृन्मूत्रोपशोषणः ॥१५॥
लघुर्मेध्यो हिमो रूक्षः स्तन्यकण्ठविशोधनः । धातुक्षयानिलव्याधीनतियोगात्करोति सः ॥१६॥
कटुर्गलामयोदर्दकुष्ठालसकशोफजित् । व्रणावसादनः स्नेहमेदः क्लेशोपशोषणः ॥१७॥
दीपनः पाचनो रुच्यः शोधनोऽन्नस्य शोषणः । छिनत्ति बन्धान् स्रोतांसि विवृणोति कफापहः ॥१८॥
कुरुते सोऽतियोगेन तृष्णां शुक्रबलक्षयम् । मूर्च्छामाकुञ्चनं कम्पं कटिपृष्ठादिषु व्यथाम् ॥१९॥
कषायः पित्तकफहा गुरुरस्रविशोधनः । पीडनो रोपणः शीतः क्लेदमेदोविशोषणः ॥२०॥
आमसंस्तम्भनो ग्राही रूक्षोऽतित्वक्प्रसादनः । करोति शीलितः सोऽतिविष्टम्भाध्मानहृद्रुजः ॥२१॥'' इति **अष्टाङ्गहृदये** ॥ २. **वातं कफं हन्ति** खंसं० जेमू ॥ ३. **परिः** खं० जे१ ॥ ४. **परिः** खं० जे१ ॥ ५. **परिः** खं० जे१ ॥ ६. **परिः** जे१,२, खंसं० पा१ ॥ ७. पा २ विना - °**न्यकृष्ण इति** खंमू०, °**न्यकृष्ण इत्यर्थः** खंसं० । °**न्यः कृष्ण इति** पा१ जे१,२, मां० ॥ ८.° **स्थाया नि**° पा२ । °**स्था नि**° जेमू१,२, °**स्थायां नि**° जेसं१॥

**[ हे० २२७-२३१ ]** १. ''नाम च धातुजमाह निरुक्ते व्याकरणे शकटस्य च तोक्तम् । यन्न पदार्थविशेषसमुत्थं प्रत्ययतः प्रकृतेश्च तदूह्यम् ॥'' इति पाणिनीयव्याकरण काशिकायां वृत्तौ ३।३।१॥

**[ हे० २३३-२५९ ]** १.**परिणामितं** जेमू१, जे२, पा१, मां० ॥ २. **वा** पा२, खंसं विना नास्ति ॥ ३. प्रतिषु पाठाः - **स्वप्रयोगत्वात्** जेमू१ । **स्वप्रयोगित्वात्** जेसं१, जे२ । **स्वप्रायोगित्वात्** पा१ खं० मां० । **स्वप्रायोगत्वात्** पा२ ॥ ४. **विशेषः** पा२ विना । **विशेषा** जेमू२ । **विशेषाः** जेसं२ ॥ ५. **स च स्वा**° जे१,२, पा१, मां० पा२ ॥ ६. दृश्यतां [हे० ९३-९५ टि० ३ ] ॥ ७. °**वधिरेव** पा१, जे१,२ ॥ ८. प्रतिषु पाठाः - **तेषु एवा**° खंमू० जेमू१,२, पा१, मां० । **तेष्वेवा**° जेसं२ । **तेषु त एवा**° खंसं० जेसं१ पा२ ॥ ९. **उदईए** खं० मां० ॥ १०. प्रतिषु पाठाः - **ततु** पा१, २, खंमू० जेमू१,२, मां०॥ ११. **एमेवे** खंमू० । **एमेव** खंसं० ॥

**[ हे० २६० ]** १. पा२ विना - **सज्जेत्यादि श्लोकः** खं० पा१, मां०, जेसं२ । **सज्जे त्ति श्लोकः** जे१ । **सजेति श्लोकः** जेमू२ ॥ २.**सर्वानभिभवत्येव** पा१, मां० ॥ ३. °**तैव** खंमू० । °**त्येष** खंसं० ॥ ४. °**ऽस्फुटश्च** जेमू१,२, । **ऽतिस्फुटश्च** जेसं१,२ ॥ ५. **तालप्र**° मां० जे१, २, पा१ ॥ ६. **यत्र गीते** जेमू१,२, **यत्र गीते गीयते** जेसं१,२ । **यत्र गीयते** खंमू०, **यत्र गीते गीयते** खंसं० ॥ ७. °**स्पराभिहत**° जेसं२, पा१, मांमू० । °**स्पराहत**° मांसं० । पा२ मध्येऽत्र पाठः पतितः ॥ ८. °**तीत्येवं** पा१, मां०, जेसं२ ॥ ९. **सक्कए इत्यादि** खं०१ ॥ १०. **गाय इत्यादि** जे१,२, पा१, मां० ॥

**[ हे० २६१ ]** १. **नामेत्यादि** खं० पा२ विना ॥ २. प्रतिषु पाठाः - **राजा तयो**° जे१,२, पा१ मां० । **राजास्तयो**° खंमू०, **राजादिस्तयो**° खंसं०, पा२ ॥ ३. °**न्तरसूचकः** जे१, जेमू२ ॥ ४. **तथाष्ट**° जे१,२, पा१, मां० ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

[ हे० २६२ ] १. नामे त्यादि खं० पा२ विना ॥

२. २७ "शृङ्गारहास्यकरुणरौद्रवीरभयानकबीभत्साद्भुतशान्ता नव रसाः ॥२॥

तत्र कामस्य सकलजातिसुलभतयात्यन्तपरिचितत्वेन सर्वान् प्रति हृद्यतेति पूर्वं शृङ्गारः । तदनुगामी च हास्यो निरपेक्षभावत्वात् तद्विपरीतस्ततः करुणः । ततस्तन्निमित्तमर्थप्रधानो रौद्रः । ततः कामार्थयोर्धर्ममूलत्वाद्धर्मप्रधानो वीरः । तस्य भीताभयप्रदानसारत्वादनन्तरं भयानकः । तद्विभावसाधारण्यसंभावनात् ततो बीभत्सः । इति इयद्वीरेणाक्षिप्तम् । वीरस्य पर्यन्तेऽद्भुतः फलमित्यनन्तरं तदुपादानम् । ततस्त्रिवर्गात्मकप्रवृत्तिधर्मविपरीतनिवृत्तिधर्मात्मको मोक्षफलः शान्तः । एते नवैव परस्परासंकीर्णा रसाः।" इति **काव्यानुशासनस्वोपज्ञवृत्तौ** ॥

"शृङ्गाररहास्यकरुणा रौद्रवीरभयानकाः । बीभत्साद्भुतसंज्ञौ चेत्यष्टौ नाट्ये रसाः स्मृताः ॥१५॥" इति **भरतविरचिते नाट्यशास्त्रे** ॥ ३. °रार्थं खं० पा२ विना ॥ ४. प्रतिषु पाठाः - **विस्मयकरोति विस्मय**° जेसं० । **विस्मयं करोति विस्मय**° खंमू० जेमू१,२, पा१ मां० । **विस्मयकरो विस्मय**° खंसं० पा२ ॥ ५-६-७. **भृकु**° पा१ मां० ॥ ८. प्रतिषु पाठाः - **शिष्टव्रीडा** खंमू० जेमू१,२, पा१ । **शिष्टस्य व्रीडा** खंसं० जेसं१,२, मां० । **शिष्यस्य व्रीडा** पा२ ॥ ९. **मा मां क्वचित्** खंसं० ॥ १०. °**भर्त्रा यत् प्रथ**° जेमू१ । °**भर्त्रा प्रथ**° जेसं१, पा २ । °**भर्त्रा यः प्रथ**° जे२, पा१ मां० ॥ ११. **वहूपोति त्ति** खं० ॥ १२. °**पुरीषपूयादि**° खंसं० पा२ ॥ १३. **तच्छियं** खंसं० ॥ १४. **तेनोपप्लुते** जे१,२, पा१ मां० ॥ १५. प्रतिषु पाठाः - °**वग्घाय**° जेमू१, जे२, खं० । °**वधाय**° जेसं१, पा१,२, मां० ॥ १६. प्रतिषु पाठाः - **द्व्यादिसंयोग**° खंमू० । °**द्व्यादिससंयोग**° जे१,२, पा१ । °**द्व्यादिरससंयोग**° जेसं१,२, मां० पा२ ॥ १७. °**मिष्टस्य सर्वस्या**° खंमू० मांसं० ॥

[ हे० २६३-३१२ ] १. **यत्र लाला**° खंमू० ॥ २. **संकीर्णः स्थान**° खंसं० ॥ ३. **जो लत्तए** खंमू० । **जे लत्तए** खंसं०, जेसं२ । **जो अलत्तए** खं० विना ॥ ४. °**रसेन**(रसस्तेन जेसं२)**प्राकृतशैल्या कन्**(**कः** मां०, जे२)**प्रत्ययः स एव** जेसं१,२, मां० ॥ ५. "राजदन्तादिषु परम् ॥ [पा० २।२।३१], एषु पूर्वप्रयोगार्हं परं स्यात् । दन्तानां राजा राजदन्तः ।" इति पा० सिद्धान्तकौमुद्याम् ॥ ६. **स्तोकेष्वाम्रा**° जे१,२, मां० पा१ ॥ ७. °**त्यपि स्वरूप**° जेमू१, जे२, पा१ मां० ॥ ८. °**सीत्युत्ता**° खंसं० ॥ ९. **सिंही**° जे१,२, पा१ मांमू० ॥ १०. **प्रवृत्ततया** पा१, २ । **प्रवृत्ता**(**त्सामान्यरूपतया प्रवृत्ता** खंसं०) **द्** खं० । **प्रवृत्त्वा** मां० ॥ ११. **प्रवृत्तत्वाद्** पा१ मां०, जेसं२ ॥ १२. दृश्यतां [ हे० ११] ॥ १३. **सप्तावि**° खंसं० विना॥ १४. "निग्गंथ सक्क तावस गेरुय आजीव पंचहा समणा । तेसि परिवेसणाए लोभेण वणिज्ज को अप्पं ?॥४४५॥

व्याख्या - निर्ग्रन्थाः साधवः, शाक्याः मायासूनवीयाः, तापसाः वनवासिनः पाखण्डिनः, गैरुकाः गेरुकरञ्जितवाससः परिव्राजकाः, आजीवकाः गोशालकशिष्या इति पञ्चधा पञ्चप्रकाराः श्रमणा भवन्ति ॥" इति **पिण्डनिर्युक्तेर्मलयगिरिसूरिविरचितायां** वृत्तौ ॥ १५. दृश्यतां [हा० १४ टि० ३] ॥ १६. दृश्यतां [हा० २६३-३१२ टि० ७ ] ॥ १७. **इत्यण् भव**° खंमू० पा१, २, मां० ॥ १८. **राजादीश्वरादि** खंमू० जेमू१,२, पा१, २, मां० ॥ १९ **अत एव ती**° पा१, २ ॥ २०. °**दिर्मातरो** जेमू१ । °**दिभिर्मातरो** जेसं१,२ । °**दिमातरो** जे विना ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

# पञ्चमं परिशिष्टम्

[ આગમપ્રભાકર પૂજ્યપાદ મુનિરાજશ્રી **પુણ્યવિજયજી** મહારાજે શ્રી**મહાવીર જૈનવિદ્યાલયથી** પ્રકાશિત થતી જૈન આગમ ગ્રંથમાળાનો પ્રારંભ કર્યો તે સમયે કોલ્હાપુરના સ્વ. **આદિનાથ નેમિનાથ** ઉપાધ્યે, **પાટણ**ના સ્વ. **ભો**ગીભાઈ સાંડેસરા તથા પં. **અમૃતલાલ**ભાઈ **મો**હનલાલ ભોજક આદિ વિદ્વાનોની સમિતિએ જે સૂચક નિયમા[1]વલી તૈયાર કરી હતી તે નિયમાવલિ મને પૂ.મુ.શ્રી **પુણ્યવિજયજી** મહારાજના અત્યંત નિકટના ઉપાસક લક્ષ્મણભાઈ હીરાલાલ ભોજકે અમદાવાદ **લા.દ.**વિદ્યામંદિરમાં રહેલા પૂ.મુ.શ્રી **પુણ્યવિજયજી** મહારાજના સંગ્રહમાંથી લાવીને જ્યારે આગમ સંશોધન સંપાદનનું કામ મને શ્રી મહાવીર જૈન વિદ્યાલયે સોંપ્યું ત્યારે આપી હતી. તે **નિયમાવલી** અહીં નીચે અક્ષરશ: આપવામાં આવે છે. ]

## जैनागम संपादनके लिए नियम

मूल आगमों के पाठ निर्णय के लिए निम्न नियमोंका अनुसरण संपादक करें यह आवश्यक है जिससे कि समग्र आगमग्रन्थमालामें एकरूपता संपन्न होगी -

(१) किसी एक ही प्रतिका पाठ मूलमें देना यह आवश्यक नहीं किन्तु जहींतक हो प्राचीनतम प्रतिको महत्त्व दिया जाय। प्राचीनतम भी यदि अशुद्ध हो तो उसको उतना महत्त्व नहीं देना। शुद्ध प्रतिको ही महत्त्व दिया जाय। प्रथम किसी एक उक्तरीति से पसंद की गई प्रतिके आधार पर पाठ लिए जाय। तदनंतर अन्य प्रतोंसे मिलान कर अंतिम पाठ निर्णय किया जाय।

(२) व्यंजनलोपकी अपेक्षा व्यंजनकी उपस्थितिको महत्त्व दिया जाय। अर्थात् किसी एक प्रतिमें व्यंजनका लोप पाठमें देखा न जाता हो तो उसी पाठको यथासंभव मूलमें स्थान दिया जाय। अलुप्त व्यंजनमें मौलिक संस्कृतके व्यंजनोंको महत्त्व देना किन्तु सभी प्रतिमें किसी एक शब्दके लिये व्यंजनका लोप ही मिलता हो तो लुप्त व्यंजनवाला पाठ ही लिया जाय। व्यंजन की पुन: स्थापना संपादक अपनी और से न करें। जैसे होति और होइ दोनों पाठ मिलतें हो तो होति लिया जाय। केवल होइ मिलता हों तो होति बनाने की आवश्यकता नहीं।

(३) संयुक्त व्यंजनके पूर्व ह्रस्व या दीर्घ जैसा भी आधारभूत प्रतमें मिले रखा जा सकता है - गुन्न गोत्त थुत्त थोत्त ये सभी रूप चल सकते हैं।

(४) संस्कृतमें जहीं मौलिक त नहीं है और प्राकृतमें आ गया है - ऐसी त - श्रुतिको मूलमें स्थान न दिया जाय। जैसे सामाइयं रखना किन्तु सामाइतं नहीं। मौलिक त हो तो उसे मूलमें कायम

---

१.આ.પ્ર.મુનિરાજશ્રી પુણ્યવિજયજીમહારાજના કાર્યોમાં આદિથી સહકારી તથા તેમના પરમ ભક્ત પં. અમૃતલાલભાઈ મોહનલાલભાઈ ભોજકે વાતવાતમાં મને એકવાર કહ્યું હતું કે પુણ્યવિજયજી મહારાજ કહેતા હતા કે વિદ્વાનો ભલે જે નિયમો નક્કી કરવા હોય તે કરે, પણ ખરેખર તો આપણે અનુભવથી જે નક્કી કરીએ તે જ નિયમ.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

रख सकते हैं - जैसे अहियरं या अहियतरं ये दोनों रूप चल सकते हैं ।

(५) आदिमें 'न' रखा जाय यदि मूल संस्कृतमें 'न' आदिमें हो । जैसे नमो रखा जाय उसका णमो न किया जाय । किन्तु न आदिमें हो ऐसे शब्द यदि समासके बीचमें आ जाय तो विकल्पसे जैसा भी न या ण मिलता हो रखा जाय । ज्ञ का प्राकृतमें ण्ण ही रखा जाय । संसकृत व्याकरणके नियमनुसार जहां न का ण होता हो वहां ण रखा जाय ।

(६) द्वन्द्व समासमें - हाइफन दो शब्दों के बीच रखा जाय । जहां संधिसे दीर्घस्वर हुवा हो वहां बीचमें - हाइफन देना आवश्यक नहीं ।

(७) एकार, ओकार के बाद जहीं अकारका लोप हुआ हो वहीं अवग्रहका चिह्न दिया जाय अन्यत्र नहीं ।

(८) प्राकृतव्याकरणसे अनेक वैकल्पिकरूप मिलते हैं । उन वैकल्पिकरूपों में से मूलमें एकरूपको पसंद करके अन्य उपलब्ध रूपोंका निर्देश प्रस्तावनामें कर देना । जैसे करइ करेइ इत्यादि रूपों में से किसी एक को पसंद करना शेषका निर्देश प्रस्तावनामें हो जाना चाहिए ।

(९) विभक्तिके प्रत्ययके भेदसे जो पाठांतर होते हैं उनकी नोंध प्रस्तावनामें लेना किन्तु सर्वत्र पाठांतर देना आवश्यक नहीं ।

(१०) संयुक्त ण्ण, म्म जो संस्कृतसे निष्पन्न हैं उन्हें कायम रखना चाहिए । उनके स्थानमें पूर्वमें अनुस्वार करके उनका.द्विर्भाव मिटाना नहीं चाहिए । जैसे सं. वर्ण = प्राकृत वण्ण को कायम रखना उसके स्थानमें वंण नहीं करना । धर्म धम्म किन्तु धंम नहीं ।

(११) परसवर्ण न करके अनुस्वार का प्रयोग करना । जैसे पञ्च=पंच, सञ्जय=संजय ।

(१२) आर्ष प्रयोग कह कर जिनकी टीका की गई हो वैसे आर्षपाठ मूलमें लेना । अन्य व्याकरणको अमान्य ऐसे पाठोंकी नोंध प्रतिके वर्णनमें देना किन्तु मूलमें वैसे पाठ नहीं रखना ।

(१३) लिपिदोषके कारण होनेवाले पाठांतरों की केवल नोंध प्रस्तावनामें लेना सर्वत्र वैसे पाठांतर देनेकी आवश्यकता नहीं ।

(१४) जाव कह कर जिस पाठकी सूचना हो उसकी पूर्तिकी सूचना स्थानका निर्देश करके दे देना । संक्षिप्त हो तो नीचे दिया भी जा सकता है । अंकों द्वारा सूचितकी भी यही व्यवस्था है ।

(१५) उववाई के वर्णकोंका निर्देशमात्र उववाईका सूत्रांक देकर कर देना ।

(१६) प्रतोंके संकेत जहीं तक हो सके एकाक्षरमें ही करना ।

(१७) संकेतोंमें जहीं एकाधिक अक्षर देने आवश्यक हो वहीं उन्हें एक साथ ही रखना अक्षरोंके बीचमें ० या ऐसा कोई चिह्न नहीं देना । जैसे आवश्यककी हारिभद्रवृत्तिका संकेत देना हो तो **आहा** या **आहावृ** दिया जा सकता है किन्तु आ०हा०वृ० ऐसा नहीं ।

(१८) जहा नंदीए या जहा पण्णवणाए - इत्यादिमें तत्तत् ग्रन्थोंके सूत्रांकका निर्देश दिया जाय । पाठ देनेकी आवश्यकता नहीं ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

## પરિશિષ્ટોના નિયમો

૧. સ્વરસંધિ છૂટો પાડવો તેમાં પ્રથમશબ્દની પાછળ ડેશ અને બીજા શબ્દની આગળ ડેશ મૂકવો. દાત. पढमित्थ = पढम- -इत्थ

૨. વિભક્તિનો લોપ થયો હોય તે શબ્દની આગળ આવું ચિહ્ન + કરવું.

૩. વિભક્તિ સાથે શબ્દો નોંધવા.

૪. સામાસિક વાક્યગત પ્રત્યેક શબ્દ વિભક્તિવિના યથાસ્થિત જ નોંધવો. પરંતુ **वंजणावग्गह, अत्थोग्गह, आभिणिबोहियणाण, मइणाण, सुयणाण** આદિ પાંચ જ્ઞાન, **विउलगइ, उज्जुमइ,** આદિમાં પૃથક્ શબ્દો હોવા છતાં પારિભાષિક એક શબ્દ થતો હોય આવા શબ્દોના ટુકડા નહિ કરવા.

૫. સામાસિક શબ્દને અંતે રહેલો વિભક્ત્યન્ત શબ્દ નોંધતાં પહેલાં ○ આવું પોલું મીડું કરવું અને પહેલાં શબ્દને અન્તે પણ પોલું મીડું કરવું.

૬. **से, य, णं, वा, व, च, से त्तं, से तं,**સૂચના માત્ર નીચે નોંધ લખવી.

૭. ટિપ્પણીના શબ્દો લખી સામે સ્થળ સૂચક પૃષ્ઠાંક પાસે ટિ. અંક સાથે લખવી.

૮. શબ્દની સામે સ્થળ નિદર્શન માટે સૂત્રાંક લખવો. પત્રાંક નહિ. સૂત્રગત ગાથા કે (૧), (૨) આવી અવાન્તર કંડિકા હોય ત્યાં તે તે ગાથાંક કે કંડિકા પણ સૂત્રાંકની સાથે નોંધવી.

૯. ટિપ્પણીના શબ્દો માત્ર સૂત્રપાઠમાંથી અને સૂત્ર પ્રતિઓના પણ પાઠાંતરોમાંથી લેવા. ગ્રંથાંતરના અવતરણગત શબ્દો લેવા નહિ. આમ છતાં પક્ખિસૂત્ર વગેરેના પાઠો ટિપ્પણીમાં આવે છે. તેવા પાઠો મૂળ પાઠને ઉપયોગી હોવાથી તે નોંધવા.

૧૦. શબ્દની સામે અર્થ લખવાનો નથી તદ્ભવ શબ્દોની સામે તત્સમ સંસ્કૃત શબ્દ લખવો સામે પર્યાય (दे०) લખવું.

૧૧. સંબોધનવાળા શબ્દ સાથે સંબોધનચિહ્ન (!) કરવું.

## વિશેષ નામો

૧. તીર્થંકર, ગણધરાદિ, ગ્રંથ, ગ્રંથકારાદિ નામો લેવાં. તેના સ્થળ સૂચન માટે પૃષ્ઠાંક આપવો ટિપ્પણીગત નામની સામે પૃષ્ઠાંક અને ટિપ્પણી નંબર આપવો.

૨. સૂત્રગત ગાથાઓનો અકારાદિક્રમ આપવો સ્થળસૂચન માટે પૃષ્ઠાંક સાથે ગાથા નંબર અને ટિપ્પણીમાં ટિ.નં. આપવો. જે શબ્દ ઉપર આવ્યો હોય તેનો તેજ શબ્દ જો ટિપ્પણીમાં આવે તો તે લેવો નહિં.

૩. દ્વન્દ્વ સમાસને અંતે (પાસે) રહેલા પદનો સમાસનાં બધાં પદો સાથે સંબંધ થાય છે. દા.ત. **मंडियमोरियपुत्ते** અહીં **मंडियपुत्त** અને **मोरियपुत्त** એમ લેવું.

Jain Education International For Private & Personal Use Only www.jainelibrary.org



Jain Education International For Private & Personal Use Only www.jainelibrary.org



Jain Education International For Private & Personal Use Only www.jainelibrary.org

Jain Education International For Private & Personal Use Only www.jainelibrary.org